॥ अथ श्रीमद्भागवते चतुर्थस्कंधः प्रारभ्यते ॥

SGDF
Sri Gangadharji Digital Foundation

श्रीमध्ववल्लभहयग्रीवायनमः ॥ पशुपतिरपिप्रेक्षादक्षोयतोगमदुन्नतिंसकलजनतावंद्यंस्थानंध्रुवोयदनुग्रहात् ॥ पृथुरथमहीदोहात्कीर्तिंशुभांसमपीपलत्तमिममजितंवंदारूणा
ममंदमुदंतुमः ॥ १ ॥ अभिनवरविप्रद्योतालीविभासिवपुःश्रियंहरिहयहरब्रह्मश्लाघ्यप्रभूतसदाशिषम् ॥ कमलनयनस्वातंत्र्येक्षादयादरसात्क्रियांशरणमानिशंविश्वस्यास्योदयां
श्रियममिहे ॥ २ ॥ तृतीयस्कंधजलधेरुन्मग्नोहंकथंचन ॥ चतुर्थस्कंधसरसीमवगाढुंपुनर्यते ॥ ३ ॥ मानेतिहाससंघातैरच्युतांघ्रिसरोरुहे ॥ आत्मप्रद्योतनोभक्तिः
पुनश्चप्रतिपाद्यते ॥ ४ ॥ अत्रादौहरौनिरतिशयप्रेमलक्षणभक्तिविधानायपशुपतेर्दक्षाध्वरध्वंसलक्षणचरित्रंवक्तुंस्वायंभुवमनुचरितमनुवदति । मनोस्त्विति । पुनःपुनःकथांप्रा
हुरभ्यासादुत्तमंफलं । विज्ञापयितुकामास्तुविद्वांसस्तत्रतत्रत्विितिवचनात् पुनरुक्तकथानुवादोनदोषायेतिज्ञातव्यं । विशेषवाचिनातुशब्देनापिफलाधिक्यं विशिनष्टि द्वौ
पुत्रौचेतिपुत्रानुकर्षणार्थश्चकारः ॥ १ ॥ भ्रातृमतीमप्याकूतिंपुत्रिकाधर्ममाश्रित्यरुचयेप्रादादित्यन्वयः । अस्यायःपुत्रोभवेत्समत्पुत्रएवेतिप्रतिज्ञायप्रदानंपुत्रिकाधर्मःराजा

ॐ नमोभगवतेवासुदेवाय ॥ मैत्रेयउवाच ॥ मनोस्तुशतरूपायांतिस्रःकन्याश्चजज्ञिरे ॥ आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रु
ताः १ आकूतिंरुचयेप्रादादपिभ्रातृमतींनृपः ॥ पुत्रिकाधर्ममाश्रित्यशतरूपानुमोदितः २ प्रजापतिःसभगवान्रुचिस्तस्या
मजीजनत् ॥ मिथुनंब्रह्मवर्चस्वीपरमेणसमाधिना ३ यस्तयोःपुरुषःसाक्षाद्विष्णुर्यज्ञस्वरूपधृक् ॥ यास्त्रीसादक्षिणाभू
तेरंशभूतानपायिनी ४ आनिन्येस्वगृहंपुत्र्याःपुत्रंविततरोचिषम् ॥ स्वायंभुवोमुदायुक्तोरुचिर्जग्राहदक्षिणाम् ॥ ५ ॥

र्थंनपुत्राभावान्मनुनादौहित्रःपुत्रत्वेनवृतः किंतु ससाक्षाद्विष्णुरितिजानतातत्पितृत्वेज्ञानातिशयवान्मुक्तौसुखातिशयवान्स्यामितिभ्रातृमतीमित्यनेनपुत्रवत्त्वप्रतीतेः । प्रियव्र
तोत्तानपादावितिवक्ष्यमाणत्वाच्च ॥ २ ॥ प्रजापतिशब्दस्यानेकाभिधेयवृत्तित्वेनकोत्रविवक्षितइत्यतउक्तं रुचिरिति । राजपुत्रीत्वेनपरिचर्यादावहंकारसंभवेनप्रेमाभा
वेनतत्त्यागसंभवेनापत्यानुत्पत्त्यामनोराशानिष्फलाभूदितिलोकापवादःपरिहृतोनेन अतएवभगवानिति ॥ ३ ॥ मिथुनंविवेचयति यस्तयोरिति । नाम्नायज्ञइति
स्वरूपधृक्औत्पत्तिकसौंदर्यधारी । यज्ञस्वरूपधृगित्येकंवापदं यज्ञोविष्णुर्देवतेतिश्रुतेः । अनेनविष्णुनामानंयजमानंव्यावर्तयति । भूतेर्लक्ष्म्याः भूतिःश्रीभस्मज
न्मस्वित्यभिधानंअनपायिनीजन्ममरणरहितेत्यनेनास्याःश्रीनारायणवदाविर्भावएवेतिध्वनयति ॥ ४ ॥ स्वायंभुवेनविवाहकालेयदुक्तंतत्सत्यंकर्तुंकार्यांतरासक्त्यानविस्मृ
तंतेनेतिभावेनाह आनिन्यइति ॥ ५ ॥

---

१ एतत्पक्षे खर्परेशरि वाविसर्गलोपोवक्तव्य इतिविसर्गलोपोज्ञेयः

SGDF
Sri Gargeshwari Digital Foundation

यजुर्षांपतिःसकलवेदप्रतिपाद्यत्वेनतदनुसारिहेतुत्वेनतत्प्रवर्तकत्वेनवेदपतिरित्यर्थः । हरिणायदर्थमवतीर्णंतत्प्रयोजनमाह तुष्टायामिति तुष्टायांदक्षिणायाम् ॥ ६ ॥ द्विषट्द्वादश ॥ ७ ॥ तोषादीनांसमुदितंनामाह तुषिताइति । अदित्यामुत्पन्नत्वाद्यथादित्यानामदेवास्तथातुष्टायामुद्भूतत्वात्तुषितानामदेवाः । मरीचिमिश्रा मरीचिमुख्याः । सुरगणेश्वरइंद्रः यज्ञःस्वयमिंद्रोभूत् ॥ ८ ॥ स्वायंभुवमन्वंतरंकैरनुवृत्तमिति तत्राह प्रियव्रतेति नप्तारः पौत्रपुत्राः ॥ ९ ॥ देवहूतिकथामनुवदति देवहूतिमिति । तत्संबंधिचरितंश्रुतप्रायंप्राचुर्येणश्रुतं किंचिदवशिष्टमस्तीत्यर्थः ॥ १० ॥ प्रसूतिंकस्माअदादितितत्राह दक्षायेति ॥ ११ ॥ एवमनूद्यवक्तव्यांशमाह याःकर्दमेति । पत्नयः पत्न्यः प्रसू

तांकामयानांभगवानुवाहयजुषांपतिः ॥ तुष्टायांतोषमापन्नोजनयद्द्वादशात्मजान् ६ तोषःप्रतोषःसंतोषोभद्रःशांतिरिडस्पतिः ॥ इद्मःकविर्विभुःस्वाहःसुदेवोरोचनोद्विषट् ७ तुषितानामतेदेवाआसन्स्वायंभुवांतरे ॥ मरीचिमिश्राऋषयोयज्ञःसुरगणेश्वरः ८ प्रियव्रतोत्तानपादौमनुपुत्रौमहौजसौ ॥ तत्पुत्रपौत्रनप्तृणामनुवृत्तंतदंतरम् ९ देवहूतिमदात्तातकर्दमायात्मजांमनुः ॥ तत्संबंधिश्रुतप्रायंभवतागदतोमम १० दक्षायब्रह्मपुत्रायप्रसूतिंभगवान्मनुः ॥ प्रायच्छद्यत्कृतःसर्गस्त्रिलोक्यांविततोमहान् ११ याःकर्दमसुताःप्रोक्तानवब्रह्मर्षिपत्नयः ॥ तासांप्रसूतिप्रसरंप्रोच्यमानंनिबोधमे १२ पत्नीमरीचेस्तुकलासुषुवेकर्दमात्मजा ॥ कश्यपंपूर्णिमानंचययोरापूरितंजगत् १३ पूर्णिमासूतविरजंविश्वगांचपरंतप ॥ देवकुल्याहरेःपादशौचाद्याभूत्सरिद्दिवः १४ अत्रेःपत्न्यनसूयात्रीन्जज्ञेसुयशसःसुतान् ॥ दत्तंदुर्वाससंसोममात्मेशब्रह्मसंभवान् १५ ॥ ॥ विदुरउवाच ॥ अत्रेर्गृहेसुरश्रेष्ठाःस्थित्युत्पत्त्यंतहेतवः ॥ किंचित्चिकीर्षवोजाताएतदाख्याहिमेगुरो १६ ॥ मैत्रेयउवाच ॥ ब्रह्मणाचोदितःसृष्टावत्रिर्ब्रह्मविदांवर ॥ सहपत्न्याययावृक्षंकुलाद्रिंतपसिस्थितः १७

तिप्रसरंप्रसूतिप्रपंचं ॥ १२ ॥ चंद्रकलाव्यावृत्त्यर्थंकर्दमात्मजेति ययोःसंतत्या ॥ १३ ॥ विश्वगांविशिनष्टि देवकुल्येति दिवःसरित्स्वर्गनदी । देवकुल्यादेवकुलप्रिया ॥ १४ ॥ जज्ञेजनयामास । आत्माविष्णुरीशोरुद्रोब्रह्माचतुर्मुखः । ब्रह्मणःसोमेविशेषावेशएवनतुपृथग्जननम् ॥ १५ ॥ विदुरःश्रुतदत्ताद्यवतारोविशेषजिज्ञासयापृच्छतीत्याह अत्रेरिति । गृहेभार्यायां । स्थित्युत्पत्त्यंतहेतवःपालनसंहारसृष्टीनांकारणभूताः ॥ १६ ॥ परमभागवतस्यात्रेःप्रियचिकीर्षवप्रथमंप्रयोजनंद्वितीयंयोगप्रवर्तनायावतार इतिभावेनमैत्रेयः प्रश्नंवक्तीत्याह ब्रह्मणेति । ऋक्षमृक्षनामानंकिमर्थंयातइतितत्राह तपसीति । गत्वातपसिस्थितोभूदित्यन्वयः ॥ १७ ॥

तस्मिन्ऋक्षनाम्नि । प्रसूनानांस्तबकोयेषांतेप्रसूनस्तबकास्तेषांपलाशाशोकानांकाननंयस्मिन्सतथातस्मिन्नाम्नानिर्विंध्यायानद्याःस्रवद्भिःस्यंदमानैर्वार्भिर्जलैःसमंततोऽयुद्धुष्टेग
र्जिते ॥ १८ ॥ वर्षशतमितिद्वितीययैकस्मिन्क्षणेपिपादद्वयेननातिष्ठदितिद्योतयति ॥ १९ ॥ तपोविषयमाह शरणमिति किंमनोगतंतवइतितत्राह प्रजामिति ॥ २० ॥
अत्रेस्तपोमाहात्म्यंतेनप्रसन्नानांत्रयाणांदेवानांतदाश्रमगमनंवक्ति तप्यमानमिति ॥ २१ ॥ अप्सरआदिभिर्वितायमानंप्रपंचोक्रियमाणंयशोयेषांतेतथा ॥ २२ ॥ तत्प्रादु
र्भावस्तेषांप्रकाशस्तस्यसंबधस्तेनविद्योतितमतिप्रकाशितंमनोयस्यसतथा ॥ २३ ॥ अर्हणमर्घ्यादिसाधनमंजलिश्चयस्यसतथा शूलकमंडलुचक्रादिभिश्चिह्नितानंकितान् ॥
॥ २४ ॥ कृपयाप्रयुक्तेनावलोकितेनलसतावदनेनोपलंभितानुपलक्षितान् । तच्छोचिषातेषांवपुस्तेजसा । प्रतिहतेप्रतिबद्धदर्शनशक्तिनी ॥ २५ ॥ तत्प्रवणंतेषुमग्नं सं

तस्मिन्प्रसूनस्तबकपलाशाशोककानने ॥ वार्भिःस्रवद्भिरुद्धुष्टेनिर्विंध्यायाःसमंततः १८ प्राणायामेनसंयम्यमनोर्वर्षशतंमुनिः ॥ अतिष्ठदेकपादेन
निर्द्वंद्वोऽनिलभोजनः १९ शरणंतंप्रपद्येहंयएवजगदीश्वरः ॥ प्रजामात्मसमांमह्यंप्रयच्छत्विति चिंतयन् २० तप्यमानंत्रिभुवनंप्राणायामैधिता
ग्निना ॥ निर्गतेनमुनेर्मूर्ध्नःसमीक्ष्यप्रभवस्त्रयः २१ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः ॥ वितायमानयशसो मुदाश्रमपदंययुः २२ तत्प्रादु
र्भावसंयोगविद्योतितमनामुनिः ॥ उत्तिष्ठदेकपादेनददृशेविबुधर्षभान् २३ प्रणम्यदंडवद्भूमावुपतस्थेर्हणांजलिः ॥ वृषहंससुपर्णस्थान्स्वैःस्वै
श्चिह्नैश्चचिह्नितान् २४ कृपावलोकेनलसद्वदनेनोपलंभितान् ॥ तच्छोचिषाप्रतिहतेनिमील्यमुनिरक्षिणी २५ चेतस्तत्प्रवणंयुंजन्नस्तावीत्संहतांज
लिः ॥ श्लक्ष्णयासूक्तयावाचासर्वलोकगरीयसः २६ ॥ अत्रिरुवाच ॥ विश्वोद्भवस्थितिलयेषुविभज्यमानैर्मायागुणैरनुगुणंप्रगृहीतदेहाः ॥ हेब्रह्मवि
ष्णुगिरिशाःप्रणतोस्म्यहंवस्तेभ्यःकएवभवतांमइहोपहूतः २७

हृतांजलिर्बद्धांजलिः श्लक्ष्णयामधुरया । सूक्तयावैदिक्या ॥ २६ ॥ कान्गुणानुपसंहृत्यतुष्टावेतितत्राह विश्वेति विश्वस्योद्भवस्थितिलयेषुविभज्यमानैःपृथक्पृथक्क्रियमा
णैर्मायायाःप्रकृतेर्गुणैःरजःसत्त्वतमःसंज्ञैरनुगुणंकार्यानुकूलं सृष्टयेरजोगुणप्रवर्तकत्वेन रक्षणायसत्त्वगुणप्रवर्तकत्वेन संहारायतमोगुणप्रर्तकत्वेन प्रगृहीतोदेहोयैस्तेप्रगृहीत
देहाःस्वीकृतावताराः हेब्रह्मविष्णुगिरिशाअहंवःप्रणतोऽस्मि प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरितावभूव आस्यजानंतोनामचिद्विविक्तनमहस्तेविष्णोसुमतिंभजामहे
इमारुद्रायस्थिरधन्वनेगिरःक्षिप्रेषवेदेवायस्वधाम्नेइत्यादिसूक्तोक्तायेयूयंतेभ्योवोयुष्मभ्यंभूयोभूयःप्रणतोस्मीत्यन्वयः ॥ भक्तिरोमाश्लिष्टमनाः ब्रह्मस्थोरुद्रस्थःपृथक्स्थितः स्वय
मपिविष्णुस्त्रिपुरुषसमाःप्रजाःप्रयच्छत्वितियःपूर्वसंकल्पस्तंविस्मरन्निवात्रिर्दुष्टमोहनार्थविज्ञापयति कएवेति भवतांमध्येमयेहकएवास्वित् कोनूपहूतइत्यन्वयः ॥ २७ ॥ २

१ प्रसूनानां स्तबका गुच्छा येषांते इतिपाठान्तरं युक्तम् ।

SGDF Sri Gargeshwari Digital Foundation

एतदेवविवृणोति एकोमयेति इहवनेतपःकुर्वतामयाविबुधप्रधानःसर्वदेवोत्तमोब्रह्मस्थोरुद्रस्थःस्वयंविष्णुरेकोभगवानेवप्रजननायपुत्रत्वयोत्पत्तये त्रिपुरुषसमानानूपुत्रा
नूमह्यंददात्विितिचित्तीकृतोध्यातइत्येवंस्थितेतनुभृतांदेहिनांमनसोऽपिदूरविषयायूयंकथंन्वत्रागतास्तद्ब्रूतसंभाषणेनप्रसीदत मेइहास्मिन्नर्थेएकस्मिनूध्यातेत्रयाणामागमनल
क्षणे महानूविस्मयइति । ब्रह्मस्थश्चैवरुद्रस्थःस्वयंचापिहारिःप्रभुः । प्रजांत्रिपूरुषसमांयच्छत्वित्यत्रिरैच्छत । तस्मात्सब्रह्मरुद्राभ्यांसहविष्णुर्जगत्पतिः । आगत्यतुत्रि
मूर्त्यैशानूप्रादात्पुत्रानूजनार्दनः । भावित्वाच्चैवकार्यस्यलोकानांमोहनायचेतिवचनात् लोकमोहनार्थमत्रिणाविकल्पितंनतुतत्त्वार्थत्वेन ॥ २८ ॥ तत्त्वंत्विदंकार्य
स्यभावित्वात्संकल्पोपेतत्वात् यथासंकल्पस्तथाकार्यमपिभविष्यति । संकल्पस्त्वेकएव । तस्माज्झटितिप्रत्यवमर्शनेनतंत्रिलोकमोहनार्थमुक्तविकल्पाभिप्रायंजानं
तस्तत्त्वगूहनंविज्ञायप्रहसंतस्त्रयेदेवाआहुरित्याह इतीति ॥ २९ ॥ कर्मप्रतीतेःकिमाहुरितितत्राह यथेति तपश्चरतात्वयायथासंकल्पःकृतस्तेनसंकल्पेनतथैवभा

एकोमयेहभगवान्नविबुधप्रधानश्चित्तीकृतःप्रजननायकथंनुयूयम् ॥ अत्रागतास्तनुभृतांमनसोपिदूराद्ब्रूतप्रसीदतमहानतिविस्मयोमे २८ ॥ मैत्रेयउ
वाच ॥ इतितस्यवचःश्रुत्वात्रयस्तेविबुधर्षभाः ॥ प्रत्यूचुःश्लक्ष्णयावाचाप्रहसंतोमुनिंप्रभो २९ ॥ देवाऊचुः ॥ यथाकृतस्तेसंकल्पोभाव्यंतेनैवनान्य
था ॥ तत्संकल्पस्यतेब्रह्मन्यद्वैध्यायसितेवयम् ३० अथास्मदंशभूतास्तेआत्मजालोकविश्रुताः ॥ भवितारोंगभद्रंतेवितरिष्यंतितेयशः ३१ ए
वंकामवरंदत्त्वाप्रतिजग्मुःसुरेश्वराः ॥ सभाजितास्तयोःसम्यक्दंपत्योर्मिषतोस्ततः ३२

व्यम् । कर्तुमकर्तुमन्यथाकर्तुंसमर्थानांभवतांमनीषितंममदुरवगाहमितितत्राह नान्यथेति सचासौसंकल्पस्तत्संकल्पस्तत्संकल्पस्यान्यथाभावोनैव त्वत्संकल्पानुसारेणास्म
त्संकल्पोपिप्याख्यातइतिभावेनाहुःयद्वाइति ब्रह्मस्थोरुद्रस्थस्तथाविष्णुःस्वयंचत्रिपुरुषसमानानूपुत्रानूप्रयच्छत्वितियत्संकल्पंध्यायासि तेवयंब्रह्मविष्णुरुद्राइतित्रयस्तुभ्यं
पुत्रानूदास्यामइतिसंकल्प्यात्रागताइतिशेषः निपातद्वयेनप्रमाणांतरप्रसिद्धिंद्योतयति ॥ ३० ॥ तर्हिप्रसन्नाश्चेत्प्रजाददतइत्यत्रेर्जिह्वाग्रसंचलनावकाशमददाना
आहुः अथास्मदिति । अथब्रह्मरुद्रस्थोविष्णुःस्वयमित्येतेवयमित्युक्त्यनंतरंव्यहारांतरंविरम्यते तवात्मजाभवितारोभविष्यंतीतिवरंददुरित्यर्थः यद्वा यतएवंत्वत्संक
ल्पोऽथतस्मादितिलोकेतेयशोविस्तृत्यतुभ्यंभद्रंकल्याणंसुखंवितारिष्यंतीत्यन्वयः ॥ ३१ ॥ किमन्यद्ददुरितितत्राह एवमिति कामचरंकामितपुत्रवरंनान्यमितिशेषः मि
षतोःपश्यतोःसतोः । ततोत्रेराश्रमात् ॥ ३२ ॥

SGDF

अंशेनेतितृतीययासोमःसाक्षाद्ब्रह्मणोंशोनभवति किंतुतेनविशेषेणसन्निहितएव । तथात्वेविष्णोरंशोदत्तःशंकरस्यांशोदुर्वासाइतीवप्रयोगःस्यात् । ब्रह्मणोनावतारोस्तिसान्नि धानंतुकेवलं । ऋतेविष्णोरात्मनस्तुतदंशोक्तिःप्रवेशतइतिवचनात् । आत्मनोजीवस्यतदंशोक्तिर्विष्ण्वंशवचनंप्रवेशतइतिज्ञेयमित्यर्थः । कथंतर्हिब्रह्मसंभवानितिप्रत्यक्षोक्तिरि तिचेन्न सृष्टिविशेषान्मानांतरविरुद्धवदुक्तेः । तथाचोक्तं सृष्टिभेदाद्विरूपंतुकथापंचोत्तरंशतं वैरूप्यमन्यद्विज्ञेयंतात्पर्यान्मोहनायचेति । अत्रग्रंथेकथापंचोत्तरंशतंसृष्टि भेदाद्विरूपंविपरीतामिवप्रतीयतइतिशेषः अन्यद्वैरूप्यंतात्पर्याज्ञानान्मोहनायोक्तमितिज्ञेयमित्यर्थः । कल्पादिभेदादपिकथाभेदोभवतीत्यतोपिविरोधोनास्ति । ऋतेतुपाड वकथांकार्ष्ण्यंरामायणंतथा विष्णोर्ब्रह्मादितांचैवक्रमाद्वयत्यस्तशक्तितां एतदापादकंचान्यद्दतेकल्पादिभेदतः कथाभेदस्तुविज्ञेयोमोहायैतेषुभिन्नतेतिवचनात् । विदिरू ताविंतिधातोर्योगवित्योगशास्त्रकृत् । अणिमादियोगज्ञोवा । बोधतेःशब्दविकरणेपठितत्वात्परस्मैपदम् । प्रजाःसंततीः ॥ ३३ ॥ कन्यकानामान्याह सिनीवा

सोमोभूद्ब्रह्मणोंशेनदत्तोविष्णोस्तुयोगवित् ॥ दुर्वासाःशंकरस्यांशोनिबोधांगिरसःप्रजाः ३३ श्रद्धात्वंगिरसःपत्नीचतस्रोऽसूतकन्यकाः ॥ सिनी वालीकुहूराकाचतुर्थ्यनुमतिस्तथा ३४ तत्पुत्रावपरावास्तांख्यातौस्वारोचिषांतरे ॥ उचथ्योभगवान्साक्षाद्ब्रह्मिष्ठश्चबृहस्पतिः ३५ पुलस्त्योऽज नयत्पत्न्यामगस्त्यंचहविर्भुजि ॥ सोऽन्यजन्मनिदह्राग्निर्विश्रवाश्चमहातपाः ३६ तस्ययक्षपतिर्देवःकुबेरस्त्विडविडासुतः ॥ रावणःकुंभकर्णश्चत थान्यस्यांविभीषणः ३७ पुलहस्यगतिर्भार्यात्रीनसूतसतीसुतान् ॥ कर्मश्रेष्ठंवरीयांसंसहिष्णुंचमहामते ३८

लीति । कृष्णचतुर्दश्यभिमानिनीसिनीवाली तत्पंचदश्यभिमानिनीकुहूः शुक्लचतुर्दश्यभिमानिनीअनुमतिः तत्पंचदश्यभिमानिनीराका ॥ ३४ ॥ तत्पुत्रौतस्याःश्रद्धायाः पुत्रौ । स्वारोचिषनाममनोः पुत्रयोर्नामाह उचथ्यइति । उचितुंस्थापयितुमस्येत्युचथ्यः । साक्षाद्भगवान्प्रत्यक्षपूज्यः । बृहत्याःवाचःपालकत्वात्स्वामित्वाद्वाबृहस्पतिः तद्बृहतोःकरपत्योश्चोरदेवतयोःसुट्तलोपश्चेतिसूत्रात्तकारलोपःसुडागमश्चेति । ब्रह्मिष्ठोवैदिकतमः बृहस्पतेनपरःसाम्नोविदुरीतिश्रुतेः ॥ ३५ ॥ त्यक्त्वागादगस्त्यः स्त्यैष्टचैशब्द संघातयोरित्यतःशब्दादिविषयजातंप्रतिगतोनभवतीतिवा सोगस्त्योन्यजन्मनिअग्निसुदह्रोनामाग्निःदह्रोऽग्निरल्पाग्निरित्यर्थेऽन्यजन्मनीतिविशेषणंव्यर्थं । अत्रपूर्णाग्निःपूर्वत्राल्पा ग्निरितिविवेकस्तुगवेषणीयइति ॥ ३६ ॥ तस्यविश्रवसः । कोयंयक्षपतिरित्यतउक्तंदेवःकुबेरइति कुबिआच्छादनइतिधातोर्धनदानेनदारिद्र्यंकुंबातिआच्छादयतीतिकुबे रः । अयमर्थःकस्मिंश्चित्पक्षेप्यतिव्याप्तःस्यादित्यतउक्तमिडविडासुतइति अन्यस्यांपत्न्याम् ॥ ३७ ॥ ३८ ॥

१ अत्रेः पत्न्यनसूयात्रीन्जज्ञे सुयशसः सुतान् । दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवानिति श्लोकेन । २ कुंबेर्नलोपश्च इति उणादिरेरक् ।

SGDF Sri Gargeshwari Digital Foundation

वालखिल्यो (वालाःखिल्या) अल्पायेषांतेतथासंततिविधुराः उर्ध्वरेतसइत्यर्थः तान्‌ब्रह्मतेजसाब्रह्मनिमित्ततेजसा ॥ ३९ ॥ ४० ॥ अन्येषांनामान्यप्रतिषिद्धत्वात्‌किमि
तिनोक्तानीतिशंकामाभूदित्याह चित्रकेतुरिति॥ अपरेसप्तभ्योन्येतेके शक्त्यादयःशक्तिमुनिप्रमुखाः ॥ ४१ ॥ ४२ ॥ ४३ ॥ तयोरायतिनियत्योः ॥ ४४ ॥ यस्यकवेः ॥

क्रतोरपिक्रियाभार्यावालखिल्यानसूयत ॥ ऋषीन्‌षष्टिसहस्राणिज्वलतोब्रह्मतेजसा ३९ ऊर्जायांजज्ञिरेपुत्रावसिष्ठस्यपरंतप ॥ चित्रकेतुप्रधाना
स्तेसप्तब्रह्मर्षयोमलाः ४० चित्रकेतुःसुरोचिश्वविरजोमित्रएवच ॥ उल्बणोवसुभृद्यानोद्युमान्‌शक्त्यादयोऽपरे ४१ शांतिस्त्वथर्वणःपत्नी
लेभेपुत्रंधृतव्रतम्‌ ॥ दध्यंचमश्वशिरसंभृगोर्वंशंनिबोधमे ४२ भृगुःख्यात्यांमहाभागःपत्न्यांपुत्रानजीजनत्‌ ॥ धातारंचविधातारंश्रियंचभगव
त्प्रियाम्‌ ४३ आयतिंनियतिंचैवसुतेमेरुस्तयोरदात्‌ ॥ ताभ्यांतयोरभवतांमृकंडुःप्राणएवच ४४ मार्कंडेयोमृकंडोस्तुप्राणाद्वेदशिरामुनिः ॥ क
विश्वभार्गवोयस्यभगवानुशनासुतः ४५ सर्वेतेमुनयःक्षत्तर्लोकान्सर्गैरभावयन्‌ ॥ एषकर्दमदौहित्रसंतानःकथितस्तव ४६ शृण्वतःश्रद्दधान
स्यसद्यःपापहरःपरः ॥ प्रसूतिंमानवींदक्षउपयेमेह्यजात्मजः ४७ तस्यांससर्जदुहितॄःषोडशामललोचनाः ॥ त्रयोदशादाद्धर्मायतथैकामग्नये
विभुः ४८ पितृभ्यएकांयुक्तेभ्योभवायैकांभवच्छिदे ४९ श्रद्धामैत्रीदयाशांतिस्तुष्टिःपुष्टिःक्रियोन्नतिः ॥ बुद्धिर्मेधातितिक्षाह्रीर्मूर्तिर्धर्मस्यपत्न
यः ॥ श्रद्धासूतशुभंमैत्रीप्रसादमभयंदया ५० शांतिःसुखंमुदंतुष्टिःस्मयंपुष्टिरसूयत ॥ योगंक्रियोन्नतिर्दर्पमर्थंबुद्धिरसूयत ५१ मेधास्मृतिं
तितिक्षातुक्षेमंह्रीःप्रश्रयंसुतम्‌ ॥ मूर्तिःसर्वगुणोत्पत्तीनरनारायणावृषी ५२ ययोर्जन्मन्यदोविश्वमभ्यनंदत्सुनिर्वृतम्‌ ॥ मनांसिककुभोवाताः
प्रसेदुःसरितोऽद्रयः ५३ दिव्यवाद्यंततूर्याणिपेतुःकुसुमवृष्टयः ॥ मुनयस्तुष्टुवुस्तुष्टाजगुर्गंधर्वकिन्नराः ५४ नृत्यंतिस्मस्त्रियोदेव्यआसीत्परममंग
लम्‌ ॥ देवाब्रह्मादयःसर्वेउपतस्थुरभिष्टवैः ५५

॥ ४५ ॥ अभावयन्‌अवर्धयन्‌ ॥ ४६ ॥ कर्दमदौहित्रकथाश्रवणफलमाह शृण्वतइति अजात्मजोदक्षः ॥ ४७ ॥ ४८ ॥ युक्तेभ्योयोगेभ्योहरौमनोयोगसहितेभ्यइतिवा
भवच्छिदेज्ञानोप देशेनसंसारनिर्मूलनाय ४९ तासांसंततिंस्वनामानुगुणमाह श्रद्धेत्यादिना ॥ ५० ॥ ५१ ॥ शमदमादिसर्वगुणानामुत्पत्तिर्ययोस्तौतथा ॥ ५२ ॥
॥ ५३ ॥ ५४ ॥ अभिष्टवैःस्तोत्रैः ॥ ५५ ॥

---

१ वालखिल्या अल्पापा येषान्ते इतिपाठो लिखिते?।

SGDF

योविष्णुर्निजमाययास्वेच्छया । खेरूपभेदमिवयथाकाशेवाय्वादिरूपभेदआकाशाधारतयाप्रतीयतेतथात्मनिस्वात्मनिस्वाधारतयाविरचितमिदंविश्वं । तत्प्रातिचक्षणायत
स्यजगतःस्वस्यचाधाराधेयभावज्ञापनायाद्यधर्मसदनेमूर्त्याख्यधर्मभार्यायां एतेनास्मद्दृष्टिगोचरेणऋषिमूर्तिनाऋषिवेषधारेणोमूर्तिर्यस्यतत्तथातेनरूपेण । प्रादुश्चकार तस्मै
परस्मैपुरुषायनमइत्यन्वयः । यथाकाशस्थितोनित्यंवायुःसर्वत्रगोमहान् यथाकाशेविमानादिरूपभेदःप्रतीयते तथाहरौजगदिदंतत्सामर्थ्यात्प्रतीयतइत्यादेः ॥ ५६ ॥ कि
मिदानींविशेषाभीष्टमित्यतस्तत्प्रार्थयंते सोयमिति । योभगवान्भक्ताभीष्टैकचिंतामणिःसोयमवलोकनेनकटाक्षनिरीक्षणेनसुरगणान्नोदृश्यादवलोकयत्वित्यन्वयः द्रष्टव्यत्वे
स्वगुणान्लक्षयति ॥ स्थितोति स्थितिव्यतिकरोपशमायस्थितिविघ्नपरिहाराय सत्त्वेनगुणेनसृष्टान् ॥ अस्माभिरपिनसाकल्येनज्ञातुंशक्यतइतिभावेनाहुः अनुमेयतत्त्वइ
ति प्रत्यक्षागमानुगृहीतव्याप्तिकेनलिंगज्ञानेनज्ञेयंतत्त्वमनारोपितज्ञानस्वरूपंयस्यसतथा । अवलोकनस्यस्वविषयेजनेगुणार्पकगुणोस्तिचेत्प्रार्थनीयतामर्हतितत्कथमत्राहुः

॥ देवाऊचुः ॥ ॥ योमाययाविरचितंनिजमात्मनीदंखेरूपभेदमिवतत्प्रतिचक्षणाय ॥ एतेनधर्मसदनेऋषिमूर्तिनाद्यप्रादुश्चकारपुरुषायनमःपरस्मै
५६ सोयंस्थितिव्यतिकरोपशमायसृष्टान्सत्त्वेननःसुरगणाननुमेयतत्त्वः ॥ दृश्याददभ्रकरुणेनविलोकनेनयच्छ्रीनिकेतममलंक्षिपतारविंदम् ५७
एवंसुरगणैस्तातभगवंतावभिष्टुतौ ॥ लब्धावलोकैर्ययतुरर्चितौगंधमादनम् ५८ ताविमौवैभगवतोहरेरंशाविहागतौ ॥ भारव्ययायचभुवःकृष्णौय
दुकुरूद्वहौ ५९ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् ॥ पावकंपावमानंचशुचिंचहुतभोजनम् ६० तेभ्योग्नयःसमभवंश्चत्वारिंशच्चपंचच ॥
तएवैकोनपंचाशत्साकंपितृपितामहैः ६१ वैतानिकेकर्मणियन्नामभिर्ब्रह्मवादिभिः ॥ आग्नेय्याइष्टयोयज्ञेनिरूप्यंतेग्नयस्तुते ६२

अदभ्रेति अदभ्राअनल्पापूर्णाकरुणायस्यतत्तथातेन नकेवलमनुग्रहगुणःकिंतुकांतिगुणोप्यस्तीत्याहुः क्षिपतेति अरविंदंक्षिपता । स्वकांतिगुणेन पद्मकांतिंनिरस्यतेत्य
र्थः । पद्मस्यकोयंमाहात्म्यातिशयइतितत्राहुः यच्छ्रीनिकेतमिति यदरविंदंश्रियोनिकेतंनिवासस्थानं । श्रियोनिवासस्थानीयत्वेकेनाचिद्गुणेनभाव्यं सकइतितत्राहुः अमलमि
ति ॥ ५७ ॥ ततःकिंभगवंतावकार्ष्टामितितत्राह एवमिति ॥ ५८ ॥ तौकरतलामलकवत्ज्ञापयति ताविमाविति । यदूद्वहोयादवेश्वरःकृष्णः । कुरूद्वहोऽर्जुनः ।
अस्मिन्नरस्यविशेषावेशाद्धरेरंशत्वं । नतुसाक्षात् । तदुक्तं । नरेविष्णुःसमाविष्टःस्वयंनारायणोहरिः अर्जुनेचनरावेशःकृष्णोनारायणःस्वयमिति ॥ ५९ ॥ अग्न्यभिमानि
नोदेवान्अग्नेःस्वाहानाम्नी हुतभोजनमितित्रयाणांविशेषणम् ॥ ६० ॥ तेभ्यस्त्रिभ्यः । पितरःपावकादयःपितामहः स्वाहापतिरग्निः ॥ ६१ ॥ वैतानिकेकर्मणियज्ञक
र्मणिब्रह्मवादिभिर्येषामग्नीनांनामभिराग्नेय्याअग्निदैवत्याइष्टयोनिरूप्यंतेतेग्नयएतादृशमहिमानइत्यर्थः ॥ ६२ ॥

SGDF Sri Gargeshwari Digital Foundation

तेषांजातिनामान्याह अग्निष्वात्ताइति तेषामग्नीनाम् ॥ ६३ ॥ ब्रह्मवादिन्यौवेदविचारविचक्षणे ॥ ६४ ॥ भवपत्न्याःसत्याःकत्यपत्यानीत्याशंकांपरिहरति ॥ भवस्येति ॥ ६५ ॥ आत्मसमापत्यालाभात्तयासत्याकिमकारीतितत्राह पितरीति पितरिदक्षे अनागसेभर्त्रायाप्रतिरूपेऽननुकूलेविरोधिनिसति अप्रौढेवाऽस्वोरुतेव । योगसंयुता प्राणोत्क्रमणनिमित्तयोगनिरतात्मनामनसाऽत्मानंहरिंध्यायंत्यात्मानंदेहमजहादत्याक्षोदित्यन्वयः ॥ ६६ ॥ ॥ इतिश्रीभागवतेचतुर्थस्कंधे वि०कृ० पदरत्नावलीटीकायांप्रथमोध्यायः ॥ १ ॥ ॥ ४ ॥ ॥ अत्रकतिपयैरध्यायैर्हरेर्भक्तिविधानार्थंतन्माहात्म्यातिशयज्ञापनाय तन्माहात्म्यातिशयाविनाभूतंदक्षाध्वरध्वंसलक्षणंरुद्रस्यमाहात्म्यं कथयति तत्रादौविदुरःसत्यात्मानमजहादितिश्रुतसतीदेहवियोगविशेषंजिज्ञासुर्मैत्रेयंपृच्छति भवेशीलवतामिति । विद्वेषाकरणेहेतवःशीलवत्त्वादिनाज्ञापनायोक्ताः ॥ १ ॥ स्व

अग्निष्वात्ताबर्हिषदःसौम्याःपितरआज्यपाः ॥ साग्नयोनग्नयस्तेषांपत्नीदाक्षायणीस्वधा ६३ तेभ्योदधारकन्येद्वेमेनांवैतरणींस्वधा ॥ उभेतेब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ६४ भवस्यपत्नीतुसतीभवंदेवमनुव्रता ॥ आत्मनःसदृशंपुत्रंनलेभेगुणशालिनम् ६५ पितर्यप्रतिरूपेस्वेभवायानागसेरुषा ॥ अप्रौढे वात्मनात्मानमजहाद्योगसंयुता ६६ इतिश्रीभाग०च०प्रथमोध्यायः ॥ १ ॥ ॥ विदुरउवाच ॥ भवेशीलवतांश्रेष्ठेदक्षोदुहितृवत्सलः ॥ विद्वेषमकरोत्कस्मादनादृत्यात्मजांसतीम् १ कस्तंचराचरगुरुंनिर्वैरंशांतविग्रहम् ॥ आत्मारामंकथंद्वेष्टिजगतोदैवतंमहत् २ एतदाख्याहिमेब्रह्मन्जामातुःश्वशुरस्य च ॥ विद्वेषस्तुयतःप्राणानत्यजद्दुस्त्यजान्सती ३ मैत्रेयउवाच ॥ पुराविश्वसृजांसत्रेसमेताःपरमर्षयः ॥ तथामरगणाःसर्वेसानुगामुनयोऽग्नयः ४ तत्रप्रविष्टंमुनयोदृष्ट्वार्कमिवरोचिषा ॥ भ्राजमानंवितिमिरंकुर्वंतंतन्महत्सदः ५ उदतिष्ठन्सदस्यास्तेस्वधिष्ण्येभ्यःसहाग्नयः ॥ ऋतेविरिंचिंशर्वंचतद्भासाक्षिप्तचेतसः ६ सदसस्पतिभिर्दक्षोभगवान्साधुसत्कृतः [१] ॥ अजंलोकगुरुंनत्वानिषसादतदाज्ञया ७

स्यगुरुत्वेपिस्वकर्मनिंदितमितिभावेनाह । कस्तमिति आत्मनिपरमात्मन्येवारामोरतिर्यस्यसतथातम् ॥ २ ॥ तथाचकिमिति तत्राह एतदिति । विद्वेषोविद्वेषकारणम् ॥ ३ ॥ विद्वेषनिमित्तंवक्तुमुपोद्घातंरचयति पुरेति नकेवलंमहर्षयएवकिंतुमुनिमात्रमप्यत्रसमवेतमित्यतोमुनयइतिपुनर्वचनम् ॥ ४ ॥ किमनेनप्रकृतइतितत्राह तत्रेति । प्रविष्टंदक्षमिति शेषः ॥ ५ ॥ ब्रह्मपुत्रत्वाद्रुद्रस्यश्वशुरत्वाच्चनायंप्राकृतःपुरुषइतिभावेनास्मिन्सभावहुमानंवक्ति उदतिष्ठन्निति । तस्यदक्षस्यभासा ॥ ६ ॥ सर्वोत्थानलक्षणसत्काराभावादतोनिर्गमनमितरजनबहुमानेनोपवेशनंचसंभावितमनयोर्दक्षेणाकिमकारीतितत्राह सदसस्पतिभिरिति ॥ ७ ॥

[१] प्रऊढाविवाहिता प्रादूहोढेतिवृद्धिः एतेन रुद्रस्य पक्षकोपात्तत्पुत्रीयमिति मनसः किंचिदन्यथाभावःसूच्यते ।

SGDF Sri Gangeshwar Digital Foundation

उपविष्टश्चेद्रुद्रविषयकोपोप्युपविष्टःकिंतत्राह प्राङ्निषण्णमिति । नामृष्यदित्यस्यार्किंलिंगंतत्राह उवाचेति ॥ ८ ॥ वृत्तंसदाचारम् ॥ ९ ॥ किमिदानींवृत्तंवक्तुंप्राप्तमत्रा
ह अयंत्विति ॥ १० ॥ स्वतउत्तमस्यशिवस्यदक्षावमानविषयत्वंकथमत्राह एषइति । गायत्रीविषये पणव्यवहारइतिधातोः पाणिंव्याहरणमुच्चारणमित्यर्थः। साधुवद्योग्यव
त् ॥ ११ ॥ मृगशावोमृगपोतः । मर्कटलोचनेइवलोचनेयस्यसतथाकेकराक्षइत्यर्थः ॥ १२ ॥ भिन्नसेतवेलंघितमर्यादाय । उशतींगिरंपौरुषेयत्वादिदोषरहितांवेदवाणीम् ॥
१३ ॥ अशुचिकर्मकरणादशुचित्वमुक्तंनतुद्वेषादित्याह प्रेतावासेष्विति । व्युप्तकेशोमुक्तकेशः ॥ १४ ॥ चिताभस्मनाश्मशानभस्मनाकृतंस्नानंयेनसतथा । प्रेतानामस्थिग्रंथ

प्राङ्निषण्णंमृडंदृष्ट्वानामृष्यत्तदनादृतः ॥ उवाचवाचंचक्षुर्भ्यामभिवीक्ष्यदहन्निव ॥ ८ ॥ दक्षउवाच ॥ श्रूयतांब्रह्मर्षयोमेसहदेवाःसहाग्नयः ॥ साधू
नांब्रुवतोवृत्तंनाज्ञानान्नचमत्सरात् ९ अयंतुलोकपालानांयशोघ्नोनिरपत्रपः ॥ सद्भिराचरितःपंथायेनस्तब्धेनदूषितः १० एषमेशिष्यतांप्राप्तोयन्मेदुहि
तुरग्रहीत् ॥ पाणिंविप्राग्निमुखतःसावित्र्याइवसाधुवत् ११ गृहीत्वामृगशावाक्ष्याःपाणिंमर्कटलोचनः ॥ प्रत्युत्थानाभिवादार्हेवाचाप्यकृतनोचितम् ॥
१२ लुप्तक्रियायाशुचयेमानिनेभिन्नसेतवे ॥ अनिच्छन्नप्यदांबालांशूद्रायेवोशतींगिरम् १३ प्रेतावासेषुघोरेषुघोरैर्भूतगणैर्वृतः ॥ अटत्युन्मत्तवन्नग्नो
व्युप्तकेशोहसन्रुदन् १४ चिताभस्मकृतस्नानःप्रेतास्थिग्रंथिभूषणः ॥ शिवापदेशोह्यशिवोमत्तोमत्तजनप्रियः १५ पतिःप्रमथभूतानांतमोमात्रात्मिका
त्मनाम् ॥ तस्माउन्मादनाथायनष्टशौचायदुर्हृदे १६ दत्ताबतमयासाध्वीचोदितेपरमेष्ठिना ॥ १७ ॥ मैत्रेयउवाच ॥ विनिंद्यैवंसगिरिशमप्रतीपमव
स्थितम् ॥ दक्षोथापउपस्पृश्यक्रुद्धःशप्तुंप्रचक्रमे १८ अयंतुदेवयजनइंद्रोपेंद्रादिभिर्भवः ॥ यज्ञभागंनलभतांदेवैर्देवगणाधमः १९ निषिध्यमानःससदस्य
मुख्यैर्दक्षोगिरित्राायविसृज्यशापम् ॥ तस्माद्विनिष्क्रम्यविवृद्धमन्युर्जगामकौरव्यनिजंनिकेतनम् २० विज्ञायशापंगिरिशानुगाग्रणीर्नंदीश्वरोरोषकषा
यदूषितः ॥ दक्षायशापंविससर्जदारुणंयेचान्वमोदंस्तदवाच्यतांद्विजाः २१

योऽस्थिभिर्ग्रथितमालास्ताएवभूषणानियस्यसतथाशिवइतिअपदेशोनामयस्यसतथास्वयमपिअशिवोऽशुद्धोहि ॥ १५ ॥ उन्मत्तत्वंस्पष्टयति पतिरिति । केवलंतमोगुण
स्वरूपंमनोयेषांतेतथातेषां अतःकिमनुशोककारणमत्राह तस्माइति ॥ १६ ॥ १७ ॥ नकेवलंदक्षेणदोषाएवगणिताःकिंतुस्वानर्थहेतुःशापोपिदत्तइत्याह विनिंद्यैवमि
ति ॥ अप्रतीपमप्रतिपक्षम् ॥ १८ ॥ इंद्रोपेंद्रादिभिर्देवैःसहदेवयजनेयज्ञभागंनलभतामित्यन्वयः ॥ १९ ॥ ततःकिमकारिदक्षेणेतितत्राह निषिध्यमानइति ॥ २० ॥ ए
वंदक्षेणशापेशिवायदीयमानेसतिकोपिशिवभक्तस्तमसहमानोभूत्किंतत्राह विज्ञायेति रोषनाम्नाकषायेणवाह्निनादूषितः तस्यशिवस्यावाच्यतांदोषलक्षणाम् ॥ २१ ॥

SGDF

कोयंशापोदत्तइतितत्राह यएतदिति एतत्मर्त्यंशरीरमध्रुवमनश्वरमुद्दिश्य । अप्रतिद्रुहि द्रोग्धारंप्रत्यद्रोहकर्तरि । भगवतिभक्त्यादिसौभाग्यवति । द्रुह्यति । वचनादिनेतिशेषः । तत्त्वतोयथार्थज्ञानाद्विमुखोबहिर्मुखोभूयादित्यन्वयः ॥ २२ ॥ नकेवलंबहिष्कृततत्त्वज्ञानःकिंतुश्रीनारायणाविषयकर्मव्यापारेषुमग्नश्चस्यादित्याह गृहेष्विति वेदवादेनस्वर्गादिषुपुष्पवादिवेदवाक्येनविपन्नानष्टाधीर्यस्यसतथा अत्रतत्त्वज्ञानविषयःशापस्तात्कालिकएव । नतुचिरकालीनः । विष्णुवाक्यस्यैवाचिरकालीनत्वात् । तदुक्तं येज्ञानविषयाःशापामुक्तिगाश्चाधिकारेणां कादाचित्कास्तेभवंतिनैवतेसार्वकालिकाः । तेषांज्ञानस्यमुक्तेश्चतारतम्यस्यचैवहि भगवन्नियतत्वात्तुशापादिर्नात्रकारणमिति ॥ २३ ॥ इतोपितात्कालिकएवशापइतिभावेनदक्षस्यशापविशेषंमुंचति बुद्ध्येति पराभिध्यायिन्यानिरंतरशब्दादिविषयचिंताकातरयाबुद्ध्याविस्मृतात्मगतिर्विस्मृतपरमात्मगतिः विस्मृतपरमात्मज्ञानः पशुर्विवेकशून्यः अतितरांस्त्रीकामःसदक्षोचिरात्बस्तमुखोस्त्वित्यन्वयः ॥२४॥ शापांतरंचाह विद्याबुद्धिरिति । अजोदक्षः।

॥ नंदिरुवाच ॥ यएतन्मर्त्यमुद्दिश्यभगवत्यप्रतिद्रुहि ॥ द्रुह्यत्यज्ञःपृथक्दृष्टिस्तत्त्वतोविमुखोभवेत् २२ गृहेषुकूटधर्मेषुसक्तोग्राम्यसुखेच्छया ॥ कर्मतंत्रंवितनुतात्वेदवादविपन्नधीः २३ बुद्ध्यापराभिध्यायिन्याविस्मृतात्मगतिःपशुः ॥ स्त्रीकामःसोस्तुनितरांदक्षोबस्तमुखोचिरात् २४ विद्याबुद्धिरविद्यायांकर्ममय्यामसावजः ॥ संसरंत्विहयेचामुमनुशर्वावमानिनम् २५ गिरेःसुतायाःपुष्पिण्यामधुगंधेनभूरिणा ॥ मथ्नाचोन्मथितात्मानःसंमुह्यंतुहरद्विषः २६ सर्वभक्षाद्विजावृत्त्यैधृतविद्यातपोव्रताः ॥ वित्तदेहेंद्रियारामायाचकाविचरंत्विह २७

अविद्यायांविद्याबुद्धिरस्त्वितिशेषः । शंकरद्वेषिणांचशापविशेषमाह संसरंत्विति ॥ २५ ॥ संसारेकारणमाह गिरेरिति । पुष्पिण्याःस्वर्गादिपुष्पप्रतिपादिकायाः गर्भीकृतमुक्तिफलायाः कालकूटनिगिरणात्हत्याख्यपापनिगिरणाच्चगिरिर्मुख्यप्राणस्तेनाशिष्यप्रशिष्यादिषुप्रणीतत्वेनव्याख्यातत्वेनचतस्यसुतायावेदवाचोभूरिणाबहुलेनमधुगंधेनविषयसुखलक्षणमकरंदपरिमलेनमथ्नाकामेनोन्मथितोविलोडितआत्मामनोयेषांतेतथोक्तास्तेहरद्विषः संमुह्यंतु । मोक्षफलप्रतिपादकवेदतात्पर्यापरिज्ञानेनात्मनःस्वर्गादिरेवपरमश्रेयोस्त्वितिविपरीतज्ञानंगच्छंत्वित्यन्वयः । मुहवैचित्त्यइतिधातोर्वैचित्त्यंविपरीतज्ञानम् । गिरिःप्राणःसमुद्दिष्टस्तत्सुतावेदवाक्स्मृता पुष्पंस्वर्गादयःप्रोक्ताःफलंमोक्षउदाहृतइतिवचनात् । उक्तएवार्थोनाम्यइति । अनंगोमन्मथोमंथाःकामोंगजउदाहृतइत्यभिधानात् ॥ २६ ॥ हरद्विषांशापांतरमपिविसृजति सर्वभक्षाइति पलांड्वादिसर्वभक्षाःवृत्त्यैजीवनाय । नधर्मायेतिशेषः ॥ २७ ॥

---

१ तात्पर्यं वाराहे । २ शापादिकारणं न किंतु प्रारब्धकर्मैव ।

ब्राह्मणकुलायदीयमानंशापंश्रुत्वापिभीत्याकोऽपिप्रतिशापदानसमर्थोनाभूदितितत्राह तस्यैवमिति ब्राह्मणानामिदमेवायुधंनान्यदितिद्योतनायब्रह्मदंडमित्युक्तम् ॥ २८ ॥
॥ २९ ॥ शिवदीक्षायांचांडालादिजन्मनांविप्रत्वकारणलक्षणायां सुरयासूनांतर्पणंयस्मिंस्तथोक्तं यद्वा सुरानामनारिकेलादिपुष्पसंभवं मधूकपुष्पादिसंभवमासवंवा ॥ ३०॥
तीव्रशापप्रदानेनिमित्तंवक्ति ब्रह्मेति विशेषेणधारयत्याश्रितानितिविधारणम् ॥ ३१ ॥ सेतुंविशिनष्टिएषइति । यस्यप्रमाणंसम्यग्वक्ता ॥ प्रमाणंबोधनेत्यंतमर्यादाशास्त्रहे
तुषु । सम्यग्वक्तरिवायःस्यात्प्रमाणंमरणेगताविति यादवः ॥ ३२ ॥ ब्रह्मवेदं भूतराट्भैरवः ॥ ३३ ॥ स्वापमानंश्रुत्वापिमहतांमहत्त्वविरोधिविकारोनयुक्तइतिभावेनत
स्यहरस्यततोनिर्गमनंचवक्ति तस्यैवमिति ॥३४॥ एवंविवादेपिसत्रस्यांतरायोमाभूदित्याह तेपीति। अंतरायानुत्पादेनिमित्तमाह यत्रेति ॥३५॥ यत्रगंगाभागीरथी। यमुनया

तस्यैवंवदतःशापंश्रुत्वाद्विजकुलायवै ॥ भृगुःप्रत्यसृजच्छापंब्रह्मदंडंदुरत्ययम् ॥ २८ ॥ भृगुरुवाच ॥ भवव्रतधरायेचयएतान्समनुव्रताः ॥
पाखंडिनस्तेभवंतुसच्छास्त्रपरिपंथिनः २९ नष्टशौचामूढधियोजटाभस्मास्थिधारिणः ॥ विशंतुशिवदीक्षायांयत्रदैवंसुरासवम् ३० ब्रह्मचब्राह्मणांश्चै
वयेयूयंपरिनिंदथ ॥ सेतुंविधारणंपुंसामतःपाखंडमाश्रिताः ३१ एषएवहिलोकानांशिवःपंथाःसनातनः ॥ यंपूर्वेचानुसंतस्थुर्यत्प्रमाणंजनार्दनः ३२
तद्ब्रह्मपरमंशुद्धंसतांवर्त्मसनातनम् ॥ विगर्ह्ययातपाखंडंदैवंवोभूतराट्सदा ॥ ३३ ॥ ॥ मैत्रेयउवाच ॥ ॥ तस्यैवंवदतःशापंभृगोःसभगवा
न्भवः ॥ निश्चक्रामततःकिंचिद्विमनाइवसानुगः ३४ तेपिविश्वसृजःसत्रंसहस्रपरिवत्सरान् ॥ संविधायमहोत्साहायत्रेज्यऋषभोहरिः ३५ आप्लुत्या
वभृथंयत्रगंगायमुनयान्विता ॥ विरजेनात्मनासर्वेस्वंस्वंधामययुस्ततः ३६ ॥ इतिश्रीभागवतेचतुर्थस्कंधेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ४ ॥
॥ मैत्रेयउवाच ॥ सदाविद्विषतोरेवंकालोविवदमानयोः ॥ जामातुःश्वशुरस्यापिसुमहानतिचक्रमे १ यदाभिषिक्तोदक्षस्तुब्रह्मणापरमेष्ठिना ॥ प्रजाप
तीनांसर्वेषामाधिपत्येस्मयोभवत् २ इष्ट्वासवाजपेयेनब्रह्मिष्ठोभूयएवसः ॥ बृहस्पतिसवंनामसमारेभेक्रतूत्तमम् ३

न्वितासंगतातत्रप्रयागइतिशेषः । अस्यैवकर्मणःस्वाभीष्टफलप्राप्तिहेतुत्वादिदंसमाप्यनकर्मांतरंप्रारब्धंतैःकिंतुस्वगृहगमनमेवानुष्ठितमित्याह विरजेनेति कर्मणानिर्मलेनांतः
करणेनयुक्ताइतिशेषः ॥ ३६ ॥ इतिश्रीभागवतेचतुर्थस्कंधेविजयध्वजकृतटीकायांद्वितीयोध्यायः ॥२ ॥ अत्रशंकरदक्षयोर्विवादकथनव्याजेनशंकरस्यवासुदेवचरणारविंदस्म
रणकथनेनहरेरमितमाहात्म्यमेवप्रकाश्यतेऽस्मिन्नध्याये। तत्रादावस्यवैरस्यदीर्घकालीनत्वंदक्षस्यगर्वाधिक्यंचवक्ति सदाविद्विषतोरिति ॥ १ ॥ यदादक्षःपरमेष्ठिनाब्रह्मणासर्वेषां
प्रजापतीनामाधिपत्येऽभिषिक्तस्तदातस्यस्मयोमदविशेषोभूदित्यन्वयः ॥ २ ॥ अरुद्रभागयज्ञकरणादस्यस्मयोलक्ष्यतइत्याशयेनाह इष्ट्वेति सदक्षोनाम्नावाजपेयेनयज्ञेनहरि
मिष्ट्वाब्रह्मिष्ठःकर्मप्रतिपादकवेदेनिष्णातोभूदित्यन्वयः । एतत्रकुतोज्ञातमत्राह भूयइति यज्ञांतरकरणात्सिद्धमित्यर्थः ॥ ३ ॥

SGDF Sri Gargeshwari Digital Foundation

तस्मिन्‌यज्ञेत्रिलोक्याःसंमेलनेनदक्षस्यस्मयातिशयोलक्ष्यतेइत्याशयेनाह तस्मिन्निति ॥ ४ ॥ ननुकिमनेनप्रकृतइतितत्राह तदुपश्रुत्येति दाक्षायणीसतीदेवी । मिथः
प्रजल्पतांखेचराणांयत्‌पितृयज्ञविषयवचनंतदुपश्रुत्यांतःपुरान्निर्गत्यस्वनिलयसमीपेउपदेववरस्त्रियोदृष्ट्वांतःपुरंप्रविश्यपतिमभ्यभाषतेत्यन्वयः ॥ ५ ॥ ६ ॥ ७ ॥ किमभा
षतेतितत्राह प्रजापतेरिति । निर्यापितःप्रवर्तितः । किलकिंवदंतो । हेवामश्रेष्ठ यदितवार्थितास्तितत्रर्हि ॥ गमनेहेतुमाह अमोइति । हियस्मात्तस्मात्‌ ॥ ८ ॥ गमने
निमित्तांतरमप्याह तस्मिन्निति । मयिगतायांतस्मात्‌जनात्पूजाविशेषोऽपिभविष्यतीत्याह अहंचेति परिबर्हंचवरवध्वोर्दीयमानम्‌ ॥ ९ ॥ नकेवलमुक्तमेवप्रयोजनमर्थांतरम
प्यस्तीत्याह तत्रेति अध्वरध्वजंयज्ञश्रेष्ठंद्रक्ष्यइत्यन्वयः । ध्वजोशेफसिकेतौचश्रेष्ठेचैत्योन्नतद्रुमेइत्यभिधानं । स्वंस्तिमेढ्रांकयोर्ध्वजइति अंकाश्वेर्ह्लेतिकोरसोरेति उरस्तुवक्ष

तस्मिन्नब्रह्मर्षयःसर्वेदेवर्षिपितृदेवताः ॥ आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्चसभर्तृकाः ४ तदुपश्रुत्यनभसिखेचराणांप्रजल्पताम्‌ ॥ सतीदाक्षायणीदेवी
पितुर्यज्ञमहोत्सवम्‌ ५ व्रजतीःसर्वतोदिग्भ्यउपदेववरस्त्रियः ॥ विमानयानाःसप्रेष्ठानिष्ककंव्यःसुवाससः ६ दृष्ट्वास्वनिलयाभ्याशेलोलाक्षीर्मृष्टकुं
डलाः ॥ पतिंभूतपतिंदेवमौत्सुक्यादभ्यभाषत ७ सत्युवाच ॥ प्रजापतेस्तेश्वशुरस्यसांप्रतंनिर्यापितोयज्ञमहोत्सवःकिल ॥ वयंचतत्राभिसरामवा
मतेयद्यर्थितामीविबुधाव्रजंतिहि ८ तस्मिन्‌भगिन्योममभर्तृभिःस्वकैर्ध्रुवंगमिष्यंतिसुहृद्दिदृक्षवः ॥ अहंचतस्मिन्भवताभिकामयेसहोपनीतंपरिब
र्हमर्हितुम्‌ ९ तत्रस्वसॄर्मेननुभर्तृसंमितामातृष्वसॄःक्लिन्नधियंचमातरम्‌ ॥ द्रक्ष्येचिरोत्कंठमनामहर्षिभिरुन्नीयमानंचमृडाध्वरध्वजम्‌ १० त्वय्येतदाश्चर्य
मजात्ममाययाविनिर्मितंभातिगुणत्रयात्मकं ॥ अथाप्यहंयोषिदतत्त्वविच्चतेदीनादिदृक्षेभवमेभवक्षितिम्‌ ११ पश्यप्रयांतीश्रभवान्ययोषितःस्वलंकृताः
कांतसखावरूथशः ॥ यासांव्रजद्भिःशितिकंठमंडितंनभोविमानैःकलहंसपांडुभिः १२

सिश्रेष्ठइतियादवः ॥ १० ॥ एवंबहुविधालापैरप्यविकृतेंद्रियंपतिंदृष्ट्वातन्माहात्म्यविज्ञापनपूर्वकंस्वाभीष्टमुद्वेलयति त्वयीति हेअजरुद्र अजाविष्णुहरच्छागाइतियादवः ।
आत्मनोहरेर्माययेच्छयाविनिर्मितंगुणत्रयात्मकंरजआदिगुणत्रयोपादानकमाश्चर्यंनानावैचित्र्योपेतमेतद्विश्वंत्वयिभाति । नित्यापरोक्षितांतस्थजगन्नारायणस्वरूपत्वात्तत्प्रसादे
नकरतलामलकवदेतद्विश्वंतवज्ञानकोष्ठेवर्तते अथापितवद्रष्टव्यांशाभावेपिहेभवमंगलहरअहंमेभवक्षितिंजन्मभूमिंदिदृक्षइत्यन्वयः। अत्रहेतुर्गर्भविशेषणंयोषिदिति । युंषशब्दा
दिसेवायां । शब्दादिविषयसेवाशीलत्वादित्यर्थः । अतएवतेतव । अतत्त्ववित्‌यथास्थितत्वत्स्वरूपाज्ञानित्वात्‌ । दीनाक्षीणाज्ञानदुर्बला ॥ ११ ॥ इतोपिगंतव्यमितिभावे
नाहपश्येति अन्यस्त्रियोपिप्रयांतिकिंमयेत्यतोगंतव्यमित्यर्थः शितिकंठनीलकंठ कलहंसवत्पांडुभिर्धवलैः ॥ १२ ॥

१ श्रेष्ठवाची ध्वजशब्द इत्यस्य प्रमाणान्तरम्‌ स्वस्तीत्यादि । २ विज्ञापयति । ३ युषसौत्रः शब्दादिसेवायां ‘ हसृरुहियुषिभ्यइतिः ’ । इति इतिप्रत्ययः ।

SGDF

युक्त्यापिगंतव्यत्वंवक्ति कथमिति नेंगतेनचलतिआह्वानाभावेकथंगमनंस्यादित्याशंक्यानाह्वानेप्येषांगृहगमनमुचितंभवतीत्याह अनाहुताइति देहकृतःपितुः ॥ १३
उपसंहरति तन्मेइति यतएवंगंतव्येबहवोहेतवःसंतितत्तस्मात्भवान्पूज्यस्त्वंममप्रसीद । हेअमर्त्यदेव । इदंवांछितंकर्तुमर्हसीत्यस्मिन्नर्थेबतकृपाकर्तव्याकारुणिकत्वादित्यर्थ
त्वमेवकारुणिकोनान्यइत्याशयेनाह त्वयेति अदभ्रचक्षुषासर्वज्ञेनत्वयासहायंधर्मःपूर्णःगरीयान्निरूपितइतियदतःकारुणिकत्वात्प्रार्थितस्त्वमनुगृहाणवांछितमितिशेषइत्य
र्थः ॥ १४ ॥ तथापिप्रिययाप्रार्थितःशंकरःकिमुत्तरमभ्यधादितिविदुरस्यमानसींशंकांपरिहर्तुमाह एवमिति । गिरित्रोगिरिशः । कुत्सितावाचएवइषवः शराःकुवागिषवस्ता
न् । कोदक्षः ॥ १५ ॥ किंवाबहुनाप्रलापेनाऽनाहूताअप्याभियांतीतियदुक्तंतस्योत्तरंशृण्वितिभावेनाह त्वयोदितमिति किंतदुदितमित्यतउक्तं अनाहुताइति तर्ह्यनभि
यानेकिंकारणमत्राह यदीति तेबांधवाः । अनात्ममदेनदेहाभिमाननिमित्तदर्पेणजातेनमन्युनाक्रोधेन ॥ १६ ॥ असतांविद्यादिकमपिमदविषयजनकत्वेनाप्रयोजकमहेःप

कथंसुतायाःपितृगेहकौतुकंनिशम्यदेहःसुरवर्यनेंगते ॥ अनाहुताअप्यभियंतिसौहृदादर्तुर्गुरोर्देहकृतश्चकेतनम् १३ तन्मेप्रसीदेदममर्त्यवाञ्छितंकर्तुंभवा
न्कारुणिकोबतार्हति ॥ त्वयापिपूर्णोऽयमदभ्रचक्षुषानिरूपितोऽतोनुगृहाणयाचितः १४ ॥ ऋषिरुवाच ॥ एवंगिरित्रःप्रिययाभिभाषितःप्रत्यभ्यधत्त
प्रहसन्सुरप्रियः ॥ संस्मारितोमर्मभिदःकुवागिषून्यानाहकोविश्वसृजांसमक्षतः १५ ॥ शंभुरुवाच ॥ त्वयोदितंशोभनमेवशोभनेअनाहुताअप्यभियां
तिबंधुषु ॥ तेयद्यनुत्पादितदोषदृष्टयोबलीयसानात्ममदेनमन्युना १६ विद्यातपोवित्तवपुर्वयःकुलैःसतांगुणैःषड्भिरसत्तमामदैः ॥ स्मृतौहतायामभि
मानदुर्दृशस्तब्धानपश्यंतिहिधामभूयसाम् १७नैतादृशानांस्वजनव्यपेक्षयागृहान्प्रतीयादनवस्थितात्मनाम् ॥ येभ्यागतान्वक्रधियाभिचक्षतेआरोपितभ्रू
भिरमर्षणाक्षिभिः १८ तथारिभिर्नव्यथतेशिलीमुखैःशेतेर्दितांगोहृदयेनदूयता ॥ स्वानांयथावक्रधियांदुरुक्तिभिर्दिवानिशंतप्यतिमर्मताडितः १९ ॥

यःपानमिवेतिभावेनाह विद्यातपइति । असत्तमाविद्यादिभिःषड्भिःसतांयोग्यैर्गुणैरुत्पन्नैर्मदैः । स्मृतौहतायांशास्त्रश्रवणोत्पन्नज्ञानेनष्टे । भूयसांमहात्मनाम् । धामप्रभाव
म् । नपश्यंति । हियस्मात्तस्मादित्यन्वयः अदर्शनेकारणमाह अभिमानदुर्दृशइति विद्यामदोधनदस्तृतीयोभिजनोमदइतिमदलक्षणं कामादिदोषदुष्टेंद्रियत्वादित्यर्थः
अतएवतब्धाअंतरितिशेषः ॥ १७ ॥ किमतइतितत्राह नैतादृशानामिति आरोपितभ्रूभिरितिह्रस्वत्वाभावश्छांदसः उन्नामितभ्रूभंगैरमर्षणाक्षिभिरसहमानलक्षणोपेतनेत्रैः ॥
१८ ॥ दक्षाध्वराऽगमनेकारणांतरंचाह तथारिभिरिति प्रधनेयुद्धे शिलीमुखैःशरैः ॥ १९ ॥

---

१ समक्षम् ।

SGDF Sri Gangeshwar Digital Foundation

किंबहुनानुलप्यत्वंदक्षस्यप्रियपुत्रीत्वेपिमदाश्रयत्वेनतप्यमानात्पितुःपूजांनप्राप्नोषीत्याह व्यक्तमिति । उत्कृष्टगतेः प्राप्तसर्वाधिपत्यस्य ॥ २० ॥ मत्पितुर्ज्ञानाधिकारिष्वेकत्वेन
सत्त्वात्कुतोभवतिद्वेषइतिआशंक्यसाम्राज्यमदलक्षणासुरावेशान्मत्पदाधिपत्यंनप्राप्तमतोद्वेषइतिभावेनाह तातप्यमानेनेति । पुरुषबुद्धिसाक्षिणांपुरुषेंद्रियप्रेरकाणामस्मत्स
दृशानांसमृद्धिभिःएषांपुरुषबुद्धिसाक्षिणांपरंपदमंजसातत्वेनाधिरोढुमकल्पोऽसमर्थोयतोयस्मात्ततोद्वेष्टि । इदमसुरलक्षणमितिभाववेनोक्तम् । यथेति ॥ २१ ॥ अभ्युत्थानाभि
वादार्होभवतानसंमानितोऽतोद्वेषइतिकिंनस्यादितितत्राह प्रत्युद्गमेति प्राज्ञैस्तत्त्ववेदिभिःपुरुषैर्वैष्णवेष्वागच्छत्सुमिथःप्रत्युद्गमादिकंचेतसागुहाशयायहृदयेस्थितायपरस्मैपुरु
षायैवविधीयतेक्रियते देहाभिमानिनेजीवायनक्रियतेइदंतूभयोःसमत्वे । बंधुतागुरुत्वनिमित्तेनगुरुत्वेनोक्तमतोदक्षायज्ञानाभावात्तन्निमित्तद्वेषोनसंभाव्यतइति ॥ २२ ॥
किंच मयाप्रत्युत्थानादिनामुख्यतःपूज्यस्तुब्रह्मादिशरीरांतस्थितोहरिरित्याह सत्त्वमिति विशुद्धसत्त्वंब्रह्मादिशरीरम् । वसुदेवशब्दितंपृथिव्यादिपदार्थेषुस्थित्वाविद्योतततेतत्क
तमलंलेपाभावादितितच्छब्देनशब्दितमित्यर्थः । तच्छब्दवाच्यत्वेनिमित्तमाह यदीयतइति । व्याप्तिक्रीडादिगुणाकरःपुमान्नारायणोपावृतोमायालक्षणावरणरहितईयते ज्ञा

व्यक्तंत्वमुत्कृष्टगतेःप्रजापतेःप्रियात्मजानामसिसुभ्रुसंमता ॥ अथापिमानंनपितुःप्रपत्स्यसेमदाश्रयात्कःपरितप्यतेयतः २० तातप्यमानेनहृदातुरें
द्रियःसमृद्धिभिःपूरुषबुद्धिसाक्षिणाम् ॥ अकल्पएषामधिरोढुमंजसापदंपरंद्वेष्टियथासुराहरिम् २१ प्रत्युद्गमप्रश्रयणाभिवादनंविधीयतेसाधुमिथःसुमध्य
मे ॥ प्राज्ञैःपरस्मैपुरुषायचेतसागुहाशयायैवनदेहमानिने २२ सत्त्वंविशुद्धंवसुदेवशब्दितंयदीयतेतत्रपुमानपावृतः ॥ सत्त्वंचयस्मिन्भगवान्वासुदेवोऽ
धोक्षजोमेमनसाविधीयते २३ त्वयानिरीक्ष्योनपितापिदेहकृद्दक्षोममद्विट्तदनुव्रताश्चये ॥ योविश्वसृग्यज्ञगतंवरोरुमामनागसंदुर्वचसाकरोत्तिरः २४ ॥

यतइतियद्यस्मात्तस्मात् । निमित्तांतरंचाह सत्त्वंचेति । तत्सत्त्वंचयस्मिन्हरौयदधीनतयावर्ततेतत्संबंधात्तच्छब्दवाच्यमित्यर्थः । एवंचवसुदेवेनिवासलक्षणसंबंधाद्वासुदेवःसोऽधो
क्षजोतींद्रियज्ञानोभगवान्ममनसाविशेषेणधीयतेचिंत्यते तदुक्तं रुद्रेणधीयतेविष्णुर्विष्णोर्ध्येयोनकश्चनेति । अनेनपुरस्थितचतुर्मुखब्रह्मणिप्रकाशमानश्रीविष्णुगुणगणो
पसंहारलक्षणोपासनैकाग्रचित्तत्वेनस्थितेनमयाकार्यांतरप्रारंभस्यानुचितत्वात्दक्षांतस्थहरिस्मरणसत्कारेणतत्सत्कारोपिकृतइतिद्वेषेकारणंनपश्यामीत्युक्तंभवति यद्वा यद्विशुद्धं
तमआदिगुणानुपरक्तंसत्त्वंतद्वसुदेवशब्दितं चशब्दएवार्थे तत्सत्त्वंगुणोयस्मिन्पुंस्येवास्तिपुमान्श्रीहरिस्तत्रतस्मिन्नेवपुंस्यपावृतईयतइतियस्मात्तस्मात्सवासुदेवः सात्त्विक
प्रियोऽधोक्षजोभगवान्मेमनसाप्रत्युत्थानादिनाविशेषेणचिंत्यतइत्यतोनास्मद्गुरुरित्यभिमानमुग्धत्वेनरजोगुणाभिभूतचित्तत्वेनचात्रहरेर्विशेषेणसन्निधानाभावात्त्वपितानसत्का
रयोग्यइतिकृत्वाप्रत्युत्थानादिनानमानितइति अनेनतमआदिगुणाभिभूतत्वेनतत्त्वाज्ञानात्द्वेषोद्रेकइत्युक्तंभवति ॥ २३ ॥ ममत्वत्पूज्यत्वान्ममद्वेषिजनकोपित्वयाद्रष्टु
मेवायोग्योगुरुध्रुग्दर्शनेदोषोक्तेरित्याह त्वयेति । देहकृदपि ॥ नकेवलमांतरोद्वेषोपितुबाह्योपीतिभावेनाह तदनुव्रताइति । स्थानंनिर्दिशति यइति ॥ २४ ॥

SGDF
Sri Gargeshwari Digital Foundation

बाधकंचाहयदीतिमरणंनामदेहवियोगलक्षणंनत्वकीर्तिलक्षणम् ॥ २५ ॥ इतिश्रीभागवतेचतुर्थस्कंधेविजयध्वजकृतटीकायांतृतीयोध्यायः ॥ ३ ॥ हरौभक्तिविधानार्थंगुर्वादावपि भक्तिरवश्यंकर्तव्येत्यभिप्रेयतेस्मिन्नध्याये तत्रदेवीमेवंबाधकंब्रुवन्शंकरःकिंचकारेतितत्राह एतावदिति। शंसुखंकरेयस्यसःशंकरोतितिवाशंकरः। उभयत्रप्रस्थापनेनिवारणेच पत्न्या अंगनाशंशरीरनाशंहियस्मात्तस्माद्विरराम । ततस्तुदेवीकिमकरोदितितत्राह सुहृद्दिदृक्षुरिति स।देवीसुहृद्दिदृक्षुःस्वाधाम्नोनिष्क्रामतीभवात्परिशंकितास्वधामनिर्विशतीचाभूदित्य न्वयः ॥ १ ॥ अंतःकरणवृत्तिभेदात्द्विधाप्रवृत्तिमतीभवानीकिमकृतेत्याशंक्यतस्याभर्तुःकामजनकमंत्रौषधैःस्त्रीस्वभावंवक्ति सुहृद्दिदृक्षेति ॥ सुहृद्दिदृक्षायाःप्रतिघातोभंगस्तेनदुर्म नादुःखितमना। अप्रतिपुरुषंप्रतिपक्षपुरुषरहितमनेनकोपरोदनाभ्यांवशीकरणमंत्राभ्यांवाशिवोभिमतानुमतिप्रदःस्यादितिभावोदर्शितः ॥ २ ॥ अनेनापिभावेनास्तिमितसमुद्भव

यदिव्रजिष्यस्यतिहायमद्वचोभद्रंभवत्यानततोभविष्यति ॥ संभावितस्यस्वजनात्पराभवोयदाससद्योमरणायकल्पते २५ इतिश्रीभागवतेमहापुराणे चतुर्थस्कंधेतृतीयोऽध्यायः ३ ॥ मैत्रेयउवाच ॥ एतावदुक्त्वाविररामशंकरःपत्न्यंगनाशंह्युभयत्रचिंतयन् ॥ सुहृद्दिदृक्षुःपरिशंकिताभवान्निष्क्रामतीनिर्वि शतीद्विधाचसा १ सुहृद्दिदृक्षाप्रतिघातदुर्मनाःस्नेहाद्रुदंत्यश्रुकलातिविह्वला ॥ भवंभवान्यप्रतिपूरुषंरुषाप्रधक्ष्यतीवैक्षतजातवेपथुः २ ततोविनिःश्वस्यस तीविहायतंशोकेनरोषेणचदूयताहृदा ॥ पित्रोरगात्स्त्रैणविमूढधीर्गृहान्प्रेम्णात्मनोयोर्धमदातसतांप्रियः ३ तामन्वगच्छन्द्रुतविक्रमांसतीमेकांत्रिनेत्रानुच राःसहस्रशः ॥ सपार्षदमुख्यामणिमन्मदादयःपुरोवृषेंद्रास्तरसागतव्यथाः ४ तांसारिकामंडुकदर्पणांबुजैःश्वेतातपत्रव्यजनस्रगादिभिः ॥ ५ ॥ गीता यनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्यविलंबितायुः ५

तूरिस्थतंशिवंदृष्ट्वातद्गमनप्रकारंवक्ति ततइति। दूयतातापवता सर्वैश्वर्याएवंभावःकथमित्यत उक्तंस्त्रैणेति। स्त्रीणांस्वभावःस्त्रैणंतेनाविमूढाधीर्यस्याःसातथा। अज्ञास्त्रियाःस्वभावए वायंनतुदेवस्त्रियाइतिभावेनाह प्रेम्णेति । आत्मनइतिपदंद्विरावर्तनीयं स्वस्यशरीरस्यार्धमरासतअदत्त रासृदानइतिधातुः ॥ ३ ॥ स्वशरीरार्धदोहरस्तस्याएकस्यागमनं कथमसहतेत्याशंक्यतद्भावविदामनुचराणांगमनप्रकारंवक्ति तामन्विति । द्रुतं।विक्रमःपादविक्षेपोयस्याःसातथातां केचनानुचराअन्वगच्छन्नतुमुख्याइत्यतउक्तं मणिमन्म दादयइति । पार्षदेषुमुख्यैःसहवर्तमानाःसपार्षदमुख्याआगतव्यथाः स्वस्तिस्यादस्वस्तिवेतिप्राप्तमनोदुःखाः ॥ ४ ॥ शीघ्रतरंगच्छंत्यारुद्राण्याः पाशाकृष्टैरिवागच्छ द्भिरनुचरैःकिमभूदित्याशंक्यराज्ञीगमनवदन्वितयात्राभूदित्याह तांसारिकेति। सारिकाक्रीडाशुकी। मंडुकंजलक्रीडावाद्यं। विलंबितायथायथासंभूयगमनंस्यात्तथाशनैश्चर तः। विटंकिताइतिपाठे शृंगारिताइत्यर्थः ॥ ५ ॥

SGDF
Sri Gangeshwari Digital Foundation

एवंभर्तृप्रेषितानुचरसूचितस्नेहात् शांतमनस्कत्वेनपश्चान्नगताकिंतुपुरतएवगत्वासायज्ञवाटमाविशदित्याह आब्रह्मेति । आसमंताद्ब्रह्मघोषेणवेदध्वनिनाब्रह्मलोकपर्यंतगा मिनाध्वनिनावोर्जितंसंकुलंयज्ञार्थंवैशसंपशुसंज्ञंपरंपशुहिंसनंयस्मिन्तत्तथा मृच्चदारुचअयश्चकांचनंचदर्भाश्चचर्माणिचतैर्निसृष्टानिनिर्मितानिभांडानियस्मिंस्तथा ॥ ६ ॥ तस्याअवज्ञाकरणप्रकारमाह तामागतामिति । यज्ञकृतोदक्षस्य ॥ कश्चनेत्यस्यव्यावृत्तिमाह ऋतेइति । स्वसारःस्वसृः । तत्स्नेहःकुतोऽवगतइतितत्राह सादराःसानुरागाइति ॥७॥ सतीप्रत्यालिंगनादिकंकिंकृतवतीनेतिभावेनाह सौंदर्येति । प्रधानावज्ञादुःसहेतिभावेनाह पित्रेति । अप्रतिनंदिताअकृतमनःसंतोषा ॥ ८ ॥ ततःकिमकरोदितितत्राह अरुद्र भागमिति । नरुद्रस्यभागोयस्मिन्सतथातं कृतहेलनंकृतावज्ञम् ॥ ९ ॥ अधीश्वर्यांकुपितमित्यत्रकिंलिंगमत्राह जगर्हेति । अमर्षेणविपन्नयागद्गदभावंप्राप्तया । धूमपंथाः कर्ममार्गःतद्विषयेश्रमःशिक्षास्मयोगर्वोयस्यसतथातं कर्ममार्गेऽतिनिष्णातमित्यर्थः । स्वतेजसास्वभावेननिगृह्यनिवार्य ॥ १० ॥ स्त्रीत्वेपिप्रमाणवद्युक्त्यानिर्निंदत्याह नयस्ये

आब्रह्मघोषोर्जितयज्ञवैशसंविप्रर्षिजुष्टंविबुधैश्चसर्वशः ॥ मृद्दार्वयःकांचनदर्भचर्मभिर्निसृष्टभांडंयजनंसमाविशत् ६ तामागतांतत्रनकश्चनाद्रियद्विमा नितांयज्ञकृतोभयाज्जनः ॥ ऋतेस्वसारोजननींचसादराःप्रेमाश्रुकंठ्यःपरिसस्वजुर्मुदा ७ सौंदर्यसंप्रश्नसमर्थवार्तयामात्राचमातृष्वसृभिश्चसादरम् ॥ दत्तांसपर्यांवरमासनंचसानादत्तपित्राऽप्रतिनंदितासती ८ अरुद्रभागंतमवेक्ष्यचाध्वरंपित्राचदेवेकृतहेलनंविभौ ॥ अनादृतायज्ञसदस्यधीश्वरीचुको पलोकानिवधक्ष्यतिरुषा ९ जगर्हसामर्षविपन्नयागिराशिवद्विषंधूमपथश्रमस्मयम् ॥ स्वतेजसाभूतगणान्समुत्थितान्निगृह्यदेवीजगतोभिशृण्वतः १० ॥ देव्युवाच ॥ ॥ नयस्यलोकेस्त्यतिशायनःप्रियस्तथाप्रियोदेहभृतांप्रियात्मनः ॥ तस्मिन्समस्तात्मनिमुक्तवैरकेऋतेभवंतंकतमःपतीपकः ११ दोषान्परेषांहिगुणेष्वसाधवोगृह्णंतिकेचिन्नभवादृशाद्विजाः ॥ गुणांश्चफल्गून्बहुलीकरिष्णवोमहत्तमास्तेष्वविदद्भवानघम् १२

ति । लोकेभुवनेविद्यमानानांदेहभृतांशरीरिणांप्रियात्मनोमनोभीष्टरूपस्ययस्यरुद्रस्ययोग्यतातिरेकेणातिशायनःप्रियोतिप्रियस्तथाप्रियोद्वेष्यश्चनास्ति । तस्मिन्रुद्रेभवंतमृतेपुरु षाणांकतमःपुरुषःप्रतीपकोनकोपीत्यर्थः प्रतीपक्करणेहेत्वंतरंचाह समस्तात्मनोति । विष्ण्वादीन्षट्ऋतेइंद्रादिसमस्तस्वामिनिनहिकाश्चिद्विरोध्यतिष्ठति स्वाम्यपिवैरकृच्चेत्त स्मिन्द्वेषःसंभावितइत्यतउक्तमेवहेतुंस्मारयति वैरकइति । मुक्तवैरेत्युपलक्षणंप्रेमापि विमुक्तप्रियइत्यर्थः ॥११॥ तत्त्वतोपिभवानपिभवद्वेषंकर्तुंनयोग्यइत्याह दोषानिति ॥ के चिदसाधवोदुर्जनाःपरेषामुत्तमानांगुणेषुदोषानेवगृह्णंतिनगुणान् । तदुक्तं दोषोप्येकोयादिगुणगणेतन्नमुक्त्वागुणौघान्दोषग्राहीभवतिहिखलःसच्छिकातुल्यधर्मइति ॥ भवादृशा महत्तमाः द्विजाःफल्गून्अल्पान्गुणान्बहुलीकरिष्णवोनदोषान्गृह्णंति किंतुगुणानेव । दोषान्मुक्त्वागुणमनुभवन्स्वल्पमप्येतितृप्तिंसाधुर्लोकेसलिलमिलितक्षीरपायीवहंसइ ति । तत्रैवंशास्त्रेस्थितेमहत्तमेषुगणितोभवान्भवद्वेषादघमविदल्लब्धवान्हि अहोकष्टमितिशेषः । द्विजाइत्यनेनदक्षस्यशास्त्रविचारयोग्यतातिशयंसूचयति ॥ १२ ॥

SGDF

असतांयोग्योमहत्तमेष्वेकस्यतवशिवंद्वेषोममाश्चर्यंबुद्धिंजनयतीतिभावेनाह ॥ नाश्चर्यमिति कुणंकर्मफलंपिबतीतिकुणपोदेहःसएवात्मेतिवादिनस्तेषुअसत्सुईर्ष्ययासहवर्तमाना महतांविर्निंदास्तीतियत्तैतदाश्चर्यम् । किंतुतदेवमहद्भिर्निंदनमेवशोभनमित्यन्वयः । कुणपात्मवादित्वंचविद्वज्जनानिषेवायाअभावादित्याह महापुरुषेतिकचिद्विद्वज्जनसेवयाआप्तशास्त्रज्ञानेनेहितत्त्वज्ञानंस्यात्तद्वेषान्नास्त्यतोयुक्तंकुणपात्मवादित्वेनमहद्भिर्निंदनंभवान्नैतादृशोऽतोममाश्चर्यबुद्धिरिति ॥ १३ ॥ महद्भिर्निंदनंमयानकृतामितिवक्तुंनशक्यतइत्याह यद्द्व्यक्षरमिति । शिवइतिद्वेअक्षरेयस्मिंस्तत्द्व्यक्षरंयस्यभगवतोयद्द्व्यक्षरंनामतत् । सकृत्कथाप्रसंगात्गिरावागिंद्रियेणेरितमुच्चारितंनृणामघं । अन्येनहंतुमशक्यंदुःखं । आशुहंतिनाशयति भवांस्तंशिवंद्वेष्टियहो लुप्तक्रियायाशुचयेमानिनेभिन्नसेतवइत्यतोभवाञ्शिवेतरोलुप्तक्रियोऽशुचिः । शिवस्त्वशुचोनांपुंसांशुचिहेतुर्दुः

नाश्चर्यमेतद्यदसत्सुसर्वदामहद्भिर्निंदाकुणपात्मवादिषु ॥ सेर्ष्यामहापूरुषपादपांसुभिर्निरस्ततेजस्सुतदेवशोभनम् १३ यद्द्व्यक्षरंनामगिरेरितंनृणांसकृत्प्रसंगादघमाशुहंतितत् ॥ पवित्रकीर्तिंतमलंघ्यशासनंभवानहोद्वेष्टिशिवंशिवेतरः १४ यत्पादपद्मंमहतांमनोलिभिर्निषेवितंब्रह्मरसासवार्थिभिः ॥ लोकस्ययद्वर्षतिचाशिषोर्थिनस्तस्मैभवान्द्रुह्यतिविश्वबंधवे १५ किंवाशिवाख्यमशिवंनविदुस्त्वदन्येब्रह्मादयस्तमवकीर्यजटाःश्मशाने ॥ तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्येमूर्धभिर्दधातितच्चरणावसृष्टम् १६

खनाशनान्नित्यंशुचिरितिभावेनाह पवित्रेति । शिवनामकीर्तनादेकदानष्टंदुःखंपुनर्नरोहतीतिभावेनाह अलंघ्येति । नलंघ्यमन्यथाकर्तुंशक्यंतन्नामकीर्तनादुत्पन्नंशुभं । प्रनष्टमशुभंचेतिशासनंशास्त्रंयस्यसतथातम् ॥ १४ ॥ प्रेतावासेषुयोघोरैश्चिताभस्मकृतस्नानइत्यादेःश्लोकद्वयेनोत्तरंध्वनयति । यत्पादपद्ममिति ब्रह्मरसःब्रह्मज्ञानजन्यआनंदःसएवासवइंद्रियतृप्तिकरंमधुतस्यार्थनाशीलंयेषांतेतथोक्ताःतैर्महतांसनकादीनांमनांस्येवालयःभृंगास्तैर्यस्यपादपद्मंनितरांसेवितं । यद्देवदत्तपादवन्निष्फलंनेत्याह लोकस्येति । आशिषअभ्युदयलक्षणाः अनेनगुरुद्रोहित्वंतवप्राप्तमित्युक्तंभवति । सनकादयोरुद्रशिष्यास्तेषामन्येतुयोगिनः ब्रह्मशिष्यस्तथारुद्रोब्रह्मानारायणस्यचेतिविशेषवचनान्महतामित्यनेनसनकादयोगृह्यंते ॥ १५ ॥ त्वदन्ये ब्रह्माआदिःपितायेषांतेब्रह्मादयः ब्रह्मपुत्राःसनकादयः योरुद्रस्तन्माल्यभस्मनृकपालीतस्मिन्श्मशानेविद्यमानप्रेतालंकारमालायोग्यास्थिभस्मनरकपालवान् जटाअवकीर्यप्रसार्यपिशाचैःसहश्मशानेऽवसदितितंशिवाख्यमशिवंविदुःकिं नविदुरेव नित्यशुद्धइत्येवविदुः कुतइतितत्राह येमूर्धभिरिति येसनकादयः तच्चरणावसृष्टरजआदिकंमूर्धभिर्दधाति अनेनशिवस्याशिवत्वेज्ञानपूर्वकंतच्चरणरजोधारणासंभवस्तत्करणात्रातोनित्यशुद्धइति तर्कःसूचितः मूर्धभिर्दधतीत्यनेनपुरुषार्थापेक्षयापादपांसुधारणंनत्वन्यथेतिध्वनयति । तदुक्तं सुपर्णशेषप्राणेशेशब्रह्मविष्णून्श्रियगिरं ऋतेनमतिनोरुद्रंकएवपुरुषार्थभागिति १६

SGDF Foundation

सभायांधर्मसंकटेप्राप्तेसभ्यैःकर्तव्यंधर्ममाह कर्णाविति । धर्मस्यावितररिईशेस्वामिनि । अघृणिभिर्दयागुणरहितैर्नृभिरस्यमानेऽधिक्षिप्यमानेसति सभ्योयद्यकल्पःशिक्षितुमसमर्थस्तर्हिस्वकर्णौपिधायनि रियात्तस्माद्देशान्निर्गच्छेत् । प्रभुश्चेदसतांरुशतींपरुषभाषिणींजिह्वांप्रसह्यच्छिंद्यात् तथाप्रभुत्वासंभवेऽसून्वाविसृजेत्सधर्मइत्यन्वयः १७ अपिशब्देनेदमेवसंभावितमितिध्वनितंस्पष्टयति अतस्तवेति । तववीर्यादुत्पन्नं शितिकंठगर्हिणोनीलकंठद्वेषिणः । अस्मिन्नर्थेन्यायमाह जग्धस्येति । जग्धस्यभुक्तस्यांधसोऽन्नस्योद्धरणंवमनंप्रचक्षतेवदंतिविद्वांसइतिशेषः १८ ननुममापराधमेववदासि मातुलत्वेनगुरुं मांदृष्ट्वाभ्युत्थानादिकमकुर्वतस्तस्यापराधंकिंनस्मरसीतितत्राह नवेदवादानिति । ज्ञानित्वेनस्वेच्छावृत्तिविधेर्महामुनेःसर्वज्ञतमस्यशिवस्यस्वएवलोकेस्वबिंबभूतेप्रकाशमानेहरौरमतोरममाणस्यतद्दर्श नसुधापानेननित्यतृप्तस्यमतिर्वेदवादान्वर्णाश्रमप्रयुक्तानभ्युत्थानादिवेदाविधीन्नानुवर्ततेनानुसराति लौकिकविलक्षणत्वात् । तत्रदृष्टांतमाह यथेति । यथादेवमनुष्ययोर्गतिर्मार्गःपृथक्भिन्नः तस्मा त्स्वएवधर्मेस्वविहितेधर्मेस्थितःपरमन्यंनाक्षिपेत् नदूषयेत् अतस्तवैवानर्गलोपराधइतिभावः १९ ननुज्ञानिनःप्रवृत्तिकर्मासंभवेपिनिवृत्तिकर्मसंभवतीतितत्राह कर्मेति । वेदेप्रवृत्तंनिवृत्तमित्युभ यलिंगमुभयविधलक्षणंकर्म । विविच्याश्रितंप्रतिपादितं स्वर्गाद्यर्थप्रवृत्तंस्यान्निवृत्तंमुक्तयेतुयदितिविवेकंकृत्वा कथितमित्यर्थः । ततःकिंतत्राह विरोधीति । तद्द्वयंयौगपद्युगपदेककालमेककर्तरि विरो

कर्णौपिधायनिरियाद्यदकल्पईशेधर्मावितर्यघृणिभिर्नृभिरस्यमाने ॥ छिंद्यात्प्रसह्यरुशतीमसतांप्रभुश्चेज्जिह्वामसूनपिततोविसृजेत्सधर्मः १७ अतस्तवो त्पन्नमिदंकलेवरंनधारयिष्येशितिकंठगर्हिणः ॥ जग्धस्यमोहाद्धिविशुद्धिमंधसोजुगुप्सितस्योद्धरणंप्रचक्षते १८ नवेदवादाननुवर्ततेमतिःस्वएवलो केरमतोमहामुनेः ॥ यथागतिर्देवमनुष्ययोःपृथक्स्वएवधर्मेनपरंक्षिपेत्स्थितः १९ कर्मप्रवृत्तंचनिवृत्तमप्युतवेदेविविच्योभयलिंगमाश्रितम् ॥ विरो धितद्यौगपदेककर्तरिद्वयंतथाब्रह्मणिकर्मनर्च्छति २० मावःपदव्यःपितरस्मदास्थितायायज्ञशालासुनधूमवर्त्मनाम् ॥ कदन्नतृप्तैरसुहृद्भिरीडिताअव्यक्त लिंगाअवधूतसेविताः २१

धि प्रकाशतमसोरेकत्रावस्थानवद्विरुद्धंस्यादित्यर्थः । ततश्चप्रकृतेकिंतत्राह तथेति । द्वय मित्यनुवर्तते । यथाद्वयमेकस्मिन्कर्तरिविरुद्धत्वादुपरतंतथाऽऽब्रह्मणिसम्यक्ज्ञानिनिजीवन्मुक्तेपिद्वयंकर्मनर्च्छतिनप्राप्नोति । आब्रह्मस्थितधीर्जीवन्मुक्तश्चेत्यभिधीयते यस्तस्यनानिवृत्तंचप्रवृत्तंकर्मचेष्य तइतिवचनात् ब्रह्मण्यद्वितीयेसाद्वितीयकर्ताश्रयंकर्मनघटतइत्यर्थस्यानुपपत्तेरुक्तएवार्थः । नन्वबध्नन्पुरुषंपशुमित्यादिश्रुतेर्देवानामपिकर्मप्रतीतेरुद्रस्यापिदेवांतर्भावात्तस्यकथंतदनर्हत्वमुच्यतइतिचेदुच्यते नास्माभिर्देवस्यकर्ममात्राभावउच्यते किंतुविष्णोराज्ञयानियताधिकारिकंनियमनामकंकर्मास्त्येव मुक्तौसुखोद्रेकहेतुत्वात्तदुक्तं यत्तुदेवाःप्रकुर्वंतिसमहानियमःस्मृतःसमहानियमोनामकर्मयत्त्वाधिकारिकं महतेनियमाद्विष्णोःप्रीत्यामुक्तौसुखोन्नतिः । केचिन्निवृत्तमित्याहुर्महानियममप्युतेति । एतदपिउतवेदेविविच्येतिध्वनितं । तस्मान्महानियमाख्यकर्माधिकृतस्यस्थितप्रज्ञस्यत्वन्निंदयागुणहीनत्वंनाशं कनीयं यदिदेवाश्चऋष्याद्यानिंद्यंतेयत्रकुत्रचित् नतावतागुणैर्हीनाःस्थितप्रज्ञाहितेमताः यथायोग्यंतुतात्पर्यंनिंदायाअन्यदेवतुइतिवचनात् २० अनंतरातीतग्रंथेनरुद्रदक्षयोः पृथङ्मार्गत्वंध्वनितंकंठो क्तीकरोति मावइति । हेपितरस्मदास्थिताअस्माभिराश्रिताः अवधूतसेविताःसनकादियोगींद्रैरभ्यस्ताः । अव्यक्तलिंगाअन्यैरज्ञातलक्षणाअर्चिरादिमार्गलक्षणायाःपदव्यस्तावोयुष्माकंमानैवभवंति यज्ञशालायामासनेनदीक्षालक्षणेनधूमवर्त्मधूमादिमार्गोयेषांतेतथोक्ताः । तेषांयुष्माकंकदन्नतृप्तैःपशुमांसलक्षणेनान्नेनअलंबुद्धिंगतैरसुहृद्भिःपशुप्राणहारिभिःपुरुषैरीडितायाधूमादिलक्षणपदव्यस्ताअ

---

१ अत्रेत्थंप्रमेयं । कर्मद्विविधं । प्रवृत्तंनिवृत्तंचेति । स्वर्गादीच्छयाक्रियमाणंप्रवृत्तं । निवृत्तिमपिद्विविधं । मोक्षोद्देश्येनक्रियमाणं । तदनुद्देश्येनकेवलममीश्वरप्रीत्यर्थमिति । एतद्देवाधिकारिकमुच्यते तत्राद्यंदे वानांनास्त्येव । द्वितीयंमहानियमसंज्ञकंतेषामस्तीतियाद्युपत्ये । स्पष्टं चेदंविष्णुरहस्ये । २ उत्तमकृतमधमनिंदनंशिक्षारूपं । अधमकृतमसुरावेशनिमित्तमितियथायोग्यमित्यर्थः ।

SGDF

स्माकंनैवेतियद्दतःपृथङ्मार्गत्वात् त्वन्निंदयानरुद्रस्यगुणहीनत्वं अतोनतस्यदूषणमुचितमितिभावः २१ किंबहुनोक्तेनेतिस्ववैराग्यमाश्रावयति एतेनेति हरेरुद्रेकृतागसःकृतापराधस्यतवदे होद्भवेनदेहाज्जातेनातएवकुजन्मनालोकेनिंदितोत्पत्तिना कस्मादीदृशंवैराग्यंतवेत्यतआह व्रीडेति । कुत्सितश्चासौजनश्चकुजनोभवादृशस्तस्यप्रसंगतोजन्यजनकसंबंधकथालक्षणस्तस्मात् कारणांतरं चाह तज्जन्मेति। यन्महतामवद्यकृत्मनोविप्रियकारितज्जन्मधिक्निंदितमित्यर्थः २२ ततःकिंफलितंतत्राह गोत्रमिति वृषध्वजोभगवान्दाक्षायणीदक्षपुत्रीतित्वदीयंगोत्रंत्वन्नामोपेतंनामविशेषंयदायाव त्सुदुर्मनास्त्वन्नामस्मरणमात्रेणसुतरांविषण्णमना अतएवव्यपेतनर्मस्मितामितिक्रियाविशेषणं अपगतनर्मवचनयुक्तमंदहासोयथाभवातितथामांप्रत्याहवक्ष्यति । हेतातताववत्ततःपूर्वमेवत्वदंगजंतवशरी रादुत्पन्नंकुणपंकुत्सितशरीरमुत्सृक्ष्यइत्यन्वयः । वृषध्वजःस्नेहवशाद्यदादाक्षायणीतित्वदीयंगोत्रमाह । तावत्तदाआशुत्वदीयद्वेषस्मरणाद्व्यपेतनर्मस्मितंसुदुर्मनाभवत्यतइतःपरंतथामाभूदितिकु णपमुत्सृक्ष्यइतिवा । ममदेहत्यागस्तृणत्यागतुल्यइतिद्योतनायात्मनेपदप्रयोगः २३ इतिचतुर्थेचतुर्थोध्यायः ॥ ४ ॥ ॥ ७ ॥ एवंदेहत्यागस्यायत्नसाध्यत्वेपीतिकर्तव्यतायाःफलाधिक्यंस्या दितिसूचनाययोगिजनशिक्षणायचदेहत्यागइतिकर्तव्यतांदर्शयत्यस्मिन्नध्याये इतीति उदीचींदिशमुद्दिश्यक्षितौनिषसादेत्यन्वयः । धूमाद्यध्वनिरमयतीत्यध्वरस्तस्मिन्यज्ञे । स्पृष्ट्वाचम्य । पी

एतेनदेहेनहरेकृतागसोदेहोद्भवेनालमलंकुजन्मना ॥ व्रीडाममाभूत्कुजनप्रसंगतस्तज्जन्मधिक्यन्महतामवद्यकृत् २२ गोत्रंत्वदीयंभगवान्वृषध्वजो दाक्षायणीत्याहयदासुदुर्मनाः ॥ व्यपेतनर्मस्थितमाशुतावदुत्स्रक्ष्यएतत्कुणपंत्वदंगजम् २३ इतिश्रीभा०च०चतुर्थोध्यायः ४ ॥ मैत्रेयउवाच ॥ इत्यध्व रेदक्षमनूद्यशत्रुहन्क्षितावुदीचींनिषसादशांतवाक् ॥ स्पृष्ट्वाजलंपीतदुकूलसंवृतानिमील्यदृग्योगपथंसमाविशत् १ कृत्वासमानावनिलौजितासना सोदानमुत्थाप्यचनाभिचक्रतः ॥ शनैर्हृदिस्थाप्यधियोरसिस्थितंकंठाद्भ्रुवोर्मध्यमनिंदिताऽनयत् २ एवंस्वदेहंमहतांमहीयसामुहुःसमारोपितमंकमा दशत् ॥ जिहासतीदक्षरुषामनस्विनीदधारगात्रेष्वनिलाग्निधारणम् ३

तंचतत्दुकूलंचतेनसंवृताच्छन्ना । दृक्दृशौनिमील्यनिमीलनयुक्तदृग्वा योगपथंदेहोत्क्रमणयोगमार्गम् १ तंविवृणोति कृत्वेति जितासनाप्राणादिसंचारवेगेनदेहसंचलनरहिताऽतएवानिंदिताऽकुत्सि तासासती । प्रथमंरेचकपूरकेकृत्वाऽनिलौप्राणापानौसमानौऊर्ध्वाधोवृत्तिरहितौकृत्वाएकविषयगतीविधाय मूलाधारादुत्क्रमणकर्तारंसुषुम्नासंचारिणमुदानमुत्थाप्योर्ध्वमुखंकृत्वानाभिचक्रमानीय ततोनाभिमंडलाद्धियानिश्चलयाबुद्ध्या । शनैरुद्वेगंविना । हृदिस्थाप्यउरःस्थितंवायुंकंठंनीत्वाकंठाद्भ्रुवोर्मध्यमनयदित्यन्वयः ।यद्वा सर्वसंधिसंचारिणंवायुंव्यानमूर्ध्वाधोगतिनिमित्तौप्राणापानौसमान वायुनैकीकृत्यतंसमानंवायुंसोदानमुदानगत्यासहितमुदानेनैकीकृत्योपर्युपरिस्थानंजीवेनसहानयदिति अत्रद्रव्यनयनशक्तिमतावायुनाजीवसंज्ञद्रव्यनयनं नतुतन्मात्रं । तस्ययोगिनोनित्याभ्यस्तत्वा त् २ एवंभ्रुवोर्मध्यमनिलमानीयस्वयमपिभ्रुवोर्मध्येस्थिताकिंचकारेतितत्राह एवमिति । एवमुक्तप्रकारेणवायुंभ्रूमध्यंनीत्वास्वयंचतत्रास्थिता । मनस्विनीवशीकृतमना । महतामिंद्रादीनांमहीयसा महत्तमेनरुद्रेणादरान्मुहुःशश्वदंकमारोपितंस्वदेहंजिहासतीत्यक्तुमिच्छती सोमा गात्रेषुकरचरणाद्यवयवेषुआनिलाग्निधारणंदेहभस्मीकरणायवाय्वग्न्युत्पत्तिलक्षणंध्यानंदधारचकार अनेकार्थत्वाद्धात्‌ नाम् । दक्षरुषेत्यनेनात्महत्यादोषंमार्ष्टि ३

आशुतावदित्यत्र आशुतद्व्यहमितिपाठान्तरम् ।

SGDF
Sri Gangeshwari Digital Foundation

ननुवाय्वग्निध्यानेदेहत्यागानंतरंचेदुत्क्रांतस्यवायोरनावृत्तेरग्निसंयोगाभावेनाभीष्टकार्यानुत्पत्तिः पूर्वंचेदात्मनोपिनाशसंभवात्सचानुपपन्नश्चेतनस्यनित्यत्वेनानाशादिसाशंक्यसमसमयत्वेनोपपत्तेरि
तिभावेनाह ततइति । ततोवाय्वग्निधारणानंतरंसासतीज्ञानोपदेष्टृत्वेनजगतांगुरोराचार्यस्यस्वभर्तुःशिवस्यचरणयोर्ध्यानेनोत्पन्नानंदलक्षणमासवंमधुचिंतयत्यास्वादयंतीअपरंतस्मादन्यंनाचिंतयती
चशब्दात्परं।विष्णवादिकंचिंतयतीस्वदेहेविष्णवादिकंददर्शदेहंचतत्याजेतिवाक्यशेषः देहत्यागस्यान्यथानुपपत्त्यासिद्धत्वादध्याहृत्यान्वीयतइत्यदोषः । रुद्रंचब्रह्मवायूचविष्णुंचैवश्रियंगिरम् उमांचिं
तयतीदेहंतत्याजान्यंनचास्मरदितिवचनाच्चाध्याहारःप्रामाणिकइतिप्रतीयते । ततइत्यनुवर्तते ततोदेहत्यागानंतरंसद्यस्तत्क्षणएवपादादिक्रमेणैवसमाधिजाताग्निनादेहःप्रजज्वालअनेनमृतदेहसं
स्कारोपिनपित्रादिनाकार्यइतिध्वनयति । हतकल्मषेत्यनेनविष्ण्वादिदर्शनानंतरंपितृकोपनिमित्तकिल्बिषमपिनष्टमितिसूचयति । यद्वा दर्शनस्यानन्यथात्वंचोत्यते दोषादन्यथाज्ञानंजायतेनचास्याः
सोस्तीत्यर्थः ४ एवंजगत्सुंदरदेहत्यागेकस्याप्यंतःकरणेखेदोनाभूत्किंतत्राह तत्पश्यतामिति ५ किमनेनसिद्धानुवादेनएकत्रदोषानारोपणेनेतितत्राह अहोइति । अनात्म्यंमूर्खकर्म अहोत्वनार्यमिति
पाठेअन्याय्यमित्यर्थः । चराचराःप्रजायस्यवशे । यस्यसंततिप्रसूताइतिवा ६ ननुकथमेतदनार्यमभूदित्याशंक्यतस्यलोकविद्विष्टफलदर्शनादित्याह सोयमिति यएतादृशमनार्यमकार्षीत्सोयंदुर्मर्षहृ

ततःस्वभर्तुश्चरणांबुजासवंजगद्गुरोश्चिंतयतीनचापरम् ॥ ददर्शदेहेहतकल्मषासतीसद्यःप्रजज्वालसमाधिजाग्निना ४ तत्पश्यतांखेभुविचाद्भुतंमहद्धाहा
हेतिवादःसुमहानजायत ॥ हंतप्रियादैवतमस्यदेवीजहावसूनकेनसतीप्रकोपिता ५ अहोत्वनात्म्यंमहदस्यपश्यतप्रजापतेर्यस्यचराचराःप्रजाः ॥ जहा
वसून्यद्विमतात्मजासतीमनस्विनीमानमभीक्ष्णमर्हती ६ सोयंदुर्मर्षहृदयोब्रह्मबंधुर्लोकेपकीर्तिंमहतीमवाप्स्यति ॥ यदंगजांस्वांपुरुषद्विडुद्यतांनप्रत्यषे
धन्मृतयेपराधतः ७ दक्षस्तुदृष्ट्वादुहितुःस्वनिमित्तंविनाशनम् ॥ बह्वतप्यतघोरेणमयाऽसाधुकृतंबत ८ धिङ्मामविजितात्मानंनिर्गुणंनिरपत्रपम् ॥ योहं
स्वीकृत्यमृतकंव्यर्थमेनोमहीयसि ९ वदत्येवमजेसत्यादृक्षाऽसुत्यागमद्भुतम् ॥ दक्षंतुपार्षदाहंतुमुदतिष्ठन्नुदायुधाः १० तेषामापततांवेगंनिशाम्यभग
वान्भृगुः ॥ यज्ञघ्नघ्नेनयजुषादक्षिणाग्नौजुहावह ११ अध्वर्युणाहूयमानेदेवाउत्पेतुरोजसा ॥ ऋभवोनामतपसासोमंप्राप्ताःसहस्रशः १२ तैरलातायुधैः
सर्वेप्रमथाःसहगुह्यकाः ॥ हन्यमानादिशोभेजुरुशद्भिर्ब्रह्मतेजसा ॥ १३ ॥ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेसतीदेहोत्सर्गःपंचमोध्यायः ॥ ५ ॥

दयोदुःसहहृदयःअतएवब्रह्मबंधुर्द्विजाधमो ब्राह्मणानांमृदुहृदयत्वात् अथोअद्यप्रभृति । तस्मादितिहेत्वर्थोवा (?) यद्यस्मादित्यनेनसंबध्यते पुरुषंशिवंद्वेष्टीतिपुरुषद्विट् तत्पुरुषायेतिश्रुतेः । अनेन
विष्णुद्वेषमपिध्वनयति पुरुषोविष्णुरुच्यतइतिश्रुतेः । मृतयेमरणायोद्यतांप्रयतमानाम् ७ शिवद्वेषग्रहग्रस्तोदक्षोपुत्रीमरणंदृष्ट्वाकिमकृतेतितत्राह दक्षस्त्विति ८ निर्गुणंशमादिगुणहीनं । मृतकंदेहं
महीयसिमहादेवे । एनोपराधमकार्षमित्यन्वयः ९ सहमरणयोग्याभूतगणास्तदाकिमकार्षुरितितत्राह वदतीति । अजेदक्षे । सत्यादेव्याः । असुत्यागंप्राणवियोगलक्षणम् १० दक्षादपिभृगोःशिवे
द्वेषोमहानितिभावेनभूतगणशक्तिह्रासोपायंहोमंवक्ति तेषामितियज्ञघ्नायेयज्ञविनाशकास्तान्हंतीतियज्ञघ्नघ्नस्तेनयजुषा । येनोरसिदुस्तरितासोहन्मतासोअनृतंवयंतः तेषांवपुष्यर्चिषाजातवेदःशुष्कंनवृ
क्षमुतसंदहस्वेत्यादियजुर्मंत्रेण ११ ततःकिमभूदत्राह अध्वर्युणेति । सोमंसोमभागम् १२ अत्रब्राह्मणशक्तिरेवबलीयसीतिध्वनयन्नेतैर्देवैर्भूतगणानांपराभवंवक्ति तैरिति । अलातान्युल्मुकान्येवा
युधानियेषांतेतथोक्तास्तैः । ब्रह्मतेजसाभृगुमंत्रप्रभावेन । उशद्भिर्भृगोःसंकल्पंकर्तुमिच्छद्भिरित्यर्थः १३ ॥ ॥ इतिचतुर्थस्कंधेपंचमोऽध्यायः ॥ ५ ॥

SGF

विष्णुद्वेषवत्तद्भक्तद्वेषस्याप्यनर्थहेतुत्वान्मुमुक्षुणासनकर्तव्यइतिज्ञाप्यतेस्मिन्नध्याये । तत्रादौनारदश्रुतभवानीमरणाद्भवाद्वीरभद्रोत्पत्तिंवक्तुमाह भवइति । प्रजापतेरवमानेनाऽसत्कृतायाधिकृताया स्तस्यदक्षस्याध्वरस्येशत्तइतितदध्वरेशाभृग्वादयस्तैः । तदध्वरंयजंतइतितदध्वरेजःतैस्तदध्वरेड्भिरितिवापाठः क्विप्संप्रसारणंच १ क्रोधफलमाह क्रुद्धइति सुदष्टेओष्ठपुटेयस्यसतथा धूता जटाअस्यसंतीतिधूर्जटिः मत्वर्थेक्विप्प्रत्ययः । तडिद्वह्निसटा वैद्युताग्निज्वाला तद्वदुग्रंरोचिर्यस्याःसातथातां । रौद्रोमध्याह्नातपइवतीक्ष्णः । आतपःकथ्यतेरौद्रइतिहलायुधः २ साजटाकि मभूदितितत्राह ततइति ततोजटायाःकश्चित्पुरुषोभूदितिशेषः । तनुवातन्वाशरीरेण । घनरक्तःसांद्रारुणःसूर्यस्तद्वद्रक्ताद्दशोयस्यसतथा । कपालानांमालासमूहोऽस्यास्तीतिकपालमाली ३ यदर्थ मसावुत्पन्नस्तत्कृत्यमाह तंकिमिति हेरुद्र । मद्भटानामग्रणीत्वेहेतुर्मेजटांशकइति । अनेनजटायाआत्मत्वंसूचयति ४ नमस्तेरुद्रमन्यवइतिश्रुतेर्मन्युनामहादेवेन युयुत्सूनांयोधानांवीरस्वभावंव क्ति मेनइति यदासोन्यासाध्यकर्मसाधनार्थमुपदिष्टस्तदात्मानंस्वमसंगरंहसंक्राप्यसक्तवेगंमहीयसांसहनशक्तिमत्तराणांसहःसहनशक्तिस्तांसहिष्णुंसहनशीलंमेनइत्यन्वयः ५ यद्यात्राविक्रमएवलोक

मैत्रेयउवाच ॥ भवोभवान्यानिधनंप्रजापतेरसत्कृतायाह्यवगम्यनारदात् ॥ स्वपार्षदसैन्यंचतदध्वरेशौर्विद्रावितंक्रोधमपारमादधे १ क्रुद्धःसुदष्टो ष्ठपुटःसधूर्जटिर्जटांतडिद्वह्निसटोग्ररोचिषम् ॥ उत्कृत्यरौद्रःसहसोत्थितोहसन्गंभीरनादोविससर्जतांभुवि २ ततोऽतिकायस्तनुवास्पृशन्दिवंस हस्रबाहुर्घनरुक्त्रिसूर्यदृक् ॥ करालदंष्ट्रोज्ज्वलदग्निमूर्धजःकपालमालीविविधोद्यतायुधः ३ तंकिंकरोमीतिगृणंतमाहबद्धांजलिंभगवान्भूतनाथः ॥ दक्षंसय ज्ञंजहिमद्भटानांत्वमग्रणीरुद्रजटांशकोमे ४ आज्ञप्तएवंकुपितेनमन्युनासदेवदेवंपरिचक्रमेविभुम् ॥ मेनेतदात्मानमसंगरंहसंमहीयसांतातसहःसहिष्णुम् अन्वीयमानःसतुरुद्रपार्षदैर्भृशंनदद्भिर्व्यनदत्सुभैरवम् ॥ उद्यम्यशूलंजगदंतकांतकंसंप्राद्रवद्धोषणभूषणांघ्रिः ६ अथर्त्विजोयजमानःसदस्याः ककुभ्युदीच्यांप्रसमीक्ष्यरेणुम् ॥ तमःकिमेतत्कुतएतद्रजोभूदितिद्विजाद्विजपत्न्यश्चदध्युः ७ वातानवांतिनहिसंतिदस्यवःप्राचीनबर्हिर्जीवतिहोग्रदंडः॥ गावोनकाल्यंतइदंकुतोरजोलोकोऽधुनाकिंप्रलयायकल्पते ॥ ८ ॥ प्रसूतिमिश्राःस्त्रियउद्विग्नचित्ताऊचुर्विपाकोवृजिनस्यैवतस्य ॥ यत्पश्यंतीनांदु हितॄणांप्रजेशःसुतांसतीमवदध्यावनागसम् ९

स्योद्वेगजनकःकिमुतत्तद्युद्धविक्रमइतिभावेनतद्यात्राप्रभावंवक्ति अन्वीयमानइति यथासुष्ठुभैरवंभयंकरंभवतितथाव्यनदत् जगदंतकोजगन्मृत्युस्तस्याप्यंतकंसंहर्तृंघोषणंशब्दनशीलंभूषणंनूपुरलक्षण मंघ्रौयस्यसतथा ६ असौवीरभद्रोयज्ञवाटनिकटमापादितिवार्तापुरोगामिनीतत्सेनाधूलिरेवव्यनक्तीतिभावेनऋत्विगादीनांधूलिदर्शनेनजिज्ञासाप्रकारंवक्ति अथेति उदीच्यांककुभिदिशि । ऋत्विजोयज्ञ प्रवर्तकाः । यजमानोयज्ञेदीक्षितः । सभास्थानेस्थित्वामंत्रतंत्रकर्महविर्देवताग्निसंबधंविवेचयंतःसदस्याः ७ नकेवलंदध्युरभिदध्युश्चेत्याह वाताइति चोराणामभावेनिमित्तमाह प्राचीनबर्हिरि ति । उग्रोदंडोयस्य । उग्रेषुदंडोयस्येतिवासउग्रदंडः प्राचीनबर्हिर्नामतत्कालभवोराजा । जीवतिसप्राणोवर्ततइत्यन्वयः । हेत्यनेनतज्जीवनंसर्वेषांसिद्धमितिव्यनक्ति ८ तत्रकेचिद्दक्षभयात्कारणंजानं तोपितूष्णीमासंस्तद्भयहीनाःप्रसूतिमुख्याःकारणमूचुश्चेत्याह प्रसूतिमिश्राइति । मिश्रशब्दोमुख्यार्थेवर्तते । प्रजेशोदक्षोदुहितॄणांप्रपश्यंतीनांसतीनामनागसमनपराधांनाम्नासतींसुतामवदध्यौअवज्ञा तवानितियद्यस्मात्तस्माद्वृजिनस्यपापस्यविपाकःफलमेवेत्यन्वयः ९

SGDF
Sri Gargeshwari Digital Foundation

सत्यवज्ञानोत्पन्नपरमेश्वरकोपादियमनर्थद्योतिनीधूलिरितिभावेनसदाशिवमाहात्म्यंवदंतीत्याह यस्त्ववत्ति । व्युप्तजटाकलापःप्रसारितजटासमूहः । वितत्यविस्तृत्यबाहूनितिशेषः । उदितान्यस्त्राणि धनुरादीनियेषुतेउदितास्त्रादोषोभुजाएवध्वजादोर्ध्वजायस्यसतथोक्तःरूक्षाट्टहासःकठोरासिंहनादःसएवस्तनयित्नुःप्रलयकालीनमेघनादस्तेनभिन्नाविद्राविताादिशोयस्यसतथोक्तः । भिन्नदृगितिपाठेस्त नयित्नुवन्मेघवद्भिन्नाव्यक्ताहग्यस्यसतथेत्यर्थः १० अनेनप्रकृतेकिंतत्राह अमर्षयित्वेति । एवंविधंतंशिवममर्षयित्वा । विधातुर्दक्षस्यस्वस्तिस्यात्किं । नस्यादेवेत्यन्वयः । दंष्ट्राप्रभाभिरुदस्तोनिरस्तो भागणोनक्षत्रगणोयस्यसतथोक्तस्तम् ११ नकेवलंतर्कतोदक्षस्यैष्यदरिष्टंज्ञायतेकिंतुदुर्निमित्तैरपीत्याह बह्वेवमिति किंबहुनापर्यक्सर्वतोदिक्षु १२ उत्पातानांक्षिप्रंप्रत्यक्षफलमभूदित्याह ता वदिति यावदुत्पाताउत्पन्नास्तावत्कालक्षेपमंतरेणसमहान्मखोरुद्रानुचरैरन्वरुध्यतइत्यन्वयः ॥ नानाविधत्वमेवस्पष्टीक्रियते वामनकैरित्यादिना वामनकैर्ह्रस्वैर्ह्रस्वशिरोभिश्च पिंगैःकपिलैःपिशंगैर्ह

यस्त्वंतकालेव्युप्तजटाकलापःस्वशूलसूच्यर्पितदिग्गजेंद्रः ॥ वितत्यनृत्यत्युदितास्त्रदोर्ध्वजोरूक्षाट्टहासस्तनयित्नुभिन्नदृक् १० अमर्षयित्वातमसह्यते जसंमन्युप्लुतंदुर्विषहंभ्रुकुट्या ॥ करालदंष्ट्राभिरुदस्तभागणंस्यात्स्वस्तिकिंकोपयतोविधातुः ११ बह्वेवमुद्विग्नदृशोच्यमानेजनेनदक्षस्यमखेमहात्मनः ॥ उत्पेतुरुत्पाततमाःसहस्रशोभयावहादिविभूमौचपर्यक् १२ तावत्सरुद्रानुचरैर्मखोमहान्नानाविधैर्वामनकैरुदायुधैः ॥ पिंगैःपिशंगैर्मकरोदराननैःप र्याद्रवद्भिर्विदुरान्वरुध्यत १३ केचिद्बभंजुःप्राग्वंशंपत्नीशालांतथापरे ॥ सदआग्नीध्रशालांचतद्विहारंमहानसम् १४ रुरुजुर्यज्ञपात्राणितथैकेग्नीननाश यन् ॥ कुंडेष्वमूत्रयन्केचिद्बिभिदुर्वेदिमेखलाः १५ अबाधंतमुनीनन्यएकेपत्नीरतर्जयन् ॥ अपरेजगृहुर्देवान्प्रत्यासन्नान्पलायितान् १६ भृ गुंबबंधमणिमान्वीरभद्रःप्रजापतिम् ॥ चंडीशःपूषणंदेवंभगंनंदीश्वरोग्रहीत् १७ सर्वएवर्त्विजोदृष्ट्वासदस्याःसदिवौकसः ॥ तैरर्द्यमानाःसुभृशंग्राव भिर्नैकधाद्रवन् १८ जुह्वतःस्रुवहस्तस्यश्मश्रूणिभगवान्भवः ॥ भृगोर्लुलुंचेसदसियोहसत्श्मश्रुदर्शयन् १९ भगस्यनेत्रेभगवान्पातितस्यरुषाभु वि ॥ उज्जहारसदस्थोक्ष्णायःशपंतमसूचयत् २० पूष्णश्चापातयद्दंतान्कालिंगस्ययथाबलः ॥ शप्यमानेगरिमणियोहसद्दर्शयन्दतः २१ आक्रम्योर सिदक्षस्यशितधारेणहेतिना ॥ छिंदन्नपितदुद्धर्तुंनाशक्नोत्त्र्यंबकस्तदा २२

रिद्रावर्णैर्मकरवदुदरमाननंचयेषांतेतथोक्तास्तैःपर्याद्रवद्भिरितस्ततउत्पतद्भिः १३ तत्रतत्रस्वस्वानुकूलंरोधंचक्रुरित्युक्तंविशिनष्टि केचिदिति । प्राग्वंशमग्निहोत्रस्थानम् । यज्ञशालायाःपूर्वपश्चिमस्तं भयोरुपर्यवांतरवंशालंबनंपूर्वपश्चिमायतंदारुवाप्राग्वंशस्तं यज्ञशालायाःपश्चिमतः पत्नीशाला । यज्ञशालायाःपुरतोमंडपःसदः । मंडपतःपुरतोहविर्धानी । तस्योत्तरतःशालाग्नीध्रशाला पशु विशसनस्थानं । तस्याग्नीध्रस्याग्निस्थानंविहारः । महानसंपचनस्थानम् १४ रुरुजुःरुजोभंगइतिधातुः वेदिमेखलाउत्तरवेदिसीमासूत्राणि १५ १६ मणिमान्कश्चिद्गणनाथः प्रजापतिंदक्षम् । चंडीशश्चंडेश्वरः १७ सर्वेप्येवमेवनिगृहीताःकिंनेत्याह सर्वएवेति १८ भवोवीरभद्रःलुलुंचेउत्पाटयामास । लुञ्चछेदनइतिधातुः । अनेनकोपराधःकृतइतितत्राह सदसीति विश्वसृजांसदसि १९ अत्रवीरभद्रःस्वापराधानुकूलंदंडंकरोतिसर्वेषामित्याह भगस्येति २० कलिंगस्यदंतवक्रस्यद्यूते बलोबलभद्रः । भृगुणा गरिमणिज्ञानोपदेष्टृत्वेनगुरुतमेशिवेशप्यमानेसति यःपूषादतःदंतान्दर्शयन्न हसत्तस्य २१ वीरभद्रोदक्षंबद्धाकिमकरोदितितत्राह आक्रम्येति । शितधारेणतीक्ष्णाग्रेण त्रीणिअंबकानिनेत्राणियस्य २२

२३ ज्ञानफलमाह दृष्ट्वेति मखेपशूनांसंज्ञपनेहिंसनेयोगंमंत्रपूर्वकोपायं यजमानएवपशुस्तस्य तेनयोगेन २४ अयंहिविक्रमउभयेषामुभयथांतःकरणवृत्तिमकार्षीदित्याह साधुवादइतिअन्येषांदक्षप
क्षिणाम् २५ मंत्रादिशक्त्यैताच्छिरःसंधानमपिनकार्यमितिभावेनशिरश्छेदोत्तराक्रियांवक्ति जुहावेति । ततःपरंकिमकारीदितितंत्राह तद्देवयजनामिति देवयजनंयज्ञंदग्ध्वाविनाश्यगुह्यकालयंकैलासंप्रा
तिष्ठत्प्रायादिति । अत्रत्र्यंबकोहरःपशुपतिरितिविशेषनामनिर्देशात्किंचनतात्पर्यमस्तीतिध्वनयाति पूर्वंवीरभद्रेणस्वेनरूपेणगत्वायज्ञशालादिकंभंक्त्वा पश्चान्मूलरूपेणगत्वादक्षमवधीत् । तत्राप्युपेंद्रेण
हारिणाधर्मपुत्रेणहारिणाचजितःशिवोन्यांस्तत्रास्थितान् जित्वाकैलासमगमदिति । तदुक्तं वीरभद्राख्यरूपेणस्वेनपूर्वंययौहरः मूलरूपेणपश्चात्तुगत्वादक्षमथावधीत् तत्रोपेंद्रेणहारिणाजितोधर्मात्मजे
नच अन्यान्जिगायप्रययौकैलासंस्वंनिकेतनमिति २६ ॥ ॥ इतिश्रीभागवतेचतुर्थस्कंधेवि०कृ०टी०षष्ठोध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ भगवदपरोक्षीकरणायतत्प्रसादवत्स्वोत्तमभक्त्युत्कर्ष
तारतम्येनतदनुग्रहोप्यापाद्यइत्याभिप्रायोवर्ण्यतेस्मिन्नध्याये । तत्रसर्वभक्तोत्तममहादेवप्रसादापादनायदेवानांब्रह्माणंप्राप्यस्वसंकटविज्ञापनप्रकारःकथ्यते अथदेवगणाइत्यादिना रुद्रस्यानीकैःसैन्यैः
पार्षदैरित्यर्थः १ एतद्वृत्तम् २ ननुविष्णुब्रह्मणोर्यज्ञागतेरावश्यकत्वेनतत्स्थितौयज्ञविनाशोब्रह्माणंगत्वादेवविज्ञापनंचकथंयुक्तं अग्नावैष्णवंपुरोडाशंनिर्वपाति प्रजापतेनत्वदेतान्यन्येत्यादिश्रुतेरित्यत

शस्त्रैरस्त्रान्वितैरेनमनिर्भिन्नत्वचंहरः ॥ विस्मयंपरमापन्नोदध्यौपशुपतिश्चिरम् २३ दृष्ट्वासंज्ञपनेयोगंपशूनांसपतिर्मखे ॥ यजमानपशोःकस्यकायात्ते
नाहरच्छिरः २४ साधुवादस्तदातेषांकर्मतत्तस्यशंसतां ॥ भूतप्रेतपिशाचानामन्येषांतद्विपर्ययः २५ जुहावैतच्छिरस्तस्यदक्षिणाग्नावमर्षितः ॥ तद्देव
यजनंदग्ध्वाप्रातिष्ठद्गुह्यकालयम् २६ ॥ ॥ इतिश्रीभागवतेचतुर्थस्कंधेषष्ठोध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ मैत्रेयउवाच ॥ अथदेवगणाःसर्वेरुद्रानीकैःपरा
जिताः ॥ शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः १ संछिन्नभिन्नसर्वांगाःसर्त्विक्सभ्याःसमाकुलाः ॥ स्वयंभुवेनमस्कृत्यकार्त्स्न्येनैतन्न्यवेदयन् २ उपलभ्य
पुरैवैतद्भगवानब्जसंभवः ॥ नारायणश्चविश्वात्मानकस्याध्वरमीयतुः ३ तदाकर्ण्यविभुःप्राहतेजीयसिकृतागसां ॥ क्षेमायभूयसेभूयान्नप्रायेणबुभूषताम्
४ अथापियूयंकृतकिल्बिषाभवेयेबर्हिषोभागभाजंपरादुः ॥ प्रसादयध्वंपरिशुद्धचेतसाक्षिप्रप्रसादंप्रगृहीतांघ्रिपद्माः ५ आशासानाजीवितमध्वरस्यलो
कःसपालःकुपितेनयस्मिन् ॥ तमाशुदेवंप्रिययाविहीनंक्षमापयध्वंहृदिविद्धंदुरुक्तैः ६

आह उपलभ्येति । एतद्भाविकार्यंपुरैवोपलभ्यज्ञात्वाब्जसंभवोब्रह्माविश्वात्माविश्वांतर्यामीत्रिमूर्तिगेनरूपेणनारायणश्चकस्यदक्षस्याध्वरंनेयतुर्नजग्मतुरित्यन्वयः अतोविष्णुब्रह्मणोस्तत्रानवस्थानाद्यज्ञविनाशोदेवानांब्रह्माणंगत्वाविज्ञापनंचयुज्यतइतिभावः ३ विज्ञापितंसंकटंश्रु
त्वाब्रह्मणाशिक्षाकरंवाक्यमवादीत्याह तदेति । तेजीयासिबलिष्ठेपुंसि । विष्णुवायूविनाइत्यतःप्रायेणेत्युक्तम् ४ तर्हितूष्णींभावोऽस्माकंकिमुपायांतरंवाज्ञापयसीतितत्राह अथापीति । बर्हिषोयज्ञस्य
भागंस्वविहितांशंभजतीतिभागभाक् तंपराकृत्यान्यस्माअदुरित्यर्थः । अथापिकृतापराधानामपियुष्माकं शिवप्रसादनमेवोपायइत्युक्तंभवति । प्रसादनेकिंसाधनमित्यतउक्तं परिशुद्धेति । राहुग्रस्तचं
द्रमंडलवच्चेतसएकस्मिन्नर्थेविकल्मषत्वंनस्यादितिपरीत्युक्तं नकेवलंचेतोनैर्मल्यमलंकिंतुकर्मचापेक्षितमित्याह प्रगृहीतेति । प्रगृहीतेअंघ्रिपद्मेयैस्तेतथोक्ताः ५ नकेवलंकालांतरभाविनःश्रेयसःसाधनं
तत्प्रसादनं किंत्वद्यतनस्यापीतिभावेनाह आशासानाइति । अध्वरस्यजीवितंपुनरनुसंधानलक्षणंजीवनमाशासानाआकांक्षमाणायूयम् दक्षदुर्वचनमेवनकारणमीश्वरस्यकोपस्यकारणांतरमप्यस्तीति
भावेनोक्तं प्रिययेति । नतत्कोपेनपरमध्वरस्यविनाशोऽपितुसपालस्यलोकस्यापीत्यतस्तदकरणाद्भवःप्रसादेनशांतोभवतिक्षिप्रप्रसादमेतितत्स्वभावादितिभावेनोक्तं लोकइति ६

बुभूषुणाविष्णुद्वेषवत्तस्यहरेर्मनोनुसारितयावर्तमानस्यश्रीकंठस्यद्वेषःकर्तुनयोग्यइत्याशयेनाह नाहमिति । अहंब्रह्मशर्मायस्यविष्णोस्तत्त्वं बलवीर्ययोरित्युपलक्षणंज्ञानादिगुणानांचप्रमाणंपरिमाणं
नवेद्मितथायज्ञइंद्रोऽपिनवेत्ति तथायूयंनवित्थ तथान्येप्रजापत्यादयोयेचदेहभाजःशरीरिणोमुनयः सनकादयश्चनविदुरित्यन्वयः। तस्यविष्णोरात्मनोमनसस्तंत्रस्यवशस्यरुद्रस्यकःपुमानपराधमु
च्चैर्विधित्सेत्कर्तुमिच्छेत् नकोपिबुभूषुरित्यर्थः । यज्ञोयज्ञपत्यादयश्चनविदुरित्यन्वयः। यज्ञोयज्ञपतिस्त्विंद्रःपुरुहूतःपुरुष्टुत इत्यभिधानादिंद्रएवात्रयज्ञशब्दार्थः । नाहंनेंद्रोनचैवान्येयत्तत्त्वंनविदुःपरं
। तस्यविष्णोर्वशोरुद्रोममवायोरथापिवा । नान्यस्यकस्यचित्पुंसस्तस्येत्थंवःकुतःकृतमितिवचनात् । स्मृतिसमाख्यानाच्च नयज्ञोविष्णुर्ममवायोरथापिवेत्यनेनात्मनोब्रह्मणोवायोश्चतंत्रस्येत्ययमर्थोपि
ध्वनितइतिज्ञायते उदित्यनेनसंसारनदीमुत्तर्तुकामैःशिवद्वेषोनकर्तव्यइतिसूचयति मोक्षस्याशिवाद्युपदिष्टज्ञानापेक्षितत्वात् । तदुक्तं मुमुक्षवोब्रह्मगश्चाशिवादिंद्रादिभिस्तथा श्रुत्वाज्ञानंपरंगुह्यंमुच्यंते
ब्रह्मणासहेति ७ मयासहगतंचेदेतेषांदेवानांएषशिवःक्षिप्रप्रसादोभविष्यतीतिमहादयालोर्ब्रह्मणःकैलासंप्रतियात्रांवक्ति सइत्थमिति । अजोब्रह्मा पुरद्विषःप्रियं कैलासोगिरिशोमृड इत्यभिधानात् ।
तस्यनिवासइतिविग्रहेयथाविहिताण्प्रत्ययेनकैलासइतिरूपंसिध्यति ८ कंटकगुल्मखंडैरप्रवेशस्यगंडशैलादिपाषाणैरनारोहस्याचलस्यकिंमाहात्म्याद्रुद्रप्रियत्वमित्यतस्तंपर्वतंचतुर्दशभिःश्लोकै

नाहंनयज्ञोनचयूयमन्येयेदेहभाजोमुनयश्चतत्त्वम् ॥ विदुःप्रमाणंबलवीर्ययोर्वातस्यात्मतंत्रस्यकउद्विधित्सेत् ७ सइत्थमादिश्यसुरानजस्तुतैःसमन्वि
तःपितृभिःसप्रजेशैः ॥ ययौस्वधिष्ण्यान्निलयंपुरद्विषःकैलासमद्रिप्रवरंप्रियंप्रभोः ८ जन्मौषधतपोमंत्रयोगसिद्धैर्नरेतरैः ॥ जुष्टंकिन्नरगंधर्वैरप्सरोभि
र्वृतंसदा ९ नानामणिमयैःशृंगैर्नानाधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः १० नानामलप्रस्रवणैर्नानाकंदरसानुभिः ॥ रमणं
विहरंतीनांरमणैःसिद्धयोषिताम् ११ मयूरकेकाभिरुतंमदांधालिविमूर्च्छितम् ॥ प्लावितैरक्तकंठानांकूजितैश्चपतत्रिणाम् १२ आह्वयंतमिवोद्धस्तै
र्द्विजैःकामदुघैर्द्रुमैः ॥ व्रजंतमिवमातंगैर्गृणंतमिवनिर्झरैः १३ मंदारैःपारिजातैश्चसरलैश्चोपशोभितम् ॥ तमालैःसालतालैश्चकोविदारासनार्जुनैः
१४ चूतैःकदंबनीपैश्चनागपुन्नागचंपकैः ॥ पाटलाशोकबकुलैःकुंदैःकुरबकैरपि १५ सुवर्णशतपत्रैश्चवीररेणुकजातिभिः ॥ कुब्जकैर्मल्लिकाभि
श्चमाधवीभिश्चमंडितम् १६

वर्णयति जन्मेत्यादिना । नरेतरैर्नरत्वजातिरहितैर्जन्मनाविशिष्टकुलोत्पत्त्याकृष्णचित्रकाद्योषधेन
कृच्छ्रचांद्रायणादितपसाऽष्टांगलक्षणयोगेनमृत्युंजयादिमंत्रेणएतैः सिद्धैरमरत्वादिसिद्धिंगतैर्जुष्टमित्यनेनसुखसाधनत्वंध्वनयति नरेतरैःकिन्नरगंधर्वैर्जुष्टमप्सरोभिर्वृतमितिवा ९ मनःशिलादिनानाविध
धातुभिर्विचित्रितैश्चित्राकारंगमितैरितिशृंगविशेषणं नानामृगगणावृतैः नानाद्रुमादिभिश्चवृतं १० निर्झरःप्रस्रवोंभसामितिहलायुधः।जलस्यनानात्वंमरकतादिस्थलसंपर्कात्कर्दमराहित्येनामलत्वम् । न
तुशौक्ल्येन। तथात्वेनानात्वंविरुद्धं । कंदरागुहाः। सानूनितटाकानि। रमणैःसहविहरंतीनांसिद्धयोषितांरमणंरतिप्रदम् ११ मयूरकेकाभिरुतंशब्दितंविमूर्च्छितंविविधंगीतं रक्तकंठानांकोकिलानांप्लावितैः
तारस्वरितैरन्येषांपतत्रिणांकूजितैरुतैः १२ किंचपक्षिग्राहकैःपुरुषैरुद्धस्तैरुद्धृत्तैर्द्विजैःकरणैःकामंदुहद्भिर्द्रुमैराह्वयंतमिवस्थितम् १३ पारिजातैःपारिभद्रकैःसरलैर्देवदारुभिःसालतालैःसर्ज्जतृणराजैः
कोविदारैःकांचनारकैःअसनैःपिशंगपुष्पैःअर्जुनैःककुभैः १४ नागैर्नागकेसरैः पुन्नागैःसुरवल्लभैःकुरबकैस्तिलकैः १५ सुवर्णःकृतमालः वीरःकरवीरः रेणुकंकेतकी कुब्जकैःकुंकुमतरुभिः माधवीवासंती
अत्रसंस्कृताधिकारित्वात्पर्यायांतरमेवलिख्यते नानात्वेनापभ्रंशानांतैर्बोधनंनशक्यते १६

हिंगूरामठः भूर्जैर्भूर्जपत्रैः ओषधीभिर्जनवृक्षैः १७ काश्मरीकृष्णवृत्तिकः आम्रातकोविडुलः आम्रोजिह्वारसकरः प्रियालोलवंगःधनुर्वा मधुकोमधुकरसः इंगुदःकिंगुदकः तापसतरुर्वा
१८ १९ शाखामृगैर्वानरैः क्रोडैर्वराहैः ऋक्षैर्भल्लुकैः शल्यकःकंटकवराहः गवयावनगावः शरभोऽष्टापदः रुरुर्हरिणेषुमहान् २० कर्णौमोकर्णःकर्णविहीनोवा कर्णःकर्णविहीनःस्यादंडस्तुच्छि
न्नपुच्छकइतियादवः कर्णाश्चऔर्णाश्चएकपादाश्चाश्वास्याश्चकर्णौर्णैकपदाश्वास्यास्तैः । और्णादयोपिमृगविशेषाः। मृगनाभिभिः कस्तूरिकामृगैः । कदलीखंडेनसंरुद्धस्यसंवृतस्य नलिनीपुलिन
स्यपद्माकरसिकतामयोच्चस्थलस्यश्रीर्यस्मिन्सतथातम् २१ नंदयागंगाशाखयानचापर्यस्तंपरिवृतं भूतेशगिरिं श्रीकैलासम् २२ तत्रकैलासेपुनःकिंचित्रमपश्यन्नितितत्राह दद्दशुरिति । तन्नामसौगंधि
कंनाम २३ अलकायाबाह्यतोबहिर्भागेतीर्थपादः श्रीनारायणस्तत्पादपद्मरजसामिश्रितत्वादतीवपावनेशुद्धे २४ स्वधिष्ण्यतःस्वविमानात् २५ तासांस्नानेनविभ्रष्टंसंक्रांतंकुचकुंकुमंतेनपिंजरं
पीतरक्तम् २६ तारैरजतैर्मौक्तिकैर्वाहेमभिःसुवर्णैर्महारत्नैर्माणिक्यादिभिरलंकृतानांविमानानांशतैःसंकुलांनिबिडां । कथमिवास्थितां तडितावधनेनचसहवर्तमानंखमाकाशंयथातथा २७ अलकां

पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः ॥ भूर्जैरोषधिभिःपूगैराजपूगैश्चजंबुभिः १७ खर्जूराम्रातकाम्राद्यैःप्रियालमधुकेंगुदैः ॥ द्रुमजातिभिरन्यैश्च
राजितंवेणुकीचकैः १८ कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः ॥ नलिनीषुकलंकूजत्खगवृंदोपशोभितम् १९ मृगैःशाखामृगैःक्रोडैर्मृगेंद्रैर्ऋक्षशल्य
कैः ॥ गवयैःशरभैर्व्याघ्रैरुरुभिर्महिषादिभिः २० कर्णौर्णैकपदाश्वास्यैर्निर्जुष्टंमृगनाभिभिः ॥ कदलीखंडसंरुद्धनलिनीपुलिनश्रियम् २१ पर्यस्तंनंदयासत्याः
स्नानपुण्यतमोदया ॥ विलोक्यभूतेशगिरिंविबुधाविस्मयंययुः २२ दद्दशुस्तत्रतेरम्यामलकांनामवैपुरीम् ॥ वनंसौगंधिकंचापितत्रतन्नामपंकजम्
२३ नंदाचालकनंदाचसरितौबाह्यतःपुरः ॥ तीर्थपादपदांभोजरजसातीवपावने २४ ययोःसुरस्त्रियःक्षत्तरवरुह्यस्वधिष्ण्यतः ॥ क्रीडंतिपुंसःसिंचं
त्योविगाह्यरतिकर्शिताः २५ ययोस्तत्स्नानविभ्रष्टकुचकुंकुमपिंजरम् ॥ वितृषोपिपिबंत्यंभःपाययंतोगजागजीः २६ तारहेममहारत्नविमानशतसं
कुलाम् ॥ जुष्टांपुण्यजनस्त्रीभिर्यथाखंसतडिद्घनम् २७ हित्वायक्षेश्वरपुरींवनंसौगंधिकंचतत् ॥ द्रुमैःकामदुघैर्हृद्यंचित्रमाल्यफलच्छदैः २८ रक्तकं
ठखगानीकस्वरमंडितषट्पदम् ॥ कलहंसकुलप्रेष्ठखरदंडजलाशयम् २९ वनकुंजरसंघुष्टहरिचंदनवायुना ॥ अधिपुण्यजनस्त्रीणांमुहुरुन्मथयन्मनः ३०
वैदूर्यकृतसोपानावाप्यउत्पलमालिनीः ॥ व्याप्तांकिंपुरुषैर्दृष्ट्वातआराद्ददृशुर्वटम् ३१

तःप्रवेशेतद्वैचित्र्यदर्शनेनतत्स्थजनसंलापेनकालक्षेपेणच्छिन्नदक्षदेहेनयज्ञानुसंधानंदुष्करंस्यादितिधियातांपुरींतद्वनंचदृष्ट्वाहित्वाबहिरेवगच्छंतस्तेदेवाआराद्वटंददृशुरित्यन्वयः । यक्षेश्वरपुरींहित्वात
त्सौगंधिकंचवनंदृष्ट्वासमीपेवटंददृशुरितिवा । तद्वनंविशिनष्टि द्रुमैरित्यादिना चित्राणिमाल्यानिपुष्पाणिफलानिच्छदाःपत्राणियेषुतेतथातैः २८ खरोदंडोयेषांतानितथा कलहंसकुलस्यप्रेष्ठानिप्रि
यतमानिखरदंडानिपद्मानियेषुतेतथोक्ताःतेचजलाशयाजलाधाराःकासारायस्मिंस्तत्तथोक्तम् २९ वनकुंजरैर्वनगजैःकंडूतिनिरासार्थंसंघृष्टानांनिष्पिष्टानांहरिचंदनानांरजोगंधमिश्रवायुनाऽधिकंपुण्यजन १३
स्त्रीणांमनोमुहुरुन्मथयद्विलोलयत् ३० उत्पलानांमालयासुविचंतइत्युत्पलमालिनीरुत्पलमालिन्यः वैदूर्यैःकृतानिसोपानानिकृत्रिमावतारस्थलानियासुतास्तथा एवंविधावाप्योयत्रसंतीतिशेषः तांकिं
पुरुषैर्विलासार्थंव्याप्ताम् ३१

SGLF
Sri Gangeshwar Digital Foundation

वटंविशिनष्टि सयोजनेति। सवटोयोजनानांशतमुत्सेधउन्नतिर्यस्यसतथोक्तः चतुर्द्धाविभक्तशतस्यपादश्चतुर्थांशः पंचविंशतिसंख्यातयोनारहितासंख्यापंचसप्ततिः। तावद्दीर्घैर्विटपैरायतोविस्तृतःपर्यक्रूप रितोगताकृतापूर्णाअमलाच्छायायस्यसतथानिर्गतानिनीडानिपक्षिमंदिराणियस्मात्सतथा। तापवर्जितःशीतोष्णरहितः ३२ सुरामहायोगमयेअष्टैश्वर्यस्वरूपेमुमुक्षूणांशरणेनिवासभूतेतस्मिन्वटमू लेआसीनंशिवंददृशुरित्यन्वयः ३३ सख्यावैश्रवणेन ३४ विद्याचतपश्चयोगश्चतेतथातेषांपंथामार्गस्तमास्थितमनुतिष्ठंतं। तदधीश्वरंतेषांविद्यादीनामधीश्वरंविषयमुपदेष्टारंस्वामिनंच। लोकंमंगलयतीति लोकमंगलं विश्वस्यसुहृदमनिमित्तबंधुं श्रीनारायणंवात्सल्याद्भक्तयुद्रेकाद्ध्यायंतम् ३५ संध्याभ्ररुचागौर्यालिंगनेनसंक्रांततत्कुचकुंकुमेनरक्तत्वात् स्वतोधवलत्वात्संध्याकालभवमेघवर्णेनांगेनताप साभीष्टम् भस्मचदंडश्चजटाचाऽजिनंचयस्मिंस्तथातल्लिंगंवेषं लिंगंशेफसिवेषेचचिह्नेबुद्ध्यादिसंहताविति यादवः। चंद्रस्यलेखांकलांचबिभ्रतम् भस्मोद्धर्तनेननेत्राद्यवयवानांरक्तत्वाद्वासंध्याभ्ररुचेति ३६ बृस्यांयतियोग्यासने। यतीनामासनंबृसीतिहलः। सनातनंनित्यंब्रह्मवेदतत्त्वम् ३७ दक्षिणेऊरौसव्यंपादपद्मंकृत्वासव्येजानुनिचसव्यबाहुंदक्षिणेजानुनिचदक्षिणबाहुंकृत्वा प्रकोष्ठेकराग्रेऽक्षमालायस्यसत

सयोजनशतोत्सेधःपादोनविटपायतः॥ पर्यक्कृतामलच्छायोनिर्नीडस्तापवर्जितः ३२ तस्मिन्महायोगमयेमुमुक्षुशरणेसुराः॥ ददृशुःशिवमासीनंत्य क्तामर्षमिवांतकम् ३३ सनंदनादिभिःसिद्धैःशांतैःसंशांतविग्रहम्॥ उपास्यमानंसख्याचभर्त्रागुह्यकरक्षसाम् ३४ विद्यातपोयोगपथमास्थितंतदधीश्व रम्॥ ध्यायंतंविश्वसुहृदंवात्सल्याल्लोकमंगलम् ३५ लिंगंचतापसाभीष्टंभस्मदंडजटाजिनम्॥ अंगेनसंध्याभ्ररुचाचंद्रलेखांचबिभ्रतम् ३६ उपविष्टंदर्भ मय्यांबृस्यांब्रह्मसनातनम्॥ नारदायप्रवोचंतंपृच्छतेशृण्वतांसताम् ३७ कृत्वोरौदक्षिणेसव्यंपादपद्मंचजानुनि॥ बाहुंप्रकोष्ठेक्षमालमासीनंतर्कमुद्रया ३८ तंब्रह्मनिर्वाणसमाधिमास्थितंव्यपाश्रितंगिरिशंयोगकक्ष्याम्॥ सलोकपालामुनयोमनूनामाद्यंमनुंप्रांजलयःप्रणेमुः ३९ सतूपलभ्यागतमा त्मयोनिंसुरासुरेशैरभिवंदितांघ्रिः॥ उत्थायचक्रेशिरसाभिवंदनमर्हत्तमोकस्ययथैवविष्णोः ४० तथापरेसिद्धगणामहर्षिभिर्येवैसमंतादनुनीललोहितम् नमस्कृतःप्राहशशांकशेखरंकृतप्रणामंप्रहसन्निवात्मभूः ४१

थातम् तर्कमुद्रयाज्ञानमुद्रयासीनम् ३८ एवंविधंशिवंदृष्ट्वाकिंचक्रुरितितत्राह तंब्रह्मेति। मनूनांमननशीलानामुपासकानामाद्यंमनुं। ब्रह्मविषयेयोनिर्वाणसमाधिः शरीराभिमानत्यागलक्षणाचित्तैकाग्र ताताहृशीमवस्थामाश्रितम्। योगकक्ष्यां योगपट्टिकाम् ३९ सर्वेषुप्रणमत्सुसत्सुब्रह्माकिमकार्षीदित्याशंक्यपितृत्वाद्गुणज्येष्ठत्वात्गुरुत्वाद्धरेःश्रेष्ठत्वाच्चाभ्येत्यशिवशर्माहमभिवादयामीत्यभिवा द्यशिवोब्रह्माणंनमतीत्याह सतूपलभ्येति शिरसेत्यनेनाष्टांगविशिष्टांनतिंध्वनयति। नतिंविशिनष्टि यथेति। यथाविष्णोरष्टांगविशिष्टत्वननमनंकरोतितथेत्यर्थः। सर्ववंद्यसूर्यादपितेजिष्ठेनरु द्रेणप्रणतस्यविरिंचस्यमाहात्म्यातिशयोस्तीतिकिंवक्तव्यमितिभावेनशिवंविशिनष्टि महत्तमइति। अर्कस्यसकाशादपिमहत्तमस्तेजस्वित्तमइत्यर्थः। गुणगुणिनोरभेदाभिप्रायेणायंप्रयोगः। तेजो र्थेउत्तमार्थेचपूज्यार्थेचप्रयुज्यते महच्छब्दोमहःशब्दोमान्यशब्दस्तथैवचेतिवचनात्तेजोर्थेमहच्छब्दइतिसिद्धम् ४० तत्रब्रह्मास्वगुरुत्वमभिनयन्नूभवंवक्तीत्याह तथेति। तथारुद्रस्यसमंतात्स्थिताअ परेयेसिद्धगणास्तैर्महर्षिभिःसहनीललोहितंअनुनमस्कृतःप्रहसन्निवात्मभूर्ब्रह्मात्मनेकृतप्रणामंशशांकशेखरंप्राहेत्यन्वयः ४१

भक्तद्वेषमसहमानेनशिवांतर्यामिणादक्षयज्ञविनाशनमकारीतिध्वनयंस्तद्यज्ञसंधिकामस्तस्मिंस्तुष्टेशिवोपितुष्टःस्यात्तस्यभक्तलक्षणत्वाच्छिवस्यासंभाव्यैर्गुणैःशिवांतर्यामिणंनरासिंहंस्तौति जानेत्वामिति । हेईश अखंडैश्वर्यविश्वस्याखिलस्यजगतोयोनिबीजयोर्मातृस्थानीयायाःशक्तेःप्रकृतेरुमायाःपितृस्थानीयस्यपुरुषशब्दवाच्यस्यशिवस्यचसकाशाद्यत्परमुत्तमंनिरंतरंस्वगतभेदरहितंशिवशक्त्योःस्थित्वामातृत्वपितृत्वलक्षणशब्दप्रवृत्तिनिमित्तापादकंत्वांजानइत्यन्वयः ४२ शिवशक्त्योर्योनिबीजत्वमुपचारिकंमुख्यंतुतदंतर्यामिणोहरेरेवेत्यभिप्रेत्याह त्वमेवेति । क्रीडयोर्णपदऊर्णनाभिर्यथोर्णांसृजतितन्मध्येक्रीडतेचतांहरतितथात्वंप्रतिमावत्स्वरूपयोःसाक्षादरूपयोःशिवशक्त्योःस्थित्वाताभ्यांकरणभूताभ्यांभगवंस्त्वमेवैतद्विश्वंसृजसिपासिरक्षस्यात्सिसंहरसीत्यन्वयः । प्रसिद्धंपरित्यज्याप्रसिद्धांतर्यामिकल्पनायांकिंकारणमित्यतउक्तं शक्तेःशिवस्यचपरमिति नहिशिवशक्त्योःपरःशिवइतिवक्तुंयुक्तं प्रतीतिविरोधात् तर्हित्वमित्यादिप्रयोगप्रतीतेःकागतिरितिचेन्न अंतर्याम्यपेक्षयाचरितार्थत्वात् । तदुक्तं क्रियंतेस्तुतयोन्यत्रतदंतर्याम्यपेक्षया । नजीवेषुगुणाःपूर्णायथायोग्याहितद्रताइति । तद्वशत्वात्स्वरूपंतुविष्णोःसर्वमुदीर्यते । स्वरूपंसचसर्वेस्यांबिबत्वादेवतूच्यते । साक्षात्स्वरूपंमत्स्याद्याविष्णोर्नान्येकथंचन तस्मादन्यगतादोषानतस्मिन्पुरुषोत्तमेइतिवचनात् शिवादीनामस्वरूपत्वंमत्स्यादीनांसाक्षात्स्वरूपत्वंचसिद्धं नापलपनीयमितिभावः ४३ दक्षयज्ञविनाशनंतदंतर्यामिणाहरिणाकृतमितिप्रमाणेनध्वनितंस्फुटयति । त्वमेवेति । त्वमेवनान्योधर्मार्थौदोग्धीतिधर्मार्थधुक् तेनधर्मार्थदुघा सूत्रेणप्रत्युत्थानाद्यकरणनिमित्तदोषसूचकेनदक्षेणहेतुनाविसर्जिताध्वरःविनाशितयज्ञोभवसीतिशेषः ।

श्रीब्रह्मोवाच ॥ जानेत्वामीशविश्वस्यजगतोयोनिबीजयोः ॥ शक्तेःशिवस्यचपरंयत्तद्ब्रह्मनिरंतरम् ४२ त्वमेवभगवन्नेतच्छिवशक्त्योःस्वरूपयोः ॥ विश्वंसृजसिपास्यत्सिक्रीडयोर्णपदोयथा ४३ त्वमेवधर्मार्थदुघाऽभिपत्तयेदक्षेणसूत्रेणविसर्जिताध्वरः ॥ त्वयैवलोकेवसिताश्चसेतवोयान्ब्राह्मणाःश्रद्दधतेधृतव्रताः ४४ त्वंकर्मणांमंगलमंगलानांकर्तासिलोकेतनुषेस्वयंफलम् ॥ अमंगलानांचतमिस्रमुल्बणंविपर्ययःकेनचिदेवकस्यचित् ४५

सोपिगुणएवाभूदित्याशयेनाह अभिपत्तयइति । तस्यदोषस्याभिपत्तयेप्रतीकारायपरिहारायपाणिमर्कटलोचनइत्यादिदोषसूचकेनदक्षेणयोयज्ञउपक्रांतस्तंत्वद्भक्तत्वेपित्वद्भक्तद्वेषित्वात्तद्दोषपरिहारायभक्तवत्सलस्त्वमेवनाशितवानित्यर्थः । दक्षोपित्वद्भक्तश्चेत्तद्यागविनाशंकिमकार्षीरित्यतआह त्वयैवेति । तत्तत्कर्मसुयानियानिव्रतानित्वयाविहितानितानिधारयंतोयेब्राम्हणावेदशास्त्रपारगास्तेयान्सेतून्श्रद्दधतेमद्भक्तोपिस्वोत्तममद्भक्तद्वेषादिकं नकुर्यादित्यादिलक्षणधर्मसेतवोलोकेवेदेचत्वयैवावसितानिश्चित्यनिर्णीताइत्यर्थः ४४ एवकारेणमन्वादिषुस्थित्वावर्णाश्रमादिसंहितांविधत्सइतिध्वनितंस्पष्टयति त्वंकर्मणामिति । मंगेरलच्[२] अगिवगिमगिरगिलगिगत्यर्थाः मंगेरलच्प्रत्ययोभवतिसंज्ञाविषयेनुमागमश्चेकारःस्वरार्थस्तेनमंगलमितिरूपंतस्यसंबुद्धिर्हेमंगलेति हेमंगलविष्णोत्वंजीवलोकेस्थित्वामंगलानांपुण्यानाममंगलानामशुभानांचकर्मणांकर्तासि स्वयमन्यानपेक्षितस्तेषामुभयेषांकर्मणांफलंस्वर्गादिकमुल्बणंतमिस्रंनरकादिकंचतनुषेस्वस्वयोग्यतानुसारेणविस्तृत्यददासीत्यन्वयः । ननुनायंनियमोद्रढीयान् विपर्ययदर्शनादित्यतआह विपर्ययइति केनचिद्भक्तद्वेषादिहेतुनाकस्यचिदेवधर्मादेःफलविपर्ययः नतुसर्वस्येत्यज्ञानांधर्मसूक्ष्मज्ञानं दुर्लभमितिभावः ॥ ४५ ॥

१ क्रीडन्नूर्णपदोयथा इतिवापाठः । २ उणादिसूत्रं । अ० ५ सू० ७० । ३ चिरत्वम् ।

SGLF Sri Gargeshwari Devi Foundation

नन्वेवंतर्हित्रह्मणाहरौरोषलक्षणदोषारोपःकृतइत्यागतमित्याशंक्यत्वद्भक्ताएामप्यनुचितोरोषोनास्तिकिमुतवेतिभावेनाह नवाइति त्वच्चरणार्पितात्मनांसर्वेषुभूतेष्वपिस्थितंतवत्वांपश्यतामात्मन्याधारत याभूतानिचपश्यतामेवापृथक्दिदृक्षतांयथार्थज्ञानेच्छूनांसतांप्रायेणतथारोषोनाभिभवेद्यथापशोरज्ञानिनोभिभवेदित्यन्वयः। अनेनरोषविषयेषुरोषःकर्तव्योनान्यत्रातोनहरौदोषारोपोब्रह्मणाकृतइत्युक्तं भवति। चतुर्थ्युषष्ठीतिसूत्रात् द्वितीयादिचतुर्थुषष्ठीवर्ततइतिविधानात्सर्वेत्यस्यद्वितीयार्थेषुयुज्यते विष्णवधीनाजगत्सत्तामतीतिश्चेष्टितंगतिः इतियन्निश्चितंज्ञानमपृथक्दर्शनंस्मृतं मिथ्याज्ञानंपृथक्ज्ञानमिति देवविदोविदुःयथैवार्थस्तथाज्ञानमपृथक्दृष्टिरुच्यतइतिवचनात् अपृथक्दर्शनंनाभेदज्ञानंकिंतुयथावस्तुविज्ञानमितिज्ञायते ४६ हननयोग्यापराधपुरुषविषयेयोरोषःसकथंमहतोपिनाभिभवेदित्याशंक्य सत्यं। स्वदोषेणहन्यमानान्नावधीरितिप्रार्थयामहइतिज्ञापयति पृथक्दृशइति।येपृथक्दृक्त्वादिदोषाकराः दुरुक्तैःपरान्वितुदंति हेदेवभवांस्तान्मावधीदित्यन्वयः। पृथग्विधान्भिन्नप्रकारान्ज्ञानिलोक विलक्षणानित्यर्थः ४७ यद्यपिब्रह्मविज्ञापनेनप्रसन्नस्यरुद्रांतर्यामिणोहरेःक्षांत्यारुद्रोपिक्षांतोभवतितथापिरुद्रोपिपृथगवाच्यइतिधियाधुनादक्षायकोपोनकर्तव्यइतिरुद्रंवक्ति येस्मिन्निति। अस्मिँल्लोके येदक्षविधाजना दुर्लंघ्ययापुष्करनाभस्यमाययाबंधकशक्त्यास्पृष्टधियोयथैवपृथग्दृशोऽस्मिञ्जनेद्वेषादिकंकुर्वंतीतियदायस्मात्तस्मात्तत्रतेषुजनेषुभवादृशाःसाधवोनुकंपया हृदयद्रवीभावेनकृपांक्षमालक्ष

नैवसतांत्वच्चरणार्पितात्मनांभूतेषुसर्वेष्वभिपश्यतांतव ॥ भूतानिचात्मन्यपृथक्दिदृक्षतांप्रायेणरोषोभिभवेद्यथापशोः ४६ पृथग्दृशःकर्मदृशोदुरा शयाःपरोदयेनार्पितहृद्रुजोनिशम् ॥ परान्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मावधीद्देवभवान्पृथग्विधान् ४७ येस्मिन्यदापुष्करनाभमाययादुर्लंघ्ययास्पृ ष्टधियःपृथग्दृशः ॥ कुर्वंतितत्रह्यनुकंपयाकृपांनसाधवोदैवबलात्कृताःकथम् ४८ भवान्हिपुंसःपरमस्यमाययादुरंतयास्पृष्टमतिःसमस्तदृक् ॥ तया हतात्मस्वनुकर्मचेतःस्वनुग्रहंकर्तुमिहार्हतिप्रभो ४९ कुर्वध्वरस्योद्धरणंहतस्यभोत्वयाऽसमाप्तस्यमनोःप्रजापतेः ॥ नयत्रभागंतवभागिनोददुःकुस्प र्धिनोयेनमखोनिनीयते ५० जीवताद्यजमानोयंप्रपद्येताक्षिणीभगः ॥ भृगोःश्मश्रूणिरोहंतुपूष्णोदंताश्चपूर्ववत् ५१

णोपकारंकर्तुमिच्छांकथंनकुर्वंतीत्यन्वयः। हृदयस्यद्रवीभावस्त्वनुकंपेतिकथ्यते उपकारंकर्तुमिच्छाकृपेत्याहुर्मनीषिणः। तेपिसाधुष्वेवकेचित्कुतएवंकुर्वंतीतितत्राह दैवेति तादृग्विधपूर्वकर्मप्रबोधक स्यदेवस्यहरेर्बंधकशक्तिबलात्तथाकृताइतिहेतुगर्भविशेषणं। हिशब्देनयोग्यताविशेषंकथयति ४८ विष्णुमायाहरेरिच्छाबंधशक्तिश्चतद्वशा सर्वत्रगाहरेरिच्छाबंधशक्तिर्ईर्वर्जितेतिवचनात्। भवान्सर्वज्ञस्त्वे नबंधशक्तिस्पर्शाभावात्त्वय्येकोनस्यात् अतोस्मिन्नज्ञानिजनेऽनुग्रहंकर्तुमर्हतीत्याह भवान्हीति। हिशब्दोहेत्वर्थः तयाबंधकशक्त्याहतात्मसुनष्टबुद्धिगुणेषु। अतएवानुकर्मचेतःसुहिंसालक्षणकर्मानुविष्टचि त्तेषु। दक्षादिष्विति शेषः। अस्पृष्टमतिः॥ ४९॥ स्वबोधनेनांतर्यामिहरिप्रसादेनचप्रसादाभिमुखंरुद्रंमत्येतादृशोनुग्रहःकार्यइतिवक्ति कुर्वध्वरस्येति हतस्यत्वयाकृतांतरायेणेतिशेषः। अतएवासमाप्तस्याकृतावभृथस्नानादिनेतिशेषः। मनोर्दक्षस्य। कोयमध्वरइतितत्राहनयत्रेति येनत्वयामखो निन्यग्भावेननीचत्वेननीयतेतस्यभागिनोयज्ञभागार्हस्यतवकुत्सितास्पर्धाएषामस्तीतिकु स्पर्धिनऋत्विजोदेवायत्रयज्ञेभागंविहितहविर्भागंनददुस्तस्याध्वरस्य। यद्वायेनयज्ञभागयोग्येनत्वयामखोनिकामंनीयते तस्यभागिनोदेवाभागंयत्रनददुस्तस्येति। निन्यग्भावनिकामयोरितियादवः। ॥ ५० ॥ यजमानसद्भावेयागोद्धारःसंभवतितस्यमयाहतत्वात्कथंनष्टाक्षाचवयवादीनांस्वभागनिरीक्षणंकथंचायुधाश्मभिर्भग्नगात्राणामृत्विजांहोमांगत्वमित्याशंक्यत्वदनुग्रहसुधासमुद्रमग्नाः सर्वे संपन्नाभवंत्वित्याह जीवतादित्यादिना ५१

SGDF

अनातुरमारोग्यम् ५२ सर्वंनिरवद्यंस्यात्यदिममभागोस्तिचेदित्याशंक्यतवायमनुशोकोमाभूदित्याह । एषतइति उच्छिष्टःस्विष्टकृद्भागः । यदग्नयेस्विष्टकृतेसमवद्यति भागधेयेनैवतद्रुद्रंसमर्द्ध
यतिसकृत्सकृदवद्यतिसकृदिवहिरुद्रउत्तरार्धादवद्यत्येषवैरुद्रस्यदिक्स्वायामेवदिशिरुद्रंनिरवद्यतेइतिश्रुतेः ५३ ॥ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेविजयध्वजकृतटीकायांसप्तमोध्यायः ॥ ७ ॥
अत्रभगवज्ज्ञानोपचितंकर्महरेःसाक्षात्कारसाधनंभवतीतितात्पर्यतोनिरूप्यते तत्रब्रह्मोक्तमाकर्ण्यतुष्टेनरुद्रेणोच्यमानप्रतिवचनप्रकारंवक्ति । इतीति । धर्मपरिपंथिनोबाधतइतिबाहुःमहांश्चा
१९ सौबाहुर्यस्यसतथा तस्यसंबोधनंमहाबाहो अजिदृशिकम्पिमिपंसिबाधृतृजिपसितुकुबुकृदीर्घहकारश्च अर्जअर्जनेदृशिर्प्रेक्षणे कमुकांतौ अमूरोगे पसिनाशने बाधृलोडने एभ्योधातुभ्यःकुप्रत्ययोभवति ८
एषांधातूनांयथासंख्यंतृजिपसितुकुबुकृदीर्घहकाराश्चेत्येतेआगमादेशाश्चभवंति ऋजुरवक्रः अव्युत्पन्नोवापशुर्मेत्रहीनश्चतुष्पाच्च कमेस्तुगागमः कंतुःकंदर्पः अमेर्बुगागमःअंबुजलं पंसिःपंसेर्दीर्घः पांसुः
रजः बाधेर्हकारादेशः बाहुःप्राण्यंगम् १ किमभ्यधायीतितत्राह नाघमिति । हेप्रजेशसर्वजीवराश्युत्तम अघमपराधंनवर्णये अनेकत्वादप्राप्तकालत्वादितिशेषः। तर्हिपश्चात्तापोस्तिकिंनेत्याह नानु

देवानांभग्नगात्राणामृत्विजांचायुधाश्मभिः ॥ भवतानुगृहीतानामाशुमन्येत्वनातुरम् ५२ एषतेरुद्रभागोस्तुयदुच्छिष्टोध्वरस्यवै ॥ यज्ञस्तेरुद्रभागेनक
ल्पतामद्ययज्ञहन् ५३ ॥ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेसप्तमोध्यायः ॥ ७ ॥ ॥ मैत्रेयउवाच ॥ इत्यजेनानुनीतेनभवेनपरितुष्यता ॥ अभ्य
धायिमहाबाहोप्रहस्यश्रूयतामिति १ ॥ रुद्रउवाच ॥ नाघंप्रजेशबालानांवर्णयेनानुचिंतये ॥ देवमायाभिभूतानांदंडस्तत्रधृतोमया २ प्रजापतेर्द
ग्धशीर्ष्णोभवत्वजमुखंशिरः ॥ मित्रस्यचक्षुषेक्षेतभागंस्वंबर्हिषोभगः ३ पूषातुयजमानस्यदद्भिर्जक्षतुपिष्टभुक् ॥ देवाःप्रकृतसर्वांगायेमउच्छेषणंददुः ४
बाहुभ्यामश्विनोःपूष्णोहस्ताभ्यांकृतबाहवः ॥ भवंत्वध्वर्यवश्चान्येबस्तश्मश्रुर्भृगुर्भवेत् ५ ॥ मैत्रेयउवाच॥ तदासर्वाणिभूतानिश्रुत्वामीढुष्टमोदितम् ॥
परितुष्टात्मभिस्तत्रसाधुसाध्वित्यथाब्रुवन् ६ ततोमीढ्वांसमामंत्र्यशुनासीराःसहर्षिभिः ॥ भूयस्तद्देवयजनंसमीढ्वद्वेधसोययुः ७ विधायकार्त्स्न्येनचत
द्यदाहभगवान्भवः ॥ संदधुःकस्यकायेनसवनीयपशोःशिरः ८ संधीयमानेशीर्षणिदक्षोरुद्राभिवीक्षितः ॥ सद्यःसुप्तइवोत्तस्थौददृशेचाग्रतोमृडम् ९

चिंतयइति । पश्चात्तापंनकरोमीत्यर्थः । पश्चात्तापाकरणेकारणमाह दंडइति । अपराधानुसारिदंडाकरणेअनुतापःस्यात्तदनुसारिणीशिक्षामयाकृतेत्यर्थः २ पुत्रच्छात्रादिभिर्गुरुवाक्यंसबहुमानंग्राह्य
मितिभावंदर्शयन्वक्ति प्रजापतेरिति अजस्यछागस्यमुखंयस्यतत्तथोक्तम् पूर्वशिरोऽनुसंधानाकरणेकारणंदग्धशीर्ष्णइति । स्वपौरुषजयस्तंभस्थापनायाज्ञजनाशिक्षणायचभगादीनामप्यन्यावयवैरेवस्व
निर्वाहःस्यादितिभावेनाह मित्रस्येत्यादिना । बर्हिषोयज्ञस्य ३ दद्भिर्दंतैः । तत्रदेवानांविशेषानुग्रहंकरोति देवाइति । प्रकृतसर्वांगाःपूर्वावस्थाप्राप्तसर्वावयवाः उच्छेषणभागोवैरुद्रइतिश्रुतेः । येमउ
च्छेषणंददुरितिविशेषानुग्रहेहेतुः ४ ऋत्विजांनैवमित्याह बाहुभ्यामित्यादि अध्वर्यवऋत्विजस्तेषांमध्येकेचिच्छिन्नबाहवः केचिच्छिन्नहस्तास्तेषुछिन्नबाहवोश्विनोर्बाहुभ्यांकृतबाहवःपूर्वबाहुप्र
योजनाभवंतु । अन्येचपूष्णोहस्ताभ्यांकृतहस्ताभवंतु । कूर्परस्योपरिदेशोबाहुस्तदधोहस्तः । देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामितिश्रुतेः । हसदानादानयोरितिधातुः ।बस्तस्यश्म
१९ श्रूणियस्यसबस्तश्मश्रुः ५ कोसावुत्तरकथाप्रसंगइतितत्राहतदेति मिहसेचनइतिधातोः प्रणतजनस्याभीष्टंवर्षतीमीढ्वांसस्तेषामतिशयेनमीढ्वान्मीढुष्टमस्तेनकथितम् अनेनतदानीमेतत्रामोपलब्ध
मितिरहस्यंज्ञायते ६ शुनासीरादेवाः । सहितामीढ्वद्वेधोभ्यांरुद्रब्रह्मभ्यांयेतथोक्ताः ७ कस्यदक्षस्य सवनीयपशोर्यज्ञीयपशोः ८ शीर्षणिशिरसि ९

SGBF Sri Gargeshwari Digital Foundation

शिवस्यावनतपुंस्यनुग्रहसामर्थ्यं व्यनक्ति तदेति । अभ्रं सलिलदेव्योम्निशस्त्रेकोदंडआयुधइतियादवः शरन्मेघवत् १० बाह्यस्वच्छत्वमेवतस्यनत्वांतरंतल्लक्षणाभावादितितत्राह भवस्तवायेति
औत्कंठ्यादुत्पन्नबाष्पकलया आंतरनैर्मल्याभावेरुद्रस्तवएवनयुक्तः सचानेनकर्तुंप्रयत्यतेतस्मादांतरीशुद्धिरप्यनुमीयतइति ११ कायिकएवप्रयत्नोनतुवाचिकइतिशंकामाभूदित्याह कृच्छ्रादिति
भावेनस्नेहेन १२ दक्षस्यशिवेत्वांतरोद्वेषोनास्तीतिज्ञापयितुंतदनुगुणगणैःस्तुतिंकरोति भूयानिति । त्वयाप्रसह्यापिमदपराधानुगुणोदंडोधृतइतियचस्मात्तस्माद्भूयाननुग्रहःकृतः । अहोमेमहतांपुंसा
मनुकंपा । शिरश्छेदादिलक्षणोनुग्रहोनस्यात्किंतुअत्यंतापकारएवायमामरणमेवलोकेकोपदर्शनादतोनयुक्तइत्याशंक्यापराधाधिक्ये नायंनियमइतिभावेनाह नब्रह्मेति । ब्रह्मबंधुषुब्राह्मणजातिमा
त्रेषुतुभ्यंतवहरेश्चवांयुवयोरवज्ञानास्तिधृतव्रतेषुदीक्षितेषुकुतएवावज्ञातः कृतावज्ञत्वान्मयिदंडकरणंयुक्तं अन्यथायुष्मदवज्ञानेनानुत्थानतमःप्राप्तिःस्यादिति १३ अवज्ञानोनिमित्तमाह विद्यातपइ
ति । ब्रह्मात्मतांवेदरक्षकतांब्रह्मणःपूर्णगुणस्यहरेरात्मतांविशेषसन्निधानदेहतांवा प्रथयितुंप्रख्यापयितुं अस्राअस्राक्षीःस्म । यस्मात्तत्तस्मात्त्वत्सन्निधानपात्रभूतान्ब्राह्मणान्विपत्सुपासीत्य

तदावृषध्वजद्वेषकलिलात्माप्रजापतिः ॥ शिवावलोकादभवच्छरदभ्रइवामलः १० भवस्तवायकृतधीर्नाशक्नोदनुरागतः ॥ औत्कंठ्यबाष्पकलयासं
परेतांसुतांस्मरन् ११ कृच्छ्रात्संस्तभ्यचमनःप्रेमविह्वलितःसुधीः ॥ शशंसानिर्व्यलीकेनभावेनेशंप्रजापतिः १२ ॥ दक्षउवाच ॥ भूयाननुग्रहअहोभवता
कृतोमेदंडस्त्वयामयिधृतोयदपिप्रसह्य ॥ नब्रह्मबंधुषुचवांभगवन्नवज्ञातुभ्यंहरेश्चकुतएवधृतव्रतेषु १३ विद्यातपोव्रतधरान्मुखतःस्मविप्रान्ब्रह्मात्मतांप्र
थयितुंप्रथमंत्वमस्राः ॥ तद्ब्राह्मणान्परमसर्वविपत्सुपासिपालःपशूनिवविभोप्रगृहीतदंडः १४ योसौमयाविदिततत्त्वदृशासभायांक्षिप्तोदुरुक्तिविशि
खैरगणय्यतन्माम् ॥ अर्वाक्पतंतमर्हत्तमनिंदयैक्षद्दृष्ट्यार्द्रयासभगवान्स्वकृतेनतुष्येत् १५ ॥ मैत्रेयउवाच ॥ क्षमाप्यैवंसमीढ्वांसंब्रह्मणाचानुमंत्रि
तः ॥ कर्मसंतानयामाससोपाध्यायर्त्विगग्निभिः १६ वैष्णवंयज्ञसंतत्यैत्रिकपालंद्विजोत्तमाः ॥ पुरोडाशंनिरवपन्वीरसंसर्गशुद्धये १७ अध्वर्युणात्तहवि
षाहूयमानोयजुष्पतिम् ॥ यथाविशुद्धयादध्यौतथाप्रादुरभूद्धरिः १८ तदास्वप्रभयातेषांद्योतयंत्यादिशोदश ॥ मुष्णंस्तेजउपानीतस्तार्क्ष्येणस्तोत्रनिर्जि
तः १९ श्यामोहिरण्यरशनोर्ककिरीटजुष्टोनीलालकभ्रमरकुंडलमंडितास्यः ॥ कंब्वब्जचक्रशरचापगदासिचर्मव्यग्रैर्हिरण्मयभुजैरिवकर्णिकारः २०

न्वयः १४ भवान्कृपासमुद्रोऽहंनिर्घृणोदुष्टइत्यत्रविवेकयुक्तिमाह योसाविति नविदितातत्त्वदृग्यस्यसतथातेनाऽलब्धतत्त्वज्ञानेनैक्षदद्राक्षीत् नास्माकंपुरुषायुषशतेनत्वत्कृतप्रतिनिधिकरणंश
क्यते अतःस्वकर्मणास्वयमेवचतुष्टोभवेत्याह सभगवानिति १५ प्रकृतमनुसरति क्षमाप्येति । संतानयामासअनुसंहितंचकार १६ दुष्टस्ययज्ञस्यप्रायश्चित्तमंतरेणकथमनुसंधानंघटतइतितत्राह ।
वैष्णवमिति वैष्णवंविष्णुदैवत्यं । त्रीणिकपालान्यासनानियस्यसत्रिकपालस्तं । वीरोवीरभद्रस्तस्यसंसर्गउपद्रवस्तस्यशुद्धयेपरिहारायनिर्वापणंसमंत्रपचनम् १७ अध्वर्योःप्रतिपत्तिफलमाह अध्व
र्युणेति । यजुष्पतिंमंत्रदेवताम् १८ तदाप्रत्यक्षस्यहरेःकर्मविशेषंस्वरूपविशेषंचाह तदेति । तार्क्ष्येणगरुडेन स्तोत्रेणसामरूपेणानिर्जितोवशीकृतः १९ हिरण्मयारशनाकांचीयस्यसतथाहिरण्यवत्पीत
मंबरंयस्यसतथेतिवा । अर्कवत्ज्वलताकिरीटेनजुष्टः नीलाश्चतेअलकाश्चनीलालकाः तएवभ्रमराश्चकुंडलेचनीलालकभ्रमरकुंडलानितैर्मंडितमास्यंयस्यसतथा कंब्वादिभिर्व्यग्रैर्विवशैः शिक्षा
भ्यासदर्शकैरिवांगदादिभूषणायितत्वाद्धिरण्मयैरिवास्थितैर्भुजैर्लक्षितःपुष्पितः कर्णिकारोवृक्षविशेषः २०

वक्षस्यधिश्रितावधूर्भार्यायस्यसतथा पुत्रभार्यावत्प्रेमास्पदत्वद्योतनायाधिश्रितरमइतिवक्तव्येवधूरित्युक्तम् । वहेश्च वहेर्धातोरूप्रत्ययोभवतिपुत्रभार्यायांगम्यमानायांचकारात्कनीयभ्रातृभार्यायाम् धकारश्चांतादेशः स्वभार्याचवधूः । सापिसेवार्थमत्रवसति नत्वालिंगनादिसुखावाप्त्यर्थमतः श्रितेति उदारहासावलोकयोःकलयाचंद्रकलावदाह्लादिकया पार्श्वेभ्रमद्व्यजनचामराख्यराजहंसाभ्यामुपरिशुभ्रातपत्रशशिनालक्ष्यमाणोदृश्यमानः एवंविधस्ताक्ष्यैंणोपानीतइतिपूर्वेणान्वयः २१ ब्रह्मरुद्रौविष्णुसमानावितिलोकप्रवादंपरिहरंस्तत्पूर्वदेवतानांश्रीनारायणप्रणामंवक्ति तमुपागतमिति ब्रह्माचतुर्मुखइंद्रोवायुरुग्यक्षोरुद्रएतेनायकायेषांतेतथोक्ताः २२ ननुनप्रणाममात्रमुत्तमत्वादिनिश्चयात्मकंसमानानामपिमिथोदर्शनादितितत्राह तत्तेजसेति । सन्नाजिह्वाःजिह्वाशक्तिरहिताः गद्गदवाचइत्यर्थः अत्रनिमित्तंससाध्वसाइति । ननुसन्नजिह्वत्वेनकिंपश्चाज्जगुरितितत्राह मूर्ध्नीति २३ स्तुतिलक्षणवागींद्रियादिव्यापाराभावेनकेवलोपस्थानेकिंप्रयोजनमत्राह अप्यर्वागिति । यस्यमहित्वेमाहात्म्यविषयेऽनंतत्वादर्वाग्वृत्तयोपिअप्राप्तवाङ्मनसव्यापाराअपिस्वभूर्ब्रह्मातदादयःकृतानुग्रहविग्रहंभक्तानुग्रहार्थंकृतोविग्रहोयेनसतथातंश्रीनारायणंयथामतिगृणंतिस्मेत्यन्वयः २४ स्तुतिप्रबंधकथनेग्रंथाधिक्यंस्यादितिमत्वायदर्थंहरेराविर्भावस्तस्यदक्षस्यभगवत्प्रतिपत्तिप्रकारंवक्ति दक्षइति २५ प्रतिपत्तिर्नामनिर्गुणत्वेनानिराकारत्वेनचेत्प्रतिपद्यमानाविषयानुसारिणीस्यात् केवलोनिर्गुणश्चाकाशंब्रह्मअनादिर्वायमाकाशःशून्योलौकिकइतिश्रुतेरन्यथाप्रतिपत्तिदोषेणानर्थापत्तिःस्यादितितत्राह । शुद्धमिति । यद्रूपंशुद्धंनिर्दोषत्वेनशोधितम् । कथंशोधितमत्राह स्वधाम्नीति ।

वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलयारमयंश्चविश्वम् ॥ पार्श्वभ्रमद्व्यजनचामरराजहंसःश्वेतातपत्रशशिनोपरिलक्ष्यमाणः २१ तमुपागतमालक्ष्यसर्वेसुरगणादयः ॥ प्रणेमुःसहसोत्थायब्रह्मेंद्रत्र्यक्षनायकाः २२ तत्तेजसाहतरुचःसन्नजिह्वाःससाध्वसाः ॥ मूर्ध्निकृतांजलिपुटाउपतस्थुरधोक्षजम् २३ अप्यर्वाग्वृत्तयोयस्यमहित्वेस्वभुवादयः ॥ यथामतिगृणंतिस्मकृतानुग्रहविग्रहम् २४ दक्षोगृहीतार्हणसाधनोत्तमंयज्ञेश्वरंविश्वसृजंपरंगुरुम् ॥ सुनंदनंदाद्यनुगैर्वृतंमुदागृणन्प्रपेदेप्रयतःकृतांजलिः २५ ॥ दक्षउवाच ॥ शुद्धंस्वधाम्न्युपरताखिलबुद्ध्यवस्थंचिन्मात्रमेकमभयंप्रतिषिध्यमायाम् ॥ तिष्ठंस्तयैवपुरुषत्वमुपेत्यतस्यामास्तेभवानपरिशुद्धमिवामनंति २६

स्वधाम्निस्वस्वरूपेउपरतानित्यनिवृत्ताअखिलाबुद्धेरवस्थाजाग्रदादिजीवावस्था यस्यतत्तथा । तर्हितन्निराकारंकिं नेत्याह । चिन्मात्रमिति । केवलंज्ञानात्मकम् । जीवस्याप्येतादृक्त्वात्किंविशेष्योच्यतइतितत्राह । एकमिति । एकंप्रधानंसर्वोत्तमम् । नहीदृशमन्यदस्तीत्याह अभयमिति द्वितीयाद्वैभयंभवतीतिश्रुतेः एतादृशस्यान्यस्याभावात्कालत्रयेपिनिरस्तभयम् कुतएतत्सर्वमित्यतआह प्रतिषिध्येति । मायांजडात्मिकांप्रतिषिध्यदूरीकृत्यतिष्ठंस्तादृग्रूपोभवांस्तयामाययोपादानत्वेनमहदादिसृष्ट्वामहदाद्युपादानत्वेनांडंसृष्ट्वातदंतस्त्रिवृदहंकारविकृताकाशाद्युपादानत्वेनपुरुषशब्दवाच्यशरीराणिसृष्ट्वातदंतःस्थितिमत्तयापुरुषत्वंपुरुषशब्दवाच्यत्वमुपेत्यतदंतर्यामिरूपेणव्यक्तोभूत्वातस्यांकार्यकारणलक्षणायांप्रकृतावास्ते । तुष्टेनत्वपिहितमितिश्रुतेः । तत्राज्ञामायावादिनोऽपरिशुद्धमुपहितंजीवमिवामनंतितस्मैतुभ्यंनमइतिवाक्यशेषःव्यक्तिलक्षणमेवपुरुषत्वंनतुजीवलक्षणमित्यस्मिन्नर्थेइवशब्दः । उत्पत्तिर्हरिरूपाणांव्यक्तिरेवनसंशयः । उत्पत्तिरेवजीवानांदेहोत्पत्तिरुदीर्यतइतिवचनात् जडमायानतस्यास्तिशरीरत्वेनकुत्रचित् सृष्ट्वातथाशरीराणितत्स्थितेःपुरुषःस्मृतः । मायायामशरीरायामपिविष्णुःस्वयंस्थितः । तस्मात्प्राकृतइत्येवजीववत्तंवदंतिहि । अस्पृष्टत्वेपितद्धर्मैस्तद्गत्वादेवकारणादितिवचनात् । नेंद्रजाललक्षणामायात्रोच्यते किंतुजडाजगदुपादानभूताप्रकृतिरेव २६ १६

१ वहेर्धश्च इति उणादिसूत्रम् ॥ १ ॥ ८३ ॥ २ दक्षोगृहीतार्हणमादरोत्तमन्निति पाठान्तरम् ।

SGDF
Sri Gargeshwari Digital Foundation

ऋत्विगादिवैदिकैःश्रीनारायणएवस्तुत्योवंद्यश्चेतिभावेनतत्प्रतिपत्तिप्रकारंवक्ति तत्त्वंनतइति । अनंजनपुण्यपापलेपरहित ऋत्विजोवयंतेतवतत्त्वंनविदामः । कस्मादज्ञानमत्राहुःरुद्रशापादिति । यज्ञादि
कर्मण्यवग्रहधियोदुराग्रहबुद्धित्वादित्यर्थः । नन्वेवंतर्हिएतस्मिन्कर्मणिभवतआविर्भावःकथंघटतइतिशंकामाभूदित्याह धर्मेति सदाशिवस्यप्रसन्नदृष्ट्यवलोकनोत्फुल्लतत्त्वज्ञानैरस्माभिःक्रियमाणमि
दमध्वराख्यंकर्मज्ञातंत्वत्पूजात्वेनेतिशेषः । कथमेतदवगतमित्यतउक्तं धर्मेति । भक्त्यादिधर्माणामुपलक्षकत्वादित्यर्थः किमत्रप्रमाणमित्यतस्तद्वनयंति । त्रिवृदिति । त्रीन्प्रत्यक्षानुमानागमानावृणो
तीति तदानींतनैःपुरुषैर्दृश्यमानत्वात् प्रत्यक्षंप्रथमप्रमाणं । द्वितीयंहरेराविर्भावोलिंगं तृतीयमेषमेसर्वधर्माणांधर्मोधिकतमोमतः यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदेत्यागमं । प्रत्यक्षस्यतुलोकाविडं
बनार्थत्वोपपत्तेर्लिंगस्यचविनोददर्शनायसंभवादागमस्यचस्तुतिरूपत्वेनार्थवादत्वोपपत्तेः । अतोनिर्णायकाभावात्सिकतावनिग्रहनिर्माणवत्सर्वंशिथिलमभूदितितत्राह यदर्थमिति । त्वंयस्याध्वरस्य
भागस्वीकारार्थमदोधिदैवमुत्तमदैवंब्रह्मादिदेवताशरीरेआस्थाइतियदतइदंनिर्णायकंप्रमाणमित्यर्थः भुंक्तेयज्ञभुजोदेवानाविश्यपुरुषोत्तमइतिवचनंचास्मिन्नर्थेमानं यद्वा कुतोनविदामइतितत्राह धर्मे
ति धर्ममदृष्टमुपलक्षयतीतितथोक्तं ज्ञानिभिरिदमध्वराख्यंकर्मयदर्थयस्त्वमर्थोविषयोयस्यतत्तथाज्ञातं कुतःकर्मणस्त्वाद्विषयत्वमत्राह अधिदैवमिति सत्त्वमधिदैवमास्थाअहंहिसर्वयज्ञानांभोक्तेति
यदतस्त्वद्विषयोयज्ञइति तद्यजनमस्माभिरिंद्रादिविषयत्वेनज्ञातमतोनविदामइति २७ हेशरणदमोक्षलक्षणगृहप्रद अशरणेरक्षितृपुरुषरहितेउरवोबहवःअविद्यास्मितरागद्वेषाभिनिवेशाःपंचक्लेशा

ऋत्विजऊचुः ॥ तत्त्वंनतेवयमनंजनरुद्रशापात्कर्मण्यवग्रहधियोभगवन्विदामः ॥ धर्मोपलक्षणमिदंत्रिवृदध्वराख्यंज्ञातंयदर्थमधिदैवमदस्त्वमास्थाः
२७ ॥ सदस्याऊचुः ॥ उत्पत्त्यध्वन्यशरणउरुक्लेशदुर्गेंतकोग्रव्यालाक्रुष्टेविषयमृगतृष्णात्मगेहोरुभारः ॥ द्वंद्वश्वभ्रेखलमृगभयेशोकदावेऽज्ञसार्थःपादौश
स्तौशरणदकदायातिकामोपसृष्टः २८ ॥ रुद्रउवाच ॥ तववरदवरांघ्रावाशिषाचानभिध्येह्यपिमुनिभिरसक्तैरादरेणार्हणीये ॥ यदिरचितधियंमावि
द्धिलोकापविद्धंजगतिनगणयेन्यंत्वत्परानुग्रहेण २९

स्तैर्दुर्गैरंतकाख्येनोग्रेणव्यालेनाजगरेणसर्पेणाक्रुष्टेद्वंद्वानिसुखदुःखान्येव श्वभ्राणिगर्तान्यस्मिन्सतथातस्मिन् । खलाःपिशुनास्तएवमृगास्तैर्भयंयस्मिंस्तथातस्मिन् । शोकोमनःपीडासएववन
वह्निर्यस्मिन्नेवंविधे । उत्पत्त्यध्वनिजननमरणादिमार्गे । अज्ञसार्थःअज्ञानिपरिषत्तवशस्तौपादौकदायातिनकदापीतिमन्यामहे । कुतइतितत्राह कामेति कामेनोपहृतत्वात् कामोपहृतत्वंस्फुटयति
विषयेति । विषयमृगतृष्णाशब्दादिविषयाख्यमरीचिकाजलमुद्दिश्यात्मायत्नः गेहंगृहं एतद्वमगुरुभारोयस्यसतथा आत्मादेहेधृतौजीवेस्वभावेपरमात्मानि यत्नेर्कैग्नौमतौवातइतियादवः यद्वा विषयमृ
गतृष्णैवात्मगेहंस्वनिवासस्थानंतदेवोरुभारोयस्यसतथा २८ रुद्रस्तुत्यासर्वलोकस्यहरेःसर्वोत्तमत्वेसंशयमुन्मूलयति तवेति । हेवरदतवाशिषाकारणेनानभिध्येअभिध्यानाविषयेआशीरर्थध्यातु
मयोग्ये । असक्तैर्निःसंगैर्मुनिभिर्ब्रह्मादिज्ञानिभिरप्यादरेणार्हणीयेपूज्येवरांघ्रौवरणीयगुणेश्रीपादे यदिरचितधिपंकृतबुद्धिंमांविद्धिमांजानासि लडर्थेलोट् कथंभूतंमांलोकापविद्धंलोकबाह्यं
अनेनरुद्रस्यज्ञान्युत्तमत्वंद्योतयति तर्हिजगतित्वत्परानुग्रहेणनगणये यंकंचनपुरुषंनप्रार्थयइत्यर्थः फलेच्छयाध्यानाभावेऽपिनिष्कामत्वेनध्यानादन्याशिषोपिभवंतीत्यस्मिन्नर्थेचशब्दः हिशब्दे
नगतिमण्वींप्रयुंजइतिवाक्यंसूचयति २९

---

१ तक्रूत्यनंदिशापात् २ अधिकाश्चतेदेवाश्चाधिदेवाः । ब्रह्मादयः । तेषामिदंशरीरमधिदैवं । यद्वा देवानांब्रह्मादीनामिदंशरीरंदैवं । अधिकंचतत्दैवंचेतिविग्रहः । एतेनाधिदेवानामिदमाधिदैवमि
तिस्यात् कथमधिदैवमितिशंकापरास्ता इतिभागवततात्पर्यदीपिका ।

ब्रह्मादीनामपिश्रीनारायणतत्त्वज्ञानंदुर्लभंकिमुतास्माकंततोरुद्रेद्वेषस्तत्तत्त्वाज्ञानहेतुकइतिभावंध्वनयन्भृगुस्तंभगवंतंस्तौति । यन्माययेतिश्लोकद्वयेनगहनयागंभीरयायस्यतवमाययापहृतआत्मबो
धःस्वरूपज्ञानंयेषांतेतथा । अतएवतमस्यविद्यायांस्वपंतःशयानाब्रह्माआदिर्येषांदेवानांतेब्रह्मादयस्तनुभृतःशरीरिणः । अनेनदेहवतएवज्ञानग्रहणयोग्यतांसूचयाति आत्मसुजीवेषुप्रेरकत्वेनाश्रितंस्थितं
तवतत्त्वमधुनापीत्यनेनोत्पाद्यदीर्घकालगतिंसूचयति नाविदंति सोयंप्रणतानामात्मनांजीवानांबंधुर्भवान्प्रसीदत्वित्यन्वयः । यद्वा ब्रह्मादिःकारणंयेषांतेब्रह्मादयस्तनुभृतोजीवाआत्मानंहृदयमा
श्रितं अन्यत्समम् ३० सर्वस्यहरेस्तत्वविषयाज्ञानमुक्त्वेदानींतत्सत्त्वप्रमाणाभावेनशून्यप्रायंतत्स्यादित्यतोऽव्यक्तादिविशेषज्ञानिप्रत्यक्षंप्रमाणमितिभावेनाह नैतदिति एतदव्यक्तादि भवतः
स्वरूपंसच्चिदानंदात्मकंनभवति इहजगतियोवैराग्यभक्त्यादिसाधनसामग्रीमानसौपदार्थभेदग्रहोऽव्यक्तादिपदार्थविशेषज्ञानीब्रह्माद्यन्यतमःपुरुषोयावत्पदार्थजातंतावत् पृथगीक्षेत्पश्यतीतियस्मा
त्तस्मादित्यर्थः भेदोंतरंविशेषश्चसूक्ष्मेक्ष्यंचाभिधीयतइतिवचनात् अत्रभेदोविशेषः नन्वव्यक्तादेर्व्यतिरिक्तंचेत्तत्तद्दर्शनंप्रमाणंस्यात्तदेवकुतइतितत्राह ज्ञानस्येति । ज्ञानस्येत्युपलक्षणंजातावेकवचनं
ज्ञानेंद्रियाणांकर्मेंद्रियाणामर्थस्यशब्दादितन्मात्राणांचाकाशादिभूतानांचगुणस्यसत्त्वादेश्च चशब्दात्तत्कार्ययोर्महदहंकारयोश्चाश्रयान्मायामयात्प्रकृतिविकारात् प्रपंचाद्व्यतिरिक्तोत्यंतविलक्षणःकेवल

॥ भृगुरुवाच ॥ यन्माययागहनयापहृतात्मबोधाब्रह्मादयस्तनुभृतस्तमसिस्वपंतः ॥ नात्माश्रितंतवविदंत्यधुनापितत्त्वंसोयंप्रसीदतुभवान्प्रणतात्मबंधुः
३० नैतत्स्वरूपंभवतोसौपदार्थभेदग्रहःपुरुषोयावदीक्षेत् ॥ ज्ञानस्यचार्थस्यगुणस्यचाश्रयान्मायामयाद्व्यतिरिक्तोयतस्त्वम् ३१ ॥ इंद्रउवाच ॥ इद
मच्युतविश्वभावनंवपुरानंदकरंमनोदृशाम् ॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः ३२ ॥ यज्ञपत्न्यऊचुः ॥ यज्ञोयंतवयजनायकेनसृष्टोविध्व
स्तःपशुपतिनाद्यदक्षकोपात् ॥ तन्नस्त्वंशवशयनाभशांतमेधंयज्ञात्मन्नखिलरुचादृशापुनीहि ३३

चिदानंदात्मकनित्यदेहस्त्वमिति यतोतइति । तदुक्तं अव्यक्तादिपदार्थानांविशेषज्ञानिनापितु नदेहोवैष्णवोज्ञेयआनंदःप्राकृतोनहीति अव्यक्तादिपदार्थानांविशेषज्ञानिनावैष्णवोदेहोऽव्यक्तादिपदार्थानां
संबंधेननिर्मितोनज्ञेयःतत्रहेतुमाह आनंदइति यद्वाऽसौपदार्थभेदग्रहःपुरुषोयावद्भवतस्वरूपमीक्षेत्तावदेतदव्यक्तादिभवतःस्वरूपंनभवतीतिप्रतीयते ज्ञानिदर्शनस्ययथार्थत्वानियमात् अनेनाज्ञानिपक्ष
एवाव्यक्तादिस्वरूपंनज्ञानिपक्षइत्युक्तं अन्यत्समं । असतइतिपाठे अमांगल्यादित्यर्थः ३१ अनंतरातीतेश्लोकेप्रत्यक्षमेतत्भवतःस्वरूपंनभवतीत्यन्यथाप्रतीतिमिंद्रस्तुतिव्याजेननिरस्यति इ
दमिति अच्युतहेयोपादेयरहितहरे इदंदृश्यमानंतववपुर्विश्वभावनंजगदुत्पादकंब्रह्मैवेत्यन्वयः वपुःशब्दस्यार्थांतरमाह आनंदकरमिति शुभाकारेतनौवपुरित्यभिधानं यावद्गुणानुपसंहृत्योपास्त
तदनुसारिफलंचस्वस्यापिस्यादित्याशयेनाह सुरविद्विडिति । सुरविद्विषोऽसुरास्तान्क्षपयंतीतिसुरविद्विट्क्षपणास्तैः ३२ अंतरायितस्यकर्मणःपूर्णफलत्वासिद्धिःश्रीनारायणकटाक्षेणैवेत्यभिप्रायेण
पत्न्यःस्तुवंतीत्याह यज्ञोयमिति । शवंजलंतस्मिन्शेतइतिशवशयः अधिकरणेशेतेरितिकर्तर्यच्प्रत्ययः कमलंनाभौयस्यसतथोक्तः तस्यसंबुद्धिःशवशयनाभकमलनाभ शांतमेधमुपरतंयज्ञंएकपदपक्षे
शवाःप्रेताःशेरतेस्मिन्निितिशवशयः पुंसिसंज्ञायांघःप्रायेणेत्यधिकरणेघःप्रत्ययः श्मशानंतस्यआभेवआभायस्यसःश्मशानकांतिश्वासावुपरतश्चासावध्वरश्चेति सतथोक्तस्तं पुनीहिशुद्धंकृत्वापूर्णफलं १७
कुर्वित्यर्थः ॥ ३३ ॥

१ अव्यक्तादिसर्वेपदार्थाः ।

SGDF
Sri Gurgeshwari Digital Foundation

इतोपीदंरूपमुपनिषदेकवेद्यंनमायामयमितिभावेनऋषयः स्तुवंतीत्याह अनन्वितमिति। भगवंस्तवविचेष्टितमनन्वितंलोककर्मविलक्षणं कुतस्त्वमात्मनाऽन्यसहायमंतरेणयत्कर्मचरसिकरोषितेनकर्मणा
नाज्यसेनालिप्यसेहियस्मात्तस्मात् सयत्तत्रकिंचित्पश्यत्यनन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइतिश्रुतेः। असंगित्वंतवैवोचितमित्याहुःविभूतयइति। यतोयस्याःश्रियःप्रसादाद्विभूतयः ईश्वरान्ब्रह्मादीनु
पसेदुःप्रापुस्तांश्रियंस्वयमनुवर्तिनींस्वतएवनिषेवमाणांभवान्नमन्यते मनज्ञानइतिधातोः अप्राप्तफलार्थंसेवतेइतिनजानाति किंतुऋतुधर्मवज्जलस्यंदनवत्भक्तिकरणमस्याःस्वभावइत्येवजानातीत्यर्थः
३४ तेतवकथामृष्टपीयूषनद्यामवगाढोमग्नोयंमनोवारणःसंसाराख्यंदावंनसस्मार। स्मरणाभावेनिमित्तमाह ब्रह्मेति। ब्रह्मसंपन्नस्यापिनिर्गमनेस्मृतिःसंभवतीत्यतउक्तंनानिष्क्रामतीति। कथानद्यव
गाहेहेतुमाहक्लेशेत्यादिना। अनेनाप्यस्यरूपस्यब्रह्मत्वंनिरणायीतिज्ञायते ३५ पूर्वंत्रयजमानेनयथातत्वंस्तुतं अत्रलोकसंस्कारपूर्वकमौत्सुक्याच्चस्वाभीष्टसिद्ध्येयजमान्याप्रसूत्यास्तूयते। स्वागत
मित्यादिनाश्रियाकांतयासहत्राहिरक्ष कबधइत्यनेनाशिरोराहित्येसिद्धेपिस्पष्टत्वाच्चशीर्षहीनइत्युक्तं। अंगैर्ऋत्विगादिभिरन्यत्रकरचरणादिभिःसहितोप्यनेनसर्वोत्तमत्वंहरेर्द्योतितम् ३६ लोकपालस्तु
त्यापिहरेरिदंरूपमनारोपितमितिज्ञायतइतिआह दृष्टःकिमिति। येनत्वयाविश्वंसर्वंदृश्यतेज्ञातंभवतिसप्रत्यग्दृष्ट्याज्ञानदृष्ट्याचदृश्यस्त्वं। नोऽस्माकं असद्ग्रहैःशब्दाद्यमंगलविषयग्राहिभिर्दृग्भिः किं
प्रयोजनमुद्दिश्यदृष्टोऽनुग्रहमंतरेणेतिशेषःषष्ठःपंचभूतव्यतिरिक्तशशरीरस्त्वं पंचभिर्भूतैर्निर्मितशरीरवद्भिर्दृष्टोभासीतियदेषाभवदीयामायाहिभवत्सामर्थ्यमेव। नह्यमांसदृष्टिगोचरस्वभावस्यतद्गोच

ऋषयऊचुः॥ अनन्वितंतेभगवन्विचेष्टितंयदात्मनाचरसिहिकर्मनाज्यसे॥ विभूतयोयतउपसेदुरीश्वरान्नमन्यतेस्वयमनुवर्तिनींभवान् ३४ सिद्धाऊचुः॥
अयंतेकथामृष्टपियूषनद्यांमनोवारणःक्लेशदावाग्निदग्धः॥ तृषार्तोवगाढोनसस्मारदावंननिष्क्रामतिब्रह्मसंपन्नवान्नः ३५॥ यजमान्युवाच॥ स्वा
गतंतेप्रसीदेशतुभ्यंनमःश्रीनिवासःश्रियाकांतयात्राहिनः॥ त्वामृतेधीशनांगैर्मखःशोभतेशीर्षहीनःकबंधोयथापूरुषः ३६॥ लोकपालाऊचुः॥ दृष्टः
किंनोदृग्भिरसद्ग्रहैस्त्वंप्रत्यग्दृष्ट्यादृश्यतेयेनविश्वम्॥ मायाह्येषाभवदीयाहिभूमन्यस्त्वंषष्ठःपंचभिर्भासिभूतैः ३७॥ योगेश्वराऊचुः॥ प्रेयान्नतेन्यो
स्त्यमृतप्रियप्रभोविश्वात्मनीक्षेन्नपृथग्यआत्मनः॥ अथापिभक्त्येशतयोपधावतामनन्यवृत्त्यानुगृहाणवत्सल ३८

रत्वंसामर्थ्यंविनायुज्यते भगवन्महिमैवासौयदृश्योभगवान्स्वयमितिवाक्यं हिशब्दगृहीतं। भूमन्नित्यनेनपूर्णस्यायंस्वभावइतिदर्शयति। यद्वा प्रत्यग्दृष्ट्यादृष्टस्त्वमस्माकंदृग्भिर्दृष्टः किमहोस्मद्भाग्यंदि
व्यदृष्टिगोचरस्यान्यदृष्टिगोचरत्वमिति। यत्पंचभिर्भूतैःसहषष्ठोभासीतियच्चसेयंभवदीयामायाहीति ३७ योगेश्वरस्तुत्याप्रतीतंपंचभूतात्मकत्वंनिवारयाति प्रेयानिति। अमृतप्रियमुक्तप्रियप्रभो
समर्थविष्णोयोजीवोविश्वात्मनिजगदंतर्यामिणित्वयिपृथक्त्वमन्यथात्वंनेक्षेन्नपश्येत् सुरनरतिर्यगादिषुजीवराशिषुप्रेरकत्वेनस्थितानांतवरूपाणांगुणादीनांचाणुमात्रंभेदंनपश्यतीत्यर्थः। तस्मादात्मनो
जीवादन्यः प्रेयांस्तवनास्ति हेभृत्येशभृत्यानांदासानामस्माकमीशभक्तवत्सल तयाभक्त्यात्वनन्ययाशक्यअहमेवंविधोर्जुनेतिप्रसिद्धा तयाऽनन्यवृत्त्याउपधावतांसेवमानानामस्माकमनुग्रहोस्त्येवअ
थापिपुनरनुगृहाणेत्यन्वयः यथार्थज्ञानिनोनान्यःप्रियोविष्णोस्तुकश्चन तथाप्यधिकसंतुष्टचैप्रसीदेत्यर्थंनपुनारितिवचनादुपपन्नाप्रार्थनेति अत्राभेदज्ञानिनोहरेरधिकप्रियत्वमुच्यतइत्ययमर्थःपृथक्ज्ञा
नंतदित्याहुर्यत्किंचिद्वीक्ष्यतेन्यथा ज्ञानज्ञेयाविरोधेनत्वपृथग्वस्तुनोदृशिः केचिद्भेदंविनिंदंतिह्यासुरज्ञानवृत्तयःनिराकुर्वंत्यथोमंदाभेदस्यपरमार्थतां येतुतत्त्वविदोमुख्याभेदंब्रह्मान्यवस्तुनोःपरमार्थ
मितिज्ञात्वानित्यंविष्णुमुपासतेइत्यादिप्रमाणविरुद्धइतिज्ञातव्यं आचार्येणापिनपृथग्यआत्मनः। अन्यथायोनपश्यतीतिपृथगित्येतदन्यथेतिव्याख्यातंनभेदमिति ३८

SGLF Sri Gargeshwari Digital Foundation

विश्वांतर्यामित्वंतत्स्वामित्वंचहरेरेवमुख्यमित्याशयेनाहुः जगदिति जगदुद्भवस्थितिलयेषुजगदुत्पत्तिस्थितिसंहारेषुलीलयाप्रविभज्यमानगुणया सृष्टौरजःस्थितौसत्त्वंसंहारेतमइतिप्रकारेणविभज्य मानाःप्रथक्क्रियमाणाःसत्त्वादिगुणायस्याःसातयात्माधीनयामायया । प्रकृत्याजडयामिथ्याज्ञानंजनयतीश्वरः तस्यभ्रमश्चसत्त्वाद्यानसंतिपरमेशितुरितिवचनात्प्रकृत्या । रचिताकृताऽऽत्मनांजीवा नांभेदमतिर्मिथ्याज्ञानंयेनसतथातस्मै स्वसंस्थया एवार्थेहिशब्दःस्वरूपस्थित्यैवमहिमलक्षणयाअतिवर्तितानिरस्ताभ्रमोगुणाश्चसत्त्वाद्यायस्मात्सतथा सचासौआत्माचेत्यतिवर्तितभ्रमगुणात्मातस्मै हेअतिवर्तितभ्रमज्ञानानंदादिगुणात्मनइतिभिन्नंवापदं । हिशब्दोज्ञानानंदात्मनोहरेरुपाधिनाभ्रमयोग्यत्वंनिवारयति ३९ हेअमितअनंततेतुभ्यंनमः तत्त्वायाऽद्वयज्ञानाय अमितानारोपितरू पायेतिवा धर्मादीनामस्माकंचसूतयउत्पत्तिकारणाय चशब्देनास्मत्कारणत्वंनिवारयति । कारणस्यरजआदिगुणसंसर्गोनास्तीत्याह निर्गुणायेति सृष्टौप्रवर्तमानस्यतद्गुणास्पर्शोमाहात्म्यातिशयाद्यु ज्यतइतीममर्थंचशब्देनवक्ति अत्रप्रणतिःसम्यक्स्वरूपज्ञानाभावेपिसामान्यज्ञानेनघटतइतिभावेनाह यत्काष्ठामिति काष्ठोत्कर्षेसीम्निदिशीतियादवः । अपरेमदर्वाचीनाःकुतोविदुर्नकुतोपीत्यर्थः अनेनास्यपरमात्मत्वेनकोपिसंदेहइतिदर्शितम् ॥ ४० ॥ अनेनापिमंदाशंकामुन्मूलयति यत्तेजसेति यस्यहरेस्तेजसा यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमितिवचनात् सुसमिद्धतेजाःपूज्य

जगदुद्भवस्थितिलयेषुलीलयाप्रविभज्यमानगुणयात्ममायया ॥ रचितात्मभेदमतयेस्वसंस्थयाह्यतिवर्तितभ्रमगुणात्मनेनमः ३९ ॥ ब्रह्मोवाच ॥ नम स्तेऽमिततत्त्वायधर्मादीनांचसूतये ॥ निर्गुणायचयत्काष्ठांनाहंवेदापरेकुतः ४० ॥ अग्निरुवाच ॥ यत्तेजसाहंसुसमिद्धतेजाहव्यंवहाम्यध्वरआज्यसि क्तम् ॥ तंयज्ञियंपंचविधंचपंचभिःस्विष्टंयजुर्भिःप्रणतोस्मियज्ञम् ४१ ॥ देवाऊचुः ॥ पुराकल्पापायेस्वकृतमुदरीकृत्यविकृतंत्वमेवाद्यस्तस्मिन्सलिल उरगेंद्राधिशयने ॥ पुमाञ्शेषेसिद्धैर्हृदिविमृशिताध्यात्मपदविःसएवाद्याक्ष्णोर्नःपथिचरसिभृत्यानवसिच ४२ ॥ गंधर्वाऊचुः ॥ आशासानादेवमरीच्या दयएतेब्रह्मेंद्राद्यादेवगणारुद्रपुरोगाः ॥ क्रीडाभांडंविश्वमिदंयस्यविभूम्नस्तस्मैनित्यंनाथनमस्तेकरवामः ४३

त्वेनसम्यक्प्रवृद्धंतेजोबलंयस्यसतथा अहंजातवेदाअध्वरेयज्ञेआज्यसिक्तमाज्येनसृतंहव्यंवहामिदेवान्प्राप्यविभज्यार्पयामीत्यर्थः ओ३म् आश्रावय अस्तुश्रौषट् यज येयजामहे वषडितियजुर्वेदगतै र्यजुर्भिःपंचमंत्रैः । स्विष्टंसुष्ठुपूजितं । तंपंचविधंपंचधाविभक्तविग्रहं । यज्ञंयज्ञपुरुषंयज्ञेशंयज्ञभावनंयज्ञभुजमित्येवंत्रिधं । भगवंतंप्रणतोस्मीत्यन्वयः । यज्ञंयज्ञेशमित्यादिपंचविधमितिवायोज्यं उक्तंच यज्ञोयज्ञपुमांश्चैवयज्ञेशोयज्ञभावनः यज्ञभुक्चेतिपंचात्मायज्ञेष्विज्योहरिःस्वयमिति आश्रावयास्तुश्रौषड्यजाथोयेयजामहे ॥ वषट्कारांतकैर्नित्यंयजुर्भिःपंचभिर्विभुरिति ४१ कल्पापायेप्रलयेस्वे नकृतंविकृतंकार्यरूपंजगदुदरीकृत्यउदरेनिधाययज्जलंसृष्टिकालेस्वयापीतंतस्मिन्सलिलेउरगेंद्रएवाधिकंशयनमुरगेंद्राधिशयनं तस्मिन्नाद्यःपुमांस्त्वंशेषे अत्रप्रमाणंचाहुः सिद्धैर्मुक्तैर्वेदैर्वाविमृशिताविचा रिताअध्यात्मनःपरमात्मनः पदवीयस्यसविमृशिताध्यात्मपदविः यएवंविधःश्रीनारायणःसएवनान्यः अद्यनोऽक्ष्णोःपथिचक्षुर्विषयेचरसिभृत्यानस्मानवसि चशब्देनभृत्यरक्षणमेवप्रयोजनंनान्यदित्यर्थं १९ निर्धारयति नैतत्स्वरूपंभवतइत्यादिनायदुक्तंतन्निर्धारितमनेनेति ४२ हेदेवआशासानाःफलमाकांक्षमाणायएतेमरीच्यादयोयएतेब्रह्मेंद्राद्यादेवगणायएतेरुद्रपुरोगाभूतगणाइतीदंविश्वंविभूम्नोयस्यतवक्री डाभांडंक्रीडोपकरणंवर्ततइत्यन्वयः हेनाथतस्मैतेतुभ्यंनित्यंनमःकरवामइत्यनेनापिसर्वशंकोन्मूलिता ४३

SGLF Sri Gargeshwari Digital Foundation

अव्यक्तादेस्त्वद्रूपकल्पनायास्त्वदिच्छाधीनत्वात्त्वत्प्रसादेनैवनिरासःस्यादित्याशयेनविद्याधराःस्तुवंतीत्याह त्वन्माययेति। त्वन्माययात्वदिच्छयात्वदधीनयाप्रकृत्याचरचितमर्थंदेहकलत्रादिलक्षणम
भिपद्यदुर्मतिर्दुःखितमतिःअस्मिन्कलेवरेममाहमितिमतिंकृत्वातएवउत्पथैर्दुर्मार्गवर्तिभिःस्वैरिंद्रियैः क्षिप्तोऽसत्स्वमंगलेषुविषयेषुलालसउत्कंठावानपिपुमान्युष्मत्कथारसानिषेवकः आत्मामुह्यत्यने
नेत्यात्ममोहःसंसारस्तमुद्व्युदस्येन्निरस्यतीत्यन्वयः ४४ ब्राह्मणस्तुतिव्याजेनहरेःसर्वस्वातंत्र्यंद्रढयाति त्वंक्रतुरिति त्वंक्रतुरित्याद्यभेदेनोक्तिरंतर्यामिविषयेतिज्ञातव्यं तदुक्तं सर्वशब्दाभिधे
यत्वंसर्वांतर्यामिकत्वतः नतुसर्वस्वरूपत्वात्सर्वभिन्नोयतोहरिरिरिति अपभ्रष्टचेतनैक्याभावेपिब्रह्मरुद्रादिविशिष्टचेतनैक्यंकिंनस्यादितिचेत्तन्न प्रमाणविरुद्धत्वात् तदुक्तं अंतर्यामिस्वरूपेणब्रह्मरुद्राद्य
भिन्नता। नतुजीवस्वरूपेणजीवाभिन्नायतोहरेः विशेषाभेदवचनंसन्निधानविशेषतः सन्निधानंतुतत्प्रोक्तंसामर्थ्यव्यंजनंहरेरिति ४५ रसायारसातलात् योगिभिःसनकादिभिः यज्ञक्रतुर्यज्ञसंकल्पः ४६
सामगीःसामगायनध्वनिः परिभ्रष्टानिविस्त्रस्तानिसत्कर्माणियेषांते तथोक्तास्तेषां यज्ञविघ्नाराक्षसाः ४७ भद्ररुद्रोवीरभद्रः उन्निन्येउर्ध्वंनीतवान् समाप्तंकृतवानित्यर्थः ४८ सर्वात्मेति
हेतुगर्भविशेषणम् । सर्वभूतांतर्यामित्वेन सर्वभागभुक् स्वेनभागेनहेतुनासर्वभागंभुंक्तइतिसर्वभागभुक् । पूर्वंप्रीयमाणइदानींप्रीयमाणइत्युभयार्थाभिप्रायेणेवशब्दः इवोभयेचसादृश्यइत्यभिधा

विद्याधराऊचुः ॥ त्वन्माययार्थमभिपद्यकलेवरेस्मिन्कृत्वाममाहमितिदुर्मतिरुत्पथैःस्वैः ॥ क्षिप्तोप्यसद्विषयलालसआत्ममोहंयुष्मत्कथामृतनिषेवक
उद्व्युदस्येत् ४४ ॥ब्राह्मणाऊचुः ॥ त्वंक्रतुस्त्वंहविस्त्वंहुताशःस्वयंत्वंहिमंत्राःसमिद्दर्भपात्राणिच ॥ त्वंसदस्यार्त्विजोदंपतीदेवताअग्निहोत्रंस्वधासोमआज्यं
पशुः ४५ त्वंपुरागांरसायामहान्सूकरोदंष्ट्रयापद्मिनींवारणेंद्रोयथा ॥ स्तूयमानोनदँल्लीलयायोगिभिर्व्युज्जहर्थत्रयीगात्रयज्ञक्रतुः ४६ सामगाऊचुः ॥
संप्रसीदत्वमस्माकमाकांक्षतांदर्शनंतेपरिभ्रष्टसत्कर्मणाम् ॥ कीर्त्यमानान्नृभिःसामगीरीशतेयज्ञविघ्नाःक्षयंयांतितस्मैनमः ४७ मैत्रेयउवाच ॥ इति
दक्षःकविर्यज्ञंभद्ररुद्राभिमर्शितम् ॥ कीर्त्यमानेहृषीकेशेउन्निन्येयज्ञभावने ४८ भगवान्स्वेनभागेनसर्वात्मासर्वभागभुक् ॥ दक्षंबभाषआभाष्यप्रीय
माणइवानघ ४९ ॥ श्रीभगवानुवाच ॥ अहंब्रह्माचशर्वश्चजगतःकारणंपरं ॥ आत्मेश्वरउपद्रष्टास्वयंदृगविशेषणः ५० सआत्ममायामाविश्ययोहंगु
णमयींद्विज ॥ सृजन्रक्षन्हरन्विश्वंदध्रेसंज्ञाःक्रियोचिताः ५१

नात् यथाप्रीयमाणःप्रियंवक्ति तथेतिवा ४९ ननुभगवान्स्वागतंबभाषइतिनयुक्तं । दक्षस्यप्रागेवतत्रस्थितत्वात् अन्यद्वक्तव्यंनप्रतीयतइत्याशंक्यस्वात्मानंदक्षायोपदिशतीत्याह अहमिति ।
आत्मेश्वरः आत्मनांजीवानामीश्वरईशनशीलः । उपद्रष्टासर्वस्मादधिकोद्रष्टा स्वयंदृक्स्वयंप्रकाशः अविशेषणः सर्वोत्तमोहंविष्णुर्जगतःपरं पॄपालनपूरणयोरितिधातुः पालकं कारणं ।
ब्रह्माब्रह्मसंज्ञोहंपरंसृष्ट्यापूरकंकारणं शर्वःशर्वसंज्ञोऽहंजगतःपरमुत्कृष्टंकारणंविक्षेपकंसंहारकंकॄविक्षेपइतिधातुः मामेवंविधंजानीहीतिशेषः ५० एतदेवस्पष्टयाति सइति हेद्विजदक्ष । योहमेवंत्रिरूपःसएवा
हंसत्त्वादिगुणमयीमात्ममायांमदधीनजडप्रकृतिमाविश्यरजोगुणोपादानत्वेनब्रह्माणंसृष्ट्वा ब्रह्माख्यमद्रूपेणतंप्राविश्यजगत्सृजन् । सत्त्वगुणप्रवर्तकत्वेनविष्णुरूपेणविश्वंरक्षन् तमोगुणोपादानत्वेनाशिवंसृ
ष्ट्वाशिवाख्यमद्रूपेणतंप्रविश्यविश्वंहरन्संहरन्तत्तत्क्रियोचिताःसंज्ञाअभिवृद्धिहेतुत्वाद्ब्रह्मनाम । सविलासव्याप्तिहेतुत्वाद्विष्णुनाम । संहारहेतुत्वाद्धरनामेतिदध्रइत्यन्वयः । अनेनब्रह्मरुद्रस्थमद्रूपाभ्यां
विष्णुरूपेणचाहमेवजगत्सृष्ट्यादित्रयकृदित्यतोब्रह्मशिवयोःप्रसिद्धयोःसृष्टिसंहारकर्तृत्ववचनंभ्रांतिमूलमित्युक्तंभवति ५१

एतदेवस्पष्टयति तास्मिन्निति योऽहंविश्वस्यमुख्यंकारणंतस्मिन्मयि । केवलेप्रकृतिसंबंधराहिते । ब्रह्मणिगुणपूर्णेऽद्वितीयेसमाधिकराहिते । परमात्मनिस्थितेसति देहात्मबुद्धिर्देहोहमितिबुद्धिर्यस्य सतथाजीवः । भूतानिब्रह्मादीनि । भेदेनस्वातंत्र्येण । स्वतएवसृष्ट्यादिप्रवृत्तिमंतिनकेनचिन्नियतानीत्यनुपश्यतीत्यन्वयः । अज्ञइतिहेतुगर्भविशेषणं यद्वा भेदेनास्थितानिब्रह्मादिभूतानिपरमात्मन्यनुपश्यतीत्यभेदेनेतिशेषः ५२ अज्ञानिदर्शनमुक्त्वाज्ञानिदर्शनप्रकारमाह यथेति पुमान्जीवःशिरःपाण्यादिषुस्वांगेषुक्वाचिदपिपारक्यबुद्धिंयथानकुरुतेकिंतुस्वकीयबुद्धिमेवकरोति एवंमत्परोब्रह्मादिभूतेषुमामकत्वबुद्धिंकरोति नस्वातंत्र्यबुद्धिम् ५३ अतःफलितमाह त्रयाणामिति हेब्रह्मन्एवमुक्तप्रकारेणममैवस्वातंत्र्यादन्येषामस्वातंत्र्यात्ब्रह्मशिवस्थत्वेनब्रह्मशिवाख्ययोर्मद्रूपयोः पृथक्स्थितस्यविष्ण्वाख्यस्यमद्रूपस्यचेतित्रयाणांत्रित्वसंख्योपेतानामेकभावानामेकरूपाणामेकैश्वर्याणां सर्वभूतात्मनासर्वभूतांतर्यामित्वेनयोजीवोभिदांनपश्यतिसशांतिंमोक्षंगच्छतीत्यन्वयः । यद्वा त्रयाणांब्रह्मविष्णुशिवाख्यानांसर्वभूतस्वामिनामेकचित्तानांभिदांमिथोविरोधबुद्धिविषयत्वंनपश्यतिसशांतिंस्वस्थबुद्धितयाभगवन्निष्ठामाप्नोति ब्रह्मादिजीवानांहरिणाऽभेदवचनस्यकागतिरितिचेन्न तद्वशत्वतत्प्रियत्वदृष्टिविषयत्वात् तदुक्तं हरेर्वशत्वदृष्टिस्तुभूतानामपृथग्दृशिः प्रियत्वदृष्टिरथवाब्रह्मादीनांविशेषतइति ५४ शांतिमधिगच्छतीत्यनेनहरेःस्वात्मोपदेशश्चेत्समाप्तःपरंदक्षेणकिमका

तस्मिन्ब्रह्मण्यद्वितीयेकेवलेपरमात्मनि ॥ देहात्मबुद्धिर्भूतानिभेदेनाज्ञोनुपश्यति ५२ यथापुमान्नस्वांगेषुशिरःपाण्यादिषुक्वचित् ॥ पारक्यबुद्धिंकुरुत एवंभूतेषुमत्परः ५३ त्रयाणामेकभावानांयोनपश्यतिवैभिदाम् ॥ सर्वभूतात्मनाब्रह्मन्सशांतिमधिगच्छति ५४ मैत्रेयउवाच ॥ एवंभगवतादिष्टःप्रजापतिपतिर्हरिम् ॥ अर्चित्वाक्रतुनास्वेनदेवान्भगवतोऽयजत् ५५ रुद्रंचस्वेनभागेनह्युपाधावत्समाहितः ॥ कर्मणोदवसानेनसोमपानितरानपि ॥ उदवस्यसहर्त्विग्भिःसस्नाववभृथंततः ५६ तस्माअप्यनुभावेनस्वेनैवावाप्तराधसे ॥ धर्मएवमतिंदत्त्वात्रिदशास्तेदिवंययुः ५७ एवंदाक्षायणीहित्वासतीपूर्वकलेवरम् ॥ जज्ञेहिमवतःक्षेत्रेमेनायामितिशुश्रुमः ५८ तमेवदयितंभूयस्त्ववापपतिमंबिका ॥ अनन्यभावैकगतिःशक्तिःसुप्तेवपूरुषम् ५९

रीतितत्राह एवमिति आदिष्टउपदिष्टःप्रजापतिःदक्षःस्वेनक्रतुनास्वयज्ञेनस्वेच्छयावाभागवतःभगवद्भक्तःस्वांशवतोब्रादेवानयजत्पूजयामास । उभयंतइतिपाठेकथमुभयतःसोमतोविष्टरादिभिश्च कथमुभयतःसोमतोहविषश्चेतिवा ५५ उपाधावदुपास्त ततोनिरपराधत्वेनशुद्धश्चाभूत् धावुगतिशुद्ध्योरितिधातुः उदवसानेनसमाप्तीष्टिलक्षणेनकर्मणा आग्नेयंपंचकपालमुदवसानीयांनिर्वपेदितिश्रुतेः सोमपानितिपाणिनेरपिसर्वज्ञेनव्यासेनप्रयुक्तत्वाद्विच्प्रत्ययःप्रायिकइतिज्ञातव्यं । इतरानसोमपानित्यर्थः । उदवस्यसमाप्तीष्टिंकृत्वा स्वेनानुभावेनभगवन्महिम्नैवावाप्तराधसेप्राप्तयज्ञसिद्धये ५६ ५७ ननुदक्षकोपेनयोगमुक्तदेहयादक्षपुत्र्यासत्यादेव्यानिवृत्तिलक्षणामुक्तिरवापीतिनयुज्यतेभर्तुःशिवस्यामुक्तदेहत्वात्सतीनामंगनानांभर्तृभिःसहमुक्तिश्रवणात् अतोऽनयाकिमकारीत्याशंकांहृद्गतांपरिहरति एवमिति क्षेत्रेभार्यायां ५८ अत्रनिमित्तमाह अनन्यभावेति एकःशंकरोगतिर्यस्याःसातथाअनन्यभावत्वात् अन्यभक्तिरहितत्वात् । अस्मिन्नर्थेदृष्टांतमाह शक्तिरिति भक्तेषुप्राहरावेवरता । सृष्टिव्यापारंविनास्थिता । शक्तिर्भार्यालक्ष्मीःपूरुषंविष्णुमिवयथाभजतितथेत्यर्थः तदुक्तं शक्तित्वाद्विष्णुशक्तिस्तुशक्तिशब्देनचोच्यते शक्यत्वात्प्रकृतिश्चापिस्वापःसृष्टिविनाहरौ । रतिस्तस्यास्तुकथितोनह्यन्यःस्वापइष्यतइति ५९

१ उभयत इतिपाठे प्रकृतोपयुक्तार्थाप्रतीतेराह उभयतइति ।

SGDF
Sri Gargeshwari Digital Foundation

भवतेदंकस्माच्छ्रुतमितितत्राह एतदिति बृहस्पतेःशिष्यादवताराच्च दक्षस्याध्वरंयज्ञंद्रोहितवान्हिंसितवान्नाशितवानितिदक्षाध्वरध्रुक्तस्य ६० संप्रदायवचनमुक्त्वातच्छ्रवणादिफलमाह इदमि
ति ६१ शंकरःस्वांसतीमवाप्यकिमकार्षीदितितत्राह सतीमिति शतमित्युपलक्षणं बह्वीःसमाइत्यर्थः ६२ अनेनरेतउत्सर्जनावधिःसूचितः तत्रकुत्रेदमुत्ससर्ज । तस्यांदेव्यामुतान्यत्र । नप्रथ
मः । प्रासपरित्यागेकारणाभावात् नद्वितीयस्त्वनुपपत्तेरितितत्राह स्ववीर्येति अकल्पामसमर्थां अनेनासामर्थ्यकारणमुक्तंभवतिइयमेवोपपत्तिः आकाशस्यनिरूपत्वेनतद्धारणायोगात् अधःपतत्तद्रे
तआकाशनदीगंगाजग्राहेत्याह गंगेति ६३ गंगायाअप्यशक्तिंनिरीक्ष्यवह्निस्तत्पीत्वास्वांतरजीर्णंस्वाहाद्वारेणनदीतीरेशरकाननेचच्छर्देत्याह पीत्वेति । स्वाहाद्वारेणेतिकस्मात्कल्प्यतइत्यतआ
चार्यैर्भारतोक्तेरित्युक्तेः भारतस्यनिर्णायकग्रंथत्वात् । अमोघरेतसोहरस्यवीर्यंनिष्फलंभवितुंनाईत्यत्रतूपगमनादिनिष्फलमिवप्रतीयतइतितत्राह कुमारइति ततोरेतसः । मातृरहितस्यकुमारस्यस्त
नपानंकथमत्राह तस्माइति ६४ एकेनमुखेनषट्कृत्तिकास्तनपानंकथंघटतइतितत्राह षड्भिरिति किमधिकारःकुमारइति तत्राहततइति सुराइतिशेषः सर्वासुराणांभयंभीतिंस्वस्थानच्युतिंचकरोतीति

एतद्भगवतःशंभोःकर्मदक्षाध्वरद्रुहः ॥ श्रुतंभागवताच्छिष्यादुद्धवान्मेबृहस्पतेः ६० इदंरहस्यंपरमीशचेष्टितंयशस्यमायुष्यमघौघमर्षणम् ॥ योनित्य
दाकर्ण्यतुकीर्तयेद्धुधोधुनोत्यघंकौरवभक्तिभावितः ६१ सतींमेनात्मजांतातप्राप्यजायांभवःपुनः ॥ तयामैथुनमास्थ्यरेमेदेवःसमाःशतम् ६२ स्ववीर्यंधार
णेकल्पांज्ञात्वाजायांसधूर्जटिः ॥ उत्ससर्जांबरेरेतोगंगाजग्राहतन्नदी ६३ पीत्वांतरजरंवह्निश्चच्छर्दशरकानने ॥ कुमारोभूत्ततस्तस्मैस्तनंषट्कृत्तिका
ददुः ६४ षड्भिर्मुखैस्तनंपीत्वासबालःषण्मुखोभवत् ॥ ततश्चकुःसैन्यपालंसर्वासुरभयंकरं ६५ ॥ इतिश्रीभागवतेचतुर्थस्कंधेऽष्टमोऽध्यायः ॥ ८ ॥
मैत्रेयउवाच ॥ सनकाद्यानारदश्चऋभुर्हंसोऽरुणिर्यतिः ॥ नैतेगृहान्ब्रह्मसुताह्यवसन्नूर्ध्वरेतसः १ मृषाधर्मस्यभार्यासीद्दंभंमायांचशत्रुहन् ॥ असू
तमिथुनंतत्तुनिर्ऋतिर्जगृहेऽप्रजः २ तयोःसमभवल्लोभोनिकृतिश्चमहामते ॥ ताभ्यांक्रोधश्चहिंसाचदुरुक्तिश्चतयोःकलिः ३ दुरुक्तौकलिराधत्तभयंमृत्युं
चसत्तम ॥ तयोश्चमिथुनंजज्ञेयातनानिरयस्तथा ४ एतेह्यधर्मवृक्षस्यवंशाःसंसृतिहेतवः ॥ श्रेयस्कामोनसेवेतनितरामाश्रमोत्तमी ५ संग्रहेणमयाख्या
तअनुसर्गस्तवानघ ॥ त्रिःश्रुत्वैतत्पुमान्पुण्यंविधुनोत्यात्मनोमलम् ६ अथातःकीर्तयेवंशंपुण्यकीर्तेःकुरूद्वह ॥ स्वायंभुवस्यापिमनोर्हरेरंशांशजन्मनः ७

॥ ६५ ॥ इतिश्रीभा० च० वि० टी० अष्टमोध्यायः ॥ ८ ॥ ॥ ७ ॥ ॥ संसारविरक्तस्यपुंसःश्रीनारायणश्रीपादपद्ममूलमेवशरणमितितिनिरूपयत्यस्मिन्नध्याये तत्रपरमभागवतस्यध्रुवस्यच
रित्रमनुवर्णयितुंहेयत्वेनाधर्मवंशानुचरितमाह सनकाद्याइति गृहान्नावसन्गृहस्थाश्रमंनाभजन्नित्यर्थः ऊर्ध्वरेतसइत्यनेनसंन्यासाश्रमंसूचयति १ अप्रजःसंततिरहितः २ ३ ४ अत्रमायादयः
स्त्रियोन्येपुमांसःसंसारहेतवोहियस्मात्तस्माच्छ्रेयस्कामोएतान्नसेवेतेत्यन्वयः आश्रमोत्तमीसंन्यासी ५ मयाख्यातअनुसर्गइत्यत्रसंध्यभावः संग्रहोक्त्याल्पत्वंनज्ञातव्यं महानयंग्रंथबहुलत्वाल्लोकेदृश्य
मानत्वाच्चेतिप्रदर्शनार्थइतिज्ञातव्यं अस्यानुसर्गस्यश्रवणफलमाह त्रिःश्रुत्वेति आत्मनोमनसोमलंविधुनोतिनिरस्यति ६ वक्तव्यायाःकथायाःसमाप्तत्वादतःपरंकिंवक्तव्यमितितत्राह अथातइति । अ
थेत्यनेनपूर्वस्माद्वक्ष्यमाणस्यार्थस्यमंगलत्वंवक्ति यतोऽधर्मादिकंहेयमतउपादेयंकथयामीत्यतइति अपिशब्देनवंशस्यानल्पत्वंश्रुतिस्मृतिभ्यांसंभावितत्वमाह हरेरिति हरेरंशांशेनविशेषावेशेनसंहितं
जन्मयस्यसतथातस्य आविष्टाहरिणाजीवाप्रभादक्षोमनुःपृथुः । शक्राद्याऋषयश्चैवमत्स्यव्यासादयोहरिरिति ७

SGDF

प्रियव्रतोत्तानपदोर्मनुपुत्रत्वेनपूर्वंमुक्तयोःपुनरत्रोक्तिर्वंशस्यादित्वज्ञापनायानुवदति । प्रियव्रतेति । वासुदेवस्यराजराजाख्यस्यकलयासन्निहितौ तदुक्तं प्रियव्रतोत्तानपादप्रमुखेषुहरिःस्वयं आविष्टःसर्व
भूतेषुऋषभाद्याःस्वयंहरिरिति ८ प्रियव्रतोत्तानपदोर्मध्येप्रियव्रतविक्रमस्यप्रथमंवक्तव्यत्वेसत्युत्तानपादपुत्रस्यध्रुवस्यातिरमणीयत्वेनविरक्तिभक्तिजनकत्वेनश्रोतुःश्रद्धाजनकत्वेन भगवदुपास्तौ
२० क्षिप्रप्रवृत्तिजनकत्वेनाऽऽश्चर्यबुद्धिजनकत्वेनचप्रथमंतच्चरितंवक्तुमुपक्रमते जायेइति यस्याःसुनीतेःसुतः ९ सुनीतिःकथंपत्युःप्रेष्ठानाभूदितिज्ञायतइतितंप्रकारंवक्ति एकदेति नाम्नोत्तमं आरुरु १
क्षंतमंकमारोढुकामम् १० तथाचिकीर्षमाणमंकमारोढुमिच्छंतं सपत्न्याःसुनीतेः सेर्ष्यमितिक्रियाविशेषणम् ११ धिष्ण्यंसिंहासनं । अनर्हत्वेनिमित्तमाह नगृहीतइति १२ नेदमाश्चर्यमित्याह बालइति ततः
किमितितत्राह नात्मानमिति । स्वायोग्यमिच्छन्यतिष्यसीतिभावेनाह यस्येति । यस्यतव १३ तर्हित्वत्पुत्रभावित्वेकिंकर्तव्यमत्राह तपसेति । पुरुषंविष्णुं १४ ध्रुवःसपत्न्याःसुरुच्याःवाक्यंश्रुत्वाकिमकार्षी

प्रियव्रतोत्तानपादौशतरूपापतेःसुतौ ॥ वासुदेवस्यकलयारक्षायांजगतःस्थितौ ८ जायेउत्तानपादस्यसुनीतिःसुरुचिस्तयोः ॥ सुरुचिःप्रेयसीपत्युर्ने
तरायत्सुतोध्रुवः ९ एकदासुरुचेःपुत्रमंकमारोप्यलालयन् ॥ उत्तमंनारुरुक्षंतंध्रुवंराजाभ्यनंदत १० तथाचिकीर्षमाणंतंसपत्न्यास्तनयंध्रुवम् ॥ सुरुचिः
शृण्वतोराज्ञःसेर्ष्यमाहातिगर्विता ११ नवत्सनृपतेर्धिष्ण्यंभवानारोढुमर्हति ॥ नगृहीतोमयायत्त्वंकुक्षावपिनृपात्मज १२ बालोसिबतनात्मानमन्य
स्त्रीगर्भसंभृतम् ॥ नूनंवेदभवान्यस्यदुर्लभेऽर्थेमनोरथः १३ तपसाराध्यपुरुषंतस्यैवानुग्रहेणमे ॥ गर्भेत्वंसाधयात्मानंयदीच्छसिनृपासनम् १४ मैत्रे
यउवाच ॥ मातुःसपत्न्याःसुदुरुक्तिविद्धःश्वसन्रुषादंडहतोयथाहिः ॥ हित्वामिषंतंपितरंसन्नवाचंजगाममातुःसरुदन्सकाशम् १५ तंनिःश्वसंतं
स्फुरिताधरोष्ठंसुनीतिरुत्संगमुदूह्यबालम् ॥ निशम्यतत्पौरमुखान्नितांतंसाविव्यथेयद्गदितंसपत्न्या १६ सोत्सृज्यधैर्यंविललापशोकदावाग्निनादावल
तेवदग्धा ॥ वाक्यंसपत्न्याःस्मरतीसरोजश्रियादृशाबाष्पकलामुवाह १७ दीर्घंश्वसंतीवृजिनस्यपारमपश्यतीबालकमाहबाला ॥ माऽमंगलंतातपरे
षुमंस्थाभुंक्तेजनोयत्परदुःखदस्तत् १८ सत्यंसुरुच्याभिहितंभवान्मेयद्दुर्भगायाउदरेगृहीतः ॥ स्तन्येनवृद्धश्चविलज्जतेयांभार्येतिवावोढुमिडस्पतिर्माम् १९

दितितत्राह मातुरिति मिषंतंपश्यंतं सन्नवाचंतूष्णींभूतं आमिषंहित्वामातुरिवास्थितस्याबिलस्यसकाशमहिरिवेतिवा १५ अस्यामवस्थायांसुनीत्याकिमकारीतितत्राह तंनिःश्वसंतमिति १६ धातोरनेका
र्थत्वात्कीदृशीव्यथातयाकारीतितत्राह सोत्सृज्येति । विलापस्योदरताडनाविनाभूतत्वेनतत्पूर्वकंतयापरिदेवितमित्यर्थः शोकदावाग्निनाशोकाख्यवनवह्निनादह्यमानेतिशेषः । दावलतावनवल्ली बाष्प
कलांनेत्रजलधाराम् १७ वृत्त्यासस्यभक्षणवद्राज्ञाकृतावज्ञानस्यापरिहार्यत्वात्संप्राप्तदुःखस्यावसानमचक्षाणाआत्मनोनिर्दुष्टमनस्कत्वंदर्शयंती बालंशिक्षयतीत्याह दीर्घंश्वसंतीति परदुःखदोजनस्तदुःखं २०
स्वयंभुंक्तेइतियद्यस्मात्तस्मात्परेष्वमंगलंमामंस्थाःननिरूपयेत्यन्वयः १८ परेणद्वेषादुक्तमपिगुणग्राहिणःस्वात्मनःपथ्यमेवभवतीतिभावेनाह । सत्यमिति चार्थोवाशब्दः । इडस्पतिःराजा । यांमांभार्येतिच
वोढुंवक्तुंविलज्जते भवांस्तस्याद्दुर्भगायाःदुःखहेत्वदृष्टायामेउदरेगृहीतोऽतएवस्तन्येनैववृद्धोनतुपितृदत्तरसायनेनेतियस्मात्तस्मात्सुरुच्यातपसाराध्येतियदभिहितंतत्सत्यामित्यन्वयः १९

SGDF

एतदेवविवृणोति आतिष्ठेति । मत्पुत्रउत्तमोयथातथायद्यध्यासनमिच्छसेआत्मनोहितमाकांक्षसेतर्ह्यधोक्षजपादपद्ममाराधयेति यत्सुमात्रासुरुच्याकथितंतदव्यलीकंकर्तुमातिष्ठ । तपइतिशेषः ॥ २० ॥
केनचित्श्रीनारायणश्रीचरणपरिचर्याफलंनिरुपममवाप्तंचेत्तर्हिश्रोतुस्तत्रक्षिप्रंप्रवृत्तिर्भवतीतितत्राह यत्पादेति परिचर्यपरिपूज्य विश्वविभावनायविश्वस्यविविधसृष्ट्यर्थमात्तगुणाभिपत्तेः अंगीकृतसा
र्वज्ञ्यादिगुणप्राप्तिहेतोरजोब्रह्माजितात्मावशीकृतमनाःश्वसनस्यवायोरपिविभागराहित्येनगंतुंयोग्यंर्वंद्यम् २१ चतुर्मुखस्यभगवत्पुत्रत्वेनतत्प्रसादायोग्यतयातस्यतादृशैश्वर्यावाप्तिर्युक्ताऽस्मत्पूर्व
जेनकेनार्प्ययेनश्रद्धयास्माकमपितत्रझटितिप्रवृत्तिःस्यात् अतस्तदनुभावयेतितत्राह तथेति । अन्यतोभक्त्यादिव्यतिरिक्तसाधनेनाऽन्याभ्योदेवताभ्योवाभौमंमन्वंतराधिपत्यंदिव्यंस्वर्गसंबंधिआपव
र्ग्यंकैवल्यसंबंधि अथेत्यनेनदेहत्यागानंतरमेवापवर्गसुखावाप्तिर्नजन्मांतरंप्राप्येत्याह २२ किंबहुनोक्तेनसारंवक्ष्यामीत्याह तमेवेति यत्किंचिद्दोषदृष्ट्याविमुखोनस्यादित्यतउक्तंभृत्येति नकेवलंवि
षयलोलैरेवाराध्यंकिंतुसंसारमोक्षेच्छुभिरपीतिभावेनोक्तंमुमुक्षुभिरिति । अत्रप्रधानसाधनमिदमितिध्वनयति अनन्यभावइति । अनन्योभावोविषयोयस्यसतथातस्मिन् तस्यभक्तिसाधनत्वंध्वन
यति निजधर्मेति यमनियमादयोनिजधर्मास्तैर्भावितेकृततत्स्वभावे २३ कुतोयमेवापेक्षिताशेषपुरुषार्थावाप्ताविततिनियमोन्यःकिंनस्यादितितत्राह नान्यंततइति योयुष्माकंकुलदेवतालक्ष्मीकांत

आतिष्ठतत्तातविमत्सरस्त्वमुक्तंसुमात्रापियदव्यलीकम् ॥ आराधयाधोक्षजपादपद्मंयदीच्छसेध्यासनमुत्तमोयथा २० यत्पादपद्मंपरिचर्यविश्वविभाव
नायात्तगुणाभिपत्तेः ॥ अजोध्यतिष्ठत्खलुपारमेष्ठ्यंपदंजितात्माश्वसनाभिवंद्यम् २१ तथामनुर्वोभगवान्पितामहोयमेकभक्त्यापुरुदक्षिणैर्मखैः ॥ इष्ट्वा
भिपेदेदुरवापमन्यतोभौमंसुखंदिव्यमथापवर्ग्यम् २२ तमेववत्साश्रयभृत्यवत्सलंमुमुक्षुभिर्मृग्यपदाब्जपद्धतिम् ॥ अनन्यभावेनिजधर्मभाविते मनस्यव
स्थाप्यभजस्वपूरुषम् २३ नान्यंततःपद्मपलाशलोचनाद्दुःखच्छिदंतेमृगयामिकंचन ॥ योमृग्यतेहस्तगृहीतपद्मयाश्रियेतरैरंगविमृग्यमाणया २४
॥ मैत्रेयउवाच ॥ एवंसंजल्पितंमातुराकर्ण्यार्थागमंवचः ॥ सन्नियम्यात्मनात्मानंनिश्चक्रामपितुःपुरात् २५ नारदस्तदुपाकर्ण्यज्ञात्वाचास्यचिकीर्षि
तम् ॥ स्पृष्ट्वामूर्धन्यघघ्नेनपाणिनाप्राहविस्मितः २६ अहोतेजःक्षत्रियाणांमानभंगममृष्यताम् ॥ बालोप्ययंहृदाधत्तेयत्समातुरसद्वचः २७

स्ततस्तस्मात्पद्मपलाशलोचनादनेनाकाशवन्निरूपस्योपासनंनसंगच्छतइतिचोद्यंपरिहृतंत्वयानान्विष्योक्तंविचारितेकाश्चित्स्यादित्यतउक्तं मृगयामीति । लक्ष्मीतत्त्वंस्यादितितत्राह यइति श्रीत्वंभार
स्यादावप्यस्तीत्यतउक्तम् इतरैरिति इतरैर्ब्रह्मादिभिःसेव्यापिसंपल्लक्षणाश्रीःकिंनस्यादित्यतउक्तं हस्तेतिअनेनश्रीःप्रियामूर्तिमतीसाक्षाल्लक्ष्मीरितिज्ञायते मृग्यतइत्यनेनहरेर्गुणतःस्वरूपतश्चोत्तम
त्वंध्वनयति विमृग्यमाणयेत्यनेनश्रीकटाक्षमोक्षस्यदुःसाधनत्वमाह २४ बालस्याद्रोषतोषयोःक्षणकालीनत्वेनासमत्राान्मातृवचःश्रुत्वापिगृहएवात्रस्थानंहृदिसन्निधायतत्समर्थनायततो निर्गम
नंवायुक्तमितिध्रुवेणद्वयोर्मध्येकिमकारीत्यांतरीशंकांपरिहर्तुमाह एवमिति अर्थस्याभिप्रेतस्यागमःप्राप्तिर्यस्मात्तत्तथा तदात्मानंमनः आत्मनाधैर्यगुणेन २५ ध्रुवोनाममहात्मेतिद्योतयंस्तस्य
स्वाभीष्टसिद्धिलक्षणंनारदसंवादंवक्ति नारदइति उपाकर्ण्येत्यनेननारदस्यदूरश्रवणशक्तिर्योगींद्रत्वात्स्वाभाविकीतिसूचयति सर्वप्राणिचित्तविषयंज्ञानंवायोगसिद्धमिति स्पृष्ट्वेत्यादिनागुरुप्रसादंध्वनय
ति अघघ्नेनसर्वदुरितविनाशकेनेतिपित्रादिद्वेषनिमित्तदोषनाशंसूचयति २६ विस्मितइत्युक्तमभिनयति अहोइति तेजोधैर्यलक्षणं अधृष्यतामसहमानानां समातुःसमानमातुःसुरुच्याः २७

SGDF

किंप्राहेतितत्राह क्वयातीतिलक्षयेलक्षणवृत्त्याजानामि २८ अत्रध्रुवेणकिमुत्तरंदत्तमितितत्राह किंनतइतिध्यानेनज्ञानंलक्षयति । कार्यकारणसंबंधात् तेत्वयाध्यानजातेनयोगराधसाऽष्टांगयोगज
नितदूरदर्शनशक्तिलक्षणसामर्थ्येनवाकिंनदृष्टंसर्वंदृष्टमेव । तथापिवक्ष्यामीतिशेषः किंतदितितत्राह नोत्सहइति २९ नारदेनापिकिंप्रत्युत्तरमुक्तमत्राह नाधुनेति ३० ननुक्रीडनादिषुसक्तस्यबाल
स्यनयुक्तमन्यस्यविवेकिनःकथमित्याशंक्यनितरामीदृशस्यसंतोषहेतुस्वामितिबोधयति १विकल्पइति विकल्पेशत्रुमित्रादिविविधकल्पनेविद्यमानेपिपुंसोमोहमृतेभ्रममंतरेणासंतोषहेतवोमनःखेदजनकानसं
ति कुतःलोकाजनाभिन्नाःस्वानुष्ठितैर्निजकर्मभिरुत्तमाधममध्यमभेदेननानाविधाइतियस्मात् ३१ ततईश्वरगतिंबुधोविद्वान्यावद्दैवोपसादितंवीक्ष्यतावन्मात्रेणपरितुष्येदित्यन्वयःईश्वरगतिंवीक्ष्ययावद्दैवोप
सादितंतावन्मात्रेणेतिवा अनेनसुरुच्यादुर्वचस्तवसंतापकारणंनभवतीत्युक्तंभवति ३२ हरेःप्रसादजनकेतपसिस्थितांबुद्धिंदृढांविधातुंबाधकमपिधत्ते अथेति । अथयादिमात्रोपदिष्टेनयोगेनोपायेनयस्य
हरेःप्रसादार्थंहरिमवरुरुत्ससिअनुग्रहोन्मुखीकर्तुमिच्छसितर्ह्यपिसहरिर्ममपुंसांदुराराध्योमतः कुतस्तत्प्रसादावाप्तिःकुतस्तरांफलावाप्तिरित्यर्थः वाइत्यनेनस्वानुभवसिद्धमितिदर्शयति ३३ मुनयोपिय

॥ नारदउवाच ॥ क्वयात्येकोभवान्वत्सहित्वास्वगृहमृद्धिमत् ॥ लक्षयेत्वावमन्यांगसंतप्तंस्वजनोत्थया २८ ॥ ध्रुवउवाच ॥ किंनतेध्यानजातेनदृष्टंवा
योगराधसा ॥ नोत्सहेसुरुचेर्वाचासमाधातुंमनःक्षतम् २९ ॥ नारदउवाच ॥ नाधुनाप्यवमानंतेसन्मानंचापिपुत्रक ॥ लक्षयामःकुमारस्यसक्तस्यक्री
डनादिषु ३० विकल्पेविद्यमानेपिनह्यसंतोषहेतवः ॥ पुंसोमोहमृतेभिन्नायल्लोकानिजकर्मभिः ३१ परितुष्येत्ततस्ताततावन्मात्रेणपूरुषः ॥ दैवोपसा
दितंयावद्वीक्ष्येश्वरगतिंबुधः ३२ अथमात्रोपदिष्टेनयोगेनावरुरुत्ससि ॥ यत्प्रसादंसवैपुंसांदुराराध्योमतोमम ३३ मुनयःपदवींयस्यनिःसंगेनोरुजन्म
भिः ॥ नविदुर्मृगयंतोपितीव्रयोगसमाधिना ३४ अतोनिवर्ततामेषनिर्बंधस्तवनिष्फलः ॥ यतिष्यतिभवान्कालेश्रेयसांसमुपस्थिते ३५ यस्ययद्दैव
विहितंसतेनसुखदुःखयोः ॥ आत्मानंतोषयन्देहीतमसःपारमृच्छति ३६ गुणाधिकान्मुदंलिप्सेदनुक्रोशंगुणाधमात् ॥ मैत्रींसमानादन्विच्छन्नतापैरभि
भूयते ३७ ॥ ध्रुवउवाच ॥ सोयंशमोभगवतासुखदुःखहतात्मनाम् ॥ दर्शितःकृपयापुंसांदुर्दर्शोस्मद्विधैस्तुयः ३८ अथापिमेऽविनीतस्यक्षात्रंघोरमुपे
युषः ॥ सुरुच्यादुर्वचोबाणैर्नभिन्नेश्रयतेहृदि ३९

न्मार्गंसमाराध्यनजानंति बालकस्त्वंकिमुतेत्याह मुनयइति ३४ ततःकिंतत्राह अतइति । तर्हिनिःश्रेयसायप्रयतमानस्यपुंसोजन्मनोनिरर्थकत्वमित्याशंक्यनायंकालःकिंतुकालांतरइत्याह यति
ष्यतीति । कालेवार्धके ३५ सुखदुःखयोर्मध्येयत्सुखंदुःखंवायस्यदैवेनविहितंसदेहीतयोरेकेनतेनात्मानंतोषयंस्तमसःपारमज्ञानस्यांतं मोक्षमृच्छतिगच्छतीत्यन्वयः ३६ मनोदुःखाभावेउपायां
तरमाह गुणाधिकादिति शमदमादिगुणाधिकात्पुरुषादितिप्रत्येकंसंबध्यते अनुक्रोशंदयां मैत्रींसौहार्दंतापैर्मनःखेदकरैर्भावैः ३७ नारदेनैवंबोधितोपिध्रुवस्तंमार्गंप्रशस्यस्वहार्दंविज्ञापयति सोयमि
ति योस्मद्विधैर्दुर्दर्शःशास्त्रदृष्ट्याज्ञातुमशक्यःसोयंशमोभगवन्निष्ठालक्षणोभगवतासुखदुःखाभ्यांहतात्मनांपीडितमनसांपुंसांकृपयादर्शितोयद्यपि ३८ अथापितथापिअविनीतस्यकुतः क्षात्रंघोरंधर्ममु
पेयुषोगच्छतोमेसुरुच्यादुर्वचोबाणैर्भिन्नेहृदिसशमोनश्रयतेस्थितिंनलभतइत्यन्वयः ३९ २१

---

१ विशब्दोविविधवार्चा । अत्रहेतुपरिणतयेति । अंतःकरणस्यपरिणामस्वभावेन । ता० दी० ।

SGDF Sri Gurgeshwari Digital Foundation

तार्हैववाकांक्षायाःकियानवधिरितितत्राह पदमिति अनेनराजासिंहासनस्यानित्यत्वेननतपःसाध्यत्वेनाकांक्ष्यत्वमितिसूचितं अस्मत्पितृभिरित्यादिनोत्तमस्यमनोरथेनाप्यनवाप्यमित्यसूचि ४०
भवान्लोकहितार्थाटनत्वान्मदभीष्टमुपादिशवीत्याशयेनाह नूनमिति ४१ यादृच्छिकगतित्वात्तदुक्तमाकर्ण्यस्मित्वायोगित्वेनादृश्यशक्तिमत्वात्तूष्णींगतमुतकिमप्युक्तामितितत्राह इतीति तद्वाक्यं
प्रतिमीतः ४२ प्राक्स्वोक्तमेवद्रढीकर्तुमुक्तमन्यद्वा संभवादुभयोरितितत्राह जनन्येति । वाइत्येवार्थःयोजनन्याभिहितःपंथाःसएवतेनिःश्रेयसस्यस्यान्नान्यइत्यन्वयः । कोसावितितत्राह भगवा
निति योहरेर्विग्रहेषुवासुदेवनामाभगवांस्तंप्रवणात्मनाभजेत्यन्वयः ४३ अस्मिन्नर्थेन्यःकिंनस्यादितितत्राह धर्मार्थेति कारणमितरव्यावर्तकंसाधनं ४४ अभीष्टसिद्धिसाधनंक्षेत्रंचोपदिशति
तत्रातेति यस्माद्धरेरेवप्रधानसाधनत्वंतत्तस्मान्मधोःपूर्णानंदस्यहरेर्वनंभजनंयस्माद्भवतितन्मधुवनं नाम्नासूचितमर्थंप्रकाशयातियत्रेति ४५ तत्राकिंकर्तव्यमितितत्राह स्नात्वेति उचितानितर्प

पदंत्रिभुवनोत्कृष्टंजिगीषोःसाधुवर्त्म मे ॥ ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम् ४० नूनंभवान्भगवतोयोंगजःपरमेष्ठिनः ॥ वितुदन्नटतेवीणांहिता
र्थंजगतोर्कवत् ४१ ॥ मैत्रेयउवाच ॥ इत्युदाहृतमाकर्ण्यभगवान्नारदस्तदा ॥ प्रीतःप्रत्याहतंबालंसद्वाक्यमनुकंपया ४२ ॥ नारदउवाच ॥ जनन्या
भिहितःपंथाःसवैनिःश्रेयसस्यते ॥ भगवान्वासुदेवस्तंभजतत्प्रवणात्मना ४३ धर्मार्थकाममोक्षाख्यंयइच्छेच्छ्रेयआत्मनः ॥ एकमेवहरेस्तत्रकारणं
पादसेवनम् ४४ तत्तातगच्छभद्रंतेयमुनायास्तटंशुचि ॥ पुण्यंमधुवनंयत्रसान्निध्यंनित्यदाहरेः ४५ स्नात्वानुसवनंतस्मिन्कालिंद्याःसलिलेशिवे ॥
कृत्वोचितानिनिवसन्नात्मनःकल्पितासनः ४६ प्राणायामेनत्रिवृताप्राणेंद्रियमनोमलम् ॥ शनैर्व्युदस्याभिध्यायेन्मनसागुरुणांगुरुम् ४७ प्रसादाभि
मुखंशश्वत्प्रसन्नवदनेक्षणम् ॥ सुनासंसुभ्रुवंचारुकपोलंसुंदरंहरिम् ४८ तरुणंरमणीयांगमरुणोष्ठेक्षणाधरम् ॥ प्रणताश्रयणंकृष्णंशरण्यंकरुणार्णवम् ॥
४९ श्रीवत्सांकंघनश्यामंपुरुषंवनमालिनम् ॥ शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजम् ५० किरीटिनंकुंडलिनंकेयूरवलयान्वितम् ॥ कौस्तुभाभरणग्रीवं
पीतकौशेयवाससम् ५१ कांचीकलापपर्यस्तंलसत्कांचननूपुरम् ॥ दर्शनीयतमंशांतंमनोनयनवर्धनम् ५२ पद्भ्यांनखमणिश्रेण्याविलसद्भ्यांसमर्चता
म् ॥ हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम् ५३

णादीनि ४६ त्रिवृतारेचकादित्रित्वसंख्योपेतेन यद्वा यरवइतित्र्यक्षरयुक्तेन यद्वा प्रणवयुक्तेन प्राणानामवशत्वमिंद्रियाणांविषयाभिमुखत्वंमनसोनवस्थितित्वमितिमलत्रयं गुरूणांगुरुमुपदेष्टारम् ॥
४७ पुरुषायुषशतेनाऽप्रसन्नतादिगुणवांश्चेत्किमनेनेत्यतोऽश्रद्धानकर्तव्योतिध्येयस्वरूपमुपदिशातिप्रसादाभिमुखमित्यादिना ४८ अरुणत्वलक्षणज्ञापनायपुनरीक्षणं क्वचिद्धरिपीतवर्णंक्वचित्कृष्णम् ॥
४९ कचिद्घनवत्श्यामंनीलंपुरुषलक्षणसामग्रीसूचनायपुरुषग्रहणम् ५० ५१ कलापोभूषणेबर्हइतिवचनात् कांचीकलापेनपर्यस्तंसंवेष्टितम् ५२ नखमणिश्रेण्याविलसद्भ्यांपादाभ्यांसमर्चितांभ
क्तानामात्मनिमध्यदेहेहृदयपद्मकर्णिकाधिष्ण्यमाक्रम्यावस्थितम् ५३

१ संध्याभावान्नमस्कारादीनीति पादुपत्ये ।

मनसैवंविधंभगवतोरूपंध्यायेदित्यन्वयः किंविशिष्टेनमनसानियमेनपरिणततयाभ्यस्ततयाप्राप्तपरिपाकत्वेनैकस्मिन्ध्येयेवस्तुनिभूतेनबाह्यविषयाभिनिवेशराहितेन ५४ निर्वृत्त्योद्रिक्तानंदेनसंपन्नंपूर्णंध्येयादितरत्रननिवर्ततेनगच्छति ५५ जप्योमंत्रः ५६ द्रव्यमयींद्रव्यप्रधानां अर्चांपूजासपर्यास्यादित्यभिधानं ५७ द्रव्याण्याह सलिलैरिति वन्यैर्वनभवैः ५८ द्रव्यमयीमर्चांशिलादिप्रतिमां अर्चातुप्रतिमाप्रोक्तेत्यभिधानं क्षितौस्थंडिलेआदिशब्दादादित्यमंडलेऽग्नौवा आहृतात्माविषयेभ्यआकृष्यवशीकृतमनाः मितंनियतादर्धंफलमूलादिवन्यंभुंक्तइतिमितवन्यभुक् ५९ निजमाययास्वरूपभूतमहिम्नास्वेच्छयाकृतावतारस्तस्यचरितैःकंसवधादिलक्षणैश्चरितंगुणसमूहंहृदयंगमान्यान्विभुविक्रमान्करिष्यतितान्ध्यायेदित्यन्वयः ६० परिचर्यादिसंक्षिप्यतत्करणप्रकारंवक्ति परिचर्याइति यावतीर्यावत्यः पूर्वाचार्यैःकल्पितास्तामंत्रहृदयेनमंत्रेणनमःशब्देनचओंनमोभगवतेवासुदेवायेत्यनेनमंत्रमूर्तयेमंत्राक्षरप्रतिपाद्यवासुदेवाय प्रयुंज्यात्कल्पयेदित्यन्वयः ६१ एवंविधोपास

स्मयमानमभिध्यायेत्सानुरागावलोकनम् ॥ नियमेनैकभूतेनमनसावरदर्षभम् ५४ एवंभगवतोरूपंसुभद्रंध्यायतोमनः ॥ निर्वृत्त्यापरयापूर्णंसंपन्नंननिवर्तते ५५ जप्यस्तुपरमोगुह्यःश्रूयतांमेनृपात्मज ॥ यंसप्तरात्रंप्रपठन्पुमान्पश्यतिखेचरान् ५६ ॐनमोभगवतेवासुदेवाय ॥ मंत्रेणानेनदेवस्यकुर्याद्द्रव्यमयींबुधः ॥ सपर्यांविविधैर्द्रव्यैर्देशकालविभागवित् ५७ सलिलैःशुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः ॥ शस्तांकुरैरंशुकैश्चार्चेत्तुलस्याप्रिययाप्रभुम् ५८ लब्ध्वाद्रव्यमयीमर्चांक्षित्यंब्वादिषुवार्चयेत् ॥ आहृतात्मामुनिःशांतोयतवाङ्मितवन्यभुक् ५९ स्वेच्छावतारचरितैश्चरितंनिजमायया ॥ करिष्यत्युत्तमश्लोकस्तान्ध्यायेद्धृदयंगमान् ६० परिचर्याभगवतोयावतीःपूर्वसेविताः ॥ तामंत्रहृदयेनैवप्रयुंज्यान्मंत्रमूर्तये ६१ एवंकायेनमनसावचसाचमनोगतः ॥ परिचर्यमाणोभगवान्भक्तिमत्परिचर्यया ६२ पुंसाममायिनांसम्यग्भजतांभाववर्धनः ॥ श्रेयोदिशत्यभिमतंयद्धर्मादिषुदेहिनाम् ६३ विरक्तश्चेंद्रियरतौभक्तियोगेनभूयसा ॥ तन्निरंतरभावेनभजेताद्धाविमुक्तये ६४ मैत्रेयउवाच ॥ इत्युक्तस्तंपरिक्रम्यप्रणम्यचनृपार्भकः ॥ ययौमधुवनंपुण्यंहरेश्चरणचर्चितम् ६५ तपोवनंगतेतस्मिन्प्रविष्टोंतःपुरंमुनिः ॥ अर्हितोर्हणयाराज्ञासुखासीनउवाचतम् ६६ नारदउवाच ॥ राजन्किंध्यायसेदीर्घंमुखेनपरिशुष्यता ॥ किंवानरिष्यतेकामोधर्मोवार्थेनसंयुतः ६७ राजोवाच ॥ सुतोमेबालकोब्रह्मन्स्त्रैणेनाकरुणात्मना ॥ निर्वासितःपंचवर्षःसहमात्रामहान्कविः ६८

नाफलमाह एवमिति भक्तिमंतःसंतस्तेषांपरिचर्ययाशुश्रूषयादेहिनांधर्मादिषुयदभिमतंश्रेयस्तद्दिशतीत्यन्वयः ६२ ६३ सर्वस्मात्साधनाद्विरक्तिभक्तीमुक्तिसाधनेइत्याशयेनाह विरक्तश्चेति तयोरवश्यकर्तव्यत्वेचशब्दः इंद्रियरतौविषयभोगेविरक्तः ६४ उत्तरकथाप्रसंगमाह इत्युक्तइति ६५ नन्वस्त्वियंकथा पुनर्नारदःकुत्रायासीदत्राह तपोवनमिति अर्हणयापूजासाधनेनार्हितः पूजितः ६६ नरिष्यतेनहिंस्यते ६७ नारदेनपृष्टोराजोत्तरमाह । सुतोमइति निर्वासितःनिष्कासितः कविरित्यनेनज्ञानित्वंद्योतयति ६८

---

१ एकभूतेनमनसेत्यत्रपरमात्मनो मनसैकत्वमुच्यतइत्यन्यथाप्रतीतेस्तात्पर्यानुसारेणयथावद्व्याख्याति । एकस्मिन्निति ॥ दी० २ मंत्रहृदयेनेत्यत्रमंत्रस्यहृदयेनेत्यन्यथाप्रतीतिवारणायतात्पर्यानुसारेणव्याख्यातिमंत्रेणनमःशब्देनचेति हृदयंनमःशब्दइतिमंत्रोद्धारग्रंथेप्रसिद्धेर्नमोंतमंत्रेणेत्यर्थइत्युक्तंभवति ॥ दी० ३ सहमातासुमातासापत्नमातासुरुचिः तया ॥ सहभ्रात्रेत्यादिप्रयोगवदितिभागवतकोंडे

SGDF
Sri Gargeshwari Digital Foundation

यतौऽसौसिंहासनपदादत्युत्तमपदंसाधयामीतिनिरूप्यमात्रादीन्विहायपुरान्निरगमदित्येवमनुतप्यमानोपिराजातद्रतंदुःखमुद्गलयति अनाथमिति ॥ ६९ ॥ एवमनुतप्यस्वदौरात्म्यंमुनिमपिसंबोधय
ति अहोइति त्वयाकिमकारीतितत्राह योंकमिति ७० प्रवक्तानारदस्तुमदाज्ञामिमानस्यगतत्वादस्यहरिरेवरक्षकइतिकृत्वापुत्रंतंमानुतपेत्याह मामेति ततोप्यनुतापोनगच्छतीत्यतअज्ञानमूलोसावि
त्याह तत्प्रभावमिति प्रावृंक्तेव्याप्नोति ७१ अस्मन्निमित्तवैराग्येनगतःपुत्रोनपुनरेष्यतीतिखेदोमाभूदित्याह सुदुष्करमिति तत्कर्मतस्यध्रुवस्यैवयोग्यत्वात् लोकपालानांदुष्करं । नतुतेषामशक्य
त्वात् नाशक्यंदेवतानांतुयदन्यैः शंकितंक्वचित् शक्ताअपिनकुर्वंतियदन्यविहितंबुधाइतिवचनादपिपदेनसूचितात् ७२ एवंविस्रब्धस्यापिराज्ञोऽनुतापपरंपरामाह इतीति अनेनसंसारस्यदुस्तरत्वमसू
चि ७३ ध्रुवोमधुवनंप्राप्यकिमकार्षीदत्राह तत्रेति आदेशेनोपदेशेननारदोक्तमार्गेणकृतयाहष्ट्यौनिरूपणयापुरुषंवासुदेवंपर्यचरदित्यन्वयः ७४ तस्यतपआतिष्ठमानस्याशनप्रकारमाह त्रिरात्रांतइति कृ

अनाथंचवनेब्रह्मन्माखादंत्वर्भकंवृकाः ॥ श्रांतंशयानंक्षुधितंपरिम्लानमुखांबुजम् ६९ अहोमेबतदौरात्म्यंस्त्रीजितस्योपधारय ॥ योंकंप्रेम्णारुरुक्षंतं
नाभ्यनंदमसत्तमः ७० नारदउवाच ॥ मामाशुचःस्वतनयंदेवगुप्तंविशांपते ॥ तत्प्रभावमविज्ञायप्रावृंक्तेयद्यशोजगत् ७१ सुदुष्करंकर्मकृत्वालोकपा
लैरपिप्रभुः ॥ एषएष्यत्यचिरतोयशोविपुलयंस्तव ७२ मैत्रेयउवाच ॥ इतिदेवर्षिणाप्रोक्तंविस्रभ्यजगतीपतिः ॥ राज्यलक्ष्मीमनादृत्यपुत्रमेवान्वचिंत
यत् ७३ तत्राभिषिक्तःप्रयतस्तामुपोष्यविभावरीम् ॥ समाहितःपर्यचरहृष्ट्यादेशेनपूरुषम् ७४ त्रिरात्रांतेत्रिरात्रांतेकपित्थबदराशनः ॥ आत्मवृत्त्यनुसा
रेणमासंनिन्येऽर्चयन्हरिम् ७५ द्वितीयंचतथामासंषष्ठेषष्ठेर्भकोदिने ॥ तृणपर्णादिभिःशीर्णैःकृतान्नोभ्यर्चयद्विभुम् ७६ तृतीयंचानयन्मासंनवमेनवमे
ऽहनि ॥ अब्भक्षउत्तमश्लोकमुपाधावत्समाधिना ७७ चतुर्थमपिवैमासंद्वादशेद्वादशेऽहनि ॥ वायुभक्षोजितश्वासोध्यायन्देवमपारयत् ७८ पंचमेमास्य
नुप्राप्तेजितश्वासोनृपात्मजः ॥ ध्यायन्ब्रह्मपदैकेनतस्थौस्थाणुरिवाचलः ७९ देवाश्चक्रुस्तपोविघ्नंत्रासयंतःस्वमायया ॥ सर्पेभसिंहकूष्मांडैस्तान्नापश्य
त्परंगतः ८० सर्वतोमनआकृष्यहृदिभूतेंद्रियाश्रयम् ॥ ध्यायन्भगवतोरूपंनाद्राक्षीत्किंचनापरम् ८१

पित्थबदरयोःफलमशनंयस्यसतथोक्तःफलभुक्अशननियतिंकथयति आत्मवृत्तीति यावतात्मनःशरीरस्यवृत्तिस्तदनुसारेण ७५ ७६ उपाधावत्उपास्त ७७ अपारयदतिक्रांतवान् ७८ अचलःस्थि
रः ७९ देवाध्रुवस्ययशोविस्तृत्यर्थंतत्तपोविघ्नंचक्रुरित्याह देवाइति । स्वस्वसिद्धमाययेंद्रजालेन कूष्मांडाःपिशाचविशेषाः तान्नापश्यदित्यनेनध्रुवस्यदेवेभ्योत्यधिकतरशक्तिमत्त्वंनाभिप्रेतंकिंतु परमभाग
वतत्वेनयशोविस्तृत्यैविघ्नकरणं नतुतत्तपःखंडनाय । तदुक्तं यत्रदेवैःकृतेविघ्नेखंडितोनपुमान्भवेत् तत्रतद्यशसेविघ्नंकुर्युर्नैनुविघातने । यत्रखंडितत्वातत्रखंडनायैवकेवलं । सत्यकामायतोदेवास्तेचि
त्ताद्यभिमानिनः । अतोविमोहनायैवप्राप्नुयुस्तेपराजयं । तेषामशक्तितोक्तिश्चविमोहायसुरद्विषामिति ८० नापश्यदित्येतद्विवृणोति सर्वतइति । आकाशादिभूतानांतदुत्पन्नानांप्राणिनांचेंद्रियाणामा
श्रयंभगवतोरूपंध्यायन्नपरंजगत्किंचनाल्पमस्वतंत्रमद्राक्षीत्स्वतंत्रंनाद्राक्षीदित्यन्वयः ८१

---

१ सुदुष्करमित्यत्रदेवानांध्रुवकृतकर्मण्यशक्तिरितिभातीत्यतउपपत्तिमाह ॥ २ हष्ट्यादेशेनपूरुषमित्यत्रहष्ट्याचक्षुषाआदेशेनेति असंगतमिवभातीत्यतस्तात्पर्यानुसारेणव्याचष्टे ॥ ३ हश्यते
नयेतिदृष्टिः निरुपणातया । आसम्यक् दिश्यतेउपदिश्यतइत्यादेशउपदेशस्तेन । ततश्चनारदेनसाधननिरूपणपूर्वकृतोपदेशेनेत्युक्तंभवति । टी० ॥ ४ भूतेंद्रियाश्रयं देहं हृदिध्यायन्भगवतो रूपं किंचन ना
द्राक्षीद्विति विरुद्धंभाति ततोयोजयति भूतेंद्रियाश्रयं भगवद्रूपमितिसिति ।

SGDF

एकाग्रमनसातस्यवासुदेवंध्यायतःसतइदमेकमाश्चर्यमभूदित्याह आधारमिति ८२ सर्वाधारंब्रह्मधारयमाणेध्रुवेस्थिरत्वेनभाव्यंतत्रलोकानांकंपनंकथमित्याशंक्योपपत्तिमाह यदैकपादेनेति । तत्रतस्मि
न्भागेतर्यामध्येइभेंद्रेणगजेनगरिम्णाधिष्ठितातरीव यथानौर्नताभवतितथा । तदेवविशिनष्टि सव्येतरतइति । सव्येतरयोर्वामदक्षिणयोःपादयोःपदेपदेनुन्नानताभवतीति ८३ नकेवलंचलनमेवलोकाना
मभूत्किंतुश्वासोच्छ्वासयोःप्रवृत्तिस्तंभेनमरणाधिकक्लेशोऽभूदित्याह तस्मिन्निति तस्मिन्ध्रुवेऽनन्ययाध्येयैकविषयतांगतयाधियाश्वासप्रवृत्तिकारणमसुंप्राणंनिरुध्यकुंभकीकृत्यात्मनोजीवराशेरुत्पत्त्यादे
र्द्वारंकारणंविश्वंविष्णुमभितःपारितइंद्रियाभिमानिदेवैःसहध्यायतिसतितिनिरुच्छ्वासेननिरुद्धप्राणवृत्त्यानिपीडिताःसलोकपालालोकाहरिंशरणंययुरित्यन्वयः अत्रभृशमित्यनेनाक्षिप्रवाचिनालोकानामेव
निरुच्छ्वासोनलोकपालानांदेवतानामन्यप्रवृत्तिहेतूनांस्वोत्तमानुग्रहेणस्वावरानधीनप्रवृत्तीनांतास्तुलोकश्वासार्थंकृपालवोहरिंशरणंययुरितिध्वनयाति उक्तंच ध्यातुर्ध्रुवस्यकीर्त्यर्थंहरिणासहदेवताःलोको
च्छ्वासान्निरुध्याथश्वासार्थंचहरिंययुः अन्यप्रवृत्तयस्तेभ्योनतेषामन्यतःक्वचित् स्वोत्तमेभ्यस्तुदेवेभ्यस्तेषांस्युश्चप्रवृत्तयइति ८४ किमर्थंशरणंगताइतितत्राह नैवामिति अखिलानांसत्त्वानांप्राणिनांधाम

आधारंमहदादीनांप्रधानपुरुषेश्वरम् ॥ ब्रह्मधारयमाणेतुत्रयोलोकाश्चकंपिरे ८२ यदैकपादेनसपार्थिवार्भकस्तस्थौतदंगुष्ठनिपीडितामही ॥ ननामत
त्रार्धमिभेंद्रधिष्ठितातरीवसव्येतरतःपदेपदे ८३ तस्मिन्नभिध्यायतिविश्वमात्मनोद्वारंनिरुध्यासुमनन्ययाधिया ॥ लोकानिरुच्छ्वासनिपीडिताभृशंसलोक
पालाःशरणंययुर्हरिम् ८४ देवाऊचुः ॥ नैवंविदामोभगवन्प्राणरोधंचराचरस्याखिलसत्त्वधाम्नः ॥ विधेहितन्नोवृजिनाद्विमोक्षंप्राप्तावयंत्वांशरणंशरण्यम्
८५ ॥ श्रीभगवानुवाच ॥ ॥ माभैष्टबालंतपसोदुरत्ययान्निवर्तयिष्येप्रतियातस्वधाम ॥ यतोहिवःप्राणनिरोधआसीदौत्तानपादिर्मयिसंगतात्मा ८६
इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेध्रुवचरितेनवमोध्यायः ९ ॥ मैत्रेयउवाच ॥ तएवमुत्सन्नभयाउरुक्रमेकृतप्रणामाःप्रययुस्त्रिविष्टपम् ॥ सहस्रशीर्षा
पिततोगरुत्मतामधोर्वनंभृत्यदिदृक्षयागतः १ सवैधियायोगविपाकतीव्रयाहृत्पद्मकोशेस्फुरितंतडित्प्रभम् ॥ तिरोहितंसहसैवोपलक्ष्यबहिःस्थितंतदवस्थं
ददर्श २ तद्दर्शनेनागतसाध्वसःक्षितावंदतांगंविनमय्यदंडवत् ॥ दृग्भ्यांप्रपश्यन्प्रपिबन्निवार्भकश्चुंबन्निवास्येनभुजेनचाश्लिषन् ३

समूहोयत्रतत्तथोक्तंतस्य तेजःशक्तिःसमूहश्चगृहंधामेतिकथ्यतइत्यभिधानात् । वृजिनाद्दुःखात् ८५ हरेःशरणंगतानांदेवानांभयव्यावर्तकप्रतिवचनप्रकारमाह माभैष्टेति । यतोयस्माद्वोयुष्माकंसकाशा
त्प्राप्तप्रवृत्तीनांलोकानांप्राणनिरोधआसीत् तंतपसोनिवर्तयिष्यइत्यन्वयः कोसावितितत्राह औत्तानपादिरिति मयिसम्यग्गतआत्मामनोयस्यसतथा ध्रुवइत्युक्ते कस्यपुत्रःकिंजातिरयामितिमाशंकास्या
दित्यतऔत्तानपादिरिति ८६ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेवि०कृतटी०नवमोऽध्यायः ॥ ९ ॥ ॥ ७ ॥ ॥ हरेःकेवलंमोक्षाख्यपुरुषार्थस्यप्राप्तिरेवनकिंत्वैहिकस्यापीतीममर्थंप्रति
पादयत्यस्मिन्नध्याये तत्रादौदेवानांस्वलोकगमनंहरेर्मधुवनयात्रांचवक्ति तएवमिति सहस्रशीर्षाश्रीवासुदेवः गरुत्मान्गरुडस्ताक्ष्यइत्यभिधानम् १ ध्रुवस्यहरिदर्शनप्रकारंवक्ति सवाइति योगपरि
पाकेनध्यानपरिणत्यातीव्रयास्वतएवभगवदुन्मुख्या । तदवस्थंहृत्पद्मकोशेयाऽवस्थातयाविशिष्टम् २ गुरूक्तगुणानुपसंहृत्यभगवदुपास्तौशक्तस्यध्रुवस्यकिंपुनर्वदनादावितिभावेनतत्प्रावण्यप्रकारमा
ह तद्दर्शनेति आगतसाध्वसःप्राप्तसंभ्रमःबालस्वभावंदर्शयन्निवभक्त्यतिशयमाह दृग्भ्यामिति ३

१ आत्मनउत्पत्त्यादेर्द्वारमित्यध्याहारेणयोजनाच्चनानुपपत्तिः दी० । २ अखिलसत्त्वधाम्नइत्यस्याऽखिलसत्त्वाश्रयस्यचराचरात्मकस्यहरेरित्यन्यथाप्रतीतेर्धामशब्दार्थमाह । समूहइति । तेनप्राणरोधो
जीवसमुदायस्येत्यर्थः । दी० ।

SGDF
Sri Durgeshwari Digital Foundation

भक्तानुकंपित्वंप्रकटयतोहरेस्तदनुग्रहविशेषमाह सतामिति । विवक्षंतंस्तुतिरूपांवाचंवक्तुकामंनतद्ब्रह्मतत्त्वंवेत्तीत्यतत्त्वावित्तं ब्रह्ममयेनवेदमयेन पांचजन्योवाएषआम्नायउदितिश्रुतेः कंबुनापांचजन्या
ख्यशंखेन ४ तत्फलमाह सवाइति सवैसोपि । यागीःपूर्वमज्ञाता तांगिरं दैवीं देवःसर्वेषुदेवेषुगुणैर्द्योतमानस्तद्विषयांगिरं उपलब्धिफलमाह परिज्ञातेति यावत्स्वयोग्यंपरितोज्ञातःपरमात्मन
स्तत्त्वनिर्णयोयेनसतथोक्तः तद्भक्त्याभावोरोमांचादिक्रियाविशेषोयस्यसतथोक्तः भावोलीलाक्रियाचेतियादवः असत्वरमितिक्रियाविशेषणं यथास्खलितंनभवति अनेनसंभ्रस्तलुप्तादिबालवचन
स्वभावंव्यावर्तयाति अत्वरयासहवर्ततइत्यसत्वरस्तमितिभगवद्विशेषणंवा परिश्रुतंव्याप्तमुरुबृहत्श्रवणमंगलंश्रवोयशोयस्यसतथातं ध्रुवानित्याक्षितिर्वैकुंठादिस्थानंयस्यसतथातं ध्रुवःक्षितिमितिवा
पाठः क्षिनिवासगत्योरितिधातोः क्षितिंगतिमित्यर्थः ५ यदीयंस्तुतिर्वेदसिद्धगुणानुरूपातर्हिब्रह्ममयेत्युक्तिःसफलास्यादिसतस्तत्सिद्धौगुणैरभिष्टौति योंतरिति । प्रसुप्तांनिद्रितामिमांवैखरींनाम
वाचंसंजीवयति । संस्कारात्मनाबोधयाति अन्यान्हस्तादीन्प्राणानींद्रियाणिस्वस्वविषयाणिकरोतितस्मैतुभ्यंनमइत्यन्वयः । असुप्तःसुप्तानभिचाकशतीतिश्रुतिः ब्रह्मणोवाएतानिकरणानीतिच ६
पुरिशयनात्पुरुषश्चेत्पुराणांनानात्वाद्धरेरपिनानात्वेनाद्वितीयत्वभंमइतितत्राह एकस्त्वमिति एकस्यापिविभावसुवदाग्निवन्नानात्वमाविरुद्धामित्यर्थः । तत्सृष्ट्वातदेवानुप्राविशत् तदनुप्रविश्यसच्चत्यच्चाभ

सतंविवक्षंतमतद्विदंहरिर्ज्ञात्वास्यसर्वस्यचहृद्यवस्थितः ॥ कृतांजलिंब्रह्ममयेनकंबुनापस्पर्शबालंकृपयाकपोले ४ सवैतदैवप्रतिपद्यतांगिरंदैवींपरिज्ञा
तपरात्मनिर्णयः ॥ तद्भक्तिभावोऽभ्यगृणादसत्वरंपरिश्रितोरुश्रवसंध्रुवक्षितिम् ५ ॥ ध्रुवउवाच ॥ योंतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्यखिलश
क्तिधरःस्वधाम्ना ॥ अन्यांश्चहस्तचरणश्रवणत्वगादीन्प्राणान्नमोभगवतेपुरुषायतुभ्यम् ६ एकस्त्वमेवभगवन्निदमात्मशक्त्यामायाख्ययोरुगुणयामहदा
द्यशेषम् ॥ सृष्ट्वानुविश्यपुरुषस्तदसद्गुणेषुनानेवदारुषुविभावसुवद्विभासि ७ त्वद्दत्तयावयुनयेदमचष्टविश्वंसुप्तःप्रबुद्धइवनाथभवत्प्रपन्नः ॥ तस्यापव
र्ग्यशरणंतवपादमूलंविस्मर्यतेकृतधियाकथमार्तबंधो ८ नूनंविमुष्टमतयस्तवमाययातेयेत्वांभवाप्ययविमोक्षणमन्यहेतोः ॥ अर्चंतिकल्पकतरुंकुण
पोपभोग्यमिच्छंतियत्स्पर्शजंनिरयेपिनृणाम् ९ यानिर्वृतिस्तनुभृतांतवपादपद्मध्यानाद्भवज्जनकथाश्रवणेनवास्यात् ॥ साब्रह्मणिस्वमहिमन्यपिना
थमाभूत्किम्वंतकासिलुलितात्पततांविमानात् १०

मवदितिश्रुतिः । तस्याअसंतोऽमंगलागुणाःसत्त्वादयोयेषुमहदादिषुतेतथातेषु अनेनस्वगतभेदाराहित्यंपुरुषशब्देनप्रवृत्तिनिमित्तंचोक्तंभवति । पुरिशयनत्पुरुषइति एकमेवाद्वितीयमितिच ७
अस्मिन्नर्थेकिंप्रमाणमत्राह त्वद्दत्तयेति वयुनयाज्ञानेनकृतधियाकृतज्ञेन अनेनदातृदेययोर्हिभेदंदातुरेकत्वंविश्वस्यहर्यधिनत्वंचपश्यतोज्ञानिनःप्रत्यक्षंप्रमाणमित्युक्तंभवतिअचष्टाऽपश्यत् सोज्ञानाद्वि
मुक्तोज्ञानीभवतीतिश्रुतिंसूचयाति सुप्तःप्रबुद्धइवेत्यनेनेति ८ भगवत्प्रसादादेवभगवद्विषयंज्ञानंस्यात्तदेवविपक्षेबाधकप्रदर्शनेनद्रढयाति नूनमिति येअन्यस्यहेयत्वेनानित्यस्यसुखस्यहेतोर्भवाप्य
यविमोक्षणंजननमरणात्मकसंसारमुक्तिदंकल्पकतरुमिवभक्ताभीष्टदंत्वामर्चंतितेतवमाययाबंधकशक्त्याविमुष्टमतयइत्यन्वयः विषयसुखंदुर्लभंचेत्कथंनिंद्यंस्यादित्यतउक्तं कुणपेति निरयेतिसुलभ
मित्यर्थः यच्छब्दोहेत्वर्थः ॥ ९ ॥ भवान्भगवत्प्रसादएवप्रार्थनीयइतिरोचयतितस्मात्किंफलंदृष्टेतितत्राह यानिर्वृतिरिति सानिर्वृतिःस्वमहिमनिअनन्याधारलक्षणमाहात्म्येब्रह्मणिपरब्रह्मणिस्थि
तस्यजीवस्यापिमाभूत् ध्यानादिकमंतरेणनस्यात् कुतःतद्यत्रैतत्सुप्तः संप्रसन्नःस्वप्नंनविजानाति एषआत्मेतिहोवाचैतदमृतंमेतदभयमेतद्ब्रह्मेति । सहशांतहृदयःप्रवव्राजसप्राप्यैवदेवानेतद्वपुंद

दर्शनाहंखल्वयमेवेमंसंमत्यात्मानंजानात्ययमहमस्मीतिनोएवेमानिभूतानिविनाशमेवापीतोभवति नाहमत्रभोग्यंपश्यामीतिश्रुतौसुप्तोतस्थत्वेपिध्यानाभावात्सुखानुभवाभावस्यदृष्टत्वादितीममर्थम
पिपदेनध्वनयति । स्वमहिमनिब्रह्मणिसुखंनास्तीतियोजना अथकस्मादुच्यतेब्रह्मेति बृहंतोह्यस्मिन्गुणाःएषह्येवानंदयतीत्यादिश्रुतिविरुद्धत्वेनउपेक्षणीयोयतःस्थितस्येत्यध्याहारोयुक्तिसिद्धत्वादंगी
क्रियते ननुतर्हिस्वर्गाद्यैश्वर्यंतत्फलंकिंनस्यात् ज्ञानादेवसर्वेकामाःसंपद्यंतइतिश्रुतेरितितत्राह किम्विति अंतकस्यहरेःभ्रूविभ्रमलक्षणेनासिनाविलुलितात्पर्यस्ताद्विमानात्पततांपुंसांसानिर्वृतिर्न
स्यादितिकिमु । एतदुक्तंभवति कर्मसाध्यज्ञानात्स्वर्गादिलक्षणविमानंप्राप्यइतस्ततोनंदनादिषुविहारार्थंपततांगच्छतांपुंसांसानिर्वृतिर्नास्तीतिकिमुवक्तव्यमिति विमानाद्भ्रश्यतामित्यर्थांगीकारेत
त्रदुःखप्राचुर्यात्सानिर्वृतिर्नस्यादितिक्रमयुक्तत्वादुक्तएवार्थः अंतकासिलुलितत्वमनित्यत्वद्योतनायोक्तमितिज्ञातव्यं अत्रध्यानंज्ञानोत्पत्तावंतरंगसाधनंकथाश्रवणंतत्साधनं श्रुतगुणानांपश्चादु
पसंहारोपपत्तेरितिज्ञातव्यं । अधिकारिणामनंतत्वात्तत्तद्योग्यताविशेषादेवमुक्तमितिवा १० भवज्जनाभगवद्भक्ताःतेषांमुखानिसृतायाभगवत्कथायाःश्रवणलक्षणोपासनयेत्युक्तं तत्रभवज्जनस्यचरि
तलक्षणकथाश्रवणेनेतीममर्थमभिप्रेत्यभवज्जनसंगतोभवत्कथासुश्रवणंसुलभंस्यादितिमत्वातत्संगतिंप्रार्थयते भक्तिंमुहुरिति येनप्रसंगेनभवाब्धिंनेष्येतरिष्यामि । नप्राप्स्यामीतिवा इषुगताविति
धातुः ११ भक्तानांलक्षणमाह तेनेति येस्वान्सुतसुहृद्गृहवित्तदारान्संपदःस्मरंतितेअतितरांप्रियमाद्यमीशंत्वांनस्मरंति हेअब्जनाभ येभवदीयपदारविंदसौगंध्यलुब्धहृदयेषुभवद्भक्तेषु कृतप्रसंगा भव

भक्तिंमुहुःप्रवहतांत्वयिमेप्रसंगोभूयादनंतमहताममलाशयानाम् ॥ येनांजसोल्बणमुरुव्यसनंभवाब्धिंनेष्येभवद्गुणकथामृतपानमत्तः ११ तेनस्मरंत्य
तितरांप्रियमीशमाद्यंस्वान्संपदःसुतसुहृद्गृहवित्तदारान् ॥ येत्वब्जनाभभवदीयपदारविंदसौगंध्यलुब्धहृदयेषुकृतप्रसंगाः १२ तिर्यङ्नगद्विजसरीसृप
देवदैत्यमर्त्यादिभिर्विरचितंसदसद्विशेषम् ॥ रूपंस्थविष्ठमजतेमहदाद्यशेषंनातःपरंपरमवेद्मिनयत्रवाचः १३ कल्पांतएतदखिलंजठरेणगृह्णन्शेतेपुमान्
स्वदृगनंतसखस्तदंके ॥ यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भेद्युमान्भगवतेप्रणतोस्मितस्मै १४

द्भक्तास्तेस्वान्सुतादीन्संपदोनस्मरंतीत्यन्वयःअनेनश्रीहरिभक्तिरेवनभवाब्धिसंतारिणीकिंतुतद्भक्तभक्तिरपीतिसूचितम् ॥ १२ ॥ ब्रह्मादीनामपित्वत्प्रसादात्ऋतेत्वद्रूपदर्शनमसुकरंकिमुतमादृशाना
मितिभावेनाह तिर्यङ्नगेति हेअजअशेषंसर्वावयवोपपन्नंमहदादिमहत्तत्त्वमादिर्यस्यतत्तथोक्तं । सतापृथिव्यादिभूतत्रयेणासतावाय्वादिभूतद्वयेनविशेषोयस्यतत्तथोक्तं स्थविष्ठंस्थूलतमंतिर्यगादिभि
र्विरचितंब्रह्मांडाख्यंरूपंवेद्मि हेपरम अतःस्थूलात्परंसूक्ष्मंरूपंनवेद्मि अत्रहेतुगर्भविशेषणमाह यत्रेति वाचइत्युपलक्षणं वेदाभिमानिनोलक्ष्म्यादयोयत्रयद्विषयज्ञानवंतोनभवंति किमुक्तंभवतिलक्ष्मी
ब्रह्माद्याअनुदिनंपश्यंतोपिकिंचिदनंतत्वेनजानंति किम्वहं । तदुक्तं पश्यमानोपितुहरिंनतुवेत्तिकथंचन वेत्तिकिंचित्प्रसादेनहरेरथगुरोस्तथा द्वेवावब्रह्मणोरूपेमूर्तंचैवामूर्तंच यतोवाचोनिवर्ततेअप्राप्यम
नसासहइत्यादिश्रुतेः १३ सृष्टिसंहारकर्त्रोर्ब्रह्मरुद्रयोर्लोकदृष्ट्यातांविष्णुसमत्वशंकांनिवर्तयितुमाह कल्पांतइति । अनंतःसखायस्यसतथोक्तःस्वदृक्स्वयंप्रकाशःपुमान्कल्पांतेएतदखिलंजगज्जठरेणोदरे
णगृह्णन्संहरंस्तस्यानंतस्यांकेशेते । यस्यनाभिसिंधुरुहंनाभिसरसोजातंतदेवकांचनंसुवर्णंलोकात्मकंपद्मंतस्यगर्भेद्युमानतिद्युतिमान्ब्रह्माजातइतिशेषः अनेनरुद्रस्यसंहर्तृत्वंब्रह्मणःस्रष्टृत्वंचद्वारमात्रमि
तिज्ञातव्यंएवंविधमाहात्म्यस्यहरेस्त्वयाकिमुपक्रियतइतितत्राह भगवतइति १४

१ तेनस्मरंतीत्यत्रभगवद्भक्तभक्ताःस्वान्संपदोयदानस्मरंतितदाऽऽद्यमीशंत्वतितरांनस्मरंतीअन्यथाप्रतीतेरतस्तात्पर्यानुसारेणयोजयति । यइति । दी०

SGLF Sri Gargeshwari Digital Foundation

पंकेप्रवर्तमानस्यपंकलेपइवसृष्ट्यादौप्रयतमानस्यहरेरनित्यत्वंदोषबद्धत्वमशुद्धत्वंचस्यादित्याशंक्ययोगिनोपिदुर्भगशरीरस्थस्यतद्गतदुःखाद्यनुभावोनास्ति किमुतनित्यस्यनित्यमुक्तस्यनित्यशुद्धस्या
तएवाप्रतिहतबोधस्येतिभावेनाह त्वंनित्येति । किमेवंभूतःपरिच्छिन्नइतिनेत्याह आत्मेति आततत्वादात्मा तर्हितत्तत्पदार्थसंबंधेनतत्तद्धर्माःसंगम्यंतइत्यतउक्तं कूटस्थइति षड्विकारशून्यः ।
एवंविधःकोयमत्राह । आदिपुरुषइतिआदीत्युपलक्षणं जगतआदावंतेचवर्तमानःपुरुषःपूर्णषड्गुणःश्रीनारायणः । पूर्णषड्गुणत्वंस्पष्टमाह भगवानिति ऐश्वर्यस्यसमग्रस्येतिस्मृतेः । कुतोस्यसमग्रैश्व
र्यमवगम्यतइत्यतउक्तं त्र्यधीशइति त्रयाणांलोकानांमुक्तामुक्तसंसारिणांवर्तमानादिकालानांवाजाग्रदाद्यवस्थानामृगादिवेदानांवाइत्यादित्रित्वसंख्यावतामधीशः । इंद्रादिव्यावृत्त्यर्थमधीशइत्यु
क्तं । त्वमेवंविशिष्टइतियचस्मात्तस्मादखंडितयास्वबुद्ध्यास्वरूपज्ञानेन वधिंसंसारस्यावधिभूतंबुद्ध्यवस्थितंबुद्धौस्थितंत्वांहष्ट्वावस्थितायेपुरुषास्तैःसहातोस्मात्प्रपंचाद्व्यतिरिक्तस्त्वमास्सइत्यन्वयः ।
वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरितिवचनादल्लोपःप्रामाणिकः १५ अघटितघटनशक्तिमत्त्वादयमेवाभीष्टसिद्धयेप्रार्थनीयइत्याह यस्मिन्निति विरुद्धगतयोलोकेविरुद्धविषयाविद्यादयोविविधश
क्तयोस्थूलत्वमणुत्वंह्रस्वत्वमित्यादयोयस्मिन्ह्रावनिशंपतंतिवर्तंते । तत्रप्रमाणमाह आनुपूर्व्येति आनुपूर्वीश्रुतिश्चैवत्रयीचाम्नायउच्यतइत्यभिधानात् विचित्रशक्तिःपुरुषःपुराणःअस्थूलमन

त्वंनित्यमुक्तपरिशुद्धविशुद्धआत्माकूटस्थआदिपुरुषोभगवांस्त्र्यधीशः ॥ यद्बुद्ध्यवस्थितमखंडितयास्वबुद्ध्याद्दष्ट्वास्थितावधिमतोव्यतिरिक्तआस्से १५ य
स्मिन्विरुद्धगतयोप्यनिशंपतंतिविद्यादयोविविधशक्तयआनुपूर्व्या ॥ तद्ब्रह्मविश्वभवमेकमविश्वमाद्यमानंदमात्रमविकारमहंप्रपद्ये १६ सत्याशिषो
हिभगवंस्तवपादमूलमांशिष्टयोनुभजतःपुरुषार्थमूर्तेः ॥ अप्येवमार्यभगवान्परिपातिदीनान्वाश्रेववत्सकमनुग्रहकातरोस्मान् १७ ॥ मैत्रेयउवाच ॥
अथाभिष्टुतएवंवैसत्संकल्पेनधीमता ॥ भृत्यानुरक्तोभगवान्प्रतिनंद्येदमब्रवीत् १८

एवंह्रस्वमित्यादिकयाश्रुत्यासिद्धमित्यर्थः अहंतद्ब्रह्मशरणंप्रपद्यइत्यन्वयः जगत्कारणमेवब्रह्मात्रविवक्षितंनजीवइतिभावेनाह । विश्वभवमिति । विश्वस्यभवउत्पत्तिर्यस्मात्तत्तथा नैतल्लक्षणंपरमाणु
ष्वतिव्याप्तमित्याह एकमिति परमाणूनामनेकत्वादिदमेवमुख्यकारणमित्यर्थः । कारणत्वंमृद्वन्नेत्याह अविश्वमिति । जगतोन्यत् । अनंतमितिपाठेजीवाश्रितं कर्मकारणमस्तीत्याशंक्य
कर्मणःक्षणभंगुरत्वेनानित्यत्वादचेतनत्वाच्चकारणत्वानुपपत्तिरित्यर्थः विश्वस्याद्यंतवत्त्वेनानित्यत्वादस्यतदभावात्कारणत्वंयुक्तमित्याह आद्यमिति । आद्यमित्युपलक्षणंविश्वस्यादावंतेचभवतीति
अनाद्यनंतत्वंप्रधानस्यास्तीत्यतउक्तमानंदमात्रमिति इतोपिप्रधानस्यकारणत्वमनुपपन्नमित्याह अविकारामिति १६ इतरदेवतानुग्रहात्त्वदनुग्रहएवाभीष्टफलप्राप्तिहेतुरित्याह सत्याशिषइति पुरु
षार्थमूर्तेरानंदानुभवरूपस्यतवपादमूलमनुभजतःपुरुषस्याऽऽशिष्टयःआचार्यशिष्टाःसत्याशिषोयथार्थशुभफलप्रदाह्येव । एवमपितथापि । आर्यपूज्य अनुग्रहकातरोभवान्दीनानस्मान्शिष्या
न्विशिष्टफलप्राप्तयेपुनः वाश्रेवनवप्रसूतागौरिववत्संपरिपातीत्यन्वयः । वाश्रेवविद्युन्मिमातिवत्संनमातासिषक्तीतिश्रुतिः १७ सत्संकल्पेन सत्सत्येभ्योहितेश्रेष्ठेसाधीयसिभवत्यपीतियादवः १८

१ पादमूलमाशीस्तथानुभजत इतिपाठान्तरं टीकायामपि आशिषआचार्यशिष्टा इतिच ।

भूयसांमहतांयोगिनामपिदुरापमित्यनेनायोग्यानामेवदुष्प्रापंनतुयोग्यानांतेषांसाधनसामग्र्यासुलभत्वादित्यर्थःसूच्यतइत्युत्तरग्रंथेनज्ञायतइतिभावेनाविशिनष्टि नान्यैरिति । ध्रुवानित्याक्षितिर्निवा
सोयस्मिंस्तत्तथोक्तं मेढीतितिलपीडोलूखलं कल्पलयेपिलयोनास्तीत्याशयेनाह स्थास्न्विति अनेनध्रुवक्षितीत्यस्यार्थविशेषोदर्शितःपुरस्तादग्रेधर्मादयोयत्स्थानंप्रदक्षिणीकृत्यचरंतितत्तुभ्यंदास्यामी
त्यन्वयः वनौकसोवानप्रस्थाः १९ २० २१ सिंहासनाधिपातिरपिभूयादितिभावेनाह प्रस्थितइति गांभूमिम् २२ उत्तमेभ्रातरिसतिकथंसिंहासनाप्तिरितितत्राह त्वद्भ्रातरीति तस्मिन्नेवमनोय
स्याःसातन्मनाः वनमन्वेषतीमार्गमाणा अनेनतन्मातृभयमपिप्रत्युक्तमितिज्ञायते २३ पुष्कलदक्षिणैःपुरुषंपुष्कलंपूर्णमितिहलायुधः अनेनयज्ञानामुत्तमकल्पत्वंध्वनयाति मानुस्मारिष्यसीत्यनेनसर्व
दास्मरन्नपिमरणकालेविशेषतोमत्स्मरणंकुर्वीतेतिविधत्ते एष्यदर्थत्वादुभयोरीति ॥ २४ ॥ ततःकिमत्राह ततइति यतोनावर्ततेयातिरित्यनेनध्रुवस्यमुक्तेर्नियतत्वंध्वनयाति ॥ २५ ॥ आति
सृज्यदत्त्वा २६ सोपिध्रुवोपिसंकल्पजंसंकल्पाज्जातंविष्णोःपादसेवयोपसादितंप्राप्तंसंकल्पनिर्वाणंप्रतिज्ञाफलंप्राप्य ,२७ विदुरोमुक्तेरितरेषुपुरुषार्थेषुविरक्तेनभाव्यमितिजानन्नपितत्प्रकटनाय

श्रीभगवानुवाच ॥ वेदाहंतेव्यवसितंहृदिराजन्यबालक ॥ तत्प्रयच्छामिभद्रंतेदुरापमपिभूयसाम् १९ नान्यैरधिष्ठितंभद्रयद्भ्राजिष्णुध्रुवक्षिति ॥ यत्र
ग्रहर्क्षताराणांज्योतिषांचक्रमाहितम् ॥ मेढ्यांगोचक्रवत्स्थास्नुपुरस्तात्कल्पवासिनाम् २० धर्मोग्निःकश्यपःशक्रोमुनयोयेवनौकसः ॥ चरंतिदक्षिणीकृ
त्यभ्रमंतोयत्सतारकाः २१ प्रस्थितेतुवनंपित्रादत्त्वागांधर्मसंश्रयः ॥ षट्त्रिंशद्वर्षसाहस्रंरक्षिताऽव्याहतेंद्रियः २२ त्वद्भ्रातर्युत्तमेनष्टेमृगयायांतुतन्मनाः ॥
अन्वेषतीवनंमातादावाग्निंसाप्रवेक्ष्यति २३ इष्ट्वामांयज्ञहृदयंयज्ञैःपुष्कलदक्षिणैः ॥ भुक्त्वाचेहाशिषःसत्याअंतेमानुस्मरिष्यसि २४ ततोगंतासि
मत्स्थानंसर्वलोकनमस्कृतम् ॥ उपरिष्टादृषिभ्यस्त्वंयतोनावर्ततेयतिः २५ ॥ मैत्रेयउवाच ॥ इत्यर्चितःसभगवानतिसृज्यात्मनःपदम् ॥ बालस्यप
श्यतोधामजगामगरुडध्वजः २६ सोपिसंकल्पजंविष्णोःपादसेवोपसादितम् ॥ प्राप्यसंकल्पनिर्वाणंनातिप्रीतोभ्यगात्पुरम् २७ ॥ विदुरउवाच ॥
सुदुर्लभंयत्परमंपदंहरेर्मायाविनस्तच्चरणार्चनार्जितम् ॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मनाकथंस्वमात्मानममन्यतार्थवित् २८ मैत्रेयउवाच ॥ मातुःसप
त्न्यावाग्बाणैर्हृदिविद्धस्तुतान्स्मरन् ॥ नैच्छन्मुक्तिपतेर्मुक्तिंतस्मात्तापमुपेयिवान् २९ ॥ ध्रुवउवाच ॥ समाधिनानेकभवेनयत्पदंविदुःसनंदादयऊर्ध्वरेतसः
मासैरहंषड्भिरमुष्यपादयोश्छायामुपेत्यापहतःपृथङ्मतिः ३० अहोबतममानात्म्यंमंदभाग्यस्यपश्यत ॥ भवच्छिदःपादमूलंगत्वायाचेतदंतवत् ३१

पृच्छति सुदुर्लभमिति मायाविनोभक्ताभीष्टफलप्रदानसामर्थ्यवतः । असिद्धार्थमसाधितप्रयोजनम् । अर्थवित्तत्तत्कालोचितप्रयोजनंवेत्तीति २८ विदुषोपिसांसारिकोनिर्बंधोदुस्त्यजइतिभावेनत
च्चोद्यंपरिहरति मातुरिति २९ अनेनभवेनेतिभवपदमावृत्त्याव्याख्येयं तथाहि अनेकेषुभवेषुजन्मसुभवतिसमुत्पद्यतइतितेनाहममुष्यहरेःपादयोश्छायांप्राप्यपृथङ्मतिर्विषयबुद्धित्वादपहतास्तिर्यक्काडि
तइवाभूवम् ३० राजभट्टादिनाताडितस्येवतस्यपश्चात्तापोद्रेकंवक्ति अहोबतेति अनात्म्यंजाड्यं अंतवदित्यनेनस्वस्यानित्याधिपत्यंसूचयाति तदुक्तं आधिपत्यमनित्यंतुध्रुवलोकस्ययद्ध्रुवे
यतोनावर्ततेयतिरित्युक्तिरपियुज्यतइत्याह नतुतत्स्थानगंतॄणांयतीनांस्थितिरुत्तमेति आधिपत्यमनित्यंचेत्ततोनिवृत्त्यानकदापितस्यमुक्तिरित्यतआह तस्यापिमुक्तिर्नियतेति तर्हिजानताविष्णुनेदं
पदंकिमितिदत्तमिति तत्राह नियतंचापितत्पदं तस्यक्लृप्तत्वाद्दत्तमित्यर्थः तर्हिध्रुवेणकिमित्यनिंदीतितत्राह तथापिकामनानिंदाध्रुवेणसुकृताबतेति मुमुक्षुणाविषयाभिलाषोनकर्तव्यइतिशिक्षणार्थ
मित्यर्थः कामनाविषयाभिलाषः । तस्यानिंदाधिकारः ३१

SGDF
Sri Gangeshwar Digital Foundation

शास्त्रशिक्षितबुद्धेस्तवकथंबुद्धिव्यामोहःप्राप्तइतितत्राह । मतिर्विदूषितेति नाधुनाप्यवमानंतइत्यादिनारदवचनम् ३२ एतदेवविशदयति देवींमिति सर्वत्रनिर्मलत्वेनद्योतमानस्यदेवस्यहरेर्विचमा
र्नामायांबंधकशक्तिमुपाश्रित्यस्पृष्ट्वाप्रसुप्तोऽज्ञानेशयितोयथाभिन्नदृग्यथावस्तुनपश्यति । विपरीतंपश्यतिच । तथाहमपिभ्रातायमुत्तमोभ्रातृव्यः शत्रुरितिहृद्रुजाहृदयभेदिरोगेणतप्ये स्वतंत्रस्या
ऽन्यस्यहरेःद्वितीयसद्भावेसंतापःसंभावितइतिनेत्याह द्वितीयइति द्वितीयेस्वतंत्रेन्यस्मिन्नसत्यविद्यमानेपिसर्वस्वातंत्र्येणसर्वैश्वर्येणाद्वितीयत्वमीश्वरत्वंचब्रह्मादीशितव्यस्यभावात्परमेश्वरत्वंहरेरेवयुक्तमि
ति इममर्थमपिपदेनध्वनयति तदुक्तं द्वितीयस्यस्वतंत्रस्यत्वभावाद्द्वयवर्जितः ईश्वरस्येशितव्यस्यभावात्सपरमेश्वरइति ३३ ध्रुवलोकस्याधिपत्यस्यानित्यत्वात्सुतरांसिंहासनाधिष्ठानस्यसंप्रार्थ्यैभिक्षणं
व्यर्थमित्याह मयैतदिति जगतामितिबहुवचनेनान्येषामाधिपत्यंश्लथयतितेनाद्वितीयस्वातंत्र्याभावोनिश्चीयतइतिज्ञातव्यम् ३४ अभीष्टपुरुषार्थदानसामर्थ्याभावान्नाभिक्षितमितिनमंतव्यमित्याह
भवच्छिदमिति भीभयसंचलनयोरितिधातोर्भयमात्रराहित्यंचेद्विवक्षितंलोकेप्यस्तीतिकिमित्यनुशोकइत्यतउक्तंविशिनष्टि तादात्म्यमिति तादात्म्यंहरिंनियतचित्ततयाग्रहवद्धरिप्रवेशलक्षणो
मोक्षः तदुक्तं हरौनियतचित्तत्वाद्गृहवत्तत्प्रवेशनात् मोक्षंतादात्म्यमित्याहुर्नतुतद्रूपतःक्वचिदिति । नैकात्मतांमेस्पृहयंतिकेचिदित्यत्रहरिणाकांक्षितांकांक्षितत्वमेवैकात्म्यम् । ननुतत्स्वरूप

मतिर्विदूषितादेवैर्यतद्भिरसहिष्णुभिः ॥ योनारदवचस्तथ्यंनाग्रहीषमसत्तमः ३२ देवींमायामुपाश्रित्यप्रसुप्तइवभिन्नदृक् ॥ तप्येद्वितीयेप्यसतिभ्रातृ
भ्रातृव्यहृद्रुजा ३३ मयैतत्प्रार्थितंव्यर्थंचिकित्सेवगतायुषि ॥ प्रसाद्यजगदात्मानंतपसादुष्प्रसादनम् ३४ भवच्छिदमयाचेहंभवंभाग्यविवर्जितः ॥
तादात्म्यंयच्छतोमौढ्यान्मनोमेभिक्षितंबत ॥ ईश्वरात्क्षीणपुण्येनफलीकारानिवाधनः ३५ ॥ मैत्रेयउवाच ॥ नवैमुकुंदस्यपदारविंदयोरजोजुषस्तातभ
वादृशाजनाः ॥ वांछंतितद्दास्यमृतेर्थमात्मनोयदृच्छयालब्धमनःसमृद्धयः ३६ आकर्ण्यात्मजमायांतंसंपरेत्ययथागतम् ॥ राजानश्रद्दधेभद्रमभद्रस्यकु
तोमम ३७ श्रद्धायवाक्यंदेवर्षेर्हर्षवेगेनधर्षितः ॥ वार्ताहर्तुरतिप्रीतोहारंप्रादान्महाधनम् ३८ सदश्वंरथमारुह्यकार्तस्वरपरिष्कृतम् ॥ ब्राह्मणैःकुलवृ
द्धैश्चपर्यस्तोमात्यबंधुभिः ३९ शंखदुंदुभिनादेनब्रह्मघोषेणवेणुभिः ॥ निश्चक्रामपुरात्तूर्णमात्मजाभीक्षणोत्सुकः ४० सुनीतिःसुरुचिश्चास्यमहिष्यौ
रुक्मभूषिते ॥ आरुह्यशिबिकेसार्धमुत्तमेनाभिजग्मतुः ४१

त्वम् हरीच्छितेच्छितैकात्म्यंनतेनैकस्वरूपतेतिवचनात् कामेनमेकामआगादित्युपास्तिसमयेप्रार्थनोक्तिश्च मेमनोबतदुःखानुभवयोग्यंवस्तुभिक्षितं क्षीणपुण्येनकारणेन अत्रदृष्टांतमाह पुलकानिति
पुलकास्तुच्छधान्यानिकुलित्थादीनिभक्तसिक्थानीव स्यात्पुलाकस्तुच्छधान्येसंक्षेपेभक्तसिक्थकइतियादवः ३५ मैत्रेयोध्रुवस्यानुशोकेतात्पर्यमाह नवाइति तद्दास्यमित्यनेनतादात्म्यमित्येतद्विवृतमर्थ
तः अन्यपुरुषार्थंकुतोनवांछंतीतितत्राह यदृच्छयेति यदृच्छयाभगवदिच्छया आकांक्षामंतरेणापिमनोभीष्टानांप्राप्तत्वादित्यर्थः ३६ एवमस्तूत्तरकथाप्रसंगःकइतिवैदुरींशंकांपरिहरन्निवाहाकर्ण्येति ३७
नन्वश्रद्धयाराज्ञः प्राक्तनोद्वेषोनुमीयत अभद्रवचनंचौपचारिकंनिश्चायकप्रमाणाभावादितिशंकामाभूदित्याह श्रद्धायेति हर्षवेगेनहर्षोद्रेकेणधर्षितोविवशीकृतः महांतिधनानियस्यसतथा ॥ ३८ ॥
संतोम्यर्हिताअश्वायस्यसतथातं पर्यस्तःपरिवृतः ३९ इदमपिराज्ञःस्नेहोद्रेकलक्षणमितिभावेनाह शंखेति ॥ ४० ॥ हरेःशक्तिरचिंत्येतिध्वनयन्सुनीतिसुरुच्योर्यात्रांचाह सुनीतिरिति रुक्मंहेम
शिबिकेआंदोलिके ४१

१ अद्यात्मशब्देनमनोग्रहणम् । २ पुलाकःपुलक इतिद्विरूपको० ।

SGDF Sri Gurgeshwari Digital Foundation

दूरप्रदेशेदर्शनंसार्वजनीनंनस्यादितिहरिणापुरनिकटएवघटितमितिभावेनपुरोपवनसमीपेकुमारदर्शनंतदनंतरंराज्ञोमाननक्रियाविशेषंचाह तंदृष्ट्वेति ४२ अंगजंपुत्रं । विष्वक्सेनांघ्रीतिविशेषणेना लिंगनव्याजेनतत्स्पृष्टुरपिपापपरिहारःस्यादितिध्वनयति ४३ किमनेनालिंगनमात्रेणानंदातिरेकलक्षणाज्ञापकेनेत्यतस्तद्विशिनष्टि अथेति शांतैःसुशीतलैःसुखलक्षणतयाऽवसितैर्वा अंतोह्यवसि तेमृत्युस्वभावेपरमात्मनीतियादवः शर्मतोषंचशंसुखमितिहलायुधः अनेनराज्याभिषेकमदूरेसूचयाति एतमर्थंचध्वनयंस्तंविशिनष्टि आप्तेति आप्तःप्राप्तः उद्दामउत्कृष्टोमनोरथोवीरासनादिल क्षणोयेनसतथातं ४४ भगवद्भक्तस्यापिरागद्वेषादिदोषोनास्तिकिमुतहरेरितीममर्थंध्वनयन्ध्रुवोपिपित्राद्युचितक्रियामाचरतीत्याहाभिवंद्येति मातरावित्युक्त्यापूर्वांतःकरणकालुष्यंदूरीकृतमितिव्यन क्ति शीर्ष्णाननामेत्यनेनपितुर्मातुर्गुरुत्वाधिक्यंसूचयति तदुक्तं दशाचार्यसमोभ्राताशतभ्रातृसमंपिता पितुर्दशशतंमातागौरवेणातिरिच्यतइति सुरुच्यामुख्यमातृत्वाभावेपिसत्स्वभावत्वेनभेदबुद्धिर्न कृतेतिद्योतनायसज्जनाग्रणीरितिविशेषितम् ४५ ध्रुवप्रणामेसुरुच्याद्वेषंविहायकिमभ्यध्यायीतितत्राह सुरुचिरिति अर्भकमितिलुप्तोपमं अर्भकंप्रेम्णचिच्छशुमिवेत्यनेनस्नेहविशेषात्ज्ञानगुरुत्वमगणय्यस

तंदृष्ट्वोपवनाभ्याशआयांतंतरसारथात् ॥ अवरुह्यनृपस्तूर्णमासाद्यप्रेमविह्वलः ४२ परिरेभेंगजंदोर्भ्यांदीर्घोत्कंठमनाःश्वसन् ॥ विष्वक्सेनांघ्रिसंस्प र्शहताशेषाघबंधनम् ४३ अथाजिघ्रन्मुहुर्मूर्ध्निशांतैर्नयनवारिभिः ॥ स्नापयामासतनयमाप्तोद्दाममनोरथम् ४४ अभिवंद्यपितुःपादावाशीर्भिश्चाभिमं त्रितः ॥ ननाममातरौशीर्ष्णासत्कृतःसज्जनाग्रणीः ४५ सुरुचिस्तंसमुत्थाप्यपादावनतमर्भकम् ॥ परिष्वज्याहजीवेतिबाष्पगद्गदयागिरा ४६ यस्यप्रसन्नोभगवान्गुणैर्मैत्र्यादिभिर्हरिः ॥ तस्मैनमंतिभूतानिनिम्नमापइवस्वयम् ४७ उत्तमश्चध्रुवश्चोभावन्योन्यंप्रेमविह्वलौ ॥ अंगसंगादुत्पल कावस्रौघंमुहुरूहतुः ४८ सुनीतिरस्यजननीप्राणेभ्योपिप्रियंसुतम् ॥ उपगुह्यजहावाधिंयदंगस्पर्शनिर्वृता ४९ पयःस्तनाभ्यांसुस्रावनेत्रजैःसलिलैः शिवैः ॥ तदाभिषिच्यमानायावीरवीरसुवोमुहुः ॥ ५० ॥ तांशशंसुर्जनाराज्ञींदिष्ट्यातेपुत्रआर्तिहा ॥ प्रतिलब्धश्चिरंनष्टोरक्षितामंडलंभुवः ५१ अभ्यर्चितस्त्वयानूनंभगवान्प्रणतार्तिहा ॥ यदनुध्यायिनोधीरामृत्युंजिग्युःसुदुर्जयम् ५२ लाल्यमानंजनैरेवंध्रुवंसभ्रातरंनृपः ॥ आरोप्यकरिणींहृष्टः स्तूयमानोविशत्पुरम् ५३

मुत्थाप्येतिज्ञायते ४६ ध्रुवस्यमरणमाकांक्षमाणासुरुचिःकथंजीवेतिवाण्युदस्थापीतितत्राह यस्येति मैत्र्यादिभिर्मैत्रीकरुणादिभिर्नमंतिप्रह्वीभवंति ४७ उत्तमस्यभूतेष्वेकत्वेनध्रुवद्वेषाशंकादूरोत्सा दितेतितयोःप्रणयोद्रेकनिमित्तक्रियामाह उत्तमश्चेति अस्रौघंबाष्पप्रवाहं ओघःपरंपरायांस्याज्जलस्रोतसिसंचयइतियादवः ४८ सूचीकटाहन्यायेनध्रुवेसुरुच्यादिप्रणयक्रियांप्रोच्याधुनासुनीतिविषयामा ह सुनीतिरस्येति ४९ अस्यजननीतिविशेषणंविशिनष्टि पयइति औरसपुत्रस्मरणादिनामातृस्तनयोःस्तन्यप्रस्रवणेनतज्जनकत्वानुमानंसुलभमित्यर्थः वीरंपुत्रंसुवतीतिवीरसूःतस्याःवीरपुत्रे यशस्वी रवत्तममितिश्रुतिः ५० सुनीतिकथापिश्रोतॄणांपापप्रणाशिन्यपिभवतीतिभावेनतांविशिनष्टि तांशशंसुरिति दिष्ट्यास्यान्मंगलादिष्वित्यभिधानात् दिष्ट्यापुण्येन ५१ पुण्यमपिविशिष्यंतीत्याह अ भ्यर्चितइति यदिप्रणतार्तिहरोहरिस्त्वयानाभ्यर्चितस्तर्हिचिरंनष्टःपुत्रोनप्रतिलब्धःस्यान्नतथातस्माद्भ्यर्चितइतितर्कः किंविशिष्टोभगवानितितत्राह यदनुध्यायिनइति अनेनतर्कस्याप्रतिपक्षतांदर्शय ति ५२ ध्रुवस्यजनलालनप्रक्रियांसंक्षिप्यरिवमैत्रेयोराज्ञःपुरप्रवेशमाह लाल्यमानमिति कलभश्चैवकन्यानांकरिणीबालमंगलइतिवचनात्करिणीमित्युक्तं ५३

१ शीतैरितिपाठान्तरं टीकायां शीतैःसुशीतलैरिति । २ गुरुत्वेनाधिक्यम् ।

SGDF
Sri Gargeshwari Digital Foundation

संवृतैःपुष्पबंधनसहितैस्तद्विधैःपुष्पबंधनसहितैः ५४ विलंबीनिचूतपल्लवादीनियेषुतेतथातैः प्रतिद्वारमुपसंस्कृतमलंकृतम् ५५ शातकुंभपरिच्छदैःसुवर्णालंकारैः श्रीमतांविमानानांशिखरा
णांद्युतिभिरलंकृतं अनेनदेवादीनांविमानानामागमनंसूचयति ५६ चत्वरश्चतुष्पथः रथ्यारथमार्गः आदिशब्देनातिर्यगाद्यवांतरमार्गोगृह्यते ५७ सिद्धार्थाःसितसर्षपाः ५८ तासांपुरस्त्रीणां
वल्गूनिचारूणिगीतानि ५९ कशिपूत्तमेमंचोत्तमेभोजनाच्छादनादिनाप्रेष्ठेवा ६० कशिपूत्तमइत्युक्तंप्रपंचयति पयःफेननिभाइति दांतादंतनिर्मिताः रुक्मपरिच्छदाःसुवर्णपरिच्छदाःउपर्या
च्छादनपटायासांतास्तथा उपस्कराः पात्राणि रौक्मानिसुवर्णनिर्मितानि ६१ रत्नंश्रेष्ठेचनिर्दिष्टमितिहलायुधः ललनारत्नैःस्त्रीरत्नैःसंयुताःशय्यादयआभांतितास्मिन्निति ॥ ६२ ॥ ६३ ॥

तत्रतत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः ॥ संवृतैःकदलीस्तंभैःपूगपोतैश्चतद्विधैः ५४ चूतपल्लववासःस्रक्मुक्तादामविलंबिभिः ॥ उपस्कृतंप्रतिद्वारमपांकुंभैः
सदीपकैः ५५ प्राकारैर्गोपुराट्टालैःशातकुंभपरिच्छदैः ॥ सर्वतोलंकृतंश्रीमद्विमानशिखरद्युभिः ५६ मृष्टचत्वररथ्यादिमार्गंचंदनचर्चितम् ॥ लाजाक्षतैः
पुष्पफलैस्तंदुलैर्बलिभिर्युतम् ५७ ध्रुवायपथिदृष्टायतत्रतत्रपुरस्त्रियः ॥ सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानिच ५८ उपजह्रुःप्रयुंजानावात्सल्यादा
शिषःसतीः ॥ शृण्वंस्तुवल्गुगीतानिप्राविशद्भवनंपितुः ५९ महामणिव्रातमयेसतस्मिन्कशिपूत्तमे ॥ लालितोनितरांपित्रान्यवसद्दिविदेववत् ६० प
यःफेननिभाःशय्यादांतारुक्मपरिच्छदाः ॥ आसनानिमहार्हाणियत्ररौक्माउपस्कराः ६१ यत्रस्फटिककुड्येषुमहामारकतेषुच ॥ मणिप्रदीपाआभां
तिललनारत्नसंयुताः ६२ उद्यानानिचरम्याणिविचित्रैरमरद्रुमैः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ६३ वाप्योवैदूर्यसोपानाःपद्मोत्पलकुमु
द्वतीः ॥ हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसारसैः ६४ उत्तानपादोराजर्षिःप्रभावंतनयस्यतम् ॥ श्रुत्वादृष्ट्वाद्भुततमंप्रपेदेविस्मयंपरम् ६५ वीक्ष्योढवयसंपुत्रं
प्रकृतीनांचसंमतम् ॥ अनुरक्तप्रजंराजाध्रुवंचक्रेभुवःपतिम् ६६ आत्मानंचप्रवयसमाकलय्यविशांपतिः ॥ वनंविरक्तःप्रातिष्ठद्विमृशन्नात्मनोगतिम् ॥
६७ ॥ ॥ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेदशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ मैत्रेयउवाच ॥ प्रजापतेर्दुहितरंशिंशुमारस्यवैध्रुवः
उपयेमेभ्रमिंनामतत्सुतौकल्पवत्सरौ १ इलायामपिभार्यायांवायोःपुत्र्यांमहाबलः ॥ पुत्रमुत्कलनामानंयोगेश्वरमजीजनत् २ उत्तमस्त्वकृतोद्वाहोमृ
गयायांबलीयसा ॥ हतःपुण्यजनेनाद्रौतन्मातातद्गतिंगता ३

६४ ध्रुवप्रभावोदेवादीनामाश्चर्यबुद्धिजनकःकिम्वितरेषामितिभावेनोत्तानपादांतःकरणप्रवृत्तिविशेषंवक्ति उत्तानपादइति ६५ विस्मयफलमाह वीक्ष्येति ऊढवयसमित्यनेनराज्यपालनशक्तिंव्यनक्ति
६६ तत्रस्वयंकिमकारीतितत्राह आत्मानंचेति आकलय्यज्ञात्वाआत्मनःस्वस्यहरेश्चगतिंस्थितिंविमृशन्विचारयन्निति ६७ इतिश्रीभागवतेचतुर्थस्कंधेविजयध्वजकृतटीकायांदशमोऽध्यायः १० ॥
अत्रनकेवलंमोक्षएवभगवत्प्रसादायत्तःकिंतुबाह्याभ्यंतरशत्रुजयोपीत्यतस्तन्माहात्म्यंवर्ण्यते तत्रादौध्रुवविवाहादिप्रकारःकथ्यते प्रजापतेरित्यादिना । तत्सुतौतस्याभ्रमेःसुतौकल्पोवत्सरश्च १ यो
गेश्वरप्रणिमाद्यष्टांगयोगानामीश्वरं अनेनराज्यानिच्छुत्वात्पश्चादुक्तिरितिज्ञायते २ राजपुत्रउत्तमःकिमभूत्ध्रुवभ्रातृत्वेनतत्कथायाअपिश्रवणार्हत्वात्सापिवक्तव्येतितत्राह उत्तमस्त्विति तन्मा
तातस्योत्तमस्यमातासुरुचिस्तस्योत्तमस्यगतिंमरणलक्षणांगतिंगता ३

SGDF

अत्रप्राकृतस्वभावमध्रुवेणकिमकारीतितत्राह ध्रुवइति। कोपामर्षशुचार्पितः भागुरिन्यायेनास्यशब्दस्यटाबंतत्वंसाधु। पुण्यजनालयं अलकांपुरीं ४ पुररक्षकानाह रुद्रेति। हिमवतोगिरेर्द्रोण्यांनिम्नत टेगुह्यकायक्षास्तैस्तैःसंकुलांनिबिडांस्तिमितताम् ५ उपदेव्योयक्षस्त्रियः ६ उदतिष्ठन्निति वापाठः ७ अहन्हतवान् ८ पत्रीरोपइषुर्द्वयोरित्यमरः ध्रुववीरकर्मस्तवनेनगुह्यकानांरण वीरत्वमसूचि ९ तत्कर्मप्रशस्यगुह्यकैःकिंपृष्ठतःप्रसृप्तमितितत्राह तेपिचेति। युगपत्संभूयध्रुवकृतविक्रमात् द्विगुणंप्रकर्षेणकर्तुमिच्छंतएवनतुकर्तुंसमर्थाः १० चित्रानानावर्णावाजाःपक्षा येषांतेचित्रवाजास्तैः ११ अयुतानांत्रयोदशलक्षाद्दुपरित्रिंशत्सहस्राणिप्राधान्यविवक्षयैतत् १२ तदाध्रुवःकिमभूदत्राह औत्तानपादिरिति आसारेणभगवतावर्षेणसंततनिबिडवर्षधारयेत्यर्थः १३ मानवःमनोःपौत्रःसूर्यःज्ञानिप्रियःसूर्यइवसूर्योवा १४ नन्वत्रमग्नस्यश्वासनिरोधेनमरणं। जलंसंस्तभ्यावस्थानमधोगमनमन्यतउन्मज्जनमितिपक्षेष्वेकःसंभवति अन्यतउन्मज्जनेपलायनापर

ध्रुवोभ्रातृवधंश्रुत्वाकोपामर्षशुचार्पितः ॥ जैत्रंस्यंदनमास्थायगतःपुण्यजनालयम् ४ गत्वोदीचींदिशंराजारुद्रानुचरसेविताम् ॥ ददर्शहिमवद्द्रोण्यांपु रींगुह्यकसंकुलाम् ५ दध्मौशंखंमहाबाहुःखंदिशश्चानुनादयन् ॥ येनोद्विग्नदृशःक्षत्तरुपदेव्योऽत्रसन्भृशम् ६ ततोनिष्क्रम्यबलिनउपदेवमहाभटाः ॥ असहंतस्तन्निनादमभिपेतुरुदायुधाः ७ सतानापततोवीरउग्रधन्वामहारथः ॥ एकैकंयुगपत्सर्वानिहन्बाणैस्त्रिभिस्त्रिभिः ८ तेवैललाटलग्नैस्तैरिषुभिः सर्वएवहि ॥ मत्वानिरस्तमात्मानमाशंसन्कर्मतस्यतत् ९ तेपिचामुममृष्यंतःपादस्पर्शमिवोरगाः ॥ शरैरविध्यन्युगपद्द्विगुणंप्रचिकीर्षवः १० ततः परिघनिस्त्रिंशैःप्रासशूलपरश्वधैः ॥ शक्त्यृष्टिभिर्भुशुंडीभिश्चित्रवाजैःशरैरपि ११ अभ्यवर्षन्प्रकुपिताःसरथंसहसारथिम् ॥ इच्छंतस्तत्प्रतीकर्तुमयुता नांत्रयोदश १२ औत्तानपादिःसतदाशस्त्रवर्षेणभूयसा ॥ नोपादृश्यतसंछन्नआसारेणयथागिरिः १३ हाहाकारस्तदैवासीत्सिद्धानांदिविपश्यताम् ॥ हतोयंमानवःसूर्योमग्नःपुण्यजनार्णवे १४ नदत्सुयातुधानेषुजयकाशिष्वथोमृधे ॥ उदतिष्ठद्रथस्तस्मान्नीहारादिवभास्करः १५ धनुर्वि स्फूर्जयन्दिव्यंद्विषतांखेदमुद्वहन् ॥ अस्त्रौघंव्यधमद्बाणैर्घनानीकमिवानिलः १६ तस्यतेचापनिर्मुक्ताभित्त्वावर्माणिरक्षसाम् ॥ कायानाविविशुस्तिग्मागिरी नशनयोयथा १७ भल्लैःसंछिद्यमानानांशिरोभिश्चारुकुंडलैः ॥ ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः १८ हारकेयूरमुकुटैरुष्णीषैश्चमहाधनैः ॥ आस्तृतास्तारणभुवोरेजुर्वीरमनोहराः १९ हतावशिष्टाइतरेरणाजिराद्रक्षोगणाःक्षत्रियवर्यसायकैः ॥ प्रायोनिकृत्तावयवाविदुद्रुवुर्मृगेंद्रविक्रीडि तयूथपाइव २०

पर्यायेजैत्रंस्यंदनमित्येतदनुपपन्नःस्यादतःकिमभूदितितत्राह मदत्स्विति अथमज्जनानंतरमेवध्रुवरथस्तस्माद्युद्धादुदतिष्ठदित्यन्वयः जलमग्नस्यसूर्यस्यान्यतउन्मज्जनंभवतीतिमत्वापत्रनिमज्जनं तत्रोन्मज्जनंतदृष्टांतत्वेननीहारादिति १५ द्विषतामस्त्रौघंव्यधमन्नष्टमकरोत् १६ एकत्रप्रयोगेणयक्षाणांगात्रधमनंतेषांचर्मभेदनंशरीरच्छेदनंचेतिकार्यत्रयमभूदित्याह तस्यतइति पविरशनिः शतधारं वज्रंकुलिशंदंभोलिरितिहलायुधः दंभोलिरशनिर्द्वयोरित्यमरः १७ वीररसमाह भल्लैरिति भल्लैरर्धचंद्राकारैर्वराहशरैर्वाहेमतालाभैःसुवर्णतालसमानैरूरुभिरुत्संगैः १८ १९ क्वापिसर्वनाशोनदृष्टश्रुत पूर्वइतिकिंवदंतीमनुसरन्नाह हतेति मृगेंद्रेणसिंहेनविगतक्रीडोपक्रमायूथपागजाः २०

SGDF
Sri Gargeshwari Digital Foundation

अस्यामवस्थायांपुरींप्रविश्यतत्सर्वमपहृत्यगमनंतत्रावस्थानंवेत्युभयस्मादेकंप्राप्तंतत्रध्रुवेणकिमकारीत्याशंक्योभयमपिनकृतंमायिजनकुचेष्टाशंकयेतिभावेनाह अपश्यमानइति । तथाहि जनोमायिनांचिकीर्षितंनवेदनजानाति । यदतइति २१ इदंचिंतनमुतवाचिकमितिनज्ञायतेइति अतोविविनक्ति इतिब्रुवन्निति प्रतियोगेनपुनरुद्यमेनशंकितः जलधेरुत्पन्नमिव नभस्वतावायुनेरितंप्रेरितम् २२ पुनः किंकिंशंकाकरमभूदितिप्रपंचयति क्षणेनेत्यादिना छादितंछन्नं विस्फुरंत्यस्ताडितोयास्मिंस्तथातेनस्तनयित्नुनागर्जितेन ॥ २३ ॥ ववृषुर्मेघाइतिशेषः कबंधानिशिरोरहितशरीराणि ॥ २४ ॥ अश्मवर्षिणोगिरेर्गदादीनिसर्वतोदिशांनिपेतुः ॥ २५ ॥ दृषद्गरलयोरश्मवेश्मधामप्रवेशयोरित्यभिधानात् अश्मवर्षिणइत्यहिविशेषणंवा अहयश्चानिपेतुरशनिर्मेघवह्निज्वालातद्वन्निःश्वासोयेषांतेतथा २६ ह्रादोनादः २७ अमनस्विनांमनोबलरहितानां तिग्मगतयस्तीक्ष्णप्रवृत्तयः आसुर्याअसुरजनाप्रियया ॥ २८ ॥ स्वकर्तव्यतयामुनयोभगवत्प्रसादेनसर्वत्राजितायध्रुवायाहित

अपश्यमानःसतदाततायिनंमहामृधेकंचनमानवोत्तमः ॥ पुरींदिदृक्षन्नपिनाविशद्द्विषांनमायिनांवेदचिकीर्षितंजनः २१ इतिब्रुवंश्चित्ररथःस्वसारथिं यत्तःपरेषांप्रतियोगशंकितः ॥ शुश्रावशब्दंजलधेरिवेरितंनभस्वतादिक्षुरजोऽन्वदृश्यत २२ क्षणेनाच्छादितंव्योमघनानीकेनसर्वतः ॥ विस्फुरत्तडितादिक्षुत्रासयंस्तनयित्नुना २३ ववृषूरुधिरौघासृक्पूयविण्मूत्रमेदसः ॥ निपेतुर्गगनादस्यकबंधान्यग्रतोनघ २४ ततःखेऽदृश्यतगिरेर्निपेतुःसर्वतोदिशम् ॥ गदापरिघनिस्त्रिंशमुशलाअश्मवर्षिणः २५ अहयोऽशनिनिःश्वासावमंतोग्निंरुषाक्षिभिः ॥ अभ्यधावन्गजामत्ताःसिंहव्याघ्राश्चयूथशः ॥ २६ समुद्रऊर्मिभिर्भीमःप्लावयन्सर्वतोभुवम् ॥ आससादमहाह्रादःकल्पांतइवभीषणः २७ एवंविधान्यनेकानित्रासनान्यमनस्विनाम् ॥ ससृजुस्तिग्मगतयआसुर्यामाययासुराः २८ ध्रुवेप्रयुक्तामसुरैस्तांमायामतिदुस्तराम् ॥ निशाम्यतस्यमुनयःशमशंसन्समागताः २९ मुनयऊचुः ॥ औत्तानपादेभगवांस्तवशार्ङ्गधन्वादेवःक्षिणोत्ववनतार्तिहरोविपक्षान् ॥ यन्नामधेयमभिधायनिशम्यचाद्धालोकोंजसातरतिदुस्तरमंगमृत्युम् ३० ॥ मैत्रेयउवाच ॥ निशम्यवदतामेवंऋषीणांधनुषिध्रुवः ॥ संदधेऽस्त्रमुपस्पृश्ययन्नारायणनिर्मितम् ३१ संधीयमानएतस्मिन्मायागुह्यकनिर्मिताः ॥ क्षिप्रंविनेशुर्विदुरक्लेशाज्ञानोदयेयथा ३२ तस्यार्षास्त्रंधनुषिप्रयुंजतःसुवर्णपुंखाःकलहंसवाससः ॥ विनिःसृताआविविशुर्द्विषद्बलंवनंयथाभीमरवाःशिखंडिनः ३३

मुपदिशंतीत्याह । ध्रुवइति संसुखं समभेदेसमीचीनेसुष्ठुपूजासुखेषुचेतियादवः । पर्पांशसावितिप्राच्याइतिसूत्राद्धासंसुखमितिज्ञायते ॥ २९ ॥ यन्नामधेयमभिधायेत्यमेनभगवन्नामस्मृत्वाभिधाययुद्धचतस्तवशत्रुजयःस्यादित्युपदिष्टमितिज्ञातव्यम् ३० असुरमायाविनाशेसमर्थनारायणास्त्रमितिजानन्ध्रुवोमुनिभिरर्पितदेवोपदिष्टमितिनिरूप्यतदस्त्रंधनुषिसंदधइत्याह निशम्येति ॥ ३१ ॥ तस्यास्त्रस्यमाहात्म्यमचिंत्यमितिभावेनाह संधीयमानइति अविद्यास्मितरागद्वेषाभिनिवेशाःक्लेशाः ३२ आर्षास्त्रंऋषिच्छंदोदेवतासहितास्त्रंज्ञानास्त्रंवा ऋषिज्ञानइतिधातोः सुवर्णालंकृताःपुंखाज्यानुसंधानप्रदेशायेषांतेसुवर्णपुंखाः वसआच्छादनइतिधातोः वासःशब्देनपक्षालक्ष्यंतेकलहंसानांवासांसिपक्षाइवपक्षायेषांतेकलहंसवाससः शिखंडिनोमयूराः भीमोभयंकरोरवोनादोयेषांतेतथा ३३

SGDF

पुण्यजनानांवीररसमाह तैरिति तिग्मधारैरुग्राग्रैःशिलीमुखैःशरैःसुपर्णगरुडं उन्नद्धफणाउद्धृतफणाः ३४ अर्कमंडलंनिर्भिद्य यंलोकंव्रजंतितंपरंलोकंनिनायेत्यन्वयः ॥ ३५ ॥ किमेवंध्रुवः सर्वाननवशिष्टानकरोदित्यस्योपयोगिकथांतरमाह तान्हन्यमानानिति अनागसोवधयोग्यापराधरहितान् चित्ररथेनध्रुवेण ३६ आगत्यनिःशेषंहनेत्युक्तंकिंनेत्याह अलमिति तमोद्वारेणयथा र्थज्ञानप्रतिबंधकत्वेननरकद्वारेण । पाप्मनापापहेतुना ३७ किंच धर्मशास्त्रानुवर्तिनामस्माकंकुलधर्मोनभवत्ययमित्याह नास्मदिति अकृतैनसामितिपदम् ३८ अकृतापराधत्वंकथंभ्रातृ वधलक्षणापराधकरणादितितत्राह नन्विति नन्वेवार्थेवर्तते अपराधेनेतिसंबध्यते ३९ तस्यापराधिनःसंगात्तदपरित्यागात्तेप्यपराधिनइतिसूक्ष्मदर्शनंभागवतानांनोपपन्नमित्याह । नायमिति आत्मानंमनोऽसंगृह्यानियम्यपशुवन्मूढवत् ॥ ४० ॥ इतोप्येकापराधेन बहूनांवधोनयुक्तःसर्वप्राणिनामंतर्यामित्वेनहरिमुपास्यप्राप्ततत्प्रसादत्वादित्याह सर्वभूतेति सर्वभूतानामात्मभावेनां

तैस्तिग्मधारैःप्रधनेशिलीमुखैरितस्ततःपुण्यजनाउपद्रुताः ॥ तमभ्यधावन्कुपिताउदायुधाःसुपर्णमुन्नद्धफणाइवाहयः ३४ सतान्पृषत्कैरभिधावतो मृधेनिकृत्तबाहूरुशिरोधरोदरान् ॥ निनायलोकंपरमर्कमंडलंव्रजंतिनिर्भिद्ययमूर्ध्वरेतसः ३५ तान्हन्यमानानभिवीक्ष्यगुह्यकाननागसश्चित्ररथेनभू रिशः ॥ औत्तानपादिंकृपयापितामहोमनुर्जगादोपगतःसहर्षिभिः ३६ ॥ मनुरुवाच ॥ अलंवत्सातिरोषेणतमोद्वारेणपाप्मना ॥ येनपुण्यजनानेतान वधीस्त्वमनागसः ३७ नास्मत्कुलोचितंतातकर्मैतत्सद्विगर्हितम् ॥ वधोयमुपदेवानामारब्धस्तेऽकृतैनसाम् ३८ नन्वेकस्यापराधेनतत्संगाद्बहवोहताः ॥ भ्रातुर्वधाभितप्तेनत्वयांगभ्रातृवत्सल ३९ नायंमार्गोहिसाधूनांहृषीकेशानुवर्तिनाम् ॥ यदात्मानमसंगृह्यपशुवद्भूतवैशसम् ४० सर्वभूतात्मभावेनभूता वासंहरिंभवान् ॥ आराध्याापदुराराध्यंविष्णोस्तत्परमंपदम् ४१ सत्त्वंहरेरनुध्याताततत्पुंसामपिसंमतः ॥ कथंत्ववद्यंकृतवाननुशिक्षन्सतांव्रतम् ४२ ति तिक्षयाकरुणयामैत्र्याचाखिलजंतुषु ॥ समत्वेनचसर्वात्माभगवान्संप्रसीदति ४३ संप्रसन्नेभगवतिपुरुषःप्राकृतैर्गुणैः ॥ विमुक्तोजीवनिर्मुक्तोब्रह्मनिर्वा णमृच्छति ४४ भूतैःपंचभिरारब्धोयोषित्पुरुषएवहि ॥ तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह ४५

तर्यामित्वेनभूतेषुप्राणिष्वावासोयस्यसतथा भूतान्यावसंत्यस्मिन्निति वातम् ४१ प्राप्तपदत्वादद्यहारिणाकिमितिभावोनतवास्तीत्याह सत्त्वमिति तस्यहरेःपुंसांभक्तानांसंमतः ततःकिंतत्राह कथमिति ४२ किंतत्सतांव्रतंतेनाकिंफलंतत्राह तितिक्षयेति शत्रुषुशत्रुत्वदर्शनंसुहृत्सु सुहृत्त्वदर्शनंसमत्वम् ४३ तत्प्रसादफलमाह संप्रसन्नइति ततःकिंतत्राह जीवेति जीवत्वाभिमानान्नितरांमुक्तोभव ति तत्फलमाह ब्रह्मेति नित्यनिर्मुक्तशरीरंपरमानंदंवाब्रह्मऋच्छत्याप्नोतीत्यन्वयः । ब्रह्मनिर्वाणंब्रह्मणिनाशमृच्छतीत्यंगीकारेमुक्तेःशून्यभावत्वेननकेनाप्यार्थित्वंस्यात् ४४ सृष्टिप्रकारज्ञानेत तोविरक्त्याप्रकृतिबंधहानेच्छास्यादतस्तामाह भूतैरिति पुरुषोयोषिच्चेतिभावः पंचभिःपृथिव्यादिभूतैरारब्धःसृष्टः अतःपरंकथंप्रारंभइत्यतआह तयोरिति इहजीवराशौतयोर्योषित्पुरुषयोर्व्यवा येनमैथुनधर्मेणसंभूतिःकरचरणादिविभागलक्षणंजन्मभवति सामित्यनेनपृथिव्यादिसंयोगेनजन्मसूचयति ४५

SGIF Sri Gargeshwari Digital Foundation

नकेवलमादिसर्गः किंतूत्तरत्राप्येवमेवेत्याह एवमिति स्थितिसंहारयोःसर्गेविपरीतत्वात्कथंसर्गवदित्युच्यतइत्यत्राह गुणव्यतिकरादिति रजआदिगुणानांविषमसमावस्थाभेदकारणात् परप्रेरणामंतरे णजडेभ्योगुणेभ्यएवंप्रवृत्तिःकथमत्राह माययेति। परमात्मनोमाययेच्छयाप्रेरितेभ्यइतिशेषः। इदमत्राकूतम्। रजोगुणकार्यभूतारब्धदेहाच्चेतनाधिष्ठितात्सर्गः पालकसत्त्वगुणकार्यभूतारब्धदेहात्स्थि तिः तमोगुणकार्यभूतारब्धदेहात्संयमइतिच एतत्सर्वमीश्वरेच्छाधीनमिति ४६ एतदेवविशिनष्टि निमित्तमात्रमिति । यत्रयस्येश्वरस्यसन्निधाने । व्यक्ताव्यक्तंकार्यकारणात्मकमिदंविश्वंभ्रम तिचेष्टते किमिव अयस्कांतस्यसन्निधानेलोहंस्वयंयथातथासः निर्गुणःसत्त्वादिगुणशक्त्यनुपहतशक्तिरात्मापरमात्मातत्रसृष्ट्यादौनिमित्तमात्रंनतूपादानकारणम् ४७ तर्हिमुख्यकर्तृत्वंहरेर्गतमत्रा ह सखल्विति खलुशब्दोन्यकारणशक्तिनिषेधार्थः । सभगवान्योगशक्त्यागुणप्रवाहेषुसृष्ट्यादिषुतत्तत्क्रियानुसारेणविभक्तवीर्योविभक्तमाहात्म्यः अक्लिष्टकर्तृत्वादकर्तैवजगत्करोति अहंतेवशत्रु भावरहितत्वान्निहंतिसंहरति । अनेनहरेःसमत्वभंगोनिरस्तइति एकस्यविरुद्धकर्तृत्वंकथमित्यतउक्तं चेष्टेति दुर्विभाव्याज्ञातुमशक्याऽस्मादृशैरितिशेषः कर्तृत्वसामान्यनिषेधः हरिरक्लिष्टकारित्वा दयस्कांतवदुच्यते कामकर्मस्वभावेषुकालेचावस्थितोहरिः सर्वकारणभूतःसंस्तत्तन्नाम्नाभिधीयतइतिवाक्यविरुद्धंस्यादितिनायमर्थःशोभते ४८ दुर्विभाव्यत्वमाह सोनंतइति यएवंविधःसहरिरस्य विश्वस्यांतकरःस्वयमनंतःस्वमारकमृत्युरहितः अंतोव्यवसितेमृत्याविति यादवः देवदत्तवत्स्वयंदंडमादायहंतीतिकिंनेत्याह कालइति आयुरादिफलपाचकत्वात् पूर्वापरत्वविशेषोपिनास्तीत्याह

एवंप्रवर्ततेसर्गःस्थितिःप्रलयएवच॥ गुणव्यतिकराद्राजन्मायया परमात्मनः ४६ निमित्तमात्रंतत्रात्मा निर्गुणःपुरुषर्षभः॥ व्यक्ताव्यक्तमिदंविश्वंयत्रभ्रमति लोहवत् ४७ सखल्विदंभगवान्योगशक्त्यागुणप्रवाहेषुविभक्तवीर्यः ॥ करोत्यकर्तैवनिहंत्यहंताचेष्टाविभूम्नःखलुदुर्विभाव्या ४८ सोनंतोंतकरःकालो नादिरादिकृदव्ययः॥ जनंजनेनजनयन्मारयन्मृत्युनात्मनः ४९ नवैस्वपक्षोस्यविपक्षएववापरस्यमृत्योर्विशतःसमंप्रजाः॥ तंधावमानमनुधावंत्यनी शायथारजांस्यनिलंभूतसंघाः ५० आयुषोपचयंजंतोस्तथैवोपचयंविभुः॥ उभाभ्यांरहितःस्वस्थोदुःस्थस्यविदधात्यसौ ५१ केचित्कर्मवदंत्येनंस्व भावमपरेनृप॥ एकेकालंपरेदैवंपुंसःकाममुतापरे ५२ अव्यक्तस्याप्रमेयस्यनानाशक्त्युदयस्यच॥ नवैचिकीर्षितंतातकोवेदाद्धास्यसंभवम् ५३

अनादिरिति नकेवलमंतकरः किंत्वादिकृच्च। चौरवत्संवृतोनकरोत्यतोऽव्ययइति। अव्ययोऽसंवृतःनिमित्तमात्रत्वंस्पष्टयन्नुक्तमेवद्रढयति जनमिति जनेनपित्रादिशरीरेणजनंपुत्रादिशरीरंजनयन्नात्मनो ऽधीनेनमृत्युनाकालरूपेणमारयन्शरीरवियोगंकारयन्वर्ततइत्यन्वयः ४९ एवंप्रवर्तमानस्यनैर्घृण्यादिदोषापत्तिर्नास्तिसमत्वादित्याह नवाइति वाइत्यनेनावैषम्यादिसूत्रप्रसिद्धिंदर्शयति समंपुण्यपा पानुसारेण। मृत्योःपरस्यविलक्षणस्य । रुद्रादीनांमारकत्वादिकमेतत्कटाक्षोपक्षिप्तमितिभावेनाह तंधावमानमिति ५० आयुरादिफलपाचकत्वेनांतादिकरइत्युक्तंस्पष्टयति आयुषइति ५१ बहवः कालकर्मादिकमस्योत्पत्त्यादेःकारणमितिसंगिरंते । तत्पदार्थतात्पर्यापरिज्ञानादितिसंतोष्टव्यं यतस्तत्तद्वस्तुषुस्थितत्वात्तत्तत्क्रियार्थप्रवर्तकत्वेनतत्तन्नाम्नायमेवोच्यतइतिभावेनाह केचिदिति केचि न्मीमांसकाः अपरेचार्वाकादयः एकेपौराणिकादयः परेमौहूर्तिकाः अपरेवात्स्यायनकोविदाः कामकर्मस्वभावेष्वितिवचनात् अयमेवनिश्चीयतइति ५२ कामकर्मादिशब्दानांकथंनिर्वचनंयेनते षांभगवद्विषयत्वंज्ञायतइतितत्राह अव्यक्तस्येति प्रत्यक्षादिप्रमाणाविषयश्चेत्शून्यकल्पोयमित्यतउक्तं नानाशक्तीति कर्मादिनानाशक्तीनामुदयोयस्मात्सतथोक्तस्तस्य अनेनपारिशेष्यप्रमाणसिद्धिं सूचयति चिकीर्षितंकर्तुमिष्टंकर्म। अस्यसंभवमुत्पत्तिं निरुक्तिप्रकारंचकोब्रह्मावेत्तिचेत्सोप्यद्धानजानातीत्यर्थः ५३

एवंसर्वत्रहरेःस्वातंत्र्यमुपपाद्यफलितमाह नैवेति विसर्गादानयोर्मरणजन्मनोः विसर्गस्यादानस्यांगीकारस्यचेतिवा हिशब्दोहेतौ ५४ किंतद्दैवमित्यतोयज्जगत्कारणंब्रह्मतदेवात्रोक्तमितिसृष्ट्यादिवि शेषणैर्विशिनष्टि सएवेति कर्दमक्षेत्रप्रवृत्तदेवदत्तवदस्यगुणकर्मलेपोनास्ति अहंकर्तेत्यभिमानाभावादित्याह अथापीति ५५ अनेनापिगुणकर्मलेपःकथमुद्धाटितइतितत्राह एषइति स्वशक्त्या स्वाधीनयास्वरूपशक्त्यावा ५६ कार्यपदप्रयोगाभावान्नेदमनुष्ठातुंयोग्यमित्याशंक्यैवंविधंदैवमितिगुणांतरसमर्पणेनोपसंहरति तमेवेति अमृतंनित्यमुक्तं नासिनासिकयां यंत्रबंधनइतिधातुः दाम्ना यंत्रिताबद्धाः ५७ श्रीनारायणप्रसादेनावाप्तसमस्तसंपदस्तवतन्नियतभूतद्रोहोनघटतइतिभावेनाह यःपंचवर्षइत्यादिना सर्वप्राणिनःप्रतिप्रतिगतमक्षमिंद्रियंयस्यसतथातं अनेनमयाक्रियमा णंकर्मनासौपश्यतीत्येतत्परिहृतम् ५८ विमुक्तविग्रहैर्योगिभिर्व्यपाश्रितंनिषेवितं अनेनभूतविग्रहोस्यप्रियोनभवतीत्युक्तं निर्गुणमावृत्तिशून्यं कुपितत्वात्पुनःप्रसादानभिमुखमित्यर्थः भूतद्रोहेक्रुद्ध स्यास्यतपसापिपुनःप्रसादापादनंदुष्करंतवेतिध्वनितं अनेनशब्दाद्यविषयंवावागादिनापिप्रसादयितुंदुःशकमित्यर्थः कुतःनिर्गुणमतींद्रियमिंद्रियाविषयत्वादित्यर्थः । गुणस्त्वावृत्तिशब्दादिर्ज्येंद्रियामु रूपतंतुष्विंतियादवः । एकंकेवलमक्षरंमूलकारणं आत्मानंपरमात्मानं विशिष्टामुक्तिर्यस्मात्ससतथातं एवंगुणाविशिष्टंहरिमात्मानिहृद्यन्विष्यालोक्यभजस्वेत्यन्वयः तत्स्वरूपंकीदृशमितिनप्रश्ना

नैवैतेपुत्रकभ्रातुर्हंतारोधनदानुगाः ॥ विसर्गादानयोस्तातपुंसोदैवंहिकारणम् ५४ सएवविश्वंमृजतिसएवावतिहंतिच ॥ अथापिह्यनहंकाराज्ञाज्यतेगुण कर्मभिः ५५ एषभूतानिभूतात्माभूतेशोभूतभावनः ॥ स्वशक्त्यामाययायुक्तःमृजत्यत्तिचपातिच ५६ तमेवमृत्युममृतंतातदैवंसर्वात्मनोपैहिजगत्परा यणम् ॥ यस्मैबलिंविश्वमृजोहरंतिगावोयथावैनसिदामयंत्रिताः ५७ यःपंचवर्षोजननींत्वंविहायमातुःसपत्न्यावचसाभिन्नवर्मा ॥ वनंगतस्तपसाप्रत्य गक्षमाराध्यलेभेमूर्ध्निपदंत्रिलोक्याः ५८ तमेवमंगात्मनिमुक्तविग्रहैर्व्यपाश्रितंनिर्गुणमेकमक्षरम् ॥ आत्मानमन्विष्यविमुक्तमात्मदृग्यस्मिन्निदंभिन्नम सत्प्रतीयते ५९ त्वंप्रत्यगात्मनिसदाभगवत्यनंतआनंदमात्रउपपन्नसमस्तशक्तौ ॥ भक्तिंविधायपरमांशनकैरविद्याग्रंथिंविभेत्स्यसिममाहमितिप्ररूढाम् ६० संयच्छरोषंभद्रंतेप्रतीपंश्रेयसांपरम् ॥ श्रुतेनभूयसाराजन्नगदेनयथामयम् ६१ येनोपमृष्टात्पुरुषाल्लोकउद्विजतेभृशम् ॥ नबुधस्तद्वशंगच्छेदिच्छ न्नभयमात्मनः ६२ हेलनंगिरिशभ्रातुर्धनदस्यत्वयाकृतम् ॥ यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः ६३

इइतिभावेनोक्तं आत्मदृगिति पूर्वमात्मानंदृष्टवानितियत्तस्मात्कथमित्यतउक्तं यस्मिन्निति असदस्वतंत्रंभिन्नंपंचविधभेदोपेतमिदंचेतनाचेतनात्मकंविश्वंयस्मिन्यदाधारतयाप्रतयितइति ५९ ननु आत्मदर्शिनोममसंसारपाशच्छेदःकिमितिनाभूदित्यतस्तादृग्गुणानुपसंहृत्यबिंबोपास्त्यभावादतस्तथोपास्तौसस्यादितिभावेनतदुपास्तिप्रकारंविदधानआह त्वंप्रत्यगात्मनीति प्रत्यगात्मनितवा भिमुखेबिंबरूपेभक्तिमुपास्तिलक्षणांसेवां अन्यत्रानुपपन्नाअत्रोपपन्नाअविरुद्धाःसमस्ताअस्थूलाणण्वादिलक्षणाःशक्तयोयत्रसतथातस्मिन् ॥ ६० ॥ तत्रप्रथमसाधनमिदमित्याह संयच्छेति ६१ श्रेयसांप्रतीपत्वंकथमत्राह येनेति येनरोषेणोपसृष्टादुपरक्तात्सज्जनानुग्रहस्यापेक्षितत्वाल्लोकोज्ञानिजनोत्रोच्यते लुकृप्रकाशइतिधातोः ६२ वैश्रवणस्यसतस्त्वेकत्वेनास्यावज्ञानानिमित्तरोषोपिपरिहरणी यइत्याह हेलनमित्यादिना वैश्रवणेहेलनमपिशिवावज्ञानंस्यात्तदवज्ञानेनश्रीनारायणविषयज्ञानमपिनोदेतीत्यभिप्रायेणोक्तं गिरिशभ्रातुरिति अतएवमहतामितिबहुवचनम् ६३ २९

१ गिरिशोभ्राताभरणशीलःपालकःसखापिवायस्येतितथा । डुभृञ्धारणपोषणयोः । टी० ।

SGDF
Sri Gargeshwari Digital Foundation

६४ ध्रुवस्यचसत्तमत्वाद्गुर्वनुशासनानुज्ञानंतथामनोश्चपौत्रमभिनंद्यस्वपुरगमनंवक्ति इत्युक्तइति शोचतइत्यनेनपूर्ववैरानुसंधानेनध्रुवेणतूष्णींस्थितंभ्रातृमातृमरणप्रतिक्रियांकर्तुंसमर्थेनापीतिजनश्रु
तिंपरिहर्तुमिवयक्षवधेप्रवृत्तमितिध्वनयति ६५ ६६ इतिश्रीभागवतेचतुर्थस्कंधेविजयध्वजकृतटीकायामेकादशोध्यायः ॥ ११ ॥ ७ ॥ ॥ साधनसामर्थ्यांभगवत्प्रसादात्स्वरूपानंदानुभवलक्षणो
मोक्षोपितत्तद्योग्यतानुसारेणप्राप्यतेपुरुषैरितिनिर्दिश्यतेस्मिन्नध्याये तत्रादौध्रुवकृतापराधंक्षांत्वावैश्रवणेनध्रुवायवरप्रदानप्रकारंवक्ति ध्रुवंनिवृत्तमित्यादिना वैशसाद्युद्धात् १ परितोषहेतुमाह य
स्त्वमिति २ स्वस्यमनोश्चैकमत्यंव्यनक्ति नभवानिति अप्ययभावयोर्मरणजन्मनोः ३ नन्वहंमच्छत्रूनवधिषंनत्वमेतदकार्षीरितिप्रदर्शनंकथमत्राह अहंत्वमिति पुरुषस्यपरमेश्वरस्यकर्तृत्वाज्ञाना
दहंत्वंकर्तेतिधीरपार्थाभ्रांताभाति नाहंकर्तानकर्तात्वंकर्तायस्तुस्वयंप्रभुरित्यनेनपरमेश्वरकर्तृत्वस्यप्रामाणिकत्वप्रतीतेः । कथमिवस्वाप्नीव यथा स्वप्नेजाग्रत्त्वबुद्धिः । आत्मन्यविद्यमानकर्तृत्वाभिमाना
दनर्थोपिस्यादित्याह अनुध्यानादिति अनुध्यानात्पुनःपुनरात्मनिकर्तृत्वस्मरणाद्ययाकर्तृत्वधियासुखादिरूपस्यात्मनोबंधेनपुत्रमित्रादिस्नेहबंधनविपर्ययोदुःखादिर्भवतीत्यतस्तादृशी बुद्धिस्त्वया
नकार्येतिभावः ४ ननुजीवकृतकार्योपक्रमोपसंहारदर्शनात्कथंतस्यजीवस्यकर्तृत्वाभावइत्याशंक्यकर्तृत्वादौनियमाभावात्तद्दत्तमेवकर्तृत्वंनममस्वतंत्रकर्तृत्वमितिनिश्चित्यतत्क्रियाविशिष्टंभगवंतंभजस्वे

तंप्रसादयवत्साशुसन्नत्याप्रश्रयोक्तिभिः ॥ नयावन्महतांतेजःकुलंनाभिभविष्यति ६४ इत्युक्तस्तंप्रणम्याहभगवंस्तेनुशासनम् ॥ आतिष्ठेभ्रातृमात्रोर्मे
शोचतःक्षम्यतामिति ६५ ॥ मैत्रेयउवाच ॥ एवंस्वायंभुवःपौत्रमनुशास्यमनुर्ध्रुवम् ॥ तेनाभिवंदितःसाकमृषिभिःस्वपुरंययौ ६६ इतिश्रीभागवतेचतु
र्थस्कंधेएकादशोध्यायः ॥ ११ ॥ मैत्रेयउवाच ॥ ध्रुवंनिवृत्तंप्रतिबुध्यवैशसादपेतमन्युर्भगवान्धनेश्वरः ॥ तत्रागतश्चारणयक्षकिन्नरैःसंस्तूयमानोऽभ्यवद
त्कृतांजलिम् १ ॥ धनदउवाच ॥ भोभोक्षत्रियदायादपरितुष्टोस्मितेऽनघ ॥ यस्त्वंपितामहादेशाद्वैरंदुस्त्यजमत्यजः २ नभवानवधीद्यक्षान्नयक्षाभ्रातरं
तव ॥ कालएवहिभूतानांप्रभुरप्ययभावयोः ३ अहंत्वमित्यपार्थाधीरज्ञानात्पुरुषस्यहि ॥ स्वाप्नीवाभात्यनुध्यानाद्ययाबंधविपर्ययः ४ तद्गच्छध्रुवभ
द्रंतेभगवंतमधोक्षजम् ॥ सर्वभूतात्मभावेनसर्वभूतात्मविग्रहम् ५ भजस्वभजनीयांघ्रिमभवायभवच्छिदम् ॥ युक्तंविरहितंशक्त्यागुणमय्यात्ममा
यया ६ वृणीहिकामंनृपयन्मनोगतंमत्तस्त्वमौत्तानपदेविशंकितः ॥ वराहणोऽस्यंबुजनाभपादयोर्निरंतरंत्वांवयमंगशुश्रुम ७

त्याह तद्गच्छेति सर्वभूतानामात्मभावेनकर्तृत्वदानादानयोःकर्तापरमात्मेतिस्नेहलक्षणयाबुद्ध्या सर्वभूतेष्वात्माविग्रहोज्ञानादिगुणपूर्णामूर्तिर्यस्यसतथातं यद्वा सर्वभूतानामात्मानिदेहोविग्रहःप्रादे
शत्वादिलक्षणोयस्यसतथातम् ५ प्रादेशाद्याकारत्वेनावस्थानंकथंगुणशक्तिमंतरेणेत्यतउक्तं युक्तमिति आत्मसामर्थ्याख्ययाशक्त्यायुक्तं गुणमय्यात्माधीनयामाययाप्रकृत्याविरहितम् ६ यद्यपि
हरेःकरुणावर्षधारापात्रत्वेनान्यतःप्राप्योवरस्तवनास्तितथापिवैश्रवणोध्रुवेप्रसन्नःकिलेतिद्योतनायवरंवरयेतिवक्ति वृणीहीति अन्यतःकथंवृणोमीत्यविशंकितःअंबुजनाभस्यहरेः पादयोःसेवायां
निरंतरंसनातनंतदेकमानसमिस्त्यर्थः ७

---

१ मिथ्याभाषणम् २ विषयेसप्तमी ३ अहंत्वमित्यनेनजीवद्वयाभावादहंत्वमितिधीरपार्थाऽपगतार्थेत्यन्यथाभातीत्यतोविवक्षितपदमन्याहृत्ययथावद्योजयति ४ बंधविपर्ययइत्यनेनबंधकामिथ्यात्वमुच्यतइत्यन्यथा
प्रतीतिवारणायविपर्ययशब्दार्थमाह । दुःखादिरिति । दी०

SGLF

मुमुक्षुणायमेववरोवरणीयइतिशिक्षणायतस्यवरादानप्रकारमाह सराजराजेनेति ८ ऐलिविलःइलिविलापुत्रोवैश्रवणः ९ ब्रह्मज्ञानोत्पत्तयेयज्ञएवकर्तव्यइतिप्रकटनायतस्ययज्ञकरणप्रकारमाहा थेति । अथविषयासक्तिंविहायपुरप्राप्त्यनंतरंमंगलंकर्मप्रारब्धवान् । किंतदित्यतउक्तं अयजतेति द्रव्यंक्रियादेवतानांकर्म विषयं अकर्मफलप्रदंमोक्षाख्यफलप्रदम् १० सर्वात्मनिसर्वांतर्यामिणि । सर्वेपूर्णे विश्वःपूर्णस्तथासर्वःसमस्तश्चाभिधीयतइत्यभिधानात् सर्वःशर्वःशिवस्थाणुरितिनामत्वात्सर्वनामसंज्ञानास्ति आत्मानिस्वस्मिन्भूतेषुचावस्थितंतंविभुंव्याप्तंयंपुरातपसाप्रत्यक्षीचकारतामि त्यर्थः ११ तस्यप्रजानुरंजनविधानमाह तमेवमिति १२ पुराकतिपयैर्मासैरेवभगवदनुग्रहमवाप्याभीष्टमाप्तवतोध्रुवस्यकिमुवक्तव्यमेतैरितिभावेनतस्यक्षितिपालनकालावधिमाह षट्त्रिंश दिति प्रारब्धपुण्यक्षयमशुभक्षयंज्ञानसामर्थ्यात् ॥ १३ ॥ बहुसवंबहुतिथं अविकलेंद्रियोवशीकृतेंद्रियः जरसाचक्षुरादींद्रियवैकल्यमंधत्वादिलक्षणंनप्राप्तइतिवात्रयाणांवर्गाणांधर्मकामार्था नामौपयिकमुपयोगसाधनंदेहंनीत्वादेहयात्रांविधायेत्यर्थः १४ पुत्रायसिंहासनंदत्त्वायंकिमकार्षीत् गृहएवावस्थितश्चेद्वैराग्यादिसाधनहासेनलोकोपहासविषयःस्यादित्यतःस्वपुरंविहायदेशांतरंग दइतिवक्तव्यमतःकंदेशंशुचितीर्थमगमदितितत्राह मन्यमानइत्यादिना सध्रुवइदंविश्वंकालोपसृष्टमियताकालेननष्टंभवतीतिमन्यमानोविशालांबदरिकाश्रमेस्पंदमानांनर्दीप्रययावित्यन्वयः विशाला

मैत्रेयउवाच ॥ सराजराजेनवरायचोदितोध्रुवोमहाभागवतोमहामतिः ॥ हरौसवव्रेऽचलितांस्मृतिंययातरत्ययत्नेनदुरत्ययंतमः ८ तस्यप्रीतेनमनसातां दत्त्वैलिविलस्ततः ॥ पश्यतोंतर्दधेसोऽपिस्वपुरंप्रत्यपद्यत ९ अथायजतयज्ञेशंक्रतुभिर्भूरिदक्षिणैः ॥ द्रव्यक्रियादेवतानांकर्माऽकर्मफलप्रदम् १० स र्वात्मन्यच्युतेसर्वेतीव्रौघांभक्तिमुद्वहन् ॥ ददर्शात्मनिभूतेषुतमेवावस्थितंविभुम् ११ तमेवंशीलसंपन्नंब्रह्मण्यंदीनवत्सलम् ॥ गोप्तारंधर्मसेतूनांमे निरेपितरंप्रजाः १२ षट्त्रिंशद्वर्षसाहस्रंशशासक्षितिमंडलम् ॥ भोगैःपुण्यक्षयंकुर्वन्नभोगैरशुभक्षयम् १३ एवंबहुसवंकालंमहात्माऽविकलेंद्रियः ॥ त्रि वर्गौपयिकंनीत्वापुत्रायादान्नृपासनम् १४ मन्यमानइदंविश्वंमायारचितमात्मनि ॥ अविद्यारचितस्वप्नगंधर्वनगरोपमम् १५ आत्मस्त्र्यपत्यसुहृदोब लमृद्धकोशमंतःपुरंपरिविहारभुवश्चरम्याः ॥ भूमंडलंजलधिमेखलमाकलय्यकालोपसृष्टमितिसप्रययौविशालाम् १६

बदरीप्रोक्तानगरीनिम्नगातथेत्यभिधानं कीदृशंविश्वमात्मन्याधारतयाहरेर्माययेच्छयारचितं अनिषेधेपुमान्विष्णाविस्यभिधानादस्यविष्णोर्विचयेच्छयाराचितेस्वप्नगंधर्वनगरेउपमायस्यतत्तथोक्तं महामायेत्यविद्येतिनियतिर्मोहिनीतिच प्रकृतिर्वासनेत्येवंतवेच्छानंतकथ्यतइत्यनेननिरुपपदमायाशब्दस्यहरेरिच्छावाचित्वंकथमितीयमाशंकापरिहृतेतिज्ञायते ॥ १५ ॥ नन्विदमीश्वरेच्छार चितमितिवक्तुंनयुक्तंतथात्वेमिथ्याभूतस्वप्नादिसाम्यकथनमनुपपन्नं । तदुच्यते तस्मान्मायाशब्देनेंद्रजालमेवोच्यते उक्तमानस्यानेकार्थवृत्तिगवादिशब्दवदुपपत्तेरित्यतउक्तंकालेतिउर्वारुकश्याम तादिवत्कालान्तरेऽन्यथादर्शनाद्यदृष्टंतन्नष्टमितिक्षणभंगुरत्वात्स्वप्नादिसाम्यं । नतुमिथ्यात्वात्तस्यचार्थक्रियाकारित्वेनसत्यत्वस्यप्रामाणिकत्वात्तदुक्तं अन्यथात्वात्क्षिप्रनाशाज्जगत्स्वप्नादिवत्स्मृतं वर्तमानंनियत्यैवसदैवपरमात्मनीति आत्मनीत्युक्त्याचसत्यत्वमवगम्यते अनादिनित्यनिरस्तकुहकस्यहरेरिंद्रजालाश्रयत्वंनयुज्यते सदानिरस्तकुहकमितिस्वोक्तेश्च निष्कलंनिष्क्रियंशांतमिति श्रुतेः । निष्क्रियब्रह्मैक्यमात्मनोजानतोध्रुवस्यविशालागमनक्रियायोगाच्च । आत्मस्त्रीपुत्रादीनांविश्रांतभूतत्वेनतद्ग्रहणेनगृहीतानामपिपुनर्वचनंदुष्करंतत्त्यागमपिकृतवानितिध्रुवस्यवैराग्यातिशयद्योत नायेति । परितोविहारभुवः आकलय्यनिश्चित्य १६

१ कर्माकर्मफलप्रदमित्यसंगतंभातीत्यतोयोजयति । द्रव्येति । तेनद्रव्यक्रियादेवतानांकर्मेत्येकंवाक्य । कर्मशब्दोविषयवाचीत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

तत्रगतोपिपितापुत्रविषयस्नेहंमुक्त्वावैराग्यद्रढीयस्तयाभगवद्भक्तिरामालिंगितस्यमुग्धस्येवस्थितस्यतदुपास्तिप्रकारंवक्ति तस्याइति । तस्याविशालायाः शिवंवाःमंगलंवारि स्थूलेपातालादिके ।
मैतन्निजमित्यतउक्तं प्रतिरूपइति शिलावत्प्रतिमास्थाने । तदुक्तं शिलावत्प्रतिमैषाहिविष्णोर्लोकचतुर्दशीति । समाधौनिरायासेनाचित्तस्यध्येयवस्तुविषयीकरणप्रतिप्रवाहेसतिअभ्यस्तत्वात्स्थूल
ध्यानंविसृजन्स्वबिंबोपास्तेरावश्यकत्वेनस्थूलसन्निहितरूपैक्येनसूक्ष्मरूपमस्मरादित्यर्थः । अव्यवहितःस्थूलसन्निहितसूक्ष्मरूपयोरभेदंपश्यन्नित्यर्थः १७ तस्यासंप्रज्ञातसमाध्यवस्थामाह भ
क्तिमिति । अहमसौध्रुवइत्यात्मानंनास्मरत् किंतुभगवंतमेवास्मरदित्यनेनजीवन्मुक्तत्वंलक्षयति । मुक्तलिंगःसूक्ष्मशरीराभिमानरहितः १८ ध्रुवस्यहरेरपरोक्षज्ञानोत्पन्नप्रसादचिह्नमाह सददर्शे
ति विभ्राजयत्दीपयत् राकापतिंपूर्णचंद्रम् १९ वृक्षात्पततपर्णमिवस्वर्गाच्च्युतंनक्षत्रमिवविमानंनाद्राक्षीत्किंतुसनाथमित्याह तत्रेति अनुअनंतरं तत्रविमानेस्थितौ २० उत्पन्ननिर्दो
षज्ञानत्वात्सहसाविमानपुरुषदर्शनात्तदातस्यभ्रांतिज्ञानंनाभूदितिभावेनतत्सत्कारप्रकारमाह विज्ञायेति प्रागदृष्टश्रुतवस्तुदर्शनेसाध्वसलक्षणोंतःकरणवृत्तिविशेषःसंभ्रमोभवति तेनसन्नोनष्टोविक्रमःप्र

तस्याविशुद्धकरणःशिववार्विगाह्यबद्ध्वासनंजितमरुन्मनसाहृदाक्षः ॥ स्थूलेदधारभगवत्प्रतिरूपएतद्ध्यायंस्तदव्यवहितोव्यसृजन्समाधौ १७ भक्तिंहरौ
भगवतिप्रवहन्नजस्रमानंदबाष्पकलयामुहुरर्द्यमानः ॥ विक्लिद्यमानहृदयःपुलकाचितांगोनात्मानमस्मरदसावितिमुक्तलिंगः १८ सददर्शविमानाग्र्यं
नभसोवतरद्ध्रुवः ॥ विभ्राजयद्दशदिशोराकापतिमिवोदितम् १९ तत्रानुदेवप्रवरौचतुर्भुजौश्यामौकिशोरावरुणांबुजेक्षणौ ॥ स्थिताववष्टभ्यगदांसुवा
ससौकिरीटहारांगदचारुकुंडलौ २० विज्ञायतावुत्तमभावकिंकरावभ्युत्थितःसाध्वससन्नविक्रमः ॥ ननामनामानिगृणन्मधुद्विषःपार्षत्प्रधानावितिसंह
तांजलिः२१ तंकृष्णपादाभिनिविष्टचेतसंबद्धांजलिंप्रश्रयनम्रकंधरम् ॥ सुनंदनंदावुपलभ्यसस्मितंप्रीत्योचतुःपुष्करनाभसंमतौ २२॥ सुनंदनंदावूचतुः ॥
भोभोभद्रसुभद्रंतेवचोनोवहितःशृणु ॥ यःपंचवर्षस्तपसाभवान्देवमतीतृपत् २३ तस्याखिलजगद्धातुर्विद्धिदेवस्यशार्ङ्गिणः ॥ पार्षदाविहसंप्राप्तौनेतुं
त्वांभगवत्पदम् २४ सुदुर्जयंविष्णुपदंजितंत्वयायत्सूरयोप्राप्यविचक्षतेपरम् ॥ आतिष्ठतच्चंद्रदिवाकरादयोग्रहर्क्षताराःपरियंतिदक्षिणम् २५ अनास्थितं
तेपितृभिरन्यैरप्यंगकर्हिचित् ॥ आतिष्ठजगतांवंद्यंतद्विष्णोःपरमंपदम् २६ एतद्विमानप्रवरमुत्तमश्लोकमौलिना ॥ उपस्थापितमायुष्मन्नधिरोढुंत्वमर्हसि २७

वृत्तिविशेषोयस्यसतथोक्तः उत्तमोभावोलीलाक्रियावाविभूतिर्वायस्यसतथोक्तःतस्यहरेःकिंकरौसदाक्षिगतौभृत्यौ संहतांजलिर्बद्धांजलिः २१ आत्मनोदेवत्वेनहस्तादिसंज्ञयास्वागमनज्ञापनंविनैव
स्वाभिप्रायमूचतुरित्याह तमिति उपलभ्यदृष्ट्वा २२ भवान्यंदेवमतीतृपत्तृप्तमकार्षीत्तस्यहरेःपार्षदौत्वांभगवत्पदंनेतुमिहप्राप्तौविद्धीत्यन्वयः २३ २४ वैकुंठंनेतुंकिंनेत्याहतुरितिब्रूते । सुदुर्जय
मिति । जितंसाधितं सूरयःसप्तर्षिप्रभृतयोयदप्राप्यपरंदूराद्विचक्षतेपश्यंति तर्हितद्गहनंविपिनंकिंनेत्यतउक्तं चंद्रइति चंद्रदिवाकरादयोग्रहाऋक्षाणिसप्तविंशतिसंख्याताअश्विन्यादयस्ताराभेषा
दिराशयोव्योमतलेदृश्यमानाज्योतिर्मूर्तयोवादक्षिणंपरियंतिप्रदक्षिणंकुर्वंतितदातिष्ठेत्यन्वयः २५ इतोपीदमास्थेयमितिप्रतिपादयतइत्याह अनास्थितमिति अन्यैरनाधिष्ठितंचेत्किंश्मशानंतादित्यतउक्तं
जगतामिति साकिंवसतिरतउक्तं तद्विष्णोरिति शिशुमारोध्रुवश्चैवसंस्थितौयत्पुरेसदा तत्पश्यंतिनयांत्यन्येलोकंयांतिसुरान्विनेतिवचनेनतत्रतात्पर्यमवगंतव्यम् २६ केनेदंविमानंप्रेषितमितिशंकांनि
वारयतइत्याह एतदिति । उत्तमश्लोकमौलिनाशिंशुमारमूर्तिनाहरिणा २७

SGDF

मैत्रेयोविदुरायाह भगवद्भक्तमाहात्म्यंशृण्विति भावेनतस्यपदमारोढुमितिकर्तव्यतांवक्ति निशम्येति वैकुंठस्यहरेर्नियोज्यानांपार्षदानांमध्येमुख्ययोःमधुपुष्परसमिवरसंच्योततिस्रवतीतिमधुच्युतां कृतांनि
त्यकर्माख्यंमंगलंयेनसकृतनित्यमंगलः । अभ्यवादयदभिवादयामास २८ नेदंध्रुवस्यैवमंगलशकुनमन्येषामपिमहत्तांभवतीतिध्वनयंस्तद्यात्राप्रारंभमांगल्यंवक्ति परीत्येत्यादिना २९ यदाधि
ष्ण्याग्र्यंविमानमधिष्ठातुमियेषतदादुंदुभ्यादयोनेदुरित्यन्वयः ३० नाहमेवसत्यसंकल्पशिरोमणिःकिंतुभक्तोपीतिभावेन हरिणास्फुरितांतःकरणवृत्तिविशेषोध्रुवएतादृशंपुत्रंसूतवत्याःस्वकृतेत्यक्तविषय
भोगायाःसुनीते पुत्रेणसहस्वर्लोकप्राप्तिर्नाभूत्स्वयंवानास्मःर्षींदितिलोकापवादंमन्वानइवयदास्वमातरमस्मार्षीत्तदाकैटभारेःसंकल्पंजानमानौतौपार्षदौतस्यपुरतोयांतींमातरंदर्शयामासतुरित्याह सचेति
अनेनध्रुवस्यापिसत्यसंकल्पत्वंलोकेप्रकाशितमितिज्ञायते ३१ अग्रगामग्रतोगच्छंतीं ३२ ३३ ध्रुवानिश्चलागतिर्यस्यसतथा देवयानेनमार्गेण ३४ तत्पदप्राप्त्यधिकारिणोन्वयव्यतिरेकाभ्या
माह नतइति येतुजंतुषुखलास्तेयत्रव्रजंति येतुजंतुषुअनुग्रहाद्दयालक्षणादनिशंभद्राणिचरंतितेयद्व्रजंति ३५ एतदेवविशिनष्टि शांताइति एतेखिलाइतिपाठेजंतुषुयेभद्राणिचरंति एतेखिलावि

मैत्रेयउवाच ॥ निशम्यवैकुंठनियोज्यमुख्ययोर्मधुच्युतांवाचमुरुक्रमप्रियः ॥ कृताभिषेकःकृतनित्यमंगलोमुनीन्प्रणम्याशिषमभ्यवादयत् २८ प
रीत्याभ्यर्च्यधिष्ण्याग्र्यंपार्षदावभिवंद्यच ॥ इयेषतदधिष्ठातुंबिभ्रद्रूपंहिरण्मयम् २९ तदादुंदुभयोनेदुर्मृदंगपणवादयः ॥ गंधर्वमुख्याःप्रजगुःपेतुःकुसु
मवृष्टयः ३० सचस्वर्लोकमारोक्ष्यन्सुनीतिंजननींध्रुवः ॥ अन्वस्मरदहंहित्वादीनांयास्येत्रिविष्टपम् ३१ इतिव्यवसितंतस्यव्यवसायंसुरोत्तमौ ॥ द
र्शयामासतुर्देवींदेवयानेनचाग्रगाम् ३२ तत्रतत्रप्रशंसद्भिःपथिवैमानिकैःसुरैः ॥ अवकीर्यमाणोददृशेकुसुमैःक्रमशोग्रहान् ३३ त्रिलोकींदेवयानेनसोति
व्रज्यमुनीनपि ॥ पुरस्ताद्यद्ध्रुवगतिर्विष्णोःपदमथाभ्यगात् ३४ यद्भ्राजमानंस्वरुचैवसर्वतोलोकास्त्रयोह्यनुविभ्राजंतएते ॥ नतेखलाजंतुषुयेत्वनुग्रहाद्व्रजं
तिभद्राणिचरंतियेऽनिशम् ३५ शांताःसमदृशःशुद्धाःसर्वभूतानुरंजनाः ॥ यांत्यंजसाच्युतपदमच्युतप्रियबांधवाः ३६ इत्युत्तानपदःपुत्रोध्रुवःकृष्णपरा
यणः ॥ अभूत्त्रयाणांलोकानांचूडामणिरिवामलः ३७ गंभीरवेगानिमिषांज्योतिषांचक्रमर्पितम् ॥ यस्मिन्भ्रमतिकौरव्यमेढ्यामिवगवांगणः ३८
महिमानंविलोक्यास्यनारदोभगवानृषिः ॥ आतोद्यंवितुदन्श्लोकान्सत्रेऽगायत्प्रचेतसाम् ३९

ष्णोरनुग्रहाद्व्रजंति भद्राचरणंविशिनष्टि येऽनिशमिति। येनिशंशांत्यादिगुणयुक्तास्तेच्युतपदंयांतीत्यन्वयः एतत्पदंप्राप्यस्वरूपाविर्भावयोग्यान्विनापुरस्तादन्यैरित्युक्तम् ३६ ३७ चंद्रदिवाकरादयइ
त्यत्रज्योतिश्चक्रेणप्रदक्षिणीक्रियमाणमेतत्स्थानमित्युक्तं । तत्किंयत्दूरतइतिनप्रतीतंतदिदानींलक्षयति गंभीरेति गंभीरवेगानिअनिमीषीवगंभीरवेगानिमींषितेषां मिषनिमिषइतिधातोः ननिमिषंतिन
मीलंतीत्यनिमिषःतेषामनस्तंगच्छतामित्यर्थः यस्मिन्नित्यनेनोपरीतिप्रतीतिंनिनिवारयति मेढ्यामिति अनेनमेढ्याःसमीपेपरितोभ्रमंतीतियथाप्रतीतं तथात्रापीत्यर्थः ३८ इतिकेनायंमहिमाज्ञाले
तोयेनास्माकमपितत्रश्रद्धातिशयःस्यादित्यतआह महिमानमिति आतोद्यंमहद्वीणावाद्यं आतोद्यंवाद्यमिष्यतेइतिहलायुधः ३९

१ भर्भूवःस्वरितित्रयाणांलोकानांसमाहारस्त्रिलोकीतामतिव्रज्येत्यर्थः । तथात्वेभूलोकादुपरिषट्त्रिंशल्लक्षयोजनानंतरंध्रुवलोकः तदनंतरं चतुर्दशलक्षयोजनोच्छ्रयेस्वर्लोकःअर्धकोट्युच्छ्रितःस्वर्गोविमानावालिसंकुलइति
प्रमाणात् । तमतिव्रज्येतिकथंसंगच्छतइत्याशंकायामत्रेदमवधेयं । ध्रुवःस्वमातरंद्रष्टुंस्वर्गंप्रतिगत्वातांदृष्ट्वादेवानानम्यतमतिव्रज्यध्रुवलोकंप्रतिगतवान् । नतुतदुपरिध्रुवलोकोस्तीत्यर्थः । अस्मिन्विषयेबहुप्रमाणानि
संतिअत्रावकाशाभावान्नलिख्यंतइतिक्रोडे

SGDF Sri Gargeshwari Digital Foundation

तपसःप्रभावोमाहात्म्यंयस्यसतथातस्य प्रतापमाहात्म्ययोःप्रभावःस्यादितियादवः ४० अजितंजिगायवशीचकार ४१ ४२ ४३ ध्रौव्यंध्रुवस्यमोक्षस्यसाधनं ४४ अच्युतप्रियध्रुवस्यचेष्टितं ४५तीर्थमुपायः
साधनंमंत्राद्युपदेष्टृवदुपदेष्टृवा तेजोबलेप्रभावेन्नेज्योतिष्यर्चिषिरेतसि नवनीतेनलेधर्मेदानंहास्तिमदेपिचेत्यमिधानात् तदिच्छूनांतेजआकांक्षमाणानांयत्रयस्मिंश्चरितेऽभ्यस्यमानेतेजोभवतीत्यर्थः ।
४६ समवायेसमूहेकीर्तयेदित्यतस्तात्पर्यादिदमितिवक्ति पुण्यश्लोकस्येति ४७ ४८ श्रावयन्फलाभिसंधिंनकुर्यादितिभावेनाह नेच्छन्निति तत्रचरितेश्राविते श्रुतेवाफलंनेच्छन्वर्ततेइतिशेषः कथंतर्हिफलसि
द्धिरित्यतआहात्मनेति । तत्रेत्युत्तरत्रापिसंबध्यते तत्रचरितेश्राव्यमाणेआत्मनामनसात्मानंपरमात्मानंप्रतिसंतुष्टःसिध्यतिप्राप्ताभीष्टफलोभवति ४९ ध्रुवचरितव्याख्यानव्याजेनभागवतंज्ञानमुपदिश

॥ नारदउवाच ॥ ॥ नूनंसुनीतेःपतिदेवतायास्तपःप्रभावस्यसुतस्यतांगतिम् ॥ दृष्ट्वाभ्युपायानपिवेदवादिनोनैवाधिगंतुंप्रभवंतिकिंनृपाः ४० यःपं
चवर्षोगुरुदारवाक्शरैर्भिन्नेनयातोहृदयेनदूयता ॥ वनंमदादेशकरोऽजितंप्रभुंजिगायतद्भक्तिगुणैःपराजितम् ४१ यःक्षत्रबंधुर्भुवितस्याधिरूढमन्वारुरुक्षे
दपिवर्षपूगैः ॥ यःपंचवर्षोयदहोभिरल्पैःप्रसाद्यवैकुंठमवापतत्पदम् ४२ ॥ मैत्रेयउवाच ॥ ॥ एतत्तेभिहितंसर्वंयत्पृष्टोहमिहत्वया ॥ ध्रुवस्योद्दामय
शसश्चरितंसंमतंसताम् ४३ धन्यंयशस्यमायुष्यंपुण्यंस्वस्त्ययनंमहत् ॥ स्वर्ग्यंध्रौव्यंसौमनस्यंप्रशस्यमघमर्षणम् ४४ श्रुत्वैतच्छ्रद्धयाऽभीक्ष्णमच्युतप्रिय
चेष्टितम् ॥ भवेद्भक्तिर्भगवतिययास्यात्क्लेशसंक्षयः ४५ महत्त्वमिच्छतांतीर्थंश्रोतुःशीलादयोगुणाः ॥ यत्रतेजस्तदिच्छूनांमानोयत्रमनस्विनाम् ४६ प्रय
तःकीर्तयेत्प्रातःसमवायेद्विजन्मनाम् ॥ सायंचपुण्यश्लोकस्यध्रुवस्यचरितंमहत् ४७ पौर्णमास्यांसिनीवाल्यांद्वादश्यांश्रवणेथवा ॥ दिनक्षयेव्यतीपाते
संक्रमेऽर्कदिनेपिवा ४८ श्रावयेच्छ्रद्दधानानांतीर्थपादपदाश्रयः ॥ नेच्छंस्तत्रात्मनात्मानंसंतुष्टइतिसिद्ध्यति ४९ ज्ञानमज्ञाततत्त्वाययोदद्यात्परमार्थ
वित् ॥ कृपालोर्दीननाथस्यदेवास्तस्यानुगृह्णते ५० इदंमयातेभिहितंकुरूद्वहध्रुवस्यविख्यातविशुद्धकर्मणः ॥ हित्वाऽर्भकःक्रीडनकानिमातुर्गृहंचवि
ष्णुंशरणंयोजगाम ५१ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेद्वादशोध्यायः १२ ॥ श्रीशुकउवाच ॥ निशम्यकौषारविणोपवर्णितंध्रुवस्यवैकुंठपदाधि
रोहणम् ॥ प्ररूढभावोभगवत्यधोक्षजेप्रष्टुंपुनस्तंविदुरःप्रचक्रमे १ ॥ ॥ विदुरउवाच ॥ ॥ केतेप्रचेतसोनामकस्यापत्यानिसुव्रत ॥ कस्या
न्ववायेप्रख्याताःकुत्रवासत्रमासत २

तोनकेवलंभगवानेवानुग्रहंकरोति किंतुतदिंद्रियाभिमानिनोदेवाअपीत्याह ज्ञानमिति ५० पुनरपितन्माहात्म्यंसूचयन्नुपसंहरति इदंमयेति ५१ ॥ ॥ इतिश्रीभागवतेचतुर्थस्कंधेटीकायांद्वादशो
ध्यायः ॥ १२ ॥ अत्रहरितद्भक्तकथाश्रवणेनशुद्धांतःकरणस्यबिंबप्रतिबिंबज्ञानादेवापवर्गःस्यादितिदीप्यतेऽस्मिन्नध्याये तत्रादौविदुरस्यप्रचेतसांविषयप्रश्नप्रकारस्तदुत्तरत्वेनमैत्रेयेणाऽस्यवंशावलिव
र्णनंक्रियतेनिशम्येत्यादिना प्ररूढभावःप्रवृद्धभक्तिः सत्रेऽगायत्प्रचेतसामित्युक्तिःप्रश्नबीजं १ अन्ववायेवंशे २

१ आत्मनाऽऽत्मानंस्वंप्रतीत्यन्यथाप्रतीतिवारणायप्रवृत्ततात्पर्यानुसारेणार्थमाह । मनसेति ॥ तेनतृतीयांतात्मशब्दोमनोवाचीद्वितीयांतस्तुपरमात्मवाचीतितात्पर्यार्थः । दी०

SGDF
Sri Gangadharan Digital Foundation

महाभागवतेनविदुरेणहरिकथाप्रश्नंविहायप्रचेतसांप्रश्नःकिमितिक्रियतेइत्याशंक्यतेषांकथापिहरिकथाविनाभूतानारदेनप्रोच्यमानत्वान्नारदस्त्वन्यकथांनवक्तिभागवतचूडामणित्वादित्याह । मन्यइति । क्रियायोगःसकइतितत्राह । परिचर्याविधिर्हरेरिति ३ प्रवृत्तानांयोग्यःकथंनिवृत्तिविषयोभवतीत्याशंक्यसंकल्पविशेषात्स्यादित्याशयेनाह । स्वधर्मशीलैरिति । अयंभावःसाक्षान्नारायणएवचरुपुरोडाशादिद्रव्यस्वामित्वेनतदभिमानित्वेनाग्न्यादिदेवतांतर्यामित्वेनतच्छब्दप्रवृत्तिनिमित्तस्यमुख्यत्वेनदेवतात्वेनचमंत्रमूर्तित्वेनेज्यतइतिनारदेनप्रतिपादितइति ॥ ४ ॥ ततःकिंफलितमित्यत्राह यास्ताइति ५ अधिराजासनंराजासनमधिकृत्यवर्तमानंसार्वभौमाश्रियंनैच्छदित्यन्वयः ६ कुतोनैच्छदितितत्राह सजन्मनेति जन्मप्रभृतिभगवन्निष्ठादिगुणयुक्तत्वात् । समदर्शनत्वंस्पष्टयति । ददर्शेति आत्मानंपरमात्मानंलोकेविततंददर्श लोकमात्मनिपरमात्माधारतयास्थितमद्राक्षीदित्यन्वयः ७ तदेवविशिनष्टि आत्मानमिति ददर्शेत्यनुवर्तते आत्मानंस्वबिंबंहरिमेवंददर्शेत्यन्वयः । कथंब्रह्मअथकस्मादुच्यतेब्रह्मेति बृहंतोह्यस्मिन्गुणाइतिश्रुतेः गुणतोदेशतोव्याप्तंहृदयगुहाकाशस्याल्पत्वेनतत्स्थितस्यापितथात्वात्कथंव्याप्तमित्युच्यतइत्याशंक्यप्राकृतवैकृतरूपवतएवानुपपत्तिः व्याप्तत्वेनहरेस्तादृशशरीराभावादितिभावेनोक्तं निर्वाणमिति एतद्बाणमवष्टभ्येतिश्रुतौवाणशब्दस्यशरीरेप्रयोगात् देहविनाशेतत्रस्थस्यापिविनाशसंभवात्कथंब्रह्मत्वमुच्यतइत्यतोवाह निर्वाणमिति निर्गतोनाशोयस्मात्तथोक्तं निर्वाणंनिर्वृतौमोक्षेविनाशेगजमज्जनइतियादवः अनेनदेहिनोजीवस्यदेहोहमितितन्निमित्तदुःखित्वेऽपिहरेस्तन्नास्तीतिज्ञापितं हरेःप्राकृतदेहोनास्तीतिस्पष्टमाह प्रत्यस्तमितेति गात्रं

मन्येमहाभागवतंनारदंदेवदर्शनं ॥ येनप्रोक्तःक्रियायोगःपरिचर्याविधिर्हरेः ३ स्वधर्मशीलैःपुरुषैर्भगवान्पुरुषोत्तमः ॥ इज्यमानोभक्तिमतानारदेनेरितःकिल ४ यास्तादेवर्षिणातत्रवर्णिताभगवत्कथाः ॥ मह्यंशुश्रूषवेब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि ५ मैत्रेयउवाच ॥ ध्रुवस्यचोत्कलःपुत्रःपितरिप्रस्थितेवनम् ॥ सार्वभौमश्रियंनैच्छदधिराजासनंपितुः ६ सजन्मनोपशांतात्मानिःसंगःसमदर्शनः ॥ ददर्शलोकेविततमात्मानंलोकमात्मनि ७ आत्मानंब्रह्मनिर्वाणंप्रत्यस्तमितविग्रहम् ॥ अवबोधरसैकात्म्यमानंदमनुसंततम् ८ अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः ॥ स्वरूपमवरुंधानोनान्यदस्मात्तदैक्षत ९

वपुःसंहननंशरीरंवर्ष्मविग्रहइत्यमरः प्रतीत्युपसर्गयोगेनयानियान्यवताररूपाण्यंतर्यामिरूपाणिचतानितानिसर्वाण्यपिप्राकृतशरीररहितानीतिसूचनेनमूलरूपस्यकिमुवक्तव्यमित्यायातं तर्हीदंशून्यकल्पमित्यतउक्तमवबोधेति अवबोधरसोज्ञानरसःसएवैकमात्मनोऽभिन्नंरूपंयस्यतत्तथोक्तं प्राकृतज्ञानमिश्रितंनभवतीत्येकेत्युक्तं तस्यापिज्ञानवाचित्वादवगच्छतीत्यादौसिद्धत्वात् ज्ञानज्ञानःसुखसुखइतिश्रुतिरपिसूचितास्यात् रूपरूपिणोरभेदद्योतनायैकात्म्यमित्युक्तं ऐकात्म्यप्रत्ययसारमितिश्रुतिश्च एवंचेद्विज्ञानवादानुप्रवेशइतितत्राह आनंदमिति आनंदयतीत्यानंदंसुखानुभवरूपमित्यर्थःविज्ञानमानंदंब्रह्मेतिश्रुतेः । उपसंहरति अनुसंततमिति अतःसर्वप्राणिष्वनुगतत्वेनतद्बहिष्ठेनचगुणगुणिनोरूपरूपिणोरभेदेनततंव्याप्तमित्युपपन्नमित्यर्थः समभेदइतियादवः ॥ ८ ॥ ज्ञानाग्निनादग्धबाह्यांतःकरणस्यैतादृशभगवद्रूपदर्शनंसंगच्छतइत्याह अव्यवच्छिन्नेति योगशब्देनतज्जनितज्ञानंलक्ष्यते अव्यवच्छिन्नयोगेननिरंतरंध्यानलक्षणोपासनयाजातेनज्ञानाग्निनादग्धंभस्मीभूतंकर्ममलंपापक्रियानिमित्तंमलंकिट्टंयस्यसतथा तादृशआशयोंतःकरणंयस्यसतथा निर्मलांतःकरणपात्रेप्रज्वलितेनज्ञानदीपेनलोकेविततमात्मानमात्मनिततंलोकंचददर्शेत्युक्त्याद्वयोःसमत्वमायातमितिमंदाशंकामपनुदन्विशदयति स्वरूपमिति स्वंरूपंजीवस्यबिंबरूपंपरमात्मानमवरुंधानःस्वज्ञानांतःस्थितंकुर्वाणःसाक्षात्कृतंकुर्वाणोऽस्माद्धरेरन्यत्स्वतंत्रमनियततंज्जगन्नैक्षतांकिंतुतत्स्रष्टं तत्स्थापितंतन्नियतंतत्संहृतंतज्ज्ञापितंतद्बद्धंतन्मोचितमपश्यदित्यर्थः तदास्वरूपंप्रतिबिंबमस्माद्बिंबादन्यद्भिन्नंनैक्षतेतिबिंबप्रतिबिंबयोरत्रैक्यमुच्यतइतिवक्तुंनयुक्तं । अव

१ स्वरूपमवरुंधानइत्यस्यजीवः स्वस्यरूपमवरुंधानइत्यन्यथाप्रतीतिवारणायतात्पर्योक्तमर्थमाह ॥ स्वरूपमिति ॥

SGDF
Sri Gurgeshwari Digital Foundation

रुंधानइत्यस्यनिर्विषयत्वात् तदेतिकालस्यपृथङ्निर्देशानुपपत्तेश्च ददर्शेत्यत्रलोकात्मनोराधाराधेयत्वोक्तेश्चतस्यचभेदनिष्ठत्वात् तदुक्तं भिन्नस्वरूपमभिदंस्वरूपंतुद्विधाहरेः भिन्नस्वरूपंब्रह्माद्यंम
त्स्याद्यमिदमुच्यतइति ९ एवंविधोऽपिलोकसंभाषणविसर्जनार्थमविवेकिनामेवंदृष्टइत्याह जडेति अतन्मतिस्तत्तद्वस्तुविषयज्ञानशून्यः विवेकिनांपक्षेएवसर्वविलक्षणेविष्णौययासंसारंतरंतिसामति
र्यस्यसोतन्मतिरिति प्रशांतार्चिर्भस्मगर्भितोग्निरिव १० अस्मिन्नेवंगतेकोत्रराजाभूदत्राह मत्वेति कालावयवस्यवत्सरस्यराज्यार्हत्वंकथमित्यतउक्तं यवीयांसामिति कुलवृद्धाज्येष्ठेकल्पनाम्निसुते
स्थितेवत्सरंराजानंकथमकुर्वन्नित्येतच्चोद्यं कल्पःकल्पाभिमानीसन्शिंशुमारानुगःस्थितः वत्सरोराज्यमकरोत्पित्रादत्तंमहाबलः चक्रेनारायणःसाक्षात्किंस्तुघ्नःकल्पमात्मजामित्यनेनपरिहर्तव्यम् ११
वत्सरोपिनाम्नास्वर्वीथ्यांभार्यायांषट्सुतानापेत्याह स्वर्वीथीति स्वर्गमार्गाभिमानित्वात्स्वर्वीथीति १२ अत्रयंयमादायकथाप्रवर्ततेसस‌एववंशेहेतुभूतः । अन्येत्वकृतोद्वाहाःयोगिनोऽप्रजाश्चेतितात्प

जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः ॥ लक्षितःपथिबालानांप्रशांतार्चिरिवानलः १० मत्वातंजडमुन्मत्तंकुलवृद्धाःसमंत्रिणः ॥ वत्सरंभूपतिंचक्रुर्य
वीयांसंभ्रमेःसुतम् ११ स्वर्वीथिर्वत्सरस्येष्टाभार्यासूतषडात्मजान् ॥ पुष्पार्णंतिग्मकेतुंचइषमूर्जंवसुंजयम् १२ पुष्पार्णस्यप्रभाभार्यादोषाचद्वेबभू
वतुः ॥ प्रातर्मध्यंदिनंसायमितिह्यासन्प्रभासुताः १३ प्रदोषोनिशिथोव्युष्टइतिदोषासुतास्त्रयः ॥ व्युष्टःसुतंपुष्करिण्यांसर्वतेजसमादधे १४
सचक्षुःसुतमाकूत्यांपत्न्यांमनुमवापह ॥ मनोरसूतमहिषीवैराजानड्वलासुतान् १५ पुरुकुत्संत्रितंद्युम्नंसत्यव्रतमृतव्रतम् ॥ अग्निष्टोममतीरात्रंसुद्युम्नं
शिबिमुल्मुकम् १६ उल्मुकोजनयत्पुत्रान्पुष्करिण्यांषडुत्तमान् ॥ अंगंसुनासमाख्यातिंक्रतुमांगिरसंगयम् १७ सुनीथांगस्ययापत्नीसुषुवेवेनमु
ल्बणम् ॥ यद्दौःशील्यात्सराजर्षिर्निर्विण्णोनिरगात्पुरात् १८ यमंगशेपुःकुपितावाग्वज्रामुनयःकिल ॥ गतासोस्तस्यभूयस्तेममंथुर्दक्षिणंकरम् १९
अराजकेतदालोकेदस्युभिःपीडिताःप्रजाः ॥ जातोनारायणांशेनपृथुःपृथुपराक्रमः २० विदुरउवाच ॥ तस्यशीलनिधेःसाधोर्ब्रह्मण्यस्यमहात्मनः ॥
राज्ञःकथमभूद्दुष्टाप्रजायद्विमनाययौ २१ किंवांहोवेनउद्दिश्यब्रह्मदंडमयूयुजन् ॥ दंडव्रतधरेराज्ञिमुनयोधर्मकोविदाः २२ नावध्येयःप्रजापालः
प्रजाभिरघवानपि ॥ यदसौलोकपालानांबिभर्त्योजःस्वतेजसा २३ एतदाख्याहिमेब्रह्मन्सुनीथात्मजचेष्टितम् ॥ श्रद्दधानायभक्तायत्वंपरावरवित्तमः
२४ ॥ मैत्रेयउवाच ॥ अंगोश्वमेधंराजर्षिराजहारमहाक्रतुम् ॥ नाजग्मुर्देवतास्तस्मिन्नाहूताब्रह्मवादिभिः २५

र्येज्ञातव्यं एताःस्त्रियःसुताश्चकालादितत्तद्वस्त्वभिमानिनइतिच ॥ १३ ॥ १४ ॥ ससर्वतेजाश्चक्षुर्नामानंसुतंनाम्नाकूत्यांपत्न्यामवापेत्यन्वयः मनोर्महिषीनाम्नानड्वलावैराजावैराजपुत्रीपुरुकुत्सा
दीन्दशसुतानसूतेत्यन्वयः १५ १६ १७ अंगस्ययासुनीथानामपत्नीसोल्बणमसुरप्रकृतिंवेनंसुषुवइत्यन्वयः १८ यंवेनं अंगविदुर गतासोर्मृतस्य १९ ततःकिमभूत्तत्राह जातइति २०
श्रवणमंगलत्वात्सामान्यतःकथितंविशेषतोविदुरः श्रोतुंपृच्छतीत्याह तस्येति यद्विमनाःयस्यादुष्टप्रजायाविषण्णमनाः २१ दंडव्रतांहिंसाख्यंव्रतंधारयतीतिदंडव्रतधरः । दंडोस्त्रीशासनेराज्ञांहिंसा
यांलकुटेगुडइतियादवः यद्वा शासनाख्यंव्रतंबिभ्रति नतेष्वज्ञानलेशःसंभाव्यतइत्याह धर्मकोविदाइति २२ नावध्येयोनावज्ञेयःतत्रनिमित्तमाह यदसाविति २३ यतएवंतत्त्वंतस्मादत्रमहन्निमित्तम
स्ति एतन्मेआख्याहीत्यन्वयः ममात्रेतिहासज्ञानंनास्तीतिवक्तुंनशक्यमित्यतउक्तं परावरेति २४ सूचितमर्थंविस्तरतोवक्तुमुपक्रमते अंगइति २५

॥ २६ ॥ नद्रव्यादिदोषादित्याहुरित्याह राजन्निति आसादितान्यापादितानि अयातयामान्यगतवीर्याणि २७ हेलनमवज्ञानं २८ २९ आहुताआहूताः । ग्रहान्हविःपिंडान् ३० राज्ञापृष्टायजमानकर्मगुणदोषान्विविच्यतत्परिहृत्यकर्मप्रवर्तनायामंत्रिताःसदस्याऋत्विजःकिंविशेष्यमवलोक्यप्रोचुरितितत्राह नरदेवेति । इहास्मिन्जन्मनिईदृशःदृष्टोऽप्रजोऽनपत्यइति यदतः प्राक्तनंपूर्वजन्मार्जितमघंबालहत्यादिकमेकमघमस्तीत्यनुमीयते ३१ तथातस्मात्तेआत्मानंसप्रजंपुत्रेणसहवर्तमानंसादयकुरु ततोभद्रंभवति । तत्रकउपायइतितमाहुरित्याह इष्टइति ॥ ३२ ॥ किंभद्रंस्यादित्यत्राह यथेति । दिवौकसांहरेरंगोत्पन्नत्वेनतदाश्रितत्वेनस्थितेस्तन्मनस्कत्वेनतत्तुष्ट्यातत्तुष्टेःस्वभागादानानादानयोस्तदिच्छाविनाभूतत्वादधुनातदिष्टत्वात्सर्वंसमंजसंभवतीतिभावेना हुरित्याह यद्यज्ञपुरुषइति। अनेनापुत्रस्यलोकोनास्तीतिप्रायिकंसद्धर्मवतोधर्मबलाल्लोकोभवत्येव। हरीच्छयाविशिष्टपुरुषोत्पत्तयेदेवैर्हविर्नाहृतं अंगस्यापिबालहत्यादिदोषादनपत्यत्वादिकल्प्यतइतिज्ञाय

तमूचुर्विस्मितास्तातयजमानमथर्त्विजः ॥ हवींषिहूयमानानिनतेगृह्णंतिदेवताः २६ राजन्हवींष्यदुष्टानिश्रद्धयाऽऽसादितानिते ॥ छंदांस्ययातयामानि योजितानिधृतव्रतैः २७ नविदामेहदेवानांहेलनंवयमण्वपि ॥ यन्नगृह्णंतिभागान्स्वान्येदेवाःकर्मसाक्षिणः २८ ॥ मैत्रेय उवाच ॥ अंगोद्विजवचःश्रुत्वाय जमानःसुदुर्मनाः ॥ तत्प्रष्टुंव्यसृजद्वाचंसदस्यांस्तदनुज्ञया २९ नागच्छंत्याहुतादेवानगृह्णंतिग्रहानिह ॥ सदसस्पतयोब्रूतकिमवद्यंमयाकृतम् ३० ॥ स दस्याऊचुः ॥ नरदेवेहभवतोनावद्यांहिमनाक्स्थितम् ॥ अस्त्येकंप्राक्तनमघंयदिहेदृक्त्वमप्रजः ३१ तथासादयभद्रंतेआत्मानंसप्रजंनृप ॥ इष्टस्तेपुत्रकाम स्यपुत्रंदास्यतियज्ञभुक् ३१ यथास्वभागधेयानिग्रहीष्यंतिदिवौकसः ॥ यद्यज्ञपुरुषःसाक्षादपत्यायहरिर्वृतः ३३ तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामय तेजनः ॥ आराधितोयथैवैषतथापुंसांफलोदयः ३४ इतिव्यवसिताविप्रास्तस्यराज्ञःप्रजातये ॥ पुरोडाशंनिरवपन्शिपिविष्टायविष्णवे ३५ तस्मात्पुरु षउत्तस्थौहेममाल्यमलांबरः ॥ हिरण्मयेनपात्रेणसिद्धमादायपायसम् ३६ सविप्रानुमतोराजागृहीत्वांऽजलिनोदनम् ॥ अवघ्रायमुदायुक्तःप्रादा त्पत्न्याउदारधीः ३७ सातत्पुंसवनंराज्ञीप्राश्यतौपत्युरादधे ॥ ततःकालउपावृत्तेकुमारंसुषुवेऽप्रजा ३८ सबालएवपुरुषोमातामहमनुव्रतः ॥ अधर्मां शोद्भवंमृत्युंतेनाभवदधार्मिकः ३९

ते। तदुक्तं अनपत्योपिसद्धर्मालोकजिन्नात्रसंशयः देवैस्तुपृथुजन्मार्थैर्हविरंगस्यनोहृतमिति ३३ नकेवलंहरिपूजयापुत्रकामस्यपुत्रावाप्तिस्तत्तत्कामेनतत्तदवाप्तिरपिस्यादित्याह तांस्तानिति फलाकांक्षानुसा रेणपूजापिताहशीतिभावेनाहुः आराधितइति ३४ हितमुक्त्वातेतूष्णीमभूवन्किंनेत्याह इतीति प्रजातयेसंतत्यैशिपिविष्टोनामपुत्रकामेष्टिदेवताहरेरूपांतरं । अतएव शिपिविष्टस्तुखलतौदुश्चर्मणिमहेश्वर इत्यन्यवृत्तिनिवारणायविष्णवइति ३५ तस्मान्निरुप्तपुरोडाशात् ३६ अंजलिनोदनमितिपाठः ३७ पुमांसंसूतइतिपुंसवनंपायसमुपावृत्तेप्राप्ते अप्रजापुत्ररहिता ३८ बालएवकौमारवयाएव अधर्मांशेनोद्भवोयस्यसतथातंमातामहंमातुःपितरंमृत्युनामानमसुरवरमनुव्रतइतियत्तेनसपुरुषोऽधार्मिकोधर्मविरुद्धकर्मकृदभूदित्यनेनाविशेषणेनधर्मांशोद्भवोमृत्युरन्योस्तीतिरहस्यमवगंतव्यं तदुक्तं मृत्यु ३३ दैवोयमभ्रातावेनमातामहोसुरइति ३९

१ मृत्युमनुव्रत इत्यत्र मृत्युनामकंदेवतानुवृत्याऽधार्मिकत्वोक्तिरयुक्तेत्याशंक्य तात्पर्यमनुतत्त्वमाह मृत्युनामानमसुरमिति ।

SGDF Sri Gargeshwari Digital Foundation

किंनामायंबालइत्यतस्तत्कर्मानुसृतंनामलोकाअकुरुवन्नित्याह सशरासनमिति वेनयतिपीडयतीतिवेनः । पीडविनेतिचप्राहुर्वेनोसौपीडनादभूदितिवचनादसाधुर्दुर्जनः ४० आक्रीडेक्रीडास्था
ने पशुमारमितिलुप्तोपमा यथापशुमारोगोघ्नश्चंडालस्तथेति ४१ स्वशासनमुल्लंघ्यवर्तमानंपुत्रमवलोक्यपित्राकिमकारीतितत्राह तंविलक्ष्येति दुरशोभनदुःखयोरित्यनेनसुष्ठुदुःखितमनाः ॥ ४२ ॥
प्रलापात्दुःखंचावगम्यतइत्याह प्रायेणेति येगृहमेधिनोऽप्रजाएवंदुर्भरंकदपत्यकृतंदुःखंनविंदंतितैःसर्वैरपिप्रायेणदेवोनारायणोभ्यर्चितइत्यन्वयः ॥ ४३ ॥ अपकीर्त्यादिदोषहेतुत्वात्पं
डितोनरकत्राणाहेतुत्वात्साधुरयंपुत्रइतिबहुमानंनकरोतीत्याह यतइति ४४ ४५ नकेवलंदुःखमेवकदपत्यात्किंतुविवेकिनःप्रयोजनंचास्तीत्याह कदपत्यमिति क्लेशसमूहेनातुरोमर्त्योस्वगृहान्नि
र्विद्येतेतियस्माद्विद्वेषणादिशुचापदात्सदपत्यात्कदपत्यंवैराग्यहेतुत्वात्साधुमन्यइत्यन्वयः । हलंतादपिटापंचेतिवचनाच्छुचेतिरूपंसाधु ४६ नन्वत्रशोकान्मरणंदेशांतरगमनंवास्यात्तत्राकिम

सशरासनमुद्यम्यमृगयुर्वनगोचरः ॥ हंत्यसाधुर्मृगान्दीनान्वेनोसावित्यरौज्जनः ४० आक्रीडेक्रीडतोबालान्वयस्यानतिदारुणः ॥ प्रसह्यनिरनुक्रोशःपशु
मारममारयत् ४१ तंविलक्ष्यखलंपुत्रंशासनैर्विविधैर्नृपः ॥ यदानशासितुंकल्पोभृशमासीत्सुदुर्मनाः ४२ प्रायेणाभ्यर्चितोदेवोयेऽप्रजागृहमेधिनः ॥
कदपत्यभृतंदुःखंयेनविंदंतिदुर्भरम् ४३ यतःपापीयसीकीर्तिरधर्मश्चमहान्नृणाम् ॥ यतोविरोधःसर्वेषांयतआधिरनंतकः ४४ कस्तंप्रजापदेशंवैमोहं
बंधनमात्मनः ॥ पंडितोबहुमन्येतयदर्थाःक्लेशदागृहाः ४५ कदपत्यंवरंमन्येसदपत्याच्छुचापदात् ॥ निर्विद्येतगृहान्मर्त्योयत्क्लेशनिवहागृहाः ४६ एवं
सनिर्विण्णमनान्नृपोगृहान्निशीथउत्थायमहोदयोदयात् ॥ अलब्धनिद्रोनुपलक्षितोनृभिर्हित्वागतोवेनसुवंप्रसुप्ताम् ४७ विज्ञायनिर्विद्यगतंपतिंप्रजाःपु
रोहितामात्यसुहृद्गणादयः ॥ विचिक्युरुर्व्यामतिशोककातरायथानिगूढंपुरुषंकुयोगिनः ४८ अलक्षयंतःपदवींप्रजापतेर्हतोद्यमाःप्रत्युपसृत्यतेपुरीम् ॥ ऋ
षीन्समेतानभिवंद्यसाश्रवोन्यवेदयन्पौरवभर्तृविप्लवम् ४९ इतिश्रीभागवतेम०चतुर्थस्कंधेत्रयोदशोध्यायः १३ ॥ मैत्रेयउवाच ॥ भृग्वादयस्तेमुनयो
लोकानांक्षेमदर्शिनः ॥ गोप्तर्यसतिवैनृणांपश्यंतःपशुसाम्यताम् १ वीरमातरमाहूयसुनीथांब्रह्मवादिनः ॥ प्रकृत्यसंमतंवेनमभ्यर्षिंचन्पतिंभुवः २ श्रुत्वा
नृपासनगतंवेनमत्युग्रशासनम् ॥ निलिल्युर्दस्यवःसद्यःसर्पत्रस्ताइवाखवः ३

नेनाकारीतितत्राह एवंसइति महानुदयोमहतीविभूतिस्तस्याउदयउद्रेकोयस्मिंस्तत्तथातस्मात् लक्षदर्शनांकनयोरितिधातोरनुपलक्षितोऽदृष्टः ॥ ४७ ॥ जलादौमृतोदूरंगतोवेतिसंशयेतयो
रेकंनिश्चित्यकिमकार्षुस्तदीयाइतितत्राह विज्ञायेति विचिक्युरन्विष्यादृष्टवंतः हृदिगूढंपुरुषंहरिं ४८ अन्विष्यादृष्टवंतःकिमकुर्वन्नित्यतआह अलक्षयंतइति । पौरव विदुर । साश्रवःबाष्पसहिताः ।
साधीयसोविष्णुयाजिनोंगस्यैवंदुष्टपुत्रोत्पत्तिस्तन्निमित्तेनविप्लवश्चकथमभूदितीदंचोद्यं अनपत्यत्वकर्मासौबालहत्याकृतेःपुरा अतोदुष्टोभवत्पुत्रइष्टोविष्णुरतःपृथुरिति ॥ ४९ ॥ इतिश्रीभाग
वतेम०च०स्कंधेवि०टीकायांत्रयोदशोध्यायः ॥ १३ ॥ गुरुवाक्यंश्रद्धयाऽनुतिष्ठतामिहामुत्रश्रेयःस्यादकुर्वतामनर्थश्चेत्येतन्निरूप्यतेऽस्मिन्नध्याये । तत्रादौभृग्वादिऋषिभिःक्रियमाणंराज्येवेनस्या
भिषेकंवक्ति भृग्वादयइति क्षेमानामाप्तरक्षायामितियादवः पशुसाम्यतांपशुसाधर्म्यंसांकर्यं १ हेवीर प्रकृत्यास्वभावेनामात्यादिबुद्ध्याराज्यासंमतमनुचितम् २ अस्मिन्नभिषिक्तेसत्येकोगुणोराज्यस्यस्या
दित्याह श्रुत्वेति । निलिल्युर्निलीनाः ३

पालकेराज्ञिबहवोगुणाभवंतितत्रैकोगुणइतिविशिष्योच्यतइतिचेत्सत्यमस्यसर्वेदोषाएवसंतीतिवक्तुमुपक्रमते । सआरूढेति । आरूढंनृपस्थानंसिंहासनंयेनसतथा मंत्र्यमात्यदूतराज्यकोशदुर्गजनप
दपुरोहितारूयैर्वाणिमादिभिर्वाष्टविभूतिभिरुन्नद्धस्तब्धःमहत्सूत्थानाद्याचारशून्यः ४ अतोलोकस्यकिमवद्यमभूदत्राह एवंमदांधइति उत्सिक्तउद्धृत्तः ५ हेद्विजाः ६ तत्रनिग्रहानुग्रहसमर्थाः मुनयः
किमकार्षुरितितत्राह वेनस्येति सत्रिणोयज्वानः ७ उभयतस्तस्करपालयोः । दारुणीतिसप्तमीषष्ठ्यर्थे दारुणउभयतोदीप्तोवह्निः ८ दारुणइवउभयतोव्यसनंकथमत्राह अराजकइति नतस्य
राज्यस्यार्हणोयोग्योभवतीतिअतदर्हणः ९ अयमप्यस्माकमनर्थकरइत्याहुरित्याह अहेरिवेति १० युष्माभिःकथंपोषितइतितत्राह प्रकृत्येति सुनीथागर्भसंभवत्वात् अस्माभिःप्रजापा
लोनिरूपितःससांप्रतंप्रजांजिघांसतिवैहंतुमेवाकांक्षतिवै ११ तर्हिकिंक्रियतेइतितत्राह तथापीति प्रकृत्याखलत्वादस्मदुक्तंनशृणोतियद्यपितथापीति । सांत्वनेहेतुमाह । मास्मानितियुष्मत्सांत्वना

सआरूढनृपस्थानउन्नद्धोष्टविभूतिभिः ॥ अवमेनेमहाभागान्स्तब्धःसंभावितःशठः ४ एवंमदांधउत्सिक्तोनिरंकुशइवद्विपः ॥ पर्यटन्रथमास्थायकं
पयन्निवरोदसी ५ नयष्टव्यंनदातव्यंनहोतव्यंद्विजाःक्वचित् ॥ एवंन्यवारयद्धर्मंभेरीघोषेणसर्वतः ६ वेनस्यावेक्ष्यमुनयोदुर्वृत्तस्यविचेष्टितम् ॥
विमृश्यलोकव्यसनंकृपयोचुःस्मसत्रिणः ७ अहोउभयतःप्राप्तंलोकस्यव्यसनंमहत् ॥ दारुण्युभयतोदीप्तइवतस्करपालयोः ८ अराजकभयादेषकृतोरा
जाऽतदर्हणः ॥ ततोप्यासीद्भयंत्वद्यकथंस्यात्स्वस्तिदेहिनाम् ९ अहेरिवपयःपोषःपोषकस्याप्यनर्थकृत् १० वेनःप्रकृत्यैवखलःसुनीथागर्भसंभवः ॥
निरूपितःप्रजापालःसजिघांसतिवैप्रजाः ११ तथापिसांत्वयामोऽमुंमास्मांस्तत्पातकंस्पृशेत् ॥ तद्विद्वद्भिरसद्वृत्तोवेनोस्माभिःकृतोनृपः १२ सांत्वितो
यदिनोवाचंनग्रहीष्यत्यधर्मकृत् ॥ लोकधिक्कारसंदग्धंदहिष्यामःस्वतेजसा १३ एवमध्यवसायैनंमुनयोगूढमन्यवः ॥ उपव्रज्याब्रुवन्वेनंसांत्वयित्वा
थसामभिः १४ ॥ मुनयऊचुः ॥ नृपवर्यनिबोधैतद्यत्तेविज्ञापयामभोः ॥ आयुःश्रीबलकीर्तीनांतवतातविवर्धनम् १५ धर्मआचरितःपुंसांवाङ्मनःका
यबुद्धिभिः ॥ लोकान्विशोकान्वितरत्यथानंत्यमसंगिनाम् १६ सतेमाविनशेद्वीरप्रजानांक्षेमलक्षणः ॥ यस्मिन्विनष्टेनृपतिरैश्वर्यादवरोहति १७
राजन्नसाध्वमात्येभ्यश्चोरादिभ्यःप्रजानृपः ॥ रक्षन्यथाबलिंगृह्णन्निहप्रेत्यचमोदते १८ यस्यराष्ट्रेपुरेचैवभगवान्यज्ञपूरुषः ॥ इज्यतेस्वेनधर्मेणजनैर्वर्णा
श्रमात्मकैः १९ तस्यराज्ञोमहाराजभगवान्भूतभावनः ॥ परितुष्यतिविश्वात्मातिष्ठतोनिजशासने २० तस्मिंस्तुष्टेकिमप्राप्यंजगतामीश्वरेश्वरे ॥ लो
काःसपालाह्येतस्मैहरंतिबलिमादृताः २१

ग्रहणेकिंबाधकंकरिष्यंतितदशक्तौतत्सांत्वनंव्यर्थमाह तद्विद्वद्भिरिति । असद्वृत्तइति तस्यादौरात्म्यंविद्वद्भिः १२ १३ एवंजिज्ञासमानाःकालक्षेपंनाकुर्वन्नित्याह एवमिति १४ १५ आ
नंत्यंमोक्षं असंगिनांफलाभिसंधिरहितानाम् १६ सधर्मोमाविनशेत् नष्टोनस्यात् बाधकमाहुरित्याह यस्मिन्निति अवरोहति अधोयाति १७ कोसौधर्मोयोलोकान्दधातीतितत्राहुरित्याह
राजन्निति असाधवोदुर्जनाः अमात्याःसचिवास्तेभ्यः साधुस्त्रिषूचितेसौम्येसज्जनेवार्धुषौपुमानित्यभिधानं यथासादृश्ययोग्यत्ववीप्सास्वार्थानतिक्रमइतिवचनात् यथायोग्यंषष्ठांशंबलिंकरम् १८
१९ २० तत्तुष्ट्याकिंफलंस्यादित्यत्राह तस्मिन्निति २१

SGDF Sri Gargeshwari Digital Foundation

इतोपिश्रीनारायणएवेज्यतइत्याहुरित्याह । तंसर्वेति । सर्वशब्दःप्रत्येकमभिसंबध्यते सर्वान्लोकानमरान्यज्ञान्संगृह्णातीतिसर्वलोकामरयज्ञग्रहस्तं त्रय्यात्रिभिर्वेदैःप्रतिपाद्येषुमुख्यप्रतिपाद्यत्वात्त्र
यीमयस्तं सर्वद्रव्याणांभगवद्विषयत्वाद्धरिर्द्रव्यमयस्तं अनेनैवतपोमयमितिव्याख्यातं सर्वसंग्रहणाद्विष्णुःसर्वसंग्रहउच्यते वेदस्यतस्यवक्तृत्वात्प्राधान्यंतुत्रयीमयः सर्वंतद्विषयत्वेनमुख्यंसर्वमय
स्ततइतिवाक्यंचात्रमानं एवंविधंश्रीहरिंविचित्रैर्यज्ञैस्तेतवभवायभद्राययजतःस्वदेशान्स्वस्यतवदेशआदेशउपदेशोयेभ्योयज्विभ्यस्तेस्वदेशास्तान् स्वस्यदेशोविसर्जनंदानंयेषांतेतथातान्विप्रांस्त्वम
नुरोद्धुमनुकूलीकर्तुमर्हसीत्यर्थः भवोभद्रेहरेःप्राप्ताविितियादवः २२ इंद्रादिविषयेणस्वर्गादिफलप्रदेनयज्ञेनहरियजनंकथंसंगच्छतेप्रत्युततद्विघातेनानर्थएवस्यादित्याशंक्येंद्रादयोविष्णोर्मुख्यसान्निधा
नपात्रत्वेनतदिज्ययातत्प्रीत्याप्रीतायजमानाययद्यदभीष्टंतत्तद्दिशंत्यन्यथायजनेतदवज्ञयानर्थमेवप्रयच्छंतीत्याहुरित्याह यज्ञेनेति विष्णोःसन्निहितत्वात्तुसर्वेदेवाहरेःकलाइतिवचनान्मत्स्यादिवत्कला
नभवंतीतिज्ञातव्यं कलबंधनइतिधातोरात्मनिहरेःसन्निधानंबध्नंतीतिकलाइत्यर्थः २३ ऋषीणांवाक्यामृतंशिरसिवज्रपातोपममिवमन्यमानोगूढाक्षेपाभिसंधिर्वेनःप्रतिवक्तीत्याह वेनइति २४

तंसर्वलोकामरयज्ञसंग्रहंत्रयीमयंद्रव्यमयंतपोमयम् ॥ यज्ञैर्विचित्रैर्यजतोभवायतेराजन्स्वदेशाननुरोद्धुमर्हसि २२ यज्ञेनयुष्मद्विषयेद्विजातिभिर्वितायमानेनसुराःकलाहरेः ॥ स्विष्टाःसुतुष्टाःप्रदिशंतिवांछितंतद्धेलनंनार्हसिवीरचेष्टितुम् २३ ॥ वेनउवाच ॥ बालिशाबतयूयंवैअधर्मेधर्ममानिनः ॥ येवृत्तिदंपतिंहित्वाजारंपतिमुपासते २४ अवजानंतियेमूढानृपरूपिणमीश्वरम् ॥ नानुविंदंतितेभद्रमिहलोकेपरत्रच २५ कोयज्ञपुरुषोनामयत्रवोभक्तिरीदृशी ॥ भर्तृस्नेहविदूराणांयथाजारेकुयोषिताम् २६ विष्णुर्विरिंचोगिरिशइंद्रोवायुर्यमोरविः ॥ पर्जन्योधनदःसोमःक्षितिरग्निरपांपतिः २७ एतेचान्येचविबुधाःप्रभवोवरशापयोः ॥ देहेतिष्ठंतिनृपतेःसर्वदेवमयोनृपः २८ तस्मान्मांकर्मभिर्विप्रायजध्वंगतमत्सराः ॥ बलिंचमह्यंहरतमत्तोन्यःकोग्रभुक्पुमान् २९ मैत्रेयउवाच ॥ इत्थंविपर्ययमतिःपापीयानुत्पथंगतः ॥ अनुनीयमानस्तद्याच्ञांनचक्रेभ्रष्टमंगलः ३० इतितेऽसत्कृतास्तेनद्विजाःपंडितमानिना भग्नायांभव्ययाच्ञायांतस्मैविदुरचुक्रुधुः ३१ हन्यतांहन्यतामेषपापःप्रकृतिदारुणः ॥ जीवन्जगदसावाशुकुरुतेभस्मसाद्ध्रुवम् ३२ नायमर्हत्यसद्वृत्तोनरदेववरासनम् ॥ योवैयज्ञपतिंविष्णुंविनिंदत्यनपत्रपः ३३ कोवैनंपरिचक्षीतवेनमेकमृतेशुभम् ॥ प्राप्तईदृशमैश्वर्यंयदनुग्रहभाजनम् ३४

स्वबुद्ध्याबालिशत्वमुपपादयति अवजानंतीति २५ पुनरपिवेनःशापयोग्यापराधमात्मनिकर्तुंवक्ति कोयज्ञइति २६ अस्मद्भक्तिविषयोनाम्नाविष्णुःसृष्ट्यादिकारिणस्तदाज्ञानियताविरिंचादय
स्तत्परिवारभूताइतिभ्रांतिर्माभूद्यतएवैतेविष्णुप्रभृतयोमयिसन्निहिताअतस्तत्तच्छक्तिमत्त्वादहमेवाखिलोत्तमइज्यतमइत्याह विष्णुरित्यादिना २७ वरशापयोःदानेप्रभवःसर्वदेवमयइत्युपसंहारः २८
२९ किंफलितंतदाह इत्थमिति तेषामृषीणांयाच्ञाम् ३० आत्मनिशापसामर्थ्येसमुल्लसतिकर्णौपिधायनिर्याणमनुचितमितिपश्यंतःशापात्पूर्वभाविकोपायुधमृषयउदाहरन्नित्याह इतीति इ
तिशब्दःप्रकारवचनः हव्यविषययाच्ञायाम् ३१ ऊचुश्चेत्याह हन्यतामिति जीवंश्चजगद्भस्मसात्करोति ३२ ३३ निंद्यदोषेसद्भावान्निंदतीतिकिंनस्यादत्राह कोवेति निरनिष्ठोनिरवद्यइतिश्रु
तेरशुभोयमेवनिंद्यदोषाकरइतिभावः यस्यहरेरनुग्रहस्यभाजनंयस्यानुग्रहोयस्मिन्सयदनुग्रहःपुमान्सएवभाजनंवातदनुग्रहरहितत्वादयंहंतव्यइत्यर्थः अत्रक्रोधवचनयोःक्रमकारणमेकैकंदृष्ट्वाऽस्मान
यंक्षमापयेदितिबुद्ध्याकृतमितिज्ञातव्यम् ३४

SGDF

मरेत्युक्तिःश्रोतृणांश्रोत्रदुःसहेतिप्रकारांतरेणतंजघ्नुरित्याह इत्थमिति । एवंमारितोवेनःकंलोकमवापऋषीगांतन्मतदूषकत्वात् केतस्यानुष्ठातारस्तन्मतनिरासिनःपृथोश्चाक्षिप्रभावित्वादुत्सन्नप्रायामि तिचवक्तुंनयुक्तंतत्रतत्रदृश्यमानत्वादितिसर्वं अहंब्रह्मेतिवेनस्तुध्यायन्नापाधरंतमः तद्राद्धांतोमहींव्याप्तोभेर्याख्यापयतोनिशं असुराराक्षसाश्चैवपिशाचास्तत्पथिस्थिताः भूमौतत्पृथुनासर्वंनिरस्तंमाहिमा त्मना पुनःकलियुगेप्राप्तेअष्टाविंशतिमेमनोः वैवस्वतस्यसमयेजाताःक्रोधवशाभुवि ख्यापयंतिदुरात्मानोमार्गमांस्तत्पुरःसर इत्यतोत्रतुग्रंथबाहुल्यादन्यत्रविस्तृतत्वाच्चज्ञातुमनभ्यर्हितत्वाच्चनप्रपंचि तमितिज्ञातव्यं तेषांक्रोधवशानांपुरःसरोग्रगंतामुख्यइत्यर्थः ३५ वेनस्यपुत्राभावादृषीणांक्रोधात्पुरोहितस्यभीतत्वात्प्रेतकार्यमंत्रवक्त्रभावात्परंकलेवरंकिंकृतमत्राह ऋषिभिरिति विद्यायोगेनमंत्रौ षधादिविद्योपायेन शोचतीत्यनेनमातृस्वभावोदर्शितः ३६ एवंवेनंशप्त्वातपोबलादन्यमेकंराजानंचक्रुस्तद्वंश्याभावात्तूष्णीमासुः कलेवरंमुनयःकिमकुर्वन्नितिपरीक्षितःशंकांपरिहरन्नुत्तरकथाप्रसं गमाह एकदेति सरयूनाम्नोनद्याःसलिलेआप्लुताः कृतस्नानाःसतोभ्यर्हितस्यविष्णोःकथायदाचक्रुः ३७ तदामहोत्पातान्वीक्ष्याहुरित्यन्वयः किमाहुरितितत्राह अपीति अपिशब्दस्यभवेदित्यने

इत्थंव्यवसिताहंतुमृषयोरूढमन्यवः ॥ निर्जघ्नुर्हुंकृतैर्वेनंहतमच्युतनिंदया ३५ ऋषिभिःस्वाश्रमपदंगतेपुत्रकलेवरम् ॥ सुनीथापालयामासविद्यायो गेनशोचती ३६ एकदामुनयस्तेतुसरयूसलिलाप्लुताः ॥ हुत्वाग्निंसत्कथाश्चक्रुरुपविष्टाःसरित्तटे ३७ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंकरान् ॥ अप्यभद्रमनाथायादस्युभ्योनभवेद्भुवः ३८ एवंमृशत्सुऋषिषुधावतांसर्वतोदिशम् ॥ पांसुःसमुत्थितोभूमेश्चोराणांवसुलुंपताम् ३९ तदुपद्रवमाज्ञाय लोकस्यवसुलुंपताम् ॥ भर्तर्युपरतेतस्मिन्नन्योन्यंचजिघांसताम् ४० चोरप्रायंजनपदंहीनसत्त्वमराजकम् ॥ लोकान्नावारयञ्छक्ताअपितद्दोषदर्शिनः ४१ ब्राह्मणःसमदृक्शांतोदीनानांसमुपेक्षकः ॥ स्रवतेब्रह्मतस्यापिभिन्नभांडात्पयोयथा ४२

नान्वयः अनाथायाइतिहेतुगर्भविशेषणादभद्रंसंभावितमितिप्रावोचन्नित्यर्थः ३८ वसुलुंपतांचोराणांसकाशाद्भूमेःपांसुः समुत्थितइत्यन्वयः ३९ ततःकिमभूदत्राह तदुपद्रवमिति तत्तदालोकस्यचो राणामुपद्रवमाज्ञायैवनिश्चित्यमृतस्यवेनस्यमहीपतेरूरुंतरसाममंथुरित्यन्वयः ४० युष्मत्तोन्येतन्निवारकानसंतिकिमितितटस्थचोद्यंपरिहरंतीत्याह चोरप्रायमिति सत्यंतद्दोषदर्शिनोयद्यधर्मकर्तारं नवारयंतितर्हिसदोषस्तानपिस्पृशेदितिदोषंपश्यंतःकिंचशक्तास्तन्निवारणेसमर्थाअपिलोकाः लुक्प्रकाशनइतिधातोः । विशिष्टज्ञानाजनाहीनसत्त्वंपराक्रमविधुरमराजकंगजापालकरहितंजनपदंवी क्ष्यचोरान्नावारयन्नितियदतइत्यर्थः ४१ सामान्यमुक्त्वाजातिविशेषस्यदोषाधिक्यमाहुरित्याह ब्राह्मणइति ब्रह्मेतिभावप्रधानोनिर्देशः दुष्टोपद्रवेणदीनानांजनानामुपद्रवंदृष्ट्वासमुपेक्षकस्तूष्णींभूतः स्यात्तस्यब्रह्मत्वंब्राह्मण्यंस्रवतेनश्यति तन्निदर्शयंतिभिन्नेति तस्मादस्माभिरनुष्ठेयमितिभावः ४२

---

१ अत्रभगवन्निंदायाःफलंनिजघ्नुरितिप्रसिद्धहिंसैवेतिभाति । नचतद्युक्तं । भगवन्निंदयावेनोद्विजैस्तमसिपातितइतिप्रमाणेइत्याशंक्यतमःप्राप्तिलक्षणंफलमित्युक्तत्वात् । भगवन्निंदयावेनस्यसमाख्याप्रमाणेनाभि प्रायमाह ॥ अहंब्रह्मेति (टीकास्थम्)। वैवस्वतस्यसमयेएकसप्ततिमहायुगलक्षणकालविशेषेतत्राप्यष्टाविंशंकलौयुगेवैवस्वतस्यमनोर्महायुगेषुअष्टाविंशोयोमहायुगः तदन्तर्गतकलौयुगेप्राप्तेसतीत्यर्थः । पुनः येपूर्वं गंधमादनगिरौभीमेनमणिमत्पुरोगमानिहताः तएवसंकारादिरूपेणपुनर्जाताइत्यर्थः । तेननिजघ्नुरित्युक्तहननं तमःप्राप्तिरेव । हनर्हिंसागत्योरितिधातोर्गतिरेवहननम् । साचगतिस्तमसिस्थितिरूपा ॥ तथाचदैत्यह तिस्तमसिस्थिरानियतस्थितिरेवेनचान्यथेत्युक्तेरित्युक्तंभवति ॥ उक्ताख्यायिकयाचअहंब्रह्मास्मीत्युपासनाशास्त्रप्रवृत्तौवेनएवमूलभूतः । तदीयसिद्धांतानुसारेणमणिमानेवसंकराभूत्वाऽद्वैतप्रतिपादकभाष्यमकरोत् । तदनुसारेणचित्सुखादिदुरात्मानोपिपंचपादिकादिग्रंथांश्चक्रुरितिबोध्यम् ॥ ता०दी

३५

SGF
Sri Gargeshwari Digital Foundation

इतोपीत्याहुरित्याह नांगस्येति संस्थातुंनाशंप्राप्तुं कुतइत्यतउक्तं अमोघेति ४३ यथाऽमृतमंथनेकालकूटमादावुदभूदेवंतत्रापीतिभावेनाह तत्रेति तत्रमथ्यमानेसातिबाहुकोवामनः कुब्जक्षुद्रदीर्घखर्व
ह्रस्ववामनबाहुकाइत्यभिधानम् ४४ तंविशिनष्टि काकेति महाहनुःस्थूलकपोलः । निम्ननासाग्रोऽधोनतघ्राणशिराः ४५ ततोनिषीदेतिवचनात् ४६ सकइतितांविशिनष्टि । योपाहरदिति अनेनवेनश्च
तुर्धाविभक्तइतिज्ञायतइति । तथाहि तामसोराजसःसात्त्विकस्तामसतामसइति । तत्रतामसांशोनिषादः । राजसांशःस्वर्गस्यगंता । सत्त्वांशःपृथुः । तामसतामसांशोवेनःस्वयमंधंतमोगतः । तदुक्तं ।
त्र्यंशोवेनःसमुद्दिष्टःसत्त्वांशःपृथुतामगात् रजोंशश्चदिवंप्रापनिषादस्तामसोभवत् स्वयंवेनश्चतुर्थस्तुमहातमसिपातितइतिरजोंशोवेनोदिवंगतइतिकेनावगम्यतइतिचोद्यं । पापरूपीपृथग्जातो
निषादोवेनदेहतः यस्मात्तस्मात्पृथोःपुत्राद्रजोवेनोदिवंययावित्यनेनपरिहृतमिति ग्रंथांतरसिद्धत्वादत्रनविस्तृतम् ४७ अथसत्वांशात्पृथोरुत्पत्तिंवक्ति अथेति ४८ ४९ एषविष्णोःकलेतिलिं
गव्यत्ययेन मत्स्यादिवत्साक्षाद्धरेरंशतावचः साक्षादंशानायंकिंतुविशेषावेशात्तदंशइतिवचनमितिध्वनयति तदुक्तं पृथुहैहयादयोजीवास्तेष्वाविष्टोहरिःस्वयं विशेषावेशतस्तेषुसाक्षाद्धर्यंशतावचः किं
स्तुमन्व्यासऋषभकपिलामत्स्यपूर्वकाः आकूतिजैतरेयौचधर्मजत्रयमेवच धन्वंतरिर्हयग्रीवोदत्तात्रेयश्चतापसः स्वयंनारायणस्त्वेतेनाणुमात्रविभेदिनः बलतोरूपतश्चैवगुणैरपिकथंचनेति इयंचलक्ष्मीःसं

नांगस्यवंशोराजर्षेरेषसंस्थातुमर्हति ॥ अमोघवीर्याहिनृपावंशोस्मिन्केशवाश्रयाः ४३ विनिश्चित्यैवमृषयोविपन्नस्यमहीपतेः ॥ ममंथुरूरुंतरसातत्रासी
द्वाहुकोनरः ४४ काककृष्णोतिह्रस्वांगोह्रस्वबाहुर्महाहनुः ॥ ह्रस्वपान्निम्ननासाग्रोरक्ताक्षस्ताम्रमूर्धजः ४५ तंतुतेऽवनतंदृष्ट्वाकिंकरोमीतिवादिनम् ॥
निषीदेत्यब्रुवंस्तातसनिषादस्ततोभवत् ४६ तस्यवंश्यास्तुनैषादागिरिकाननगोचराः ॥ योपाहरज्जायमानोवेनकल्मषमुल्बणम् ४७ ॥ मैत्रेयउवाच ॥
अथतस्यपुनर्विप्रैर्विपन्नस्यमहीपतेः ॥ बाहुभ्यांमथ्यमानाभ्यांमिथुनंसमपद्यत ४८ तद्दृष्ट्वामिथुनंजातमृषयोब्रह्मवादिनः ॥ ऊचुःपरमसंतुष्टाविदित्वाभ
गवत्कलाम् ४९ ॥ ऋषयऊचुः ॥ एषविष्णोर्भगवतःकलाभुवनपावनी ॥ इयंचलक्ष्मीःसंभूतिःपुरुषस्यानपायिनी ५० ॥ इतिश्रीभागवतेम०चतुर्थ
स्कंधेचतुर्दशोध्यायः १४ ॥ ॥ छ ॥ ॥ विप्राऊचुः ॥ अत्रतुप्रथमोराज्ञांपुमान्प्रथयितायशः ॥ पृथुर्नाममहाराज ।भविष्यतिपृथुश्रवाः १

भूतिरितिविशेषणात् पृथुरपिहरेःसाक्षादंशइतरथास्यतत्पतित्वायोगादितिबुद्धिव्यामोहोनकर्तव्यः तत्रसन्निहिताश्रीश्चयत्रसन्निहितोहरिः नास्यसन्निधिमात्रेणरमापत्नीत्वमाव्रजेत् साक्षादेवतुसाक्षाच्च
हरेःसन्निधितःक्वचित् गोप्यादिरूपाभवतिविपरीतंनतुक्कचिदितिनिर्णायकवचनात् पुरुषोधातुःपुनीपुनाद्धपुंस्त्वात्मपरमात्मनोरित्यभिधानात् प्रकरणबलाच्च पुरुषंपरमात्मानमपहायनातिष्ठतीत्यभि
प्रायेणोक्तंपुरुषस्यानपायिनीति लक्ष्मीविशेषणवतीकापिरमणीभर्तृवियोगशून्याजातेतितात्पर्यमिति ५० ॥ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेविजयध्वजकृतटीकायांचतुर्दशोऽध्यायः ॥ १४ ॥
श्रीनारायणचरणारविंदमकरंदनिषेविणांमहतांपुरुषाणामिहामुत्रानभिमताअपिभगवदिच्छयासकलाःसंपदोभवंतीतिनिरूप्यतेस्मिन्नध्यायेपृथुकथाकथनव्याजेन तत्रादौविप्राणांपृथुप्रशंसाप्रकारंवक्ति
अत्रेतितुशब्देनभेदवादिनापृथोर्हरेश्चमहान्भेदोस्तीतिसूच्यते एतदर्थद्योतकप्रमाणसद्भावात्तथाह्युक्तं ब्रह्मण्यनंतेगरुडेरुद्रेकामेशचीपतौ अनिरुद्धेमनौचैवपृथौचकृतवीर्यजे । नारदेचैवमाद्येषुविशेषा
त्सन्निधिर्हरेः । सुदर्शनादिष्वस्त्रेषुतथासन्निहितोहरिः नरलक्ष्मणौबलश्चैवशेषस्यांशाःप्रकीर्तिताः । तथाभरतशत्रुघ्नौशंखचक्रावुदाहृतौ प्रद्युम्नश्चकुमारश्चस्कंदःकामांशकाःस्मृताइति । वैन्येपृथौसन्नि

१ ममन्थुरित्यादिना तामसबाहुकोत्पत्तिरचेतनाद्देहात् कथं? तथाच मथ्यमानाभ्यां बाहुभ्यां मिथुनोत्पत्तिः कथं? तथाच भगवन्निंदयावेनोद्विजैर्ब्रह्मासिपातित इत्युक्त्यातत्तामसदेहात्सात्त्विकोत्पत्तेरयुक्त्वा
त्तदुत्पत्तिः कथम्? अतआह अनेनेति ।

हितोराजरूपीजनार्दनइतिविशेषवचनेनायंवैन्यःपृथुःश्रीनारायणांशःअन्यस्तथाकश्चित्पृथुनामातत्रोच्यतइतिशंकानिर्मूलितेतिज्ञातव्यं अत्रास्मिन्वर्षेराज्ञांगणनसमयेप्रथमः । कथं यतोयशःप्रथयि
ता अतःप्रथयितृत्वात्पृथुर्नाममहाराजेत्यत्रटच्प्रत्ययाभावस्तेभ्योवैशिष्ट्यद्योतनार्थः १ सुदतीशोभमानदंता । अर्चिर्नामगुणैरर्चितत्वाद्भूषणैर्ज्वलितत्वात्अर्चिर्भाज्वालेत्यभिधानं वरोवरणीयआरो
होनितंबोयस्याःसातथोक्ता अवरुंधतीपतित्वेनस्वीकुर्वाणाभविष्यतीत्यर्थः २ एषपृथुःसाक्षाद्धरेःश्रीनारायणस्यांशइति सप्तसुप्रथमेतिसूत्रादंशस्यसन्निधानस्यमुख्यंपात्रंलोकरिरक्षयाजनरक्षणे
च्छया यद्वाप्रत्यक्षसदृशोःसाक्षादित्यभिधानाद्धरेः साक्षादंशःपृथोर्याजातिस्तज्जातिसदृशजातिरूपेणसन्निहितइत्यर्थः तदुक्तं राजरूपीजनार्दनइति यतोहरेःपृथौसान्निधानविशेषात्तदंशत्ववत्स्माच्छ्रि
योपितथावचनमित्यस्मिन्नर्थेहिशब्दः हिर्हेतावववधारणइतियादवः अवधारणार्थत्वे उक्तस्मृतिविरोधः ३ गंधर्वप्रवरादयस्तत्राद्विजप्रशंसासमयेगानादिकंचक्रुरित्यन्वयः ४ ५ तत्रदेवाश्चि

इयंचदेवीसुदतीगुणभूषणभूषिता ॥ अर्चिर्नामवरारोहापृथुमेवावरुंधती २ एषसाक्षाद्धरेरंशोजातोलोकरिरक्षया ॥ इयंचतत्पराहिश्रीरनुजज्ञेऽनपायि
नी ३ ॥ मैत्रेयउवाच ॥ प्रशंसंतिस्मतंविप्रागंधर्वप्रमुखाजगुः ॥ मुमुचुःसुमनोधाराःसिद्धानृत्यंतिसास्त्रियः ४ शंखतूर्यमृदंगाद्यानेदुर्दुंदुभयोदिवि
तत्रसर्वउपाजग्मुर्देवर्षिपितृणांगणाः ५ ब्रह्माजगद्गुरुर्देवःसहागत्यसुरेश्वरैः ॥ वैन्यस्यदक्षिणेहस्तेदृष्ट्वाचिह्नंगदाभृतः ६ पादयोररविंदंचतस्मिन्मे
नेहरेःकलाम् ॥ यस्याप्रतिहतंचक्रमंशस्यपरमेष्ठिनः ७ तस्याभिषेकआरब्धोब्राह्मणैर्ब्रह्मवादिभिः ॥ आभिषेचनिकान्यस्मैआजह्रुःसर्वतोजनाः ८
सरित्समुद्रागिरयोनागागावःखगामृगाः ॥ द्यौःक्षितिःसर्वभूतानिसमाजह्रुरुपायनम् ९ सोभिषिक्तोमहाराजःसुवासाःसाध्वलंकृतः ॥ पत्न्यार्चिषालं
कृतयाविरेजेग्निरिवापरः १० तस्मैजहारधनदोहैमंवीरवरासनम् ॥ वरुणःसलिलस्रावमातपत्रंशशिप्रभम् ११ वायुश्चवालव्यजनेधर्मःकीर्तिमयीं
स्रजम् ॥ इंद्रःकिरीटमुत्कृष्टंदंडंसंयमनंयमः १२ ब्रह्माब्रह्ममयंवर्मभारतीहारमुत्तमम् ॥ हरिःसुदर्शनंचक्रंतत्पत्न्यव्याहतांश्रियम् १३ दशचंद्रमसिंरुद्रः
शतचंद्रंतथांबिका ॥ सोमोमृतमयानश्वांस्त्वष्टारूपाश्रयंरथम् १४ अग्निराजवगंचापंसूर्योरश्मिमयानिषून् ॥ भूःपादुकेयोगमयेद्यौःपुष्पबलिमन्व
हम् १५ नाट्यंसुगीतंवादित्रमंतर्धानंचखेचराः ॥ ऋषयश्चाशिषःसत्याःसमुद्रःशंखमात्मजम् १६ सिंधवःपर्वतानद्योरथवीथीर्महात्मनः ॥ सूतोथ
मागधोबंदीसंस्तोतुमुपतस्थिरे १७ स्तावकांस्तानभिप्रेत्यपृथुर्वैन्यःप्रतापवान् ॥ मेघनिर्ह्रादयावाचाप्रहसन्निदमब्रवीत् १८

शिनाष्टि मेनेति तस्मिन्पृथौसन्निहितांहरेःकलांमेनइत्यन्वयः ६ ७ एवंप्रशस्यब्राह्मणैःकिमकारीतितत्राह तस्येति अभिषेकसाधनानि स्वयंसंपादितानिकिंवान्यैरित्यतआह आभिषेचनि
कानीति ८ तत्रोपायनानिकआजह्रुरितितत्राह सरिदिति ९ १० नकेवलंसरिदादयउपायनंददुःकिंत्वन्येलोकपालादयोपीत्याह तस्माइति ११ १२ तस्यहरेःपत्नीलक्ष्मीः १३ नाम्नादश
चंद्रंखड्गं त्वष्टाविश्वकर्मा रूपाश्रयंरथं १४ योगमयेऽणिमादियोगसाधने १५ अंतर्धानमदृश्यतां आत्मजमात्मनोजातं १६ रथवीथीरथमार्गान् । यथात्मविद्यंराजानिषेवणीयइतिभावेनसू
तादीनामुपस्थानप्रकारंवक्ति सूतोथेति १७ पृथोर्निरहंकारत्वप्रकटनायवक्ति स्तावकानिति मेघनिह्रादवत्मेघध्वनिवत्ध्वनिर्यस्याःसातथातया १८

SGDF Sri Gargeshwari Digital Foundation

हेसूताद्याःयोज्यतांस्तुतिंप्रयुंजतांवोयुष्माकमेषःस्तवोमेकिमाश्रयःकंगुणमाश्रित्यवर्तमानःस्यादित्यन्वयः तवशौर्यादिगुणमाश्रित्यवर्ततइतितत्राह लोकइति अस्पष्टगुणस्याप्रकाशितपराक्रमादि
गुणस्य यद्वा यद्यहंप्रख्यातगुणःस्यांतर्ह्येषवःस्तवोयोज्यतां । नचतथा तस्मात्किमाश्रयोयोज्यते यतएवमतोवोमयिप्रयुक्तागिरोवितथामाभूवन्नित्यन्वयः १९ किमिदानींफलितमत्राह तस्मा
दिति यस्मादिदानीमनाविष्कृतगुणावयंतस्मादीड्यवाचोयूयंपरोक्षेकालांतरेकृतविक्रमानंतरमस्मदुपाश्रितान्यस्मद्विषयाणिकर्माण्याश्रित्यालमत्यर्थंस्तोत्रंकरिष्यथेत्यन्वयः यद्वा कथंकारंचेदंवित
थाःस्युरस्मद्गिरइतितत्राह तस्मादिति यतोवयमप्रकाशितगुणास्तत्रप्रवर्तमानाविषयाणामसत्त्वाद्वैतथ्यमालभंते तस्मात्तद्दोषपरिहारार्थमस्मदपरोक्षेचास्मन्निकटेस्मदूरप्रदेशेवर्तमानोयोहरिस्तस्ये
ड्यवाचोहरेराश्रितानिचरितान्यंगीकृत्यस्तोत्रमलंकरिष्यथभूषितंकुर्वंतु अन्यथादूषितमेवस्यादतस्तस्यगुणानांनित्यत्वात्तद्विषयायुष्मद्गिरःसफलाःस्युः अविद्यमानकथकाबंदिनःपरिकीर्तिताइति
युष्मद्दोषोपिपरिहृतःस्यादिति भाविनोगुणान्समूह्यस्तुमइतितत्राह सतीति उत्तमश्लोकगुणानामनुवादेसत्यभ्यर्हितेपिसभ्याआत्मस्तवनंजुगुप्सितमितिनस्तावयंति आत्मप्रशंसामरणमितिस्मृतेः
२० वयंतत्रतत्रवंप्रभुंस्तुत्वाततःफलंलभामहेतत्कथमित्याशंक्यतन्मूर्खविषयंनविद्वद्विषयमित्याशयेनाह महद्गुणानिति अनभिव्यक्तत्वेनबाल्येऽसतोऽविद्यमानानपिमहतांपृथिव्यादीनांक्षमादिगुणानात्म

पृथुरुवाच ॥ हेसूतहेमागधसौम्यबंदिन्लोकेऽधुनाऽस्पष्टगुणस्यमेस्यात् ॥ किमाश्रयोमेस्तवएषयोज्यतांमामय्यभूवन्वितथागिरोवः १९ तस्मात्परो
क्षेऽस्मदुपाश्रितान्यलंकरिष्यथस्तोत्रमपीड्यवाचः ॥ सत्युत्तमश्लोकगुणानुवादेजुगुप्सितंनस्तवयंतिसभ्याः २० महद्गुणानात्मनिकर्तुमिच्छन्कस्ता
वकैःस्तावयतेसतोपि ॥ तेस्यभविष्यन्निति विप्रलब्धोजनापहासंकुमतिर्नवेद २१ प्रभवोह्यात्मनस्तोत्रंजुगुप्संत्यपिविश्रुताः ॥ ह्रीमंतःपरमोदाराःपौरुषं
वाविगर्हितम् २२ वयंत्वविदितालोकेसूताद्यापिवरीमभिः ॥ कर्मभिःकथमात्मानंगापयिष्यामबालवत् २३ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधे
पंचदशोध्यायः ॥ १५ ॥ मैत्रेयउवाच ॥ इतिब्रुवाणंनृपतिंगायकामुनिचोदिताः ॥ तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया १

निकर्तुमिच्छन्प्रकाशयितुकामःकोविद्वांस्तावकैर्भवादृशैःस्तावयतेनकोपीत्यन्वयः कथंतन्मूर्खविषयमभूदितितत्राह सवाइति यद्वा यदुक्तंहरिविषयंस्तोत्रमलंकरिष्यथेति तद्गुणसंदृब्धंस्तोत्रंनिर्गुणेह
रौकथंसंगच्छतेतथात्वेवास्मद्गिरांवैतथ्यंसुलभंस्यादितितत्राह । सतीति उत्तमश्लोकस्यहरेर्गुणानामनुवादेसतिस्तोतॄणांपापहरत्वेनप्रशस्ते । सभ्याःपंडिताःविण्मूत्रपूर्णमदुपैतिकान्येति जुगुप्सि
तमात्मानंनस्तावयंतीत्यन्वयःसभ्येष्वेकोपितथाविधःकिंनस्यादितिशंकमानोमूर्खएवेतिभावेनाह महद्गुणानिति आत्मन्यसतोमहतोअणोरणीयान्महतोमहीयानितिश्रुतिसिद्धस्यहरेर्गुणानौदार्यादि
कानात्मनिकर्तुमिच्छन्स्तावकैःकोविद्वान्स्तावयते अपिपदेनोक्तंजुगुप्सितमित्यनुकर्षति । किमित्याक्षेपइत्यतोलोकापवादविषयत्वादित्याशयेनाह सवाइति २१ सद्गुणाःप्रभवोप्यात्मस्तुतिंजुगुप्सं
तेकिमुतवयमितिभावेनाह प्रभवोपीति विद्यमानगुणसंदृब्धस्तोत्रंप्रत्यक्षप्रमितंपारमार्थिकंपौरुषमपिनिंदंतीत्यर्थः २२ वरीमभिर्वरणीयैःश्रेष्ठैरित्यर्थः २३ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेवि
जयध्वजकृतटीकायांपंचदशोध्यायः ॥ १५ ॥ ७ ॥ पृथुस्तुतिव्याजेनहरौभक्तावतारार्थंतन्माहात्म्यंनिरूप्यते अस्मिन्नध्याये नन्वत्रसूतादयःस्तुतौपृथुनानिवारिताअन्येकेस्तोतारोयेनवत्तः
स्तुत्याहरौभक्तिरवतार्यतइत्याशंक्यमुनिप्रेरितास्तएवतुष्टुवुरितितत्स्तुतिप्रकारमुपक्रमते इतिब्रुवाणमित्यादिना १

वयंस्तोष्यामइतिप्रारंभएवश्रेयान्नतुतत्रसमर्थाइत्याहुरित्याह नालमिति अलंसमर्थाःपृथुसन्निहितश्रीहरिमहिमसंदृब्धत्वादितिभावेनोच्यते यइति योदेवदेवःश्रीनारायणोमाययाभक्तानुकंपेच्छयावत तार तस्य वेनांगजंवेनस्यांगादवयवाज्जन्म । अतस्यअतसातत्यगमनइतिधातोर्विशेषसन्निहितत्वेनप्राप्तस्य । तेत्वयिस्थितस्यहरेःपौरुषाणिवर्णयितुंवाचस्पतीनांब्रह्मादीनामपिधियोबभ्रमुरितियस्मा त्तस्माद्वयंनसमर्थाइतिकिमुवर्णनीयं चशब्दःकैमुत्यार्थः अन्यत्रदेवोहरिस्तस्यदेवोदेवनंक्रीडनंयस्मिन्पृथौसदेवदेवःपृथुः माययाभगवदिच्छोद्बोधितमुनीच्छयावततार प्रकाशितोभूत्तस्यतेवेनस्यांगाद वयवाज्जातस्यपौरुषाणिकथयितुंवाचस्पतीनांकवीनांधियोबभ्रमुरितियदतइति धीशब्देनमनोलक्ष्यते मनसावाअग्रेसंकल्पयत्यथवाचाव्याहरतीतिश्रुतेः वाचोभ्रमंतीतिकिमुवक्तव्यमित्यर्थः २ त र्हिनिवर्ततामित्याहुरित्याह अथापीति असमर्थाअपिकथामृतादृतत्वान्निवर्तितुंमनोनायातीत्यर्थः तर्हिकिंनुकुर्वंतीतितत्राहुरित्याह यथोपदेशमिति साकल्येनस्तवनाशक्तौनिवर्तनंपरमित्यतउक्तं मुनिभिरिति आज्ञोल्लंघनभीरुत्वाद्वितन्महेप्रपंचयामः ३ किंगुणविशिष्टःप्रपंचइत्यत्रोच्यते एषइति तत्परिपंथिनांतस्यधर्मसेतोर्विरोधिनां ४ एषपृथौसन्निहितोहरिस्तनौस्वदेहेतनूःशक्तिलक्षणा

सूतउवाच ॥ नालंवयंतेमहिमानुवर्णनेयोदेवदेवोऽवततारमायया ॥ वेनांगजातस्यचपौरुषाणितेवाचस्पतीनामपिबभ्रमुर्धियः २ अथाप्युदारश्रवसः पृथोर्हरेःकलावतारस्यकथामृतादृताः ॥ यथोपदेशंमुनिभिःप्रचोदिताःश्लाघ्यानिकर्माणिवयंवितन्महे ३ एषधर्मभृतांश्रेष्ठोलोकंधर्मेनुवर्तयन् ॥ गोप्ता चधर्मसेतूनांशास्तातत्परिपंथिनाम् ४ एषवैलोकपालानांबिभर्त्येकस्तनौतनूः ॥ कालेकालेयथाभागंलोकयोरुभयोर्हितम् ५ वसुकालउपादत्तेकालेचा यंविमुंचति ॥ समःसर्वेषुभूतेषुप्रतपन्सूर्यवद्विभुः ६ तितिक्षत्यक्रमंवैन्यउपर्याक्रमतामपि ॥ भूतानांकरुणःशश्वदार्तानांक्षितिवृत्तिमान् ७ देवेवर्षत्य सौदेवोनरदेववपुर्हरिः ॥ कृच्छ्रप्राणाःप्रजाह्येषरक्षिष्यत्यंजसेंद्रवत् ८ आप्याययत्यसौलोकंवदनामृतमूर्तिना ॥ सानुरागावलोकेनविशदस्मितचा रुणा ९ अव्यक्तवर्त्मैषविशुद्धकार्योगंभीरचेताउपगुप्तवित्तः ॥ अनंतमाहात्म्यगुणैकधामापृथुःप्रचेताइवसंवृतात्मा १० दुरासदोदुर्विषहआसन्नोपिविदू रवत् ॥ नैवाभिभवितुंशक्योवेनारण्युत्थितोनलः ११

मूर्तीःयथाभागंबिभर्ति ५ भरणप्रकारंदर्शयति वस्वित्यादिना वसुर्हिदेग्नौयोत्क्रंशेवसुतोयेमहाधनइत्यभिधानात् यथासंभवंयोज्यं करादानकालेवसुधनमुपादत्तेदुर्भिक्षादौदानयोग्यपुरुषागमनकालेवि मुंचति सूर्योपिग्रीष्मादिकालेवसुजलमुपादत्तेवर्षादौमुंचति समोयथायोग्यंदंडचादिषुप्रतपत्प्रतापंकुर्वन्नन्यत्रयथर्तुप्रतपन् ६ उपर्याक्रमतामात्मानमतिक्रम्यवर्तमानानांसतामक्रममपराधंतितिक्षतिसहते दारिद्र्येणार्तानांक्षितिवृत्तिमान्भूमिलक्षणवृत्तिदाता भूमार्थेमतुबर्थः ७ देवेऽवर्षतिअनावृष्टौसत्यांबुभुक्षयाकृच्छ्रप्राणाःक्लिष्टेंद्रियचेष्टाःप्रजारक्षिष्यतीत्यन्वयः ८ वदनामृतमूर्तिनामुखचंद्रेण ९ अ
व्यक्तंसूक्ष्मंवर्त्मचारैःप्रवेशमार्गोयस्यसतथा अव्यक्तानांयोगिनांवर्त्मयस्येतिवा नितरांशुद्धंकार्यंकर्तव्यंयस्य । उपगुप्तवित्तःसुरक्षितकोशःसुरक्षितयशावा । वित्तंयशोधनंवित्तोविद्वान्विश्रुतएवचे त्यभिधानं । अनंतानांमाहात्म्यगुणानामेकंधामाश्रयोयस्यसतथा । अनंतमाहात्म्यगुणाएवैकंधामयस्यसतथावा । अन्यत्रशेषस्यमाहात्म्यगुणैकधामा संवृतआत्मास्वरूपंयस्यसतथा १० अ ग्नेःशक्तिसन्निधानस्वभावमाह दुरासदइति ११

SGDF
Sri Gargeshwari Digital Foundation

वायुसन्निधानफलमाह अंतर्बहिरिति अंतश्चारणैःश्वाससंचारैर्बहिश्चारिगूढपुरुषैः प्रेमलंबनत्वाद्देहिनामात्मा । वायुस्तुप्राणरूपेणोदासीनउपरिस्थितोधोवर्तमानंसर्वमीक्षतेयथा तथायमप्यध्यक्षः स
र्वस्मादुपरिवर्तमानावक्षौयस्येतिवाध्यक्षःपरितोवर्तमानंजानातितथेतिवा ॥ १२ ॥ आत्मद्विषामात्मशत्रूणांसुतमप्यदंड्यंनदंडयतिदंड्यंतमात्मजमपिदंडयति । तत्रनिमित्तमाह धर्मपथइति
अनेनधर्मराजसन्निधानफलमुक्तंभवति १३ परमेष्ठ्यंशसन्निधानफलमाह अस्येति आमानसाचलान्मानसपर्वतपर्यंतमंतरंगोगणैराश्मिगणैः १४ चंद्रगुणसन्निधानफलमाह रंजयिष्यती
ति यद्यस्मादस्मात् १५ संधोऽवधौप्रतिज्ञायामितियादवः १६ १७ आनंदवर्धनः आनंदवृद्धिकरः मुक्तसंगैःपरमहंसैःप्रसंगोयस्यसतथा पूर्वध्वनितमर्थंस्पष्टयति दंडपाणिरिति ।
॥ १८ ॥ १९ ॥ उक्तमिदंसर्वंश्रीनारायणसन्निधानफलमित्यभिप्रेत्याह अयंत्विति तुशब्दएवार्थे अस्मिन्पृथौकलयावतीर्णःसन्निहितः साक्षाद्भगवांस्तुऋष्याद्यन्यतमोनस्यात्किंतुनारायण

अंतर्बहिश्चभूतानांपश्यन्कर्माणिचारणैः ॥ उदासीनइवाध्यक्षोवायुरात्मेवदेहिनाम् १२ नादंड्यंदंडयत्येषसुतमात्मद्विषामपि ॥ दंडयत्यात्मजमपिदंड्यं
धर्मपथेस्थितः १३ अस्याप्रतिहतंचक्रंपृथोरामानसाचलात् ॥ वर्ततेभगवानर्कोयावत्तपतिगोगणैः १४ रंजयिष्यतियल्लोकमयमात्मविचेष्टितैः ॥
अथामुमाहूराजानंमनोरंजनकैःप्रजाः १५ दृढव्रतःसत्यसंधोब्रह्मण्योवृद्धसेवकः ॥ शरण्यःसर्वभूतानामानंदोदीनवत्सलः १६ मातृभक्तिःपरस्त्रीषुपत्न्याः
स्मरइवापरः ॥ प्रजासुपितृवत्स्निग्धःकिंकरोब्रह्मवादिनाम् १७ देहिनामात्मवत्प्रेष्ठःसुहृदानंदवर्धनः ॥ मुक्तसंगप्रसंगोयंदंडपाणिरसाधुषु ॥ १८ ॥
एषदोग्धामहीवीरोगांसतीमोजसौषधीः ॥ समांकरिष्यतेचेमांधनुःकोट्यासमंततः १९ अयंतुसाक्षाद्भगवांस्त्र्यधीशःकूटस्थआत्माकलयावतीर्णः॥ यस्मि
न्नविद्यारचितंनिरर्थकंपश्यंतिनानात्वमिवप्रतीतम् २० अयंभुवोमंडलमोदयाद्रेर्गोप्तैकवीरोनरदेवनाथः ॥ आस्थायजैत्रंरथमात्तचापःपर्यस्यतेदक्षिणतोय
थार्कः २१ तस्मैनृपालाःकिलतत्रतत्रबलिंहरिष्यंतिसलोकपालाः ॥ मंस्यंतिएषांस्त्रियआदिराजंचक्रायुधंतद्यशउद्धरंत्यः २२ अयंमहींगांदुदुहेधिराजः
प्रजापतिर्वृत्तिकरःप्रजानाम् ॥ योलीलयाद्रीन्स्वशरासकोट्याभिंदन्समांगामकरोद्यथेंद्रः २३ विस्फूर्जयन्नाजगवंधनुःस्वयंयदाचरत्क्ष्मामविषह्यआजौ
तदानिलिल्युर्दिशिदिश्यसंतोलांगूलमुद्यम्ययथामृगेंद्रः २४

एवंत्वितिहेतुगर्भविशेषणद्वयमाह त्र्यधीशइति त्रयाणामीशाइंद्रादयस्तेषामप्यधिकत्वेनेशः । स्यादध्याधिकईश्वरइतियादवः । चेतनाचेतनकूटेतिष्ठतीतिकूटस्थः । स्थानदोषत्वेनलेपनमस्यनास्ती
त्यतउक्तमात्मेति । गुणपूर्णत्वादात्मा । तर्हिस्थानभेदान्नानात्वमायातमत्रोच्यते यस्मिन्निति यल्लोकेनिरर्थकंतद्यस्मिन्हरौप्रतीतमविद्ययाहरीच्छयारचितंकल्पितंनानात्वमिवयथापश्यंति । एतदुक्तं
भवति यंल्लोकेखपुष्पादिकमविद्यमानंतन्मत्स्यादिभगवद्रूपेषुप्रतीतंनानात्वंयथामिथ्याभूतंपश्यंतियोगिनस्तथेति तदुक्तं यल्लोकेनिरर्थकंतद्भगवद्रूपेषुप्रतीतनानात्वदृष्टांतेनपश्यंतिसंतः मत्स्यरूपा
दिनानात्वदृष्टवद्यन्निरर्थकमितिपाद्मे एवंधर्मान्पृथक्पश्यन्निितिच अनेनतद्धर्माणमपिपृथक्त्वदर्शनेनानर्थइत्युक्तंभवति २० राज्यावधिमाहुरित्याह अयमिति ओदयाद्रेरुदयपर्वतपर्यंतं । पर्य
स्यतेपर्यटति २१ अन्येषुराजसुसत्सुअस्याधिराज्यंकथमित्याशंक्यचक्रवर्तित्वाद्युच्यतइतिउच्यते तस्माइति २२ कीदृशंयशउद्धरंत्यइत्यत्राह अयंमहीमिति २३ निलिल्युर्निलीनाः लांगूलंपुच्छम् २४

१ अत्रयस्मिन्परब्रह्मणिअविद्यारचितं अनिर्वचनीयाविद्याकल्पितंविश्वं । प्रतीतंभ्रांतिप्रतीतिसिद्धंयन्नानात्वमिवभेदमिवनिरर्थकंमिथ्याभूतंपश्यंतिल्यन्यथाप्रतीतेर्यथावद्व्याचष्टे यदिति दी०

SGDF
Sri Gargeshwari Devi Foundation

अहार्षीदित्यनेनास्यप्रतिभटःशतमखएवनान्यइतिद्योतनायकथितमितिज्ञातव्यं चरमेअंत्येश्वमेधेवर्तमानेसति २५ यतोज्ञानात्परंब्रह्मप्रत्यक्षंभवतियोगिनः २६ तद्भविष्यत्कथाऽतीतत्वेनकथं
कथ्यतइत्यत्रोच्यते तत्रेति आत्माश्रिताःस्वविषयास्त्रिभिःषड्भिश्चरणैरुपलक्षितायशोनिबंधाः २७ अप्रतिरुद्धचक्रोऽप्रतिहताज्ञो भविताभविष्यतीत्युपसंहरते २८ ॥ ॥ इतिश्रीभागवतेचतु
३८ र्थस्कंधेषोडशोध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ अस्मिन्नध्यायेसूतादिभिःश्रीहरिमहिमोपनिबद्धत्वेनपृथोर्महिम्न उक्तत्वात्तन्माहात्म्यमेवोच्यते तत्रादौसूतादितृप्तिकरणप्रकारमाह एवंभगवा
नित्यादिना छंदयामासतोषयामास १ राज्ञासमानवयसःश्रेणयस्त्वंगरक्षकाइत्यभिधानाच्छ्रेणयोंगरक्षकाः २ विदुरःसूतादिभिःसूचितंगोदोहनादिपृथुविक्रमंविस्तरतःश्रोतुंलोकोपकारायपृच्छति १७

एषोश्वमेधाञ्छतमाजहारसरस्वतीप्रादुरभूद्वियत्र ॥ अहार्षीद्यस्यहयंपुरंदरःशतक्रतुश्चरमेवर्तमाने २५ एषस्वसद्मोपवनेसमेत्यसनत्कुमारंभगवंतमेकम्
॥ आराध्यभक्त्यालभतामलंतद्ज्ञानंयतोब्रह्मपरंवदंति २६ तत्रतत्रगिरस्तास्ताइतिविश्रुतविक्रमः ॥ श्रोष्यत्यात्माश्रितागाथाःपृथुःपृथुपराक्रमः २७
दिशोविजित्याप्रतिरुद्धचक्रःस्वतेजसोत्पाटितलोकशल्यः ॥ एवंसुरेंद्रैरनुगीयमानोमहानुभावोभवितापतिर्भुवः २८ इतिश्रीभागवतेमहापुराणे
चतुर्थस्कंधेपृथ्वाख्यानेषोडशोध्यायः १६ मैत्रेयउवाच ॥ एवंसभगवान्वैन्यःख्यापितोगुणकर्मभिः ॥ छंदयामासतान्कामैःप्रतिपूज्याभिनंद्यच
१ ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः ॥ पौरान्जानपदान्श्रेणीःप्रकृतीःसमपूजयत् २ ॥ विदुरउवाच ॥ कस्माद्दधारगोरूपंधरित्रीबहुरूपिणी ॥
यांदुदोहपृथुस्तत्रकोवत्सोदोहनंचकिम् ॥३ प्रकृत्याविषमादेवीकृतातेनसमाकथम् ॥ तस्यमेध्यंहयंदेवःकस्यहेतोरपाहरत् ४ सनत्कुमाराद्भगवतोब्र
ह्मन्ब्रह्मविदुत्तमात् ॥ लब्ध्वाज्ञानंसविज्ञानंराजर्षिःकांगतिंगतः ५ यच्चान्यदपिकृष्णस्यब्रह्मन्भगवतःप्रभोः ॥ श्रवःसुश्रवसःपुण्यंपूर्वदेहकथाश्रयम्
६ भक्तायमेऽनुरक्तायतवचाधोक्षजस्यच ॥ वक्तुमर्हसियोऽदुह्यद्वैन्यरूपेणगामिमाम् ७ श्रीशुकउवाच ॥ चोदितोविदुरेणैवंवासुदेवकथांप्रति ॥ प्रशस्य
तंप्रीतमनामैत्रेयःप्रत्यभाषत ८ मैत्रेयउवाच ॥ यदाभिषिक्तःपृथुरंगविप्रैरामंत्रितोजनतायाश्चपालः ॥ प्रजानिरन्नेक्षितिपृष्ठएत्यक्षुत्क्षामदेहाः
पतिमभ्यवोचन् ९ प्रजाऊचुः ॥ वयंराजन्जाठरेणाभितप्तायथाग्निनाकोटरस्थेनवृक्षाः ॥ त्वामद्ययाताःशरणंशरण्यंयःशाधिनोवृत्तिकरःपतिर्नः १०

कस्मादिति दोहनंपात्रद्रव्यम् ३ ४ ५ पूर्वदेहाःपुरातनास्तेषांकथाश्रयंसत्कथासंबंधं सुश्रवसोहरेःश्रवोयशः ६ योदुह्यादितिसर्वप्राणिनांतच्छाक्तिनियतत्वात्पुनर्वचनमादावैक्त्यार्थम् ७
तत्रशुकोपिकथाप्रसंगंसंदधातीत्याह चोदितइति त्वयाहंयथाचोदितएवंविदुरेणेति ८ तत्रपूर्वोत्तरकथाविच्छेदपरिहारायादितएवमैत्रेयोवक्तीत्याह यदेति क्षितिपृष्ठेभूगोलकेनिरन्नेभोजनपदार्थ
रहितेसति ९ निरन्नइत्यनेनदुःखनिमित्तमितिज्ञातंतत्कीदृशमत्राह वयमिति जाठरेण जठरसंबंधिनाग्निना कोटरंवृक्षविवरं युष्माकमीदृशाग्निपरिहारायअन्यशरणप्राप्तिः किंनस्यादत्राह यःशाधी ३८
ति यस्त्वंनोस्माकंवृत्तिकरःपतिर्यस्मात्त्स्मात्त्वमस्माञ्छाधिअनुशिक्षस्वेयंबुद्धिरिति १०

१ अथकृष्णस्यपूर्वदेहकथाश्रयमित्यन्वयभ्रांतिवारणायान्वयंदर्शयति ॥ तथाचपूर्वदेहोयेषांतेपूर्वदेहाःअतीतराजानःतेषांकथाश्रयम् । तत्पुरस्कारेणप्रवृत्तंभगवतोयशइत्यर्थः । टी०

SGLF

भा०च० अहार्षीदित्यनेनास्यप्रतिभटःशतमखएवनान्यइतिद्योतनायकथितमितिज्ञातव्यं चरमेअंत्येश्वमेधेवर्तमानेसति २५ यतोज्ञानात्परंब्रह्मप्रत्यक्षंभवतियोगिनः २६ तद्भाविष्यत्कथाऽतीतत्वेनकथं वि०अ०
कथ्यतइत्यत्रोच्यते तत्रेति आत्माश्रिताःस्वविषयास्त्रिभिःषड्भिश्चरणैरुपलक्षितायशोनिबंधाः २७ अप्रतिरुद्धचक्रोऽप्रतिहताज्ञो भविताभविष्यतीत्युपसंहरते २८ ॥ ॥ इतिश्रीभागवतेचतु
३८ र्थस्कंधेषोडशोध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ अस्मिन्नध्यायेसूतादिभिःश्रीहरिमहिमोपनिबद्धत्वेनपृथोर्महिम्न उक्तत्वात्तन्माहात्म्यमेवोच्यते तत्रादौसूतादितृप्तिकरणप्रकारमाह एवंभगवा
नित्यादिना छंदयामासतोषयामास १ राज्ञासमानवयसःश्रेणयस्त्वंगरक्षकाइत्यभिधानाच्छ्रेणयोंगरक्षकाः २ विदुरःसूतादिभिःसूचितंगोदोहनादिपृथुविक्रमंविस्तरतःश्रोतुंलोकोपकारायपृच्छति १७

एषोश्वमेधाञ्छतमाजहारसरस्वतीप्रादुरभूद्धियत्र ॥ अहार्षीद्यस्यहयंपुरंदरःशतक्रतुश्चरमेवर्तमाने २५ एषस्वसद्मोपवनेसमेत्यसनत्कुमारंभगवंतमेकम्
॥ आराध्यभक्त्यालभतामलंतद्ज्ञानंयतोब्रह्मपरंवदंति २६ तत्रतत्रगिरस्तास्ताइतिविश्रुतविक्रमः ॥ श्रोष्यत्यात्माश्रितागाथाःपृथुःपृथुपराक्रमः २७
दिशोविजित्याप्रतिरुद्धचक्रःस्वतेजसोत्पाटितलोकशल्यः ॥ एवंसुरेंद्रैरनुगीयमानोमहानुभावोभवितापतिर्भुवः २८ इतिश्रीभागवतेमहापुराणे
चतुर्थस्कंधेपृथ्वाख्यानेषोडशोध्यायः १६ मैत्रेयउवाच ॥ एवंसभगवान्वैन्यःख्यापितोगुणकर्मभिः ॥ छंदयामासतान्कामैःप्रतिपूज्याभिनंद्यच
१ ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः ॥ पौरान्जानपदान्श्रेणीःप्रकृतीःसमपूजयत् २ ॥ विदुरउवाच ॥ कस्माद्दधारगोरूपंधरित्रीबहुरूपिणी ॥
यांदुदोहपृथुस्तत्रकोवत्सोदोहनंचकिम् ¦३ प्रकृत्याविषमादेवीकृतातेनसमाकथम् ॥ तस्यमेध्यंहयंदेवःकस्यहेतोरपाहरत् ४ सनत्कुमाराद्भगवतोब्र
ह्मन्ब्रह्मविदुत्तमात् ॥ लब्ध्वाज्ञानंसविज्ञानंराजर्षिःकांगतिंगतः ५ यच्चान्यदपिकृष्णस्यब्रह्मन्भगवतःप्रभोः ॥ श्रवःसुश्रवसःपुण्यंपूर्वदेहकथाश्रयम्
६ भक्तायमेऽनुरक्तायतवचाधोक्षजस्यच ॥ वक्तुमर्हसियोऽदुह्यद्वैन्यरूपेणगामिमाम् ७ श्रीशुकउवाच ॥ चोदितोविदुरेणैवंवासुदेवकथांप्रति ॥ प्रशस्य
तंप्रीतमनामैत्रेयःप्रत्यभाषत ८ मैत्रेयउवाच ॥ यदाभिषिक्तःपृथुरंगविप्रैरामंत्रितोजनतायाश्चपालः ॥ प्रजानिरन्नेक्षितिपृष्ठएत्यक्षुत्क्षामदेहाः
पतिमभ्यवोचन् ९ प्रजाऊचुः ॥ वयंराजन्जाठरेणाभितप्तायथाग्निनाकोटरस्थेनवृक्षाः ॥ त्वामद्ययाताःशरणंशरण्यंयःशाधिनोवृत्तिकरःपतिर्नः १०

कस्मादिति दोहनंपात्रद्रव्यम् ३ ४ ५ पूर्वदेहाःपुरातनास्तेषांकथाश्रयंसत्कथासंबंधं सुश्रवसोहरेःश्रवोयशः ६ योदुह्यादितिसर्वप्राणिनांतच्छाक्तिनियतत्वात्पुनर्वचनमादावेक्तव्यार्थम् ७
तत्रशुकोपिकथाप्रसंगंसंदधातीत्याह चोदितइति त्वयाहंयथाचोदितएवंविदुरेणेति ८ तत्रपूर्वोत्तरकथाविच्छेदपरिहारायादितएवमैत्रेयोवक्तीत्याह यदेति क्षितिपृष्ठेभूगोलकेनिरन्नेभोजनपदार्थ
रहितेसति ९ निरन्नइत्यनेनदुःखानिमित्तमितिज्ञातंतत्कीदृशमत्राह वयमिति जाठरेण जठरसंबंधिनाग्निना कोटरंवृक्षविवरं युष्माकमीदृशाग्निपरिहाराय अन्यशरणप्राप्तिः किंनस्यादत्राह यःशाधी ३८
ति यस्त्वंनोस्माकंवृत्तिकरःपतिर्यस्मात्तस्मान्नास्माञ्छाधि अनुशिक्षस्वेयंबुद्धिरिति १०

१ अथकृष्णस्यपूर्वदेहकथाश्रयमित्यन्वयभ्रांतिवारणायान्वयंदर्शयति ॥ तथाचपूर्वदेहोयेषांतेपूर्वदेहाःअतीतराजानःतेषांकथाश्रयम् । तत्पुरस्कारेणप्रवृत्तंभगवतोयशइत्यर्थः । दी०

SGDF
Sri Gargeshwari Digital Foundation

वृत्तिकरइत्यनेनज्ञाताभिप्रायस्यापिराज्ञःस्वाभिप्रायमुद्गलपंतीत्याह । तन्नइति । रातवेमरणाय उज्झितान्नास्त्यक्तान्नाः पूर्वमेवेतिशेषः । वार्तापतिःजनानामन्नंदत्त्वारक्षकइत्यर्थः ११ राज्ञोराज
धनमदोत्सिक्तत्वसंभवेनकिमुत्तरंकार्यमभूदत्राह पृथुरिति करुणंदयाजनकंनिमित्तमन्नाभावस्यकारणमन्वपद्यतज्ञातवान् १२ ज्ञात्वाप्यशक्यमितिमत्वासाधयिष्यामइतिगुडाजिह्विकावाणीमुक्त्वा
किंकार्यांतरेतेनास्थायीतितत्राह इतीति विशिखंशरं त्रिपुरहाहरः १३ तत्रभूम्याकिमकारीतितत्राह प्रवेपमानेति वेपृकंपनइतिधातुः गौःसतीगोरूपा । मृगयोर्व्याधात् १४ अत्रपृथुनापलायं
त्याश्रियार्किमर्तिनिवृत्तंकिंनेत्याह तामेवेतिअन्वव्रजत् पृष्ठतोगतोभूत् सारंगइवकार्यसारग्राहित्वात्पृष्ठतोऽयासीदेवनबाणंमुक्त्वावधीदित्याशयेनाह शरमिति १५ १६ राजरूपिणोहरेःसंनि
धानविशेषवित्त्वादुत्तरकार्यस्यापिस्वाभिप्रेतत्वान्नेंद्राद्यन्यतमोपितामत्रायतेत्याह । लोकेनेति वैन्यादन्यस्माज्जीवन्भद्राणिपश्यतीतिबुद्ध्यैवहरेःसर्वप्राणिप्रेरकत्वेनतच्छक्तिनियतत्वाच्चभूमेरावृत्तिमाह
त्रस्तेति १७ अत्रवचनमेवानुसर्तव्यंनान्यदितिभाववतीवक्ति उवाचेति १८ रक्षायांनियुक्तस्यतवापराधमंतरेणाभिहननंनयुक्तमित्याह सत्त्वमिति । एवमपिमांहनिष्यसिचेत्तवधर्मज्ञत्वमपहासित

तन्नोभवानर्हतिरातवेन्नंक्षुधार्दितानांनरदेवदेव ॥ यावन्ननंक्ष्यामहउज्झितान्नावार्तापतिस्त्वंकिललोकपालः ११ ॥ मैत्रेयउवाच ॥ पृथुःप्रजानांकरुणंनि
शम्यपरिदेवितम् ॥ दीर्घंदध्यौकुरुश्रेष्ठनिमित्तंसोन्वपद्यत १२ इतिव्यवसितोबुद्ध्याप्रगृहीतशरासनः ॥ संदधेविशिखंभूमौक्रुद्धस्त्रिपुरहायथा १३ प्रवे
पमानाधरणीनिशम्योदायुधंचतम् ॥ गौःसत्यपाद्रवद्भीतामृगीवमृगयोर्द्रुतम् १४ तामेवान्वव्रजद्वैन्यःकुपितोत्यरुणेक्षणः ॥ शरंधनुषिसंधाययत्रयत्रपला
यति १५ सादिशोविदिशोदेवीरोदसीचांतरंतयोः ॥ धावतीतत्रतत्रैनंददर्शानूद्यतायुधम् १६ लोकेनाविंदतत्राणंवैन्यान्मृत्योरिवप्रजाः ॥ त्रस्तातदा
निवव्रतेहृदयेनविदूयता १७ उवाचाथमहाभागंधर्मज्ञापन्नवत्सल ॥ त्राहिमामपिभूतानांपालनेवस्थितोभवान् १८ सत्वंजिघांससेकस्माद्दीनामकृ
तकिल्बिषाम् ॥ अहनिष्यत्कथंयोषांधर्मज्ञइतियोमतः १९ प्रहरंतिनवैस्त्रीषुकृतागःस्वपिजंतवः ॥ किमुतत्वद्विधाराजन्करुणादीनवत्सलाः २० मां
निहत्याजरांनावंयत्रविश्वंप्रतिष्ठितम् ॥ आत्मानंचप्रजाश्चेमाःकथमंभसिधास्यसि २१ ॥ पृथुरुवाच ॥ वसुधेत्वांवधिष्यामिमच्छासनपराङ्मुखीम् ॥
भागंबर्हिषियावृंक्तेनतनोषिचनोवसु २२ यवसंजग्ध्यनुदिनंनैवदोग्ध्यौधसंपयः ॥ तस्यामेवंहिदुष्टायांदंडोनात्रनशस्यते २३

स्यादित्याशयेनाह । अहनिष्यदिति । योभवान्धर्मज्ञइतिमतोऽभविष्यत्तर्हिकथंयोषांमामहनिष्यदित्यन्वयः १९ बालिशाअपिजंतवःस्त्रीवधंनकुर्वंति किंपुनर्भवादृशाइत्याह प्रहरंतीति २० नकेवलम
दृष्टहानिरपितुदृष्टहानिरपिस्यादित्याह मांनिहत्येति । अजरांनूतनामिवस्थितां धास्यासिधारयिष्यासि २१ स्वोक्तकारित्वकरणायपृथुर्भीतिकरंवाक्यंवक्ति । वसुधइति । ननु वधयोग्यापराधः
कइतितत्राह मच्छासनेति अनेनतवपत्युर्ममस्त्रीवधोनदोषायभर्तृशासनातिक्रमएवापराधित्वादितिध्वनितम् । किंतत्त्वच्छासनातिलंघनं येनापराधिनीस्यामत्राह भागमिति याभवती बर्हिषि
यज्ञे भूःस्वाहेतिहुतंहविर्भागं वृंक्तेवृणोति सात्वं वसुधनंयोग्यंनतनोषिपरिपाकेननप्रपंचयसीत्यन्वयः २२ एतदेवविशिनष्टि यवसमिति हविराख्यंयवसं पयःशब्दस्यजलेपिवृत्तेरित्यतऔधस
मिति गोरूपत्वादेवमुक्तिः । मत्पालिताभ्यःप्रजाभ्यः या पयोनदोग्धि तस्यामेवंदुष्टायामत्रभवत्यांदंडोनशस्यतइतिनहि । शस्यतएवेत्यर्थः २३

SGDF

आत्मन्यसत्त्वान्नमुंचामीतिनित्याह । त्वंसखुइति । त्वदधिकरणत्वेनप्रजाजीवनार्थत्वेनविरिंचिसृष्टौषध्यदानेचौर्याख्यदोषोपितवस्यादित्यर्थः आत्मनिसत्त्वात्नदास्यामीतिदुराग्रहबुद्धिरवज्ञेति २४
मद्वधस्तवकोपनिवारणावसायीनतुशरणागतप्रजारक्षणोपायसिद्धिरितितत्राह अमूषामिति अमूषांशरणागतानांमेदसामांसविशेषेण २५ तथापिस्त्रीवधोनशस्तइतितत्राह पुमानिति यएवंविधस्त
द्वधः २६ यदुक्तंमांनिहत्यात्मानमिमाःप्रजाश्चांभसिकथंधारयिष्यसीतितत्राह त्वांस्तब्धामिति मायागामित्यनेनगोवधदोषोपिनास्तीतिसूचितंआत्मयोगबलेनौत्पत्तिकस्वरूपधारणयाशक्त्या २७ त
त्रनिरुत्तरयाधरयाकिमकारीतितत्राह एवामिति २८ स्वयंदेवतास्वेकत्वेनहरेरन्यस्यैवंविधवाक्यानुदयादित्यादिहेतुनाज्ञातत्वात्धरापृथ्व्यंतर्यामिणंतद्योग्यैर्गुणैरन्यत्रायोग्यैःश्रीनारायणमभिष्टौति
नमइति मायया प्रकृत्याचित्प्रकृत्यावा । विन्यस्तातद्योग्यतयाविरचितानानातनवोब्रह्मादिर्जीवदेहायेनसतथोक्तस्तस्मै । ब्रह्मादिजीवदेहास्तुमायादेहाःप्रकीर्तिताइतिवचनात् मायाशब्देन
नैंद्रजालमत्रोच्यतइति । स्वस्यापिप्राकृतदेहसंभवेनदेवदत्तवत्कर्मणिश्रांतत्वेनप्रपंचरचनानुपपत्तिरित्यतउक्तमगुणात्मनइति सत्त्वादिगुणरहितस्वरूपाय यदिहरेःस्वरूपंप्राकृतगुणरहितंतर्हिकीह
शंयेनदेहित्वेनसृष्ट्यादौप्रवृत्तिःस्यादित्यस्यापीदमेवोत्तरंगुणात्मनइति ज्ञानानंदादिगुणदेहाय आत्माजीवेधृतौदेहइतियादवः अस्तुज्ञानादिगुणदेहत्वंतथापिप्रकृत्याप्रवर्तमानस्यकर्दममणेरिवकाथि
तदोषानिरस्तारइतितत्राह स्वरूपेति स्वरूपानुभवेनतद्ब्रह्मवेदाहंब्रह्मास्मीतिश्रुतिसिद्धेनस्वरूपापरोक्षेणनिर्धूतानिरस्ताद्रव्यक्रियाकारकनिमित्तानांविभ्रमाणामूर्मयोयेनसतथा द्रव्यादयस्तामसतै

त्वंखल्वौषधिबीजानिप्राक्सृष्टानिस्वयंभुवा ॥ नमुंचस्यात्मरुद्धानिमामवज्ञायमंदधीः २४ अमूषांक्षुत्परीतानामार्तानांपरिदेवितम् ॥ शमयिष्यामि
मद्बाणैर्भिन्नायास्तवमेदसा २५ पुमान्योषिदुतक्लीबआत्मसंभावनोधमः ॥ भूतेषुनिरनुक्रोशोनृपाणांतद्वधोवरः २६ त्वांस्तब्धांदुर्मदांनीत्वामायागां
तिलशःशरैः ॥ आत्मयोगबलेनेमाधारयिष्याम्यहंप्रजाः २७ एवंमन्युमयींमूर्तिंकृतांतमिवबिभ्रतम् ॥ प्रणताप्रांजलिःप्राहमहींसंजातवेपथुः २८
॥ धरण्युवाच ॥ नमःपरस्मैपुरुषायमाययाविन्यस्तनानातनवेगुणात्मने ॥ नमःस्वरूपानुभवेननिर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये २९ येनाहमा
त्मीयतनुर्विनिर्मिताधात्रायतोयंगुणसर्गसंग्रहः ॥ सएवमांहंतुमुदायुधःस्वराडुपस्थितोऽन्यंशरणंकमाश्रये ३० यएतदादावसृजच्चराचरंस्वमाययात्मा
श्रययाऽवितर्क्यया ॥ तयैवसोयंकिलगोप्तुमुद्यतःकथंनुमांधर्मपरोजिघांसति ३१

जसवैकारिकाहंकारसंज्ञाः यद्वा द्रव्यंगुणानामाधारोदेहःक्रियाकर्मेंद्रियंकारकंज्ञानेंद्रियं एतन्निमित्तानां विभ्रमाणांसंशयाद्यंतःकरणधर्माणामूर्मयः परंपरादूरोत्सारितायेनसतथा विभ्रमःसंशयेभ्रांतौशो
भायांचेतियादवः तत्रकिंकारणमित्यतउक्तं स्वरूपेति द्रव्यक्रियादिनिमित्तविभ्रमोर्मयोस्माकमेवनहरेरितिनिरणायि २९ यतःस्वामित्वेनपितृत्वेनगुरुत्वेनस्थितंहरिंशरणंविहायममान्योरक्षकोस्तीतिभ्रां
त्याऽलब्धान्यन्निवृत्तेत्यतस्तत्स्वामित्वादिकंतवैवेतिसयुक्तिकमाह येनेति येनधात्राहरिणाहमात्मीयतनुःस्वशरीरत्वेननिर्मिता यस्यपृथिवीशरीरमितिश्रुतेः यतोयस्मात्सत्त्वादिगुणैःसर्गसंग्र
हः स्यात्सएवपितृभूतःस्वराट्स्वामीउदायुधः शिक्षागुरुर्मांहंतुमुपस्थितइत्यन्वयः किमतइतितत्राह अन्यमिति किंकुर्मःकस्यवाब्रूमोगरदायांस्वमातरीतिवाक्यंध्वनयति कमित्यनेन ३० तवनिर्मीते
श्वरोन्यस्त्वांजिघांसुःपृथुराजाचापरइतिमदाशंकांपरिहरन्निवपूर्वोक्तार्थंविवृणोति यएतदिति आत्मैवाश्रयोयस्याःसाआत्माश्रयातयाऽतएवावितर्क्ययाविविधतर्काविषयया अजामेकांलोहितशुक्लकृष्णा २९
मित्यादिश्रुतिसिद्धत्वान्निर्वक्तुमशक्येत्येतदद्वैतवादितर्कागोचरयेत्यर्थः एवंविधयास्वमाययास्वप्रकृत्यासृष्टुःपालयितुश्चैकत्वेनतस्यहंतृत्वंनयुक्तमदर्शनादित्यर्थः वार्तासंभाव्ययोःकिलेत्यभिधानं अतः
संभावितंनभवतीति । यथास्वस्यतर्काविषयत्वंतथामायायाअपीतिसूचितम् ३१

SGDF
Sri Gangeshwari Digital Foundation

हरेस्तर्काविषयत्वंस्पष्टयति नूनंतवेति । विभो । अकृतात्मभिरल्पबुद्धिभिरशिक्षितबुद्धिभिर्वाजनैर्दुर्जययास्वमायया । ईशस्यैश्वर्यादिगुणाकरस्य । समीहितंसमीचीनंचेष्टितंनलक्ष्यते । नूनंतर्कयामी त्यन्वयः । तर्कनिश्चितयोर्नूनमितियादवः । समीहितंकिंतदित्यतआह । यस्त्विति यस्त्वकरोत्कार्यं । ब्रह्मणाजगदकारयच्च । अनेकःइंद्रोमायाभिःपुरुरूपईयतेइतिश्रुतेः । तत्त्वतएकः एकमेवाद्वितीयमिति श्रुतेः । एवंविधःसपरतःपरेषामीश्वरोनास्माकमार्तानामितिक्षोण्याक्षेपलक्षणमर्थविशेषंध्वनयति । अर्थांतरासंभवात् ३२ कर्तृत्वेनकारयितृत्वेनसर्वस्वातंत्र्यप्रतीतेःपृथिव्यादीनांकर्तृत्वमीश्वरश त्त्यनुस्यूतत्वादित्याह । सर्गादिति द्रव्याणिपंचभूतानिक्रियाःकर्मेंद्रियाणिकारकाःज्ञानेंद्रियाणिचेतनोजीवएतान्व्याप्यतिष्ठंतीतिचेतनात्मानस्ताभिःशक्तिभिर्योस्यजगतःसर्गाद्यनुरुणद्धितत्तद्योग्य तानुकूल्येनकरोतितस्मैनमइत्यन्वयः । एकस्ययुगपदनेकवैचित्र्योपेतपदार्थस्रष्टृत्वंकथमुपपद्यतइत्यतउक्तं समुन्नद्धेति तदुक्तं विरुद्धशक्तयोयस्यनित्यायुगपदेवतु तस्मैनमोभगवतेविष्णवेसर्वजिष्ण वइति कर्तृत्वशक्तिःस्वरूपभूतेत्युक्तं वेधसइति कर्तृत्वशक्तिमते । किंनामधेयमस्येत्यतउक्तं परस्माइति । अनेनपुंशक्तिमत्त्वादस्यैवोक्तमुपपन्नमित्यसूचि ॥ ३३ ॥ पूर्वंत्वयैवभूतधात्रीत्वेनसंकल्प

नूनंतवेशस्यसमीहितंजनैःस्वमाययादुर्जययाकृतात्मभिः ॥ नलक्ष्यतेयस्त्वकरोदकारयद्योनेकएकःपरतःसईश्वरः ३२ सर्गादियोस्यानुरुणद्धिशक्तिभि र्द्रव्यक्रियाकारकचेतनात्मभिः ॥ तस्मैसमुन्नद्धविरुद्धशक्तयेनमःपरस्मैपुरुषायवेधसे ३३ सवैभवानात्मविनिर्मितंजगद्भूतेंद्रियांतःकरणात्मकंविभो ॥ संस्थापयिष्यन्नजमांरसातलादभ्युज्जहारांभसआदिसूकरः ॥ ३४ ॥ अपामुपस्थेमयिनाव्यवस्थिताःप्रजाभवानद्यरिरक्षिषुःकिल ॥ सवीरमूर्तिःसमभू द्धराधरोयोमांपयस्युग्रशरोजिघांसति ३५ नूनंजनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ॥ नज्ञायतेमोहितचित्तवर्त्मभिस्तेभ्योनमोवीरयशस्करे भ्यः ३६ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेसप्तदशोऽध्यायः १७ ॥ मैत्रेयउवाच ॥ इत्थंपृथुमभिष्टूयरुषाप्रस्फुरिताधरम् ॥ पुनराहावनिर्भीतासंस्त भ्यात्मानमात्मना १ सन्नियच्छविभोमन्युंनिबोधश्रावितंचमे ॥ सर्वतःसारमादत्तेयथामधुकरोबुधः २ अस्मिँल्लोकेथवामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः ॥ दृष्टायोगाप्रयुक्ताश्चपुंसांश्रेयःप्रसिद्धये ३

त्वाद्धिरण्याक्षनीतांमामुदाहारितवांस्तत्रात्मयोगबलेनैवधारयिष्यामीत्यंगीकारेसंकल्पभंगःस्यादित्याशयेनाह सवाइति सवाइत्यनेनयएतदित्याद्युक्तंपरामृश्यते मामां ॥ ३४ ॥ भूमेरुद्धर्तान्योहम न्यस्तस्मात्संकल्पभंगःकथमितिमंदाशंकांपरिहरति अपामुपस्थेइति जलस्योपरिस्थितांमांजिघांसति सवीरमूर्तिर्भवानद्यरक्षितुकामोधराधरोभूमेर्भर्तासमभूदित्यन्वयः ३५ स्त्रीत्वमस्माद्विचेष्टितंकिंजा नासीत्याशंक्यसत्यं । तथाप्यस्माकंयुष्मत्प्रसादनायनमइत्येतावत्कर्तुमुचितमितिभावेनाह नूनंजनैरिति त्वद्गुणसर्गमाययातवस्रष्ट्यादौगुणकर्मभूतयासर्गमाययाप्रकृत्या ३६ इतिश्रीभागवतेचतुर्थस्कंधे टीकायांसप्तदशोऽध्यायः ॥ १७ ॥ ॥ ७ ॥ ॥ स्वरूपभूतागुणाहरेरपरोक्षज्ञानाद्धव्यज्यंतइत्येतदर्थसंग्रहार्थंभूमेस्तत्तद्वसुदोहनंनिरूप्यतेस्मिन्नध्याये तत्रादौ पृथोःक्रोधशमनायपुनर्भूमेस्त प्रतिवचनप्रकारंवक्ति इत्थमिति १ कथंनियच्छामिक्रोधंयेनतच्छांतिहेतुंश्रुत्वाऽऽर्द्रांतःकरणोभवामीतितत्राह निबोधेति पुंसेहसद्धर्मएवाशिक्षणीयोनसाह्लिकांधर्मइत्याशयेनाह सर्वतइति ॥ २ ॥ कीदृशंश्राव्यतेयत्प्रकृतोपयोगिस्यादत्राह अस्मिन्निति लोकेकृष्यादिश्रेयःसिद्धयेबीजाद्यर्जनोपायाश्चमुष्मिन्स्वर्गादौयागादियोगास्तत्त्वदर्शिभिर्मुनिभिर्दृष्टाःप्रयुक्ताश्चेत्यन्वयः ३

---

१ नास्तिकधर्मः ।

SGDF
Sri Gangadharan Digital Foundation

ततःकिमित्यतोन्वयव्यतिरेकावाह तानातिष्ठतीति ४ अविद्वानव्युत्पन्नः व्यभिचरंति नियमेननसिध्यंति ५ किंबहुकथाकथनेनाधुनौषधीनामनुपलंभःकस्मात्तन्निमित्तंकथयेतितत्राह पुरेति याःपु
राविरिंचेनसृष्टास्ताओषधीरहमग्रसमित्यन्वयः ६ असत्पुरुषैर्भुज्यमानत्वंभवादृशेनक्षत्रियेणारक्षितत्वमगोपितत्वंनृलोकस्यचोरप्रायत्वंचावेक्ष्यसत्सूपपन्नेषुश्रीनारायणपूजालक्षणयज्ञप्रयोजनस्यावश्य
कत्वादिति ७ तर्हितादेहीति तत्राह नूनमिति क्षीणानामापादनंदुःसाध्यमितितत्राह तत्रेति शास्त्रदृष्टेन ननुस्वरूपतोनष्टाउतलघुतामापन्नाइतिसंशयोमाभूत्तत्तत्कार्यसाधनेतच्छास्त्रदृष्टोपायेनसर्वंसा
ध्यम् ८ तथापिकिंरामानुचराणांवानराणांवारेणुकायावामृतसंजीविन्यादिनेत्यत्रप्राप्तमुपायंवक्ति वत्समिति वत्सलावत्सप्रिया अनुरूपं तत्तद्योग्यंदोहनंदोहक्रियाविशेषम् ९ नैतावतापूर्यतइत्युक्तं दो
ग्धारंचेति ओजस्वदवष्टंभकृत्प्राणधारणशक्तिप्रदमित्यर्थः १० औषध्युत्पत्तौप्रधानसाधनंजलंतद्विषमायांमयिदेववृष्टंपयोनसमंप्रसरति तद्यथाऽपर्त्तावपिप्रवृष्टकालेसमंस्यात्तथामांसमांकुर्वन्यथौषध्य

तानातिष्ठतियःसम्यगुपायान्पूर्वदर्शितान् ॥ अपरःश्रद्धयोपेतउपायान्विंदतेंजसा ४ताननादृत्ययोविद्वानर्थानारभतेस्वयम् ॥ तस्यव्यभिचरंत्यर्थाः
प्रायशश्चपुनःपुनः ५ पुरासृष्टाश्चौषधयोब्रह्मणायाविशांपते ॥ भुज्यमानामयादृष्टाअसद्भिरधृतव्रतैः ६ अपालितानादृतास्ताभवद्भिर्लोकपालकैः ॥
चोरीभूतेथलोकेहंयज्ञार्थेऽग्रसमौषधीः ७ नूनंतावीरुधःक्षीणामयिकालेनभूयसा ॥ तत्रदृष्टेनयोगेनभवानादातुमर्हति ८ वत्संकल्पयमेवीरयेनाहंवत्सला
तव ॥ धोक्ष्येक्षीरमयान्कामाननुरूपंचदोहनम् ९ दोग्धारंचमहाबाहोभूतानांभूतभावन ॥ अन्नमीप्सितमोजस्वद्भगवान्वांछतेयदि १० समांचकुरुमां
राजन्देववृष्टंयथापयः ॥ अपर्तावपिभद्रंतेउपावर्तेतमांविभो ११ इतिप्रियंहितंवाक्यंभुवआदायभूपतिः ॥ तथाचकारसर्वत्रसारमाददतेबुधाः १२
वत्संकृत्वामनुंपाणावदुहत्सकलौषधीः ॥ ततोऽपरेयथाकामंदुदुहुःपृथुभाविताम् १३ ऋषयोदुदुहुर्देवीमिंद्रियेष्वथसत्तम ॥ वत्संबृहस्पतिंकृत्वापय
श्छंदोमयंशुचि १४ कृत्वावत्संसुरगणाइंद्रंसोममदूदुहन् ॥ हिरण्मयेनपात्रेणवीर्यमोजोबलंपयः १५ दैतेयादानवावत्संप्रह्लादमसुरर्षभम् ॥ विधाय
दुदुहुःक्षीरमयःपात्रेसुरासवम् १६ गंधर्वाप्सरसोऽधुक्षन्पात्रेपद्ममयेपयः ॥ वत्संविश्वावसुंकृत्वागांधर्वंमधुसौभगम् १७ वत्सेनपितरोऽर्यम्णाकव्यंक्षी
रमधुक्षत ॥ आमपात्रेमहाभागश्रद्धयाश्राद्धदेवताः १८

नुत्पादेत्वत्कोपविषयास्यामित्याह समांचेति ११ अत्रापित्वद्धस्तंत्वयैवोद्गीर्यंदातव्यं अन्यथावधिष्यामीतिपुनरपिपृथुनाकिंकुपितंनाकिंतुतदुक्तमंगीकृतंसारग्राहित्वादित्याह इतीति प्रियहितं श्रोतृ
सुखं प्रियंपथ्यं हृदयंगमंहितं भूपतिःपृथुः १२ १३ ततोपरइत्युक्तंविव्रियते । ऋषयइत्यादिना देवींसरस्वतीं इदमेवविशिनष्टि छंदोमयमिति वेदमयंपयःकुत्र वागिंद्रियेषु १४ नकेवलंसोमरसमात्रम
दूदुहन्किंतुतदुद्भवंगुणंचेत्याह वीर्यमिति पराक्रमंमाहात्म्यंवा ओजोवष्टंभशक्तिं बलंनिराहारत्वेपिचेष्टाशक्तिं अत्रबाह्यानेवगुणानदूदुहन्नतुस्वरूपभूतान् तदुक्तं गुणाःस्वरूपभूताश्चबाह्याश्चेतिद्विधा ४०
मताः स्वरूपभूताव्यज्यंतेहरेर्बाह्यान्दुदुहुःपयइति १५ अयःपात्रे अयोमयेपात्रे । सुराख्यमासवंमधु प्रह्लादस्यप्रतिमन्वंतरमुत्पन्नप्रायत्वादत्रोक्तं प्रतिमन्वंतरंप्रायःप्रह्लादाद्याबभूविरइतिवचनात् १६ गां
धर्वगानं मधुसौभगंसौभाग्यलक्षणंमधु १७ आमपात्रेनवभांडे श्राद्धदेवताःश्राद्धकर्मणांदेवताः १८

१ पृथोःस्वायंभुवमन्वंतरोत्पन्नत्वात् । प्रह्लादस्यचवैवस्वतमन्वतरेत्पन्नहिरण्यकाशपूत्वोक्तेरित्यतः प्रमाणेनाह । दी० ।

SGDF Sri Gangeshwari Digital Foundation

संकल्पनामयींसंकल्पमात्रेणाभीष्टसिद्धिप्रदांसिद्धिं येविद्याधरादयस्तेचनभसिविद्यांखेचरत्वलक्षण।सिद्धिमधुक्षतेत्यन्वयः १९ अंतर्धानगतात्मनाऽदृश्यत्वेप्राप्तमनस्कत्वेन अन्येमायिनोधारणा
मयींचिंतामात्रसाध्यांमायां २० पिशिताशनामांसभक्षाः भूतेशोभैरवाख्योरुद्रोवत्सोयेषांतेतथोक्ताः क्षतजासवंरुधिराख्यंमद्यम् २१ अह्यादीनांविषधरत्वसाम्येप्यवांतरविशेषत्वात्पृथगुक्तिः
२२ गोवृषंनंदिकेश्वरं मृगेंद्रेणसिंहेमदंष्ट्रिणः २३ क्रव्यादाःप्राणिनोहिंस्राः क्रव्यमपक्वमांसंस्वकलेवरेपात्रेदुदुहुरित्यन्वयः चरंजंगमं अचरंतरुफलम् २४ वनस्पतयःतिक्तादिभेदेनबहुत्वाद्रसस्य
पृथगित्युक्तं नानाधातून्सुवर्णादीन् २५ उपसंहरति सर्वइति स्वजातिषुमुख्यःस्वमुख्यःसएववत्सस्तेन सर्वान्कामान्दोग्धीतिसर्वकामदुघाताम् २६ एकस्याःपृथ्व्याःक्षीरभेदःकथमत्राभूदत्राह
एवमिति दोहभेदेनवत्सभेदेनादिशब्दाद्दोग्धृभेदेनच ॥ २७ ॥ राज्ञांकिंप्रीतंकुपितमुततूष्णींभूतमितिसंशयावसरोनास्तीत्याह ततइति लोकगोविलक्षणक्षीरभेददातृत्वादत्रप्रीतेरेवसंभावितत्वात्

प्रकल्प्यवत्संकपिलंसिद्धाःसंकल्पनामयीम् ॥ सिद्धिंनभसिविद्यांचयेचविद्याधरादयः १९ अन्येचमायिनोमायामंतर्धानगतात्मना ॥ मयंप्रकल्प्यवत्स
त्वेदुदुहुर्धारणामयीम् २० यक्षरक्षांसिभूतानिपिशाचाःपिशिताशनाः ॥ भूतेशवत्सादुदुहुःकपालेक्षतजासवम् २१ तथाऽहयोदंदशूकाःसर्पानागाश्च
तक्षकम् ॥ वत्संविधायदुदुहुर्बिलपात्रेविषंपयः २२ पशवोयवसंक्षीरंवत्संकृत्वाचगोवृषम् ॥ अरण्यपात्रेचाधुक्षन्मृगेंद्रेणचदंष्ट्रिणः २३ क्रव्यादाःप्रा
णिनःक्रव्यंदुदुहुःस्वकलेवरे ॥ सुपर्णवत्साविहगाश्चरंचाचरमेवच २४ वटवत्सावनस्पतयःपृथग्रसमयंपयः ॥ गिरयोहिमवद्वत्सानानाधातून्स्वसानुषु ॥
२५ सर्वेस्वमुख्यवत्सेनस्वेस्वेपात्रेपृथक्पृथक् ॥ सर्वकामदुघांपृथ्वींदुदुहुःपृथुभाविताम् २६ एवंपृथ्वादयःपृथ्वीमन्नादाःस्वन्नमात्मनः ॥ दोहवत्सादिभे
देनक्षीरभेदंकुरूद्वह २७ ततोमहीपतिःप्रीतःसर्वकामदुघांपृथुः ॥ दुहितृत्वेचकारेमांप्रेम्णादुहितृवत्सलः २८ चूर्णयन्स्वधनुःकोट्यागिरिकूटानिराजरा
ट् ॥ भूमंडलमिदंवैन्यःप्रायश्चक्रेसमंविभुः २९ अथास्मिन्भगवान्वैन्यःप्रजानांवृत्तिदःपिता ॥ निवासान्कल्पयांचक्रेतत्रतत्रयथार्हतः ३० ग्रामान्पु
रःपत्तनानिदुर्गाणिविविधानिच ॥ घोषान्व्रजांश्चशिबिरान्नगरान्खेटखर्वटान् ३१ प्राक्पृथोरिहनैवैषापुरग्रामादिकल्पना ॥ यथासुखंवसंतिस्मत
त्रतत्राकुतोभयाः ३२ ॥ ॥ इतिश्रीभागवतेचतुर्थस्कंधेअष्टादशोध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

२८ इदानींभूमेःसमीकरणप्रकारंवक्ति चूर्णयन्निति गिरिकूटानिगिरिशृंगाणि कूटोस्त्रीशृंगमायाद्येष्वद्रिकुंजेषुभेदयोरितियादवः क्वचित्क्वचिद्गिरिकूटादीनांसत्त्वात्प्रायइत्युक्तं २९ भूमेःसमीकरणेनसु
खपर्यटनात्परंप्रजानांप्रयोजनंकिमकारिराज्ञेतितत्राहाथेति ३० उक्तंविशिनष्टि ग्रामानिति ग्रामोबहुजनाकीर्णोराजराजाश्रयंपुरं समुद्रसंगतनद्युपकंठेयवनजनाश्रयःपत्तनं जलपर्वतादिनागंतुमश
क्यंस्थानंदुर्गं गवांस्थानंघोषः गोपालानांस्थानंव्रजः गोष्ठंघोषइतिप्रोक्तोव्रजस्तत्पालसंस्थितिरित्यभिधानाद्गोष्ठाध्वनिवहाव्रजाइतिसामान्यवचनंइतिज्ञातव्यं सेनानिवेशस्थानंशिबिरं वैश्यानामा
श्रयोनगरं मृगयोपजीवनंखेटः । आदित्यादिवारमुद्दिश्यपत्रवणिजांयोगस्तत्खर्वटाख्यंस्थानंवस्त्रभारविक्रयस्थानंवा । पाखंडिनांनिवासस्थानंवा ३१ इदंपुरादिनिर्माणंपृथोर्माहात्म्याविनाभूतमित्याह
प्राक्पृथोरिति किमतइतितत्राह यथेति अनेनेतःपूर्वंराज्ञांसाधुत्वेपिसंबाधप्रायप्रजानांनिवाससुखंनास्तीतिसूचितम् ३२ ॥ ॥ इतिचतुर्थेऽष्टादशोध्यायः ॥ १८ ॥ ॥ ७ ॥ ॥ ७ ॥

ब्रह्मार्पितकर्मणाशुद्धांतःकरणस्यपुंसोहरेरापरोक्ष्यंस्यादितिवेदयितुंपृथोर्यज्ञकरणव्याजेनहरेर्माहात्म्यंनिरूप्यतेस्मिन्नध्याये कर्मणाज्ञानमातनोतीतिश्रुतेः तत्रप्रथमतःपृथोर्यज्ञदीक्षाप्रकारमाह अथेति घो
टकेवीथितुरगतुरंगाश्वतुरंगमाः वाजिवाहार्वगंधर्वहयसैंधवसप्तयइत्यमरः नाम्नाब्रह्मावर्ते सरस्वतीदृषद्वत्योरंतरंदेवनिर्मितं ब्रह्मावर्तमानवंतंविदुर्देशंविचक्षणाइत्यभिधानं प्राचींमैंद्रींदिशमुद्दिश्यस्यं
दमाना १ अत्रेंद्रेणस्वनामाभिभूष्णौयज्ञेक्रियमाणेकथंक्षांतमत्राह तदभिप्रेत्येति २ शतक्रतोःकर्मणोतिशयमाह यत्रेति सर्वात्मासर्वव्यापी ३ निघंटवत्यज्ञपतिरित्यादिनाम्नांबहुत्वकथनेनकि
मेकेनागतेनेत्यतउक्तमन्वितइति अनेनापिराजैश्वर्यंनद्योतितमित्यतउक्तमुपगीयमानइति ४ गायकानांकिंचिदनुगम्यस्वाभिप्रेतमुपेत्यपश्चादन्यतोगमनसंभवादित्यतोयावद्गम्यमनुगंतॄनाह सिद्धे
ति ५ तत्त्वविदामनुगमनमेवतन्माहात्म्यद्योतकमित्यतउक्तं कपिलइत्यादि नित्यविरोधिनांदैत्यादीनामनुगमनंकथंसंगच्छतइत्यतउक्तं भागवताइति अनेनदैत्यादयोर्द्विविधाःसंतीतिध्वनितं
येचतस्यहरेःसेवनोत्सुकास्तेचान्वीयुरिति ६ धर्मदुघायज्ञयोग्यपयोदोग्ध्रीति । नकेवलमेतावदेवकिंतुसर्वकामदुघा नैतत्स्तुतिमात्रमनुभवसिद्धमित्याह महीति महित्वान्महनीयत्वाच्चमही ७ गोपा

मैत्रेयउवाच ॥ अथादीक्षितराजर्षिर्हयमेधशतेनसः ॥ ब्रह्मावर्तेमनोःक्षेत्रेयत्रप्राचीसरस्वती १ तदभिप्रेत्यभगवान्कर्मातिशयमात्मनः ॥ शतक्रतुर्नममृ
षेपृथोर्यज्ञमहोत्सवम् २ यत्रयज्ञपतिःसाक्षाद्भगवान्हरिरीश्वरः ॥ अन्वाहूयतसर्वात्मासर्वलोकगुरुःप्रभुः ३ अन्वितोब्रह्मशर्वाभ्यांलोकपालैःसहानु
गैः ॥ उपगीयमानोगंधर्वैर्मुनिभिश्चाप्सरोगणैः ४ सिद्धाविद्याधरादैत्यादानवागुह्यकादयः ॥ सुनंदनंदप्रमुखाःपार्षदप्रवराहरेः ५ कपिलोनारदो
दत्तोयोगेशाःसनकादयः ॥ तमन्वीयुर्भागवतायेचतत्सेवनोत्सुकाः ६ यत्रधर्मदुघाभूमिःसर्वकामदुघामही ॥ दोग्धिस्माभीप्सितानर्थान्यजमानस्य
भारत ७ ऊहुःसर्वरसान्नद्यःक्षीरदध्यन्नगोरसान् ॥ तरवोभूरिवर्ष्माणःप्रासूयंतमधुच्युतः ८ सिंधवोरत्ननिकरान्गिरयोन्नंचतुर्विधम् ॥ उपायनान्यु
पाजह्रुःसर्वेलोकाःसपालकाः ९ इतिचाधोक्षजेशस्यपृथोर्यज्ञमहोदयम् ॥ असूयन्भगवानिंद्रःप्रतिघातमचीकरत् १० चरमेणाश्वमेधेनयजमानेयजुष्प
तिम् ॥ वैन्येयज्ञपशुंस्पर्धन्नपोवाहतिरोहितः ११ तमत्रिर्भगवानैक्षत्त्वरमाणंविहायसा ॥ आमुक्तमिवपाखंडंयोऽधर्मेधर्मविभ्रमः १२

लानांरसानांचतुर्विधान्नजनित्वेनकथंतत्संभवइत्यत्राह ऊहुरिति अनेननदीनांमूर्तिमत्त्वंलक्षयति जलानांमूर्तिमधार्यमाणानांवोढुमसंभवात् वर्ष्मदेहप्रमाणयोरित्यभिधानात् स्थूलप्रमाणाः ८
भक्ष्यंभोज्यंलेह्यंपेयंचेतिचतुर्विधम् । व्ययार्थद्रव्यंनकोशादुद्धार्यंकिंतुसर्वैरानीतमेवालंप्रीत्यार्पितस्यातिशुद्धत्वादितिभावेनाह उपायनानीति ९ भूमंडलेकोप्यजातशत्रुर्नास्ति यतः श्रीनारायणै
कदेवस्यपृथोरपियज्ञविध्वंशक्रोऽकरोदित्याह इतीति इतिशब्दःप्रकारवचनः उक्तप्रकारंयज्ञेमहोदयमसूयन्नसहमानःस्वार्थेवायत्प्रत्ययः १० कीदृशंविघ्नमकरोदित्यत्राह चरमेणेति चरमेणांत्येनशत
तमेनयज्ञेनयजुष्पतिंयजुर्मंत्राधिदैवतंहरिंयजमानेसति स्पृधुस्पर्धायामितिधातोःशतृच्प्रयोगेणात्मनःशतक्रतुत्वंतस्यपृथोरेकोनशतक्रतुत्वंहरेरभिप्रेतमितिध्वनयन्निंद्रोहरेरुल्लंघनंनाकरोदितिज्ञायते
हरेरनभिप्रेतत्वेअश्वापहरणंतत्कटाक्षतोनक्षममिति । उत्तमश्लोकविग्रहावितिवक्ष्यमाणत्वात् ११ नन्वेवंतर्हिऋषीणांत्रिकालदर्शित्वख्यातिरपहास्तितेतितत्राह तमत्रिरिति विहायसागंतुंत्वरमाणम् ।
पुनःकिमाकारमद्राक्षीदित्यतउक्तमामुक्तमिवेति पाखंडरूपमामुक्तंगृहीतमिवास्थितं पाखंडंलक्षयति योऽधर्मइति जनानांज्ञानदुर्बलानामधर्मेधर्मोयमितिविभ्रमोबुद्धिभ्रंशोयस्तत्पाखंडरूपम् १२

SGDF Digital Foundation

अत्रिणादृष्टंचेत्प्रकृतेकिमागतमत्राह अत्रिणेति १३ अनुधावनेनप्रत्यावर्त्यशक्रेणसहयुद्धमभूत्किंनेत्याह तामिति अधर्मंशरीरिणंपापदेहिनंमेनइत्यन्वयः । मुंचतिमुमोच जटापाखंडिनासहयुद्धंनधर्म इति १४ चोरक्रियामनुवर्तमानस्यपुंसोवधोनदोषायेतिमुख्यधर्मविदुषातत्रप्रेर्यमाणेनभवितव्यमितिजानन्अत्रिःपुनश्चतमचोदयदित्याह पापान्निवृत्तमिति वैशब्देनपापशंकांनिवारयति । गुरोर्व चनमौषधमितिस्मृतेः । विबुधाधिपत्यंचतुर्मुखस्याप्यस्तीत्यतउक्तं महेंद्रमिति १५ गृध्रराड्जटायुः १६ अत्रेंद्रोसुरजनमोहायस्वामशक्तिंदर्शयन्निवाभवदित्याह सोश्वमिति तदुक्तं देवाःशक्ताअपिमो हायदर्शयेयुरशक्तवत् ऋषीणांचैवराज्ञांचनहितेदेवतासमाः आज्ञयावाहरेःक्वापिकार्यंतोवाक्वाचित्कचिदिति यत्रक्वापितुदेवैर्ऋष्यादिषुप्रणिपातादिकंक्रियतेसोपितत्स्थहरौमनसासंकल्प्याक्रियतइ तितात्पर्यंज्ञातव्यंच तदुक्तं प्रणिपातादिकंदेवैर्ऋष्यादिषुजनार्दने क्रियतेतोनतेषांहितेजोभंगःकथंचन अत्युत्तमानामवरेतेजोभंगोनविद्यते यथानराणांतिर्यक्षुप्रायःसाम्येहिसस्मृतइति ऋष्यादिषु स्थितेजनार्दनेक्रियतइत्यर्थः १७ इंद्रांजितवतापृथोःपुत्रेणलोकसंमतंकिंजयस्तंभलक्षणंयशःप्राप्तमत्राह ततस्येति १८ पुंसास्वकार्यसिद्धिपर्यंतंप्रयत्नवताभाव्यमितिन्यायमनुसंदधानइंद्रःपूर्वस्मादाधि

अत्रिणाचोदितोहंतुंपृथुपुत्रोमहारथः ॥ अन्वधावतसंक्रुद्धस्तिष्ठतिष्ठेतिचाब्रवीत् १३ तंतादृशाकृतिंवीक्ष्यमेनेऽधर्मंशरीरिणम् ॥ जटिलंभस्मनाच्छन्नं तस्मैबाणंनमुंचति १४ पापान्निवृत्तंवैभूयोहंतवेऽत्रिरचोदयत् ॥ जहियज्ञहनंतातमहेंद्रंविबुधाधिपम् १५ एवंवैन्यसुतःप्रोक्तस्त्वरमाणंविहायसा २ अन्वधावदतिक्रुद्धोरावणंगृध्रराडिव १६ सोश्वंरूपंचतद्धित्वातस्थावंतर्हितःस्वराट् ॥ धीरःस्वपशुमादायपितुर्यज्ञमुपेयिवान् १७ ततस्यचाद्भुतंकर्मवि लक्ष्यपरमर्षयः ॥ नामधेयंददुस्तस्मैविजिताश्वइतिप्रभो १८ उपसृज्यतमस्तीव्रंजहाराश्वंपुनर्हरिः ॥ चषालयूपयोश्छन्नोहिरण्यरशनंविभुः १९ अत्रिः संदर्शयामासत्वरमाणंविहायसा ॥ कपालखट्वांगधरंवीरोनैनमबोधत २० अत्रिणाचोदितस्तस्मैसंदधेविशिखंरुषा ॥ सोश्वंरूपंचतद्धित्वात स्थावंतर्हितःस्वराट् २१ वीरश्चाश्वमुपादायपितृयज्ञमथाव्रजत् ॥ तदवद्यंहरेरूपंजगृहुर्ज्ञानदुर्बलाः २२ यानिरूपाणिजगृहेइंद्रोहयजिहीर्षया ॥ तानि पापस्यखंडानिलिंगंखंडमिहोच्यते २३ एवमिंद्रोहरत्यश्वंवैन्ययज्ञजिघांसया ॥ तद्गृहीतविसृष्टेषुपाखंडेषुमतिर्नृणाम् २४

कयत्नंविधायदुर्जनमोहायवेषांतरंविधायाश्वमपाहार्षीदित्याह उपसृज्येति हरिरिंद्रः । चषालयूपयोरंतर्मध्येछन्नोनिलीनः चषालोयूपकटकःकंबासुगहनावृतिरित्यभिधानाद्दक्षानिर्मितयूपेवलयश्च षालः । हिरण्यंनरचितारशनाकांचीयस्यतम् १९ २० वि कायाच्छिरसःपृथक्भावंकुर्वतीशिखायस्यसविशिखः । विनिषेधेपृथग्भावइतियादवः । एवंविधंशरंदृष्ट्वाकिंपराद्रवदिंद्रोनाकिंतुनि लीनोभूत्रूपांतरेणयज्ञांतरायकरणायेत्याह सोश्वमिति ॥ २१ ॥ अंतर्हितइत्यनेनगृहीतरूपंविसृज्यरूपेणांतर्द्धानंगम्यते तत्रपूर्वरूपंकिमभूदचेतनस्यचेतनसंबंधएवहानादिक्रियासामर्थ्यमन्यथो च्छूसनीभूयनष्टंस्यात् नतद्युक्तं देवकृतस्यान्यथात्वादर्शनादत्राह तदवद्यमिति हरेरिंद्रस्यज्ञानदुर्बलाअन्य थाज्ञानिनइत्यर्थः २२ रूपस्यावद्यत्वमाह यानीति खंडानिलिंगानिखंडंसमुदायः किमित्यतउक्तंलिंगमिति खंडपदस्यसमुदायवाचित्वेपीहास्मिन्प्रकरणेखंडशब्देनलिंगमुच्यते । अभ्यर्हितत्वादुभयोःसमुदायवाचित्वात् लिंगंशेफसिवेषेशेचिह्नेबुद्ध्यादिसंहताविरत्यभिधानात्संहतिः समुदायइत्यर्थः पापस्यवेषोवा अप्यक्षरसाम्यान्निर्ब्रूयादितिनिरुक्तिकारवचनादेकेनापिप्रकारेणविवक्षितार्थसिद्धिःस्फुटेति ॥ २३ ॥ सांप्रतंयेवर्तमानाःपाखंडाएतन्मूलाइत्याह एवमिति मतिरभि रुचिरभूदितिशेषः ॥ २४ ॥

---

१ सोश्वंरूपंचतद्धित्वातस्थौअंतर्हितःस्वराट् इत्यत्रइंद्रोभयेनान्तर्हितइतिभाति अतस्तात्पर्यानुरोधेनाह अत्रेति ।

SGF

कथंधर्मइति निरूप्य स्वधर्मांकिद्धेपषूपधर्मैषुस्वतोऽधर्मत्वेपिउपमितधर्मेषु तदुक्तं । धर्मोपमस्त्वधर्मोयैउपधर्मःसउच्यतइति चक्षुर्विषयंलक्षणमाह नग्नेति आदिशब्देनकंथानरकपालढक्का दिमत्त्वंगृह्यते । तेषामनुत्सादनमाह प्रायेणेति संगेनिमित्तमाह पेशलेष्वितिपेशलेष्वविचाररमणीयेषु । एतदपिकुतइत्यतउक्तं वाग्मिष्विति कुतर्कबृंहितशास्त्रवाचालेषु २५ एवमस्यामवस्थायां पृथुनाकृतःपराक्रमोनश्रूयतइतितत्राह तदभिज्ञायेति २६ विहिताहिंसांविनान्याहिंसोद्यमेतत्त्वविदोनिंद्रिताःकिंतत्राह ऋत्विजइति कुतोनयुक्तइत्यतउक्तं अप्रचोदितइति अविहितत्वात् २७ कथंतर्हितन्निग्रहोपायइतितत्रोच्यते वयमिति अयातयामोपहवैरन्यत्राऽप्रयुक्तत्वेनागतसारैर्मंत्रैः मरुत्वंतामिंद्रं । अर्थनाशनंयज्ञाख्यप्रयोजनद्रुहं । आहूयकिंकुर्वंतीतितत्रोच्यते तमग्नयइति तेत्तवाहितम् २८ नन्विंद्रेनिधनंगतेयज्ञएवनस्यात् मंत्राणांतद्विषयत्वात् मरुत्वंतंसख्यायहवामहइतिश्रुतेः अतोत्रधर्महरस्यवेदी कोपिनाभूदितिसभादोषंपरिहरतोब्रह्मणउक्तिप्रकारंवक्ति इतीति क्रतुपतिंपृथुं । अस्यपृथोःसंबंधिनः स्रुह्न्यस्तेहविः मंत्रशक्त्येतिशेषः २९ किमाकारः प्रतिषेधइतितत्राह नवध्यइति कुतोनवध्यइत्यतउक्तं यद्यज्ञइति यद्यस्माद्भगवतोहरेस्तनुर्यज्ञः अनेनेंद्र स्यावध्यत्वेकिमायातमत्राह यस्येति सुराइंद्राद्याहरेरिष्टास्तनवोविशेषसन्निधानयोग्यायस्मात्तस्मात्तस्येष्टतनुत्वादस्मिन्यज्ञेतमिंद्रंनजिघांसतइंद्रजिघांसयाहरेरप्रीत्यायज्ञएवनस्यादित्यर्थः पद्वा य

धर्मइत्युपधर्मेषुनग्नरक्तपटादिषु ॥ प्रायेणसज्जतेभ्रांत्यापेशलेषुचवाग्मिषु २५ तदभिज्ञायभगवान्पृथुःपृथुपराक्रमः ॥ इंद्रायकुपितोबाणमादत्तोद्य तकार्मुकः २६ तमृत्विजःशक्रवधाभिसंधितंविचक्ष्यदुःप्रेक्ष्यमसह्यरंहसा ॥ निवारयामासुरहोमहामतेनयुज्यतेत्रान्यवधोऽप्रचोदितः २७ वयंमरुत्वंत मिहार्थनाशनंह्वयामहेत्वच्छ्रवसाहतत्विषम् ॥ अयातयामोपहवैस्तमग्नयेप्रसह्यराजन्जुहवामतेऽहितम् २८ इत्यामंत्र्यक्रतुपतिंविदुरास्यर्त्विजोरुषा ॥ स्रुह्न्यस्तंजुह्वतोभ्येत्यस्वयंभूःप्रत्यषेधत २९ नवध्योभवतामिंद्रोयद्यज्ञोभगवत्तनुः ॥ तंजिघांसतयज्ञेनयस्येष्टास्तनवःसुराः ३० तदिदंपश्यतमहद्धर्म व्यतिकरंद्विजाः ॥ इंद्रेणानुष्ठितंराज्ञःकर्मैतद्विजिघांसया ३१ पृथुकीर्तिःपृथोभूयास्त्वंह्येकोनशतक्रतुः ॥ अलंतेक्रतुभिःशिष्टैर्यद्भवान्मोक्षधर्मवित् ॥ ३२ नैवात्मनेमहेंद्रायरोषमाहर्तुमर्हसि ॥ उभावपिहिभद्रंतेउत्तमश्लोकविग्रहौ ३३

ज्ञोभगवतइंद्रस्यतनुर्यदत्रेष्टाःसुराश्चयस्येंद्रस्यतनवस्तस्मादस्मिन्यज्ञेतंनाजिघांसतेति ३० भीषयन्निववक्ति तदिदमिति इंद्रेणशतक्रतुत्वहानिलक्षणभीत्यैतदनुष्ठितमितिध्वनयति इंद्रेणेति पृथोरा ज्ञएतत्कर्मजिघांसया ३१ इदानींपृथुमभिवदति पृथुकीर्तिरिति हेपृथोत्वमेकोनशतक्रतुरितिपृथुकीर्तिःप्रख्यातकीर्तिर्भूयाइत्यन्वयः हिशब्देनत्वमेवैवंविधकीर्तिमान्नान्यइतिस्फोटयति शक्रःशतक्रतुर्भू यादहंत्वदाज्ञयाएकोत्तरशतक्रतुर्भूयासमित्येवमभिसंधिःस्यादत्राह अलंतइति तेशिष्टैरेकाद्वित्रैःक्रतुभिरधिकःस्यामितिबुद्धिरलंतिष्ठतु अलंतुभूषणेशक्तौपर्याप्तौविनिवारणइतियादवःतवैतदेवभूषणमितिभा वेनाह यद्भवानिति मोक्षधर्मस्तारतम्यादिलक्षणस्तंवेत्तीतियद्यस्मात्तस्मान्निवृत्तिधर्मज्ञइतिवा अनेनपृथुजीवादिंद्रस्यात्युत्तमत्वंसूचितमितिज्ञायते ३२ फलितमाह नैवात्मनेति त्वत्सन्निहि तहरेर्विशेषनिवासहेतुत्वादात्मनइत्युक्तं एतदेवविशिनष्टि उभाविति उत्तमश्लोकस्यहरेर्विशेषस्थितिहेतुविग्रहोदेहोययोस्तौतुभ्यंभद्रमस्तुहरेःसन्निधानविशेषपात्रत्वात्अन्योन्यंजयपराजयानवक्तव्याः ३३

रोषशमनमेवकर्तुमुचितमन्यथाचिंतयादेहनाशस्तवस्यादित्याह मास्मिन्निति यद्दैवहतंकार्यंतत्कर्तुमुपायंध्यायतःपुंसोमनोतिकष्टमंधंतमोविशते तुशब्देनलोकद्वयेप्यनर्थपरंपरांसूचयति हेत्वर्थो
वा तस्मादस्मिन्कार्येचिंतांस्मृत्वामाकृथाइत्यन्वयः स्मृतेवृत्तेर्निषेधेस्मेतियादवः अथैतत्कुर्वित्याह निशामयेति निशामयशृणु ॥ ३४ ॥ किंतदत्राह क्रतुरिति नकेवलंक्रतोर्विरामेणपूर्यते
किंतुदेवेषुदुरवग्रहोविरमतां देवेषुकुपितेषुत्वद्राष्ट्रेवृष्टिविघातोपिस्यादतस्तद्दुरवग्रहविरामःकर्तव्यइत्यर्थः क्रतुविशेषणंवा कुपितदेवाविषयोदुष्टोवग्रहोयस्मात्सतथा । देवप्रीत्यासुवृष्टयर्थंपुरुषैर्यज्ञो
नुष्ठीयते तत्रदेवप्रतिहतेक्रतौक्रियमाणेतदप्रीत्याऽनावृष्ट्यांव्रीह्याद्यौषध्यनुत्पत्त्याऽन्नाभावेनप्राणिनांप्राणधारणोपायाभावेनदेहवियोगलक्षणोविनाशःस्यादिति व्याङ्परिभ्योरमइत्यनेनाविहितपर
स्मैपदप्रयोगंविहायस्वार्थहानिसूचनायाविरमतामित्यात्मनेपदप्रयोगः इतोपिक्रतुर्विरमत्वित्याह धर्मव्यतिकरइति यत्रयस्मिन्नश्वरमाश्वमेधेक्रियमाणेसतिइंद्रनिर्मितैःपाखंडैर्धर्मव्यतिकरोऽधर्मेधर्मबु
द्ध्याधर्मनाशःस्यात् ॥ ३५ ॥ धर्मव्यतिकरंप्रत्यक्षतोपिपश्येत्याह एभिरिति हारिभिर्वशीकरणसमर्थैर्ह्रियमाणंसंगृह्यमाणमेतत्कर्मविचक्ष्वपश्य कोसाविंद्रइत्यतआह यइति यज्ञंद्रुह्यतीतियज्ञध्रुक्
अश्वंमुष्णातीतिअश्वमुट्सइंद्रइत्यर्थः ॥ ३६ ॥ धर्मावनार्थमवतीर्णत्वाच्चतस्यनाशप्रयत्नेमहानतिक्रमइत्याशयेनाह भवानिति चशब्दोधर्मविरोधिपरिहारार्थमपीतिग्राह्यं नानासमयानुरूपं

मास्मिन्महाराजकथाःस्मचिंतांनिशामयास्मद्वचआदृतात्मा ॥ यद्ध्यायतोदैवहतंतुकर्तुंमनोतिकष्टंविशतेतमोंधम् ३४ क्रतुर्विरमतामेषदेवेषुदुरवग्रहः
धर्मव्यतिकरोयत्रपाखंडैरिंद्रनिर्मितैः ३५ एभिरिंद्रोपसंसृष्टैःपाखंडैर्हारिभिर्जनम् ॥ ह्रियमाणंविचक्ष्वैतंयस्तेयज्ञध्रुगश्वमुट् ३६ भवान्परित्रातुमिहावती
र्णोधर्मंचनानासमयानुरूपम् ॥ वेनापचारादवलुप्तमद्यतद्देहतोविष्णुकलासिवैन्य ३७ सत्वंविमृश्याभिभवंप्रजापतेःसंकल्पितंविश्वसृजोतिपीपृहि ॥
ऐंद्रींचमायामुपधर्ममातरंप्रचंडपाखंडपथंप्रभोजहि ३८ ॥ मैत्रेयउवाच ॥ इत्थंसलोकगुरुणासमादिष्टोविशांपतिः ॥ तथाचकृत्वावात्सल्यंमघोनापिचसं
दधे ३९ कृतावभृथस्नानायपृथवेभूरिकर्मणे ॥ वरान्ददुस्तेवरदायेतद्बर्हिषितर्पिताः ४० विप्राःसत्याशिषस्तुष्टाःश्रद्धयालब्धदक्षिणाः ॥ आशिषोयुयु
जुःक्षत्तरादिराजायसत्कृताः ४१ इतिश्रीभागवतेचतुर्थस्कंधेएकोनविंशोध्यायः १९

नानाविधशास्त्रानुसृतंवेनापचाराद्वेनाख्यापचारादवलुप्तंनष्टंतस्यवेनस्यदेहतः । अहंकइतिभ्रांतिर्माभूदित्यतस्तत्स्वरूपमुपदिशति विष्णुकलेति हेवैन्य । अनेनविष्णोःसत्त्वेनस्थितिहेतुत्वात्तत्कला
विशिष्टत्वात्तद्धर्मविरुद्धाचरणंनयुक्तमितिसूचयति ३७ ॥ उक्तोपसंहारमुखेनकर्तव्यंविधत्ते सत्वमिति यस्माद्धर्मावनार्थमवतीर्णोसितस्मात्सत्वंप्रजापतेरिंद्रस्याभिभवंत्वाचिकीर्षितंशतक्रतुत्वं
विमृश्यमदनुष्ठितेधर्मविरोधःस्यादितिमयातन्नकार्यमितिविचार्यविश्वसृजइंद्रस्यसंकल्पितं पृथुनाशतक्रतुत्वंनविधेयमितिनिरूपितमतिपीपृहिअत्यंतंपूरयेत्यन्वयः इंद्रस्यविरोधाकरणेऽभितःसर्वतोभ
वंशुभंभवतीतिविमृश्यविश्वसृजःप्रजापतेर्ममतवैकोनशतक्रतुत्वंसंकल्पितमतिपिपृहीतिवापृपालनपूरणयोरितिधातुः प्रचंडस्यपाखंडस्यपंथानमैंद्रीमिंद्रनिर्मितामुपधर्मस्यमातरंजनयित्रींमायांचजहि विशि
ष्टधर्माचरणेनविनाशयेत्यन्वयः ३८ सात्त्विकप्रधानत्वात्पृथुनाचतुर्मुखोक्तंगृहीतमित्याह इत्थमिति मघोनेंद्रेण ३९ यज्ञांतोवभृथस्तत्प्रभवमावभृथ्यंकृतमावभृथ्यंस्नानंयेनसतथोक्तस्तस्मै ४० एतदेवावि
शिनष्टि विप्राइति सत्याशिषोऽभीष्टसाधनसमर्थशुभवाक्यप्रबंधाःआशीर्दानलक्षणएवफलाविर्भावप्रदर्शनाययुयुजुरित्युक्तं फलनित्यसंबंधार्थंवा ददातेःकालांतरेपिफलप्राप्तिसंशयहेतुत्वसंभवात् ॥ ४१ ॥
इतिश्रीभागवतचतुर्थस्कंधेटीकायामेकोनविंशोध्यायः १९

अत्रोत्तमगुरुणास्वयोग्योपासनाविषयोहरिरुपदेष्टव्यइतिद्योतयितुंपृथुजीवायहरिणास्वात्मोपदिश्यतइतिप्रतिपादयितुमाह भगवानिति अपिशब्दस्यब्रह्मभाषणेनपुनःसमुच्चयःकारयितृत्वेनस्वामित्वेनयो
क्तृत्वेनाप्येकएवोच्यतइतिदर्शनायवैकुंठादिनामग्रहणं चशब्देनाग्रपूजयेष्टइतिसमुच्चिनोति जगदुत्पत्तौविश्लिष्टानांभूतानांसंयोजकत्वाद्वैकुंठः तदुक्तंशांतिपर्वणि मयासंश्लेषिताभूमिरद्भिर्व्योमचवायुना वा
युश्चतेजसासार्द्धंवैकुंठत्वंततोममेति अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवचइति १ हयमेधशततमस्येतिव्याख्येयं अन्यथा चरमाश्वमेधासिद्ध्यातदेकभंगाभावेनसर्वभंगापत्त्यात्वमेकोनशतक्रतुरित्यनुपप
न्नस्यादिममर्थंग्रंथांतरेसिद्धंहेत्यनेनसूचयति किमत्रकार्यंतदाज्ञापयेतितत्राह क्षमापयतइति आत्मानंत्वांक्षमापयतोमुष्येंद्रस्यक्षंतुमर्हसीत्यन्वयः आत्मानंमांक्षमापयतइतिवा त्वयिसन्निहित
त्वेनतवविरोधाचरणंममेतितत्तस्मान्ममक्षमापनंप्रार्थनमित्यर्थः २ अक्षमासाधुगुणोनस्यादित्याह सुधियइति तत्रनिमित्तमाह यर्हीति । कलेवरमनात्माजडमतएवानित्यंयर्हियस्मात्तस्मात्
३ इतोपिक्षमाकर्तव्येतिव्यतिरेकमुखेनाह पुरुषाइति ४ तर्हिकंतत्राह अतएवेति ५ शरीरासंगफलमाह असंसक्तइति असुनादेहेन । पुत्रादिगतममताबुद्धित्यागःफलमित्यर्थः ६ शरी
राद्यसक्तिरप्येकत्वादिगुणविशिष्टपरमात्मज्ञानिनएवसुदृढास्यादित्यतस्तत्स्वरूपंनिरूपयति एकइत्यादिना घटादिष्वेकत्वादिकमौपचारिकंहरौतुनिरुपचरितमितिद्योतनायवेदांतसिद्धगुणानुप
दिशति तथाहि एकोदेवइति नजायतेम्रियतेवाविपाश्चिदितिजननादिदोषाभावाच्छुद्धः । पूर्णःसत्यःशुद्धबुद्धस्वरूपोनित्यचिन्मयइति अत्रायंपुरुषःस्वयंज्योतिः । परंज्योतिरुपसंपद्येति केव

॥ मैत्रेयउवाच ॥ भगवांश्चापिवैकुंठःसाकंमघवताविभुः ॥ यज्ञैर्यज्ञपतिःस्विष्टोयज्ञभुक्तमभाषत १ ॥ श्रीभगवानुवाच ॥ एषतेह्यकार्षीद्भंगंहयमेधश
तस्यह ॥ क्षमापयतआत्मानममुष्यक्षंतुमर्हसि २ सुधियःसाधवोलोकेनरदेवनरोत्तम ॥ नाभिद्रुह्यंतिभूतेभ्योयर्हिनात्माकलेवरम् ३ पुरुषायदिमुह्यंति
त्वादृशादेवमायया ॥ श्रमएवपरंजातोदीर्घयावृद्धसेवया ४ अतएवइमंविद्वानविद्याकामकर्मभिः ॥ आरब्धमितिनैवास्मिन्प्रतिबुद्धोनसज्जते ५ असं
सक्तःशरीरेस्मिन्नमुनोत्पादितेगृहे ॥ अपत्येद्रविणेदारेकःकुर्यान्ममतांबुधः ६ एकःशुद्धःस्वयंज्योतिर्निर्गुणोसौगुणाश्रयः ॥ सर्वगोऽनावृतःसाक्षीनिरात्मा
नात्मनःपरः ७ देहाद्यपार्थास्तद्धर्मानस्युस्तद्द्रष्टुरात्मनः ॥ कैवल्यंतस्यवैधर्मःसुषुप्तंतन्निदर्शनम् ८

लोनिर्गुणश्चेति । विज्ञानमानंदंब्रह्मेति । अंतर्बहिश्चतत्सर्वमिति । अनावृतःस्वस्यान्येषामावृतएव । अन्येषामावृतोविष्णुःस्वस्यानावृतएवचेति । साक्षीचेति । निर्गतआत्मास्वामीयस्यसनिरा
त्मातस्यात्मान्योनविद्यतइति अनात्मनोगुणराशिरहिताज्जीवराशेःपरः । उत्तमःपुरुषस्त्वन्यइति ७ हरेःसर्वगतत्वेनजननादिदेहधर्माःसंभवंत्युतकथंदेहिपरत्वमत्राह देहादीति देहप्रभृतितद्धर्मादे
हधर्माजननादयस्तद्द्रष्टुस्तेषांधर्माणांद्रष्टुः । आत्मनःसर्वस्यजगतोऽतर्यामिणो हरेर्नस्युरित्यन्वयः आत्मासर्वस्यजगतस्तस्यात्मान्योनविद्यतइति कीदृशाअपार्थाःपुरुषार्थाख्यप्रयोजनशून्याः हरे
र्धर्मःकइतितत्राह कैवल्यमिति अनन्यसदृशत्वाच्चकेवलोसौहरिःस्मृतइतिवचनात् कैवल्यंनामान्यसादृश्यराहित्यंधर्मइत्यर्थः वाइत्येतत्त्वद्यत्स्वभावःकैवल्यमितिवाक्यंसूचयति ।नित्यनिर्दुःखत्वंचत
स्यधर्मस्तद्बुद्धावारोहयति सुषुप्तमिति तस्यधर्मस्यनिदर्शनंदृष्टांतः । सुषुप्तं शरीराभिमानाभावेनहृदयैकस्थितिःसुषुप्तिर्नामनहितदादुःखलेशोस्ति सतासोम्यतदासंपन्नोभवतीतिश्रुतेः सुषुप्तवचानि
र्दुःखोजाग्रद्स्वप्नप्रवृत्तिमानितिच आत्मावगम्यत्वंवातद्धर्मः अत्रापिसुषुप्तमुदाहरणंहिमानं तस्यापिजन्यज्ञानाभावेनाहमितिस्वरूपज्ञानवेद्यत्वात् । आत्मनैवावगम्यत्वाद्धरिरेषसुषुप्तवत् केवलत्वेनवि ४१
ज्ञेयोमुक्तिस्तद्वददुःखितेतिच ८

१ सुषुप्तवत्सुषुप्त्यवस्थापन्नजीववदात्मनैवावगम्यत्वाद्भगवान्सर्वदाकेवलत्वेन विज्ञेयइत्यर्थः । आत्यंतिकदुःखोच्छेदना यामुक्तिस्तद्वददुःखिता विष्णोर्योधर्मोऽदुःखतालक्षणः समुक्तिवदित्यर्थः ॥

SGDF Sri Gangeshwaran Digital Foundation

भगवद्धर्मकथनफलमाह यएवंसंतमिति यःपुरुषएवंसंतमात्मस्थंजीवांतर्यामिणमात्मानंवेदसप्रकृतिस्थोपितस्यशरीरगुणैःक्षुत्पिपासादिलक्षणैर्नोज्यतेनलिप्यते समवास्थितःसम्यगाहितचित्तत्वादिति हेतुगर्भविशेषणम् ९ मनःप्रसादस्यप्रथमसाधनत्वात्तत्संभवःकेनस्यादितितत्राह यइति १० मनःप्रसादफलमाह परित्यक्तगुणइति परितस्त्यक्ता गुणाविषयलक्षणायेनसतथासमस्थानंनिर्विकारं यद्ब्रह्मकैवल्यंस्वस्वयोग्यतानुरोधेनपूर्णतालक्षणंकेवलभावंतल्लक्षणंशांतिंमेप्रसादान्मुक्तिमश्नुतइत्यन्वयः ॥ ११ ॥ सम्यग्दर्शनइत्युक्तंदर्शनप्रकारंदर्शयति उदासीनमिवेति द्रव्यज्ञानक्रियात्मनांतामसवैकारिकतैजसरूपाणांपदार्थानामध्यक्षमधिपतिं । उदासीनमिवाक्लिष्टकारिणमेव । कूटस्थंनिर्विकारमात्मानंहरिंयोवेदसशोभनंदर्शनमेवाप्नोतीत्यन्वयः । हरिरक्लिष्टकारित्वादुदासीनइतीर्यतइति च १२ इदंचावश्यंज्ञेयमित्याह । भिन्नस्येति । द्रव्यक्रियाकारकचेतनानिसंततंव्याप्यतिष्ठतीतिद्रव्याद्यात्मातस्य जीवाद्भिन्नस्य । कालादिव्यवधानेनलीनंपदार्थजातंगमयतिज्ञापयतीतिलिंगंतस्यमनसोयःसत्त्वादिगुणानांप्रवाहःप्रवर्तनविशेषस्तंदृष्ट्वाज्ञात्वा । प्रत्यक्षासुसंपत्सुविपत्सुचप्राप्तासुनविक्रियंते जातोहंमृतोहमित्यादिविकारंनप्राप्नुवंति केसूरयः अत्रहेतुगर्भविशेषणमाह मयीति मयिबद्धंसौहृदंमहत्त्वबुद्धिलक्षणंप्रेमयैस्तेतथा तस्मादितिशेषः जीवाद्भिन्नस्यमनसोगुणाःसत्त्वादयोमताः तज्ज्ञात्वानविकुर्वीतस्वस्वरूपंमनस्तथेतिवचनात् उक्तएवार्थोनान्यइत्यर्थः १३ इदमपिमु

यएवंसंतमात्मानमात्मस्थंवेदपूरुषः ॥ नाज्यतेप्रकृतिस्थोपितद्गुणैःसमवस्थितः ९ यःस्वधर्मेणमांनित्यंनिराशीःश्रद्धयान्वितः ॥ भजतेशनकैस्तस्यमनोराजन्प्रसीदति १० परित्यक्तगुणःसम्यक्दर्शनोविशदाशयः ॥ शांतिंमेसमवस्थानंब्रह्मकैवल्यमश्नुते ११ उदासीनमिवाध्यक्षंद्रव्यज्ञानक्रियात्मनाम् कूटस्थमिममात्मानंयोवेदाप्नोतिशोभनम् १२भिन्नस्यलिंगस्यगुणप्रवाहंद्रव्यक्रियाकारकचेतनात्मनः॥ दृष्ट्वासुसंपत्सुविपत्सुसूरयोनविक्रियंतेमयिबद्धसौहृदाः १३ समःसमानोत्तममध्यमाधमःसुखेचदुःखेचजितेंद्रियाशयः ॥ मयोपक्लृप्ताखिलसत्त्वसंयुतोविधत्स्वधीराखिललोकरक्षणम् १४ श्रेयःप्रजापालनमेवराज्ञोयत्सांपरायेसुकृतंषष्ठमंशम् ॥ अतोन्यथाहृतपुण्यःप्रजानामरक्षिताकरहारोघमत्ति १५ एवंद्विजाग्र्यानुमतानुवृत्तोधर्मप्रजानांचसमोविता स्याः ॥ हस्वेनकालेनगृहोपयातान्द्रष्टासिसिद्धाननुरक्तलोकः १६ वरंचमत्कंचनमानवेंद्रवृणीष्वतेहंगुणशीलयंत्रितः ॥ नाहंमखैर्वैसुलभस्तपोभिर्योगेनवायःसमवृत्तवर्ती १७

किंसाधनमित्याह समइति सुखेचदुःखेचसमोनिर्विकारःसमानाःस्वस्वयोग्यतानुसारेणउत्तममध्यमाधमाश्रयस्यसतथोक्तःसमत्वेकारणमाह जितेति रक्षायांकिंबलइत्यतउक्तं मयेति मयाउपक्लृप्तः अखिलःपूर्णः सत्त्वगुणस्तेनसंयुतः १४ अपवर्गानुपयोगिप्रजापालनेनकिमित्याशंक्येदमेवतवश्रेयइत्याह श्रेयइति सांपरायेमोक्षे प्रजाकृतसुकृताद्विभज्यषष्ठमंशंसुकृतंलभतइतियस्मात्तस्मादिति विपक्षेबाधकमाह अतइति अतोन्यथेत्यस्यविवरणमरक्षितेति दुःखैनोव्यसनेष्वघमितियादवः १५ गुरूपदिष्टज्ञानस्यैवमुक्तिहेतुत्वात्किंप्रजारक्षणेनेत्याशंक्यतेनज्ञानोपदेष्टृसिद्धज्ञानिप्राप्तिरततःसंविद्यप्राप्यतइत्याह एवमिति १६ साक्षात्कृतोवैकुंठोपिकंचनवरंनाददादितिलोकापवादंपरिहरति वरंचेति अपवादभीरुर्वरंवृणीष्वेतिवक्तिनतुतद्गुणलुब्धइत्यतउक्तं तेहमिति मखादीनंतरेणगुणशीलयंत्रितइतिकिंविशेषोच्यतइतितत्राह नाहमिति योगेनाष्टांगलक्षणेन । समंतत्तद्वस्तुयोग्यतानुसृतंवृत्तंवर्तनंयेषांतेसमवृत्ताःपुरुषास्तेषुवर्तितुंशीलमस्येतिसमवृत्तवर्ती यद्यस्मात्तस्मादहंतवमखादिना सुलभःस्यांकिंतुगुर्वादिषुसंवृद्धभक्त्यैवेत्यर्थः १७

पृथुरात्मनिगुणग्राहित्वलक्षणंप्रकटयन्श्रीरमणोक्तमग्रहीदित्याह सइत्थमिति विश्वजित्समस्तजेता १८ विष्वक्सेनेनश्रीहारिणोक्तंगृहीतमितिशृंगग्राहिकइवदर्शयतीत्याह ॥ स्पृशंतामिति मनसा
पृथुसन्निहितराजरूपिणोहरेःपादयोः स्पृशंतं व्रीडितमसुरजनमोहायलज्जास्वभावंदर्शयंतं आयासदुःखव्रीडादीन्प्रायशःसुखिनोपितु नियमाद्दषिभूपेषुमोहायादर्शयन्सुराईतिवचनाद्व्रीडितत्वंने
त्यर्थः ॥ १९ ॥ विष्णोःपृथौप्रसादोद्रेकंदर्शयाति भगवानिति विश्वात्मापूर्णात्मा जगत्समस्तंविश्वंचनिखिलंपूर्णमुच्यतेइत्यभिधानाद्विश्वपदस्यपूर्णार्थत्वमेवांगीकर्तव्यं नतुप्रपंचात्मत्वं।
तस्यैबहुप्रमाणविरुद्धत्वात् । चंद्रोदयेसमुद्रवृद्धिवदनुदिनंसमुज्जिहानयाप्रवर्धमानयाभक्त्येत्यनेन अपक्वभक्तिमुक्तायेनतेषांहरिदर्शनं प्रायोभवतिदुःखस्यत्वभावःप्रायशोभवेत् इतिवचनात्सा
क्षात्कृतमधोक्षजंप्रत्यक्षंपश्यतः पृथोरपक्वभक्तिमुक्तेभ्योप्युत्तमत्वंदर्शयन्तत्साक्षात्कारेभक्तेरेवप्रयोजकत्वात्तच्छृंखलयाकीलितत्वान्मद्बंधनेसैवसंपादनीयेतिसूचयाति ॥ २० ॥ यात्राप्रयाणंप्र
स्थानमित्यभिधानं २१ नकेवलंपृथोर्भक्त्युद्रेकआंतरः अपितुबाह्योपिदृश्यतइतिभावेनाह सआदिराजइति। चक्षुर्वाग्व्यवहारोपरमेणपुनःकिमकारीतितत्राह हृदेति २२ किमनयातूष्णींव्यवस्थित्या
द्रष्टुस्तंद्रीहेतुभूतयेतिनिरूप्यहर्युक्तस्योत्तरंवक्तुमुपक्रमते अथेतिअश्रुकणान्नेत्रजलबिंदून् अतृप्तयोरलंबुद्धिमप्राप्तयोर्दृशोर्गोचरंविषयं उरगविद्विषःगरुडस्य २३ भगवदादिष्टंचेत्पृथुनागृहीतमथतदुक्ते

॥ मैत्रेयउवाच ॥ सइत्थंलोकगुरुणाविष्वक्सेनेनविश्वजित् ॥ अनुशासितआदेशंशिरसाजगृहेहरेः १८ स्पृशंतंपादयोःशीर्ष्णाव्रीडितंस्वेनकर्मणा ॥
शतक्रतुंपरिष्वज्यविद्वेषंविससर्जह १९ भगवानपिविश्वात्मापृथुनोपहूतार्हणः ॥ समुज्जिहानयाभक्त्यागृहीतचरणांबुजः २० प्रस्थानाभिमुखोप्येन
मनुग्रहविलंबितः ॥ पश्यन्पद्मपलाशाक्षोनप्रतस्थेसुहृत्सताम् २१ सआदिराजोरचितांजलिर्हरिंविलोकितुंनाशकदश्रुलोचनः ॥ नकिंचनोवाचसबा
ष्पविक्लवोहृदोपगुह्यामुमथाभ्यवस्थितः २२ अथाभिमृज्याश्रुकणान्विलोकयन्नतृप्तदृग्गोचरमाहपूरुषम् ॥ पदास्पृशंतंक्षितिमंसउन्नतेविन्यस्तहस्ता
ग्रमुरंगविद्विषः २३ ॥ पृथुरुवाच ॥ वरान्विभोत्वद्वरदेश्वराद्बुधःकथंवृणीतेगुणविक्रियात्मनाम् ॥ येनारकाणामपिसंतिदेहिनांतानीशकैवल्यपतेर्वृणी
तकः २४ नकामयेनाथतदप्यहंक्वचिन्नयत्रयुष्मच्चरणांबुजासवम् ॥ महत्तमांतर्हृदयान्मुखच्युतंविधत्स्वकर्णायुतमेषमेवरः २५ सउत्तमश्लोकमहन्मुख
च्युतोभवत्पदांभोजसुधाकणानिलः ॥ स्मृतिंपुनर्विस्मृततत्त्ववर्त्मनांकुयोगिनांनोवितरत्यलंवरैः २६

पुकस्योत्तरत्वेनवक्तव्यमस्यास्तीतिनपश्याम्यन्यदतःकिमाहेतितत्राह वरानिति जातावेकवचनमितिन्यायेनवरंवृणीष्वेत्युक्तं तत्रदेयत्वेनाभिमताः किमैहिकाउतपारत्रिकाः आद्येस्रक्चंदनवनिताद
योयदितर्हितत्रापिवदामीत्याह वरानिति सुलभत्वाद्वरणीयानभवंतीत्याह गुणेति गुणेषुविषयेषुविक्रियाविकारस्तेनयुक्तआत्मामनोयेषांतेतथातेषांनारकाणांनरकस्थानां अपिशब्देननरलोकेकिंव
क्तव्यमितिसूचयति वैश्रवणात्पुलकादानवत्कैवल्यपतेस्त्वदेतादृशवरादानंजुगुप्सितमित्यर्थः द्वितीयोप्यनेनैवप्रत्युक्तः सर्गसारूप्यादिलक्षणमोक्षभेदेनपारत्रिकाअपिद्विधाभिद्यंते तत्रकैवल्येपिन
ममाभिरुचिः किमुतस्वर्गादाविति २४ एवंतर्हितवकोभिप्रायइत्यतआह नकामयइति क्वचिदित्यनेनपुरुषार्थमात्रमाक्षिपाति तर्हिमयादेयंनास्तीत्यत्राह महत्तमेति महत्तमानामंतर्हृदयान्मुखद्वारेण
च्युतंनिःसृतंकर्णयोरमृतंतच्चरितलक्षणंविधत्स्वेत्यन्वयः अनेनसर्वदैतत्तुभ्यमस्त्वितितत्रत्वदनुग्रहएवकारणमन्यथानस्यादितिध्वनयति अभीष्टपूरयाति एषइति २५ हस्तप्राप्तमणित्यागवत्कै ४४
वल्यादिपुरुषार्थत्यागेनतवकिंफलितमितितत्राह सइति हेउत्तमश्लोक महतांमुखद्वारेणच्युतः ॥ २६ ॥

---

१ अमुमथाद्वस्थित इतिपाठान्तरम् ।

SGDF Sri Gangeshwari Digital Foundation

ननुमत्कथाभवताबहुशोश्राविअतोस्मादाग्रहाद्विरम्यान्यंवरंवरयेतिचेत्तत्राह यशइति हेसुश्रवःशोभनकीर्ते आर्याणां त्वत्तत्त्वज्ञानांसंगमेयदृच्छयाप्रसंगतः प्राप्तंतवयशः कथारूपेणग्रथितं भक्त्याउ
पशृणोतिसगुणज्ञःसारज्ञःपुरुषःपशुमज्ञमृतेकथमस्माद्विरमेदित्यन्वयः तत्रहेतुः श्रीरिति गुणस्त्वावृत्तिस्तत्संग्रहेच्छयायद्यशःप्रवत्रेइतियस्मात्तस्मात् अनेनयशःश्रवणमावृत्याक्रियतेचेदानंदाभिवृद्धिः
स्यादितिसूच्यते गुणस्त्वावृत्तिशब्दादिर्ज्येंद्रियामुख्यतंतुष्वितियादवः २७ अथतस्मादहंत्वामभजंभजामि तथाप्येकमेवपतिंस्पर्धेतेइत्येकपतिस्पृधौतयोस्त्वच्चरणैकतान योस्त्वत्पदैकनिष्ठयोरावयोः
कलिःकलहः कुतोनस्यात् अपिकिंनस्यादेव २८ जंतुस्वभावमपेक्ष्यकलिःस्यादितिशंकानतुभगवद्भक्तस्येत्यभिप्रेत्याह जंतोरिति हेजगदीशअखंडेश जगत्समस्तंविश्वंचानिखिलंपूर्णमुच्यते इतिच
जगत्यांराजप्रधानलोकेविद्यमानस्यजंतुसमूहस्यमिथोवैशसंहिंसालक्षणःकलहःस्यात् कलिस्वभावत्वात् । अत्रास्मद्विषयेसनस्यान्निमित्ताभावादित्युक्तं यत्कर्मणीति नोस्माकंकर्माणित्वत्पूजालक्षणे
यत्समीहितं शुभलक्षणंचेष्टितंतत्फल्गुअल्पमपिउरुमहत्करोषि । तत्रहेतुगर्भविशेषणमाह । दीनवत्सलइति । तत्राप्यल्पस्यापिशुभस्यफलप्रदानेनमहत्त्वकरणं नतुपरमाणुपरिमितस्यशुभस्यसुख
पर्वतीकरणम् । तथासतिवैषम्यापातःस्यात्तस्यनिर्दोषस्यासंभवादितिबोद्धव्यं इतोपिकलिर्नस्यादित्याह स्वएवेति स्वेस्वरूपभूतेधिष्ण्येमहिम्न्येव धिष्ण्यंतेजश्चसामर्थ्यंमहिमाधामवोच्यते इत्यभि
धानं स्वसुखार्थमन्यापेक्षांविनाभिरतस्यतववात्सल्यंविनातयाश्रियापिकिं अत्रापिवात्सल्यमेवकारणं येनयेनभक्त्यतिशयःक्रियतेतत्रतत्राधिकवात्सल्यंस्यादितितात्पर्यमवबोद्धव्यम् । जगत्यांमूल
प्रकृतौश्रियांजंतोरज्ञजनस्यवैशसंविषमबुद्धिलक्षणंस्यादेव । नतुपंडितस्य कुतःयद्यस्मात्नःकर्मणिश्रौतादिविषयेवैशसंयत्संज्ञपनलक्षणंतत्समीचीनमीहितंभक्तिपूर्वकत्वात् अल्पपुण्यस्यतवनमद्ध

यशःशिवंसुश्रवआर्यसंगमेयदृच्छयाचोपशृणोतितेसकृत् ॥ कथंगुणज्ञोविरमेद्विनापशुंश्रीर्यत्प्रवव्रेगुणसंग्रहेच्छया २७ अथाभजंत्वाखिलपूरुषोत्त
मंगुणालयंपद्मकरेवलालसः ॥ अप्यावयोरेकपतिस्पृधोःकलिर्नस्यात्कृतस्त्वच्चरणैकतानयोः २८ जंतोर्जगत्यांजगदीशवैशसंस्यादेवयत्कर्मणिनःसमी
हितम् ॥ करोषिफल्ग्वप्युरुदीनवत्सलःस्वएवधिष्ण्येभिरतस्यकिंतया २९

क्रियोग्यत्वमत्राह करोषीति यमेवैषवृणुतेतेनलभ्यइतिश्रुतेः भक्तिवशत्वद्योतनायफल्ग्वप्युरुकरोषीत्युक्तं अनेनहरौभक्तिरवश्यंकर्तव्येतिज्ञायते अन्यत्समामिति भजनक्रियामपिनशक्नुमःकर्तुंत्वत्प्रसादा
तिरेकेणेत्याह । जगज्जगत्यामिति जगताजंगमेनोपलक्षणमेतत् स्थावरेणापियुक्तायांजगत्यां लोके । नोस्माभिःकर्मणिविषयेयत्समीहितंस्यात्तद्वैशसमेवंहिंसारूपमेवातएवफल्गुतुच्छफलं ततःस्वत
वृप्तयेमालमित्यर्थः अथभगवानुरुपारिपूर्णंकरोति अत्रहेतुगर्भविशेषणं हेदीनवत्सलेति हेत्वंतरमाह स्वएवेति परिपूर्णानंदरूपेभिरतस्य । तयाभजनक्रिययाकिंभृत्यवात्सल्यादुरुकरोतीत्यर्थः
अथवाअप्येकपतिस्पृधोःकलिःस्यादितिसंदेहःकुतःपूर्वमधुनातवमयिपक्षपातात्कलिरित्याह जगज्जगत्यामिति जगतोजंगमस्थावरलक्षणस्यप्राणिसमूहस्यजगत्याधारभूतामूलप्रकृतिर्लक्ष्मीस्तस्यां
वैशसंपीडास्यादेव हेजगदीश । कुतःयद्यस्मादस्माकंकर्माणिश्रौतादीफल्ग्वप्युरुकरोति नतथातयाकृतम् हेदीनवत्सल । अथवाकिमिदमाश्चर्यमित्याह स्वएवेति तयाश्रियाकिंप्रयोजनम् ।
कामिनामुपकारिण्येत्यर्थः जगज्जगत्यामित्येकपदेपिलक्ष्म्यामित्यर्थः । अथवाजगतोहिंसारूपत्वात्तदंतःपातीकथमहंत्वांभजामित्वत्प्रसादंविनेत्याह जगदिति हेजगदीश जगत्यांलोकेयज्जगत्प्रा
णिसमूहःतद्वैशसमेवहिंसाप्रकृतिरेव । तथापितदंतःपातिभिरस्माभिः कर्माणियत्समीहितंस्यात्तत्फल्गुहिंसारूपमप्युर्वहिंसारूपकमपिकरोतिभवान् हेदीनवत्सल । किमर्थमेवंपक्षपातेनकरोति नस्वेधि
ष्ण्येभिरतस्यतयाअहिंसयातवाकिं । केवलंमामुद्धर्तुमेवेतिभावइतिकेचिद्व्याचक्षते तदसत् पदानांविवक्षितार्थावाचकत्वेनपाठसंप्रदायाभावेनप्रमाणविरोधेनप्रेक्षावद्भिरुपेक्षणीयत्वात्पूर्वापराविरोधाच्च
लक्ष्म्याहरेर्भक्तेषुपक्षपातकथनस्यस्वानुभवविरुद्धत्वाच्च २९

अस्मिन्नर्थेसाधुसंमतिमाह भजंतीति अथान्यच्चास्मिन्नर्थेप्रमाणमस्तीति । किंतदिति तदुच्यते अतएवभक्तवात्सल्यादेवसाधवःसज्जनास्त्वांभजंति कंगुणमुपसहृत्योतितत्रोक्तं । व्युदस्तेति
मायागुणानांविभ्रमोदयोविलासोदयोयःसनिरस्तोयेमसतथातंसंसारोच्छेदोपिनस्वतएषामित्यभिप्रेत्याह भवत्पदेति अन्यत्कर्मादिकं ३० विमुक्तिमुख्यनिमित्तमंघ्रिस्मरणादन्यन्नास्तीतियद्यस्मात्त
स्माद्भजंतंप्रतिवरंवृणीष्वेतिवाणीजगन्मोहकरीत्याह मन्येगिरामिति तदुपपादयति वाचेति तदस्येदंवावातंत्यानामभिर्दामभिःसर्वासितामितिश्रुतिः षिञ्बंधने यद्यसितोबंधनरहितस्तर्हिपुनः
शश्वत्कथंकर्मकरोतीत्यन्वयः ३१ इतोपिमोहितइत्याह त्वन्माययेतिअबुधोयोजनः ऋतात्मनःसत्यात्मनोहरेःसकाशादन्यत्स्वर्गादिकमाशास्तइतियत्तस्मादेषत्वन्माययाखंडितस्त्वदुपास्तेर्वियोजि
तइत्यर्थः अस्यामवस्थायांबहुप्रजल्पात्किमिदमेवप्रार्थयइत्याह यथेति ३२ पृथूक्तंश्रीपतिमनसिसंविष्टमितिभावेनहरेस्तदुक्तिप्रशंसाप्रकारमाह साध्विति साधूचितं । इदमात्यंतिकभक्तलक्षण
मितिभावेनाह स्वर्गेति नरकान्नरकांतरप्राप्तिसमयेकिंचिन्निवृत्तिःसमत्वं ३३ मद्भक्तस्यरोषत्यागएवमत्प्रीतिसाधनमित्याह प्रीतइति ३४ प्रसिवचनंचेत्समाप्तंपरंकिमकारीहार्रणेतितत्राह इतीति

भजंत्यथत्वामतएवसाधवोव्युदस्तमायागुणविभ्रमोदयम् ॥ भवत्पदानुस्मरणादृतेसतांनिमित्तमन्यद्भगवन्नविद्महे ३० मन्येगिरंतेजगतांविमोहिनीं
वरंवृणीष्वेतिभजंतमात्थयत् ॥ वाचानुतंत्यायदितेजनोऽसितःकथंपुनःकर्मकरोतिमोहितः ३१ त्वन्माययाद्धाजगदीशखंडितोयदन्यदाशास्तऋता
त्मनोबुधः ॥ यथाचरेद्बालहितंपितास्वयंतथात्वमेवार्हसिनःसमीहितुम् ३२ ॥ श्रीभगवानुवाच ॥ साधुतेवसितंराजन्नाशास्तेनयदाशिषः ॥ स्वर्गाप
वर्गनरकान्समंपश्यतिमत्परः ३३ प्रीतोहंतेमहाराजरोषंदुस्त्यजमत्यजः ॥ श्रद्दधानोमदादेशंतन्मह्यंपरमार्हणम् ३४ मैत्रेयउवाच ॥ इतिवैन्यस्यराजर्षेः
प्रतिनंद्यार्थवद्वचः ॥ पूजितोनुगृहीत्वैनंगंतुंचक्रेच्युतोमतिम् ३५ देवर्षिपितृगंधर्वसिद्धचारणपन्नगाः ॥ किन्नराप्सरसोमर्त्याःखगाभूतान्यनेकशः
३६ यज्ञेश्वरधियाराज्ञावाग्वित्तांजलिभक्तितः ॥ सभाजिताययुःसर्वेवैकुंठानुगतास्ततः ३७ भगवानपिराजर्षेःसोपाध्यायस्यपश्यतः ॥ हरन्निवमनो
मुष्यस्वधामप्रत्यगात्प्रभुः ३८ अदृष्टायनमस्कृत्यस्वस्यसंदर्शितात्मने ॥ वासुदेवायदेवानांदेवायस्वपुरंययौ ३९ इतिश्रीभागवतेमहापुराणेचतुर्थ
स्कंधेविंशोध्यायः ॥ २० ॥ मैत्रेयउवाच ॥ मौक्तिकैःकुसुमस्रग्भिर्दुकूलैःस्वर्णतोरणैः ॥ महासुरभिभिर्धूपैर्मंडितंतत्रतत्रवै १ चंदनागुरुतोयार्द्ररथ्याच
त्वरमार्गवत् ॥ पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिभिरर्चितम् २ सवृंतैःकदलीस्तंभैःपूगपोतैःपरिष्कृतम् ॥ तरुपल्लवमालाभिःसर्वतःसमलंकृतम् ३

३५ हरिमनुगत्तादेवादयःकिंचक्रुरत्राह देवेति ३६ सर्वप्राणिषुयज्ञेश्वरोहरिरवस्थितः तदुक्तं भूतेषुहरिरित्येवहर्यर्पणधियातथा सर्वभूतेषुचहरेःपूजाकार्यात्मवेदिभिरितिवचनात् इदंसर्वंतदर्पण
मस्त्वितिधीर्यज्ञेश्वरधीस्तयासभाजिताःसंभाविताः ३७ गंतुंमनएवकृतंनतुगतमितिशंकामाभूदित्याह भगवानपीति ३८ राज्ञोयज्ञशालातःस्वपुरप्रस्थानप्रकारमाह अदृष्टायेति अदृष्टायचक्षुषो
रविषयाय स्वस्यसंदर्शितात्मनेसाक्षात्कारितस्वरूपाय ३९ इतिचतुर्थस्कंधेविंशतितमोध्यायः ॥ २० ॥ ॥ ७ ॥ देवादीन्विनाहरेर्ब्राह्मणाःसन्निधानपात्रमित्येतत्प्रतिपाद्यतेऽस्मिन्नध्याये ४५
तत्रानंतरातीताध्यायेपृथुःपुरंययावित्युक्तं तत्पुरंवर्णयति मौक्तिकैरित्यादिना १ पिष्टचंदनागुरुमिश्रतोयैरार्द्रारथ्याचत्वरमार्गायस्मिंस्तत्तथोक्तं गोमयतोयैःआर्चीभिर्दीपज्वालाभिः २
पूगपोतैःक्रमुकपुष्पैःपरिष्कृतमलंकृतम् ३

SGDF Sri Gurgeshwara Digital Foundation

संभृतानिसंपादितानिअशेषाणिमंगलानिदध्यादीनितैश्चयुक्ताः मृजुसंशुद्धावितिधातुः ४ भूयःपुरप्रवेशानंतरं गतस्मयोगर्वरहितः ५ प्रियानभीष्टान्वरान्प्रददातीतिप्रियवरप्रदः ६ प्रश्नमंकुरयन्नुपसं हरति सएवमिति भूयांसिमहांति स्फीतंपुष्टंलोकेनिधाय ७ गुणवद्भिःपुरुषैःसभाजितंपूजितं ८ किमाहेतितत्राह सोभिषिक्तइति सपृथुर्यत्कर्माकरोत्तन्मेवदेत्यन्वयः ॥ लब्धान्यशेषैःसुरैःकृतान्यर्हणानि येनसतथोक्तः ९ वक्तव्यत्वेगुणमाह कोन्वस्येति देवेभ्यंऋषयोभूपाश्चोच्यंतेशक्तिमत्तया क्वचित्क्वचित्तुमोहार्थंकादाचित्कात्तुहेतुतइतिवचनाद्युक्तंसपालाइति १० श्रद्धावतःश्रोतुंयस्मिञ्छ्रद्धाविदुषातदेववक्तव्यमितिभावयन्मैत्रेयस्तत्रोत्तरत्वेनतत्कथामाह गंगेति यावद्भिर्भोगैर्देहस्थितिःस्यात्तानेवनाधिकानित्येवकारार्थः तानपिपुण्यजिहासयापुण्यक्षयाभिप्रायेण नसुखार्थम् ११ सर्वत्रेत्युक्तंसंकोचयति अन्यत्रेति अच्युतगोत्रतोवैष्णवकुलात् गोत्रंनाम्निकुलेखलइतियादवः १२ ज्ञानिनःप्रारब्धकर्मभोगस्यनियतत्वेनसिद्धत्वान्नैतद्वर्णनमत्रापेक्षितमन्यत्किंचिच्छ्राव्यमस्तिचेद्वक्तव्यमितितत्राह एकदेति

प्रजास्तंदीपबलिभिःसंभृताशेषमंगलैः ॥ अभीयुर्मृष्टकन्याश्चमृष्टकुंडलमंडिताः ४ शंखदुंदुभिघोषेणब्रह्मघोषेणचर्त्विजाम् ॥ विवेशभवनंवीरःस्तूयमानोगतस्मयः ५ पूजितःपूजयामासतत्रतत्रमहायशाः ॥ पौरान्जानपदांस्तांस्तान्प्रीतःप्रियवरप्रदः ६ सएवमादीन्यनवद्यचेष्टितःकर्माणिभूयांसिमहन्महत्तमः ॥ कुर्वन्शशासावनिमंडलंयशःस्फीतंनिधायारुरुहेपरंपदम् ७ ॥ सूतउवाच ॥ श्रुत्वादिराजस्ययशोविजृंभितंगुणैरशेषैर्गुणवत्सभाजितम् ॥ क्षत्तामहाभागवतःसदस्पतेकौषारविंप्राहगुरुंसमर्चयन् ८ ॥ विदुरउवाच ॥ सोभिषिक्तःपृथुर्विप्रैर्लब्धाशेषसुरार्हणः ॥ बिभ्रत्सवैष्णवंतेजोबाह्वोर्याभ्यांदुदोहगाम् ९ कोन्वस्यकीर्तिंनश्टणोत्यभिज्ञोयद्विक्रमोच्छिष्टमशेषभूपाः ॥ लोकाःसपालाउपजीवंतिकाममद्यापितन्मेवदकर्मशुद्धम् १० ॥ मैत्रेयउवाच ॥ गंगायमुनयोर्नद्योरंतराक्षेत्रमावसन् ॥ आरब्धानेवबुभुजेभोगान्पुण्यजिहासया ११ सर्वत्रास्खलितादेशःसप्तद्वीपैकदंडधृक् ॥ अन्यत्रब्राह्मणकुलादन्यत्राच्युतगोत्रतः १२ एकदासीन्महासत्रदीक्षातत्रादिवौकसाम् ॥ समाजोब्रह्मर्षीणांचदेवर्षीणांचसत्तम १३ तस्मिन्नर्हत्सुसर्वेषुस्वर्चितेषुयथार्हतः ॥ उत्थितःसदसोमध्येताराणामुडुराडिव १४ प्रांशुःपीनायतभुजोगौरःकंजारुणेक्षणः ॥ सुनासःसुमुखःसौम्यःपीनांसःसुद्विजःस्मितः १५ व्यूढवक्षाबृहच्छ्रोणिर्वलीवल्गुतरोदरः ॥ आवर्तनाभिरोजस्वीकांचनोरुरुदग्रवाक् १६ सूक्ष्मवक्रासितस्निग्धमूर्धजःकंबुकंधरः ॥ महाधनेदुकूलाग्र्येपरिधायोपधायच १७

यज्ञभेदेसदादानेसत्रमाच्छादनेवने इत्यभिधानात् दीक्षेतिविशेषणाद्दीक्षायज्ञइत्यर्थः समाजःसंमेलनं १३ दानार्थंभोजनार्थंवामिथोनिरीक्षणार्थंचेतस्ततःसंगच्छंतेजनाःकिमत्रचोद्यमिति तत्राह तस्मिन्निति तस्मिन्समाजेऽर्हत्सुसंमान्येषु अर्हतौजिनसंमान्याविितियादवः उडुराट्चंद्रःसराजासमंततश्चतुर्दिशमुपविष्टानैक्षतेतिषष्ठश्लोकेनान्वयोवेदितव्यः १४ कथंभूतइतितल्लक्षणवाक्ति प्रांशुमित्यादिना गौरोनिर्मलः । यद्वा गौरोरुणेसितेपीतइतिवचनात् गौरशब्दाक्षिप्तवर्णविशेषविशिष्टत्वंवक्ति कंजारुणेक्षणइत्यादिना । सौम्यःसुंदरःविप्रप्रियोवा । सोमयोग्योवा । द्विजादंताः ॥ १५ ॥ व्यूढवक्षाउन्नतवक्षाः । वलीभीरेखाभिः अतिशयेनवल्गुसुंदरमुदरंयस्यसतथा उदग्रवागुन्नतवाक् १६ सूक्ष्माश्चवक्राश्चासितानीलाश्चस्निग्धाश्चमूर्धजाःकेशायस्यसतथा । कंबुवत्त्रिरेखांकितवृत्तशंखवत्कंधरायस्यसतथा उपधायोत्तरीकृत्य १७

---

१ अस्मिन्श्लोकेपृथोर्देवेभ्योप्यतिशायितशक्तिमत्त्वामितिभातीत्यतस्तदुक्तेराभिप्रायंप्रमाणेनाह ॥ दी०

SGDF Sri Gangeshwari Digital Foundation

नियमेयज्ञनियमविषये १८ किमर्थंनिरीक्षणमितिआविदुषांचित्तव्याकुलतांपरिहराति ऊचिवानिति चित्राणिपदानियस्मिंस्तत्तथा श्लक्ष्णंमधुरंहृद्यंहृदयप्रियं । गूढमर्थतोगंभीरं अविक्लवम
कातरमस्खलितमितियावत् वचनमितिशेषः ॥ १९ ॥ किमनेनाचित्तव्याकुलतापरिहृतेतितत्राह सभ्याइति वोभद्रमस्त्वित्युक्तंप्रथमंचित्तव्याकुलतापरिहारायेतिज्ञातव्यं धर्मजिज्ञासुभिर्ज्ञातुकामैः
पुरुषैःस्वमनीषितंसत्सुयोग्येष्वावेद्यं २० किंतत्स्वमनीषितमित्यतउक्तं अहमिति दंडोस्त्रीशासनेराज्ञांहिंसायांलकुटेगुडइत्यभिधानात् तत्तद्योग्येषुतंतंदंडंधारयतीतिदंडधरः धात्राहरिणा
धातुशब्दार्थंलक्षयति रक्षितेत्यादिना स्थापितास्थापयिता २१ तस्यमेकामान्संदुहंतीतिकामसंदोहाःकर्मण्यण्प्रत्ययः कामानांसंदोहायेष्वितिवा लोकाःस्युरितिब्रह्मवादिनः आहुरितियद्य
स्मात्तस्मादेतत्फलमन्वीक्ष्याहंधात्रेहप्रजापालनादौयोजितइत्यन्वयः तदनुध्यानात्तस्यप्रजापालनस्यानुष्ठानादित्यनुवादः श्रीनारायणप्रसादेनभाविनोलोकाःकथंप्रजापालनेनस्युरितितत्राह यस्ये
ति ॥ २२ ॥ व्यतिरेकमाह यउद्धरेदिति भागंषष्ठांशंपुण्यं २३ इदानींप्रजाःप्रत्याह तत्प्रजेति यस्मात्प्रजानामरक्षणेप्रत्यवायोभवतितत्तस्मात्हेप्रजाः यद्यनसूयवोयूयंअधोक्षजेहरौधियंकुरुत
तर्हिमेनोनुग्रहःकृतोभवेदित्यन्वयः तवानेनकिंतत्राह भर्तृपिंडार्थमिति भर्तुर्ममषष्ठांशलक्षणसुकृतात्व्यप्रयोजनाय नकेवलंममयुष्माकमप्यस्तिप्रयोजनमित्याह स्वार्थमिति ॥ २४ ॥ सभ्या

व्यंजिताशेषगात्रश्रीर्नियमेन्यस्तभूषणः ॥ कृष्णाजिनधरःश्रीमान्कुशपाणिःकृतोचितः ॥ शिशिरस्निग्धताराक्षस्तानैक्षतसमंततः १८ ऊचिवानिदमुर्वी
शःसदस्यान्हर्षयन्निव ॥ चारुचित्रपदंश्लक्ष्णंहृद्यंगूढमविक्लवम् १९ ॥ पृथुरुवाच ॥ सभ्याःशृणुतभद्रंवःसाधवोयइहागताः ॥ सत्सुजिज्ञासुभिर्धर्ममावे
द्यंस्वमनीषितम् २० अहंदंडधरोधात्राप्रजानामिहयोजितः ॥ रक्षितावृत्तिदस्तेषुसेतुषुस्थापितापृथक् २१ तस्यमेतदनुष्ठानाद्यदाहुर्ब्रह्मवादिनः ॥ लो
काःस्युःकामसंदोहायस्यतुष्यतिदिष्टदृक् २२ यउद्धरेत्करंराजाप्रजाधर्मेष्वशिक्षयन् ॥ प्रजानांशमलंभुंक्तेभागंचस्वंजहातिसः २३ तत्प्रजाभर्तृपिंडार्थं
स्वार्थमप्यनसूयवः ॥ कुरुताधोक्षजधियंतर्हिमेनुग्रहःकृतः २४ यूयंतदनुमोदध्वंपितृदेवर्षयोमलाः ॥ कर्तुःशास्तुरनुज्ञातुस्तुल्यंयत्प्रेत्यतत्फलम्
२५ अस्तियज्ञपतिर्नामकेषांचिदिहसत्तमाः ॥ इहामुत्रचलक्ष्यंतेज्योत्स्नावत्यःक्वचिद्भुवः २६ मनोरुत्तानपादस्यध्रुवस्यापिमहीपतेः ॥ प्रि
यव्रतस्यराजर्षेरंगस्यास्मत्पितुःपितुः २७

नुद्दिश्याह यूयमिति तेनकिमस्माकंफलमित्यतउक्तं अनुज्ञातुरिति अनुज्ञात्रादीनांशास्त्रेषुयत्फलमुक्तंतत्तदनुज्ञानुसारिफलंस्यादित्यभिप्रायेणतुल्यमित्युक्तं नतुकर्त्रनुज्ञात्रोस्तुल्यफलत्वंस्यादन्य
थाकृतहान्यादिदोषापत्तिरिति २५ ननुयद्यधोक्षजसद्भावंप्रमाणंस्यात्तर्हितद्धियंकुरुतेतिविधातुंयुक्तंतदेवकुतइतितत्राह अस्तीति यद्दृष्टंतदेवसत् यददृष्टंतदेवासदितिवादिनोपेक्ष्यकेषांचिदित्युक्तं
केषांचिद्व्यासादीनांमहात्मनांपक्षेयज्ञपतिर्नामविष्णुरस्तीत्यन्वयः यज्ञोपयज्ञपतिर्यज्वेत्यादिस्मृतेः श्रीनारायणस्यप्रसादेनप्राप्यालोकास्तेनानियतादेवताश्चसंतीत्येतदेकोक्त्याह इहेति इहमनुष्यलो ४६
केतच्छरीरेच । अमुत्रस्वर्गादौ । ज्योत्स्नावत्यःप्रकाशभूयिष्ठाभुवःस्थानविशेषाःइंद्रियादिप्रेरकत्वेनभवनाद्भुवोदेवताश्चदृश्यंते । प्रमाणतइतिशेषः । प्रकाशवद्भुवोदेवामानुषाश्चापिकेचनोतिवचनात् दु
र्लभत्वात्क्वचिदित्युक्तं इहेत्यनेनबिलस्वर्गंलक्षयति । सुखहेतुत्वेनचंद्रिकयातुल्यरत्नप्रकाशेनप्रकाशितत्वात्ज्योत्स्नावत्यइति २६ केषांचिदितिसूचितांस्तान्नामतोनिर्दिशति मनोरिति अस्मत्पि
तुर्वेनस्य पितुः । २७ ।

अजस्यब्रह्मणः। गदाभृतोहरेः। कृत्यंपूजालक्षणंकार्यमस्ति २८ स्वर्गादेरन्याधीनतयातत्प्राप्त्यर्थंतदुपाधानस्यैवकर्तव्यत्वेनतत्रकिंगदाभृतःकृत्येनेतितत्राह राज्येति राज्यादेःप्रायेणान्याधीनत्वमंतरेणैवैकात्मनःसमस्तात्प्रधानस्यहरेर्हेतुताकारणत्वं । एकात्माहारिरुद्दिष्टःप्रधानत्वात्समस्ततइतिवचनात् । ज्ञानादेवस्वर्गोज्ञानादेवापवर्गइतिश्रुतेः स्वर्गादिप्राप्त्यर्थमपिश्रीनारायणस्यपूजाज्ञानजनित्रीकार्येत्याशयः ननुप्रायःशब्दस्यप्राचुर्यार्थावधारणार्थत्वेनिषिध्यावशिष्टाल्पनिषेधःकथंक्रियतेइतिचेन्नतस्यावधारणाक्षेपेप्रयोगदर्शनात् तदुक्तं प्रायःपदंस्यात्प्राचुर्येचाक्षेपात्मावधारणे अर्थतोवधृतिःक्षेपोसुखाक्षेपोवधारणमिति एकश्चेतनोजीवएवराज्यादेःकारणमधिकृतत्वादितिचेन्न विपक्षाविरोधात् अनाम्नायत्वाच्च एकात्माहारिरुद्दिष्टःप्रधानत्वात्समस्ततइति । एतत्समाख्यानस्मृतिविरोधाच्च केषांचिदित्यनेनकेषांचिन्नास्तीत्युक्तं नास्तिकानाह दौहित्रादीनिति मृत्योर्दौहित्रोदुहितुःपुत्रोवेनः २९ यज्ञपतिस्तुराज्यादेर्हेतुर्येनविधिनाफलसिद्धिःस्यात्तंप्रकारमुपदिशेत्यतआह यत्पादेति अत्रगंगादृष्टांतोबुद्ध्यवतारार्थं नतुगंगाकृष्णपादसेवयोःफलसाम्याभिप्रायेण कृष्णपादसेवासाक्षाज्ज्ञानसाध्यप्रसादसाधनं गंगासेवातुशुद्धांतःकरणस्यभगवत्सेवामुत्पाद्यतत्साधनमितिपरंपरयोपसंगच्छते ३० नष्टमनोमलस्यकिमात्यंतिकफलमत्राह विनिर्धुतेति निरस्तमनोदोषस्यपुंसोविषयासंगलक्षणवैराग्याज्जातायाभक्तेर्विज्ञानंभवति तदेवविशेषवीर्यमस्यास्तीतिअसंगविज्ञानविशेषवीर्यवान् यस्यांघ्रिमूलेकृताश्रयः विज्ञानात्पूर्वंयथासंसारमाप्नोति तथानाप्नोतीत्यस्मिन्नर्थेपुनरिति संसारक्लेशप्रतिपत्तिमपिनाप्नोतिकिंपुनस्तत्प्राप्तिरित्यतःप्रपद्यत

ईदृशानामथान्येषामजस्यचभवस्यच ॥ प्रह्लादस्यबलेश्चापिकृत्यमस्तिगदाभृतः २८ राज्यस्वर्गापवर्गाणांप्रायेणैकात्महेतुता ॥ दौहित्रादीनृतेमृत्योःशोच्यान्धर्मविमोहितान् २९ यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितंमलंधियः ॥ सद्यःक्षिणोत्यन्वहमेधतीसतीयथापदांगुष्ठविनिःसृतासरिव् ३० विनिर्धुताशेषमनोमलःपुमानसंगविज्ञानविशेषवीर्यवान् ॥ यदंघ्रिमूलेकृतकेतनःपुनर्नसंसृतिंक्लेशवहांप्रपद्यते ३१ तमेवयूयंभजतात्मवृत्तिभिर्मनोवचःकायगुणैःस्वकर्मभिः ॥ अमायिनःकामदुघांघ्रिपंकजंयथाधिकारावसितार्थसिद्धये ३२ असाविहानेकगुणाध्वरैःसतापृथग्विधैर्द्रव्यगुणक्रियोक्तिभिः ॥ संपद्यतेर्थाशयलिंगनामभिर्विशुद्धविज्ञानघनस्वरूपतः ३३

इति ३१ एवंतत्सेवाफलमुक्त्वातदुपास्तिंविधत्ते तमेवेति फलस्यानुभवसिद्धत्वादन्ययोगव्यवच्छेदार्थएवशब्दः भजतैवेत्ययोगव्यवच्छेदोवा आत्मनिहरावेववृत्तिर्वर्तनंयेषांतेतथातैः अयमेवमनआदीनांगुणः । यद्विष्णुविषयत्वेनचरणं । स्वकर्मभिःस्वस्यविहिताश्रमादिकर्मभिः । उक्तमेतत्सर्वमप्रयोजकंव्याजिनइत्यतउक्तममायिनइति फलपूर्वविधानेक्षिप्रप्रवृत्तिर्भवतीतिभावेनोक्तं कामदुघेति वेदानुकूलमितिद्योतनायदुघेति इदमेवदर्शयन्नित्थंभावमाह यथेति अथातआनंदस्यमीमांसाभवतीत्यादिश्रुतौमनुष्योत्तममारभ्यब्रह्मपर्यंतंयोग्यमधिकारोयोग्यतालक्षणस्तास्मिन्नवसितानिर्णीता अर्थसिद्धिरानंदप्राप्तिर्यातदर्थमित्यर्थः । अर्थःमोक्षः । अर्थःस्याद्विषयेमोक्षेशब्दवाच्येप्रयोजनइतियादवः ३२ स्वकर्मभिरित्युक्तकर्मकरणप्रकारमाह असाविति आत्मावाइदमेकएवाग्रआसीदित्यादिश्रुतिसिद्धोयोऽसौश्रीनारायणइहजीवराशौसतापुंसानुष्ठितैरनेकगुणाध्वरैःसंपद्यतेप्राप्यतइत्यन्वयः तेचाधिकारभेदात्बहवइत्याशयेनाह पृथगिति षोडशादिभेदभिन्नैरनेकगुणत्वंव्यनक्ति द्रव्येति द्रव्यंपुरोडाशादिकल्पोक्तगुणविशिष्टं द्रव्यंगुणानामाधारइतियादवः । गुणोविशिष्टमातापितृजन्यत्वादि क्रियाऋत्विग्व्यापारः । इंद्रायाग्रयइत्याद्युक्तयोयेषुतेतथातैः । अर्थेषुयजमानेषु । आशयोंतःकरणंयेषांतेदेवाअर्थाशयास्तेषांलिंगानिवज्रधरत्वादीनींद्रादिनामानिचयेषुतेतथातैःयद्वार्थाशयत्वंमुक्ताश्रयत्वंचचक्रधरादिलिंगंनारायणादिनामचयेषुते

१ आक्षेपोऽन्ययोगव्यवच्छेदस्तद्रूपावधारणे

तथातैः कथंप्राप्यते । विशुद्धविज्ञानघनस्वरूपतः एवंज्ञानेनप्राप्यइत्यर्थः अनेनकर्मणाशुद्धांतःकरणाज्जातंज्ञानंसंसारनिवर्त्तकमित्युक्त्या कर्मणैवहिसंसिद्धिमास्थिताजनकादयइत्यादेर्गतिरुक्तेतिज्ञा
यते ३३ कर्मसाधनज्ञानेनज्ञायतइत्युक्तं तत्रविशिष्टतयाज्ञानंमुक्तिसाधनंस्यादितितंप्रकारंब्रूते प्रधानेति प्रधानंप्रकृतिःकालःफलपाचकः आशयोंतःकरणं कर्मजीवादृष्टमेतानिसंगृह्णातीतिप्रधान
कालाशयकर्मसंग्रहः त्यक्तेषुसर्वेषुशरीरमेवशिष्यतेयस्यसशरीरशेषोजीवस्तंप्रतिपद्यप्राप्य चेतनोज्ञानशक्तिमान्नित्याविलुप्तज्ञानइत्यर्थः विभुःश्रीनारायणोयंक्रियाफलत्वेनकर्मफलदातृत्वेन
पुण्यकर्मभिःपुरुषैर्विभाव्यतेज्ञायतेइत्यन्वयः फलमतउपपत्तेरितिसूत्राद्धरेःकर्मफलदातृत्वंसिद्धं अत्रदृष्टांतमाह यथेति यथानलोग्निस्तस्यदारुणोगुणंस्थौल्यादिकमादत्तेदारुस्थौल्याद्यनुसारेणस्वयं
चस्थौल्यादिमान्भवतीतितद्गुणात्मकोविष्युक्तगुणवत्सुदारुषुअग्निर्मथनादिनाभिव्यक्तोज्ञायते तथाप्रधानादिशब्दाभिधेयलक्ष्म्यादिभिःपरिवृतोजीवांतर्गतोजीवपरिमाणगुणानुकारीतदनुष्ठितकर्मफ
लदातृत्वेनगुरुशिष्यव्याख्यानश्रवणलक्षणमथनेनाभिव्यक्तोहरिर्ज्ञायतइतिभावः प्रधानादीनांहर्यधीनत्वं तद्भिन्नत्वंचदर्शयितुंतद्ग्रहणं देहस्थत्वेपितद्गुणसंपृक्ताभावदर्शनायदार्वनलनिदर्शनं किंचा
नेनदेहदोषदारणसामर्थ्यंजगद्भक्षणेप्यलंबुद्धिराहित्यंसूचयितुंदार्वनलपदमुपात्तमितिज्ञापयति ३४ गुरुशिष्यव्याख्यानादिमथनेनहरिरभिव्यक्तोभवतीत्युक्तं तत्रगुरवःशिष्याश्चश्रीनारायणमुखोत्प
न्नत्वात्व्याख्यानादेर्मुखव्यापारत्वेनातएवमुख्यत्वेनसात्त्विकत्वेनचस्वतएवव्याख्यानादौप्रवृत्तिसंभवाज्जलस्यंदनवद्ब्राह्मणाएवेत्यभिप्रेत्याधुनातानभिष्टौति अहोबतेति अमीत्यनेनहरेर्मुखजातत्वंप

प्रधानकालाशयकर्मसंग्रहःशरीरशेषंप्रतिपद्यचेतनः ॥ क्रियाफलत्वेनविभुर्विभाव्यतेयथानलोदारुषुतद्गुणात्मकः ३४ अहोबतामीवितरंत्यनुग्रहंहरिं
गुरुंयज्ञभुजामधीश्वरम् ॥ स्वधर्मयोगेनयजंतिमामकानिरंतरंक्षोणितलेधृतव्रताः ३५ माजातुतेजःप्रभवेन्महर्द्धिभिस्तितिक्षयातपसाविद्ययाच ॥ देदी
प्यमानेऽजितदेवतानांकुलेस्वयंराजकुलेद्विजानाम् ३६ ब्रह्मण्यदेवःपुरुषःपुरातनोनित्यंहरिर्यच्चरणाभिवंदनात् ॥ अवापलक्ष्मीमनपायिनींयशोजग
त्पवित्रंचमहत्तमाग्रणीः ३७

रामृशति बतेतिचित्तंद्रवीकरोति अहोइतिसभ्यानुन्मुखीकरोति इष्टदेवतात्वेनगुरुत्वेनस्वविहितकर्मफलदातृत्वेनश्रीनारायणएवपूज्यइत्यतोविशेषणत्रयं एषमेसर्वधर्माणांधर्मोधिकतमोमतः यद्भक्त्या
पुंडरीकाक्षंस्तवैरर्चेन्नरःसदेतिवचनात् स्वधर्मयोगोभक्तियोगस्तेनयजंतिपूजयंति भगवद्भक्तत्वेनस्वचेतःप्रीतिजनकत्वान्मामकाइत्युक्तं कृष्याद्यन्यव्यापाररराहित्यप्रकटनायनिरंतरमिति एतत्सूचना
यधृतव्रताइति सत्रादिकर्मसुदीक्षितानामन्यव्यापाराभावस्तथात्रापीति कर्मणांफलाधिक्यद्योतनायक्षोणितलेपतनदुःखक्षयहेतुत्वात्प्रतिष्ठाहेतुत्वाच्चक्षोणितलइति क्षिणुक्षयेतलप्रतिष्ठायामितिधातुः३५
स्ववंश्यानांराज्ञांशिक्षामाह माजात्विति राजकुलेविद्यमानाभिर्महर्द्धिभिःसमुत्थितंतेजःप्रभावलक्षणं अजितःश्रीनारायणोदेवतायेषांतेतथातेषांतितिक्षादिनादेदीप्यमानेद्विजानांकुलेजातुकदाचिदपिमा
प्रभवेत्कुलक्षयेसमर्थंनभवेत् ३६ नकेवलंब्रह्मकुलंनाभिवनीयंकिंतुतत्रभक्तिरपिकर्तव्येत्यत्रकैमुत्यन्यायमाह ब्रह्मण्यदेवइति अर्कमर्कटमंडूकविष्णुवासववायवः तुरंगसिंहशीतांशुयमाश्चहरयोदशेति
निगदाद्धरिरिंद्रोयस्यश्रीनारायणस्यचरणाभिवंदनादनपायिनींलक्ष्मीमवाप जगत्पवित्रंयशश्चावाप सोपिपुरातनःपुरुषोब्रह्मण्यदेवोब्राह्मणप्रियश्च । देवः क्रीडादिगुणयुक्तश्चेत्यन्वयः ब्राह्मणप्रियत्वंक्री
डामात्रमितिदर्शयितुंदेवइतिपदं अतएवमहत्तमाग्रणीरित्युक्तंमहतामिंद्रादीनांसकाशादुत्तमाब्रह्मादयस्तेषामप्यग्रणीःश्रेष्ठस्तस्मात्क्रीडामात्रमिदं अतएवानुपपत्त्याहरिशब्देनेंद्रएवगृहीतः पत्प्रसादेनदे ४७
वेंद्रोवेदोदितयशाअभूत् सोपिविष्णुरमेयात्मासदाब्राह्मणवत्सलइतिस्मृतेश्चप्रतीतार्थपरित्यागोयुक्तः अजितदेवतानामित्युक्तिविरोधाच्च ३७

१ हरिर्नारायणः येषांचरणाभिवंदनात् स्वपत्नीं अनपायिनीं लक्ष्मीं अवापप्राप जगत्पवित्रं यशश्चावाप इतियोजनाभ्रांतिं निवारयितुं तात्पर्यानुसारेण योजयति हरिरिंद्रइति ।

SGDF

अस्तुविष्णुर्द्विजप्रियस्ततःप्रकृतेकिमित्याशंक्यविष्णुभक्तिमवमृश्यब्राह्मणसेवाकार्येत्याह यत्सेवयेति अपवर्गावाप्तौ श्रीलक्ष्मीकांतप्रसादएवापेक्षणीयोऽतःक्षितिदेवप्रीत्याकिमित्यतोवा यत्सेवयेति भगवत्प्रसादोत्पत्तौविप्रसेवाद्वारमित्यर्थः स्वराट्स्वतंत्रःयतोविष्णुप्रसादोभवति तस्माद्ब्राह्मणकुलंनिषेव्यतामित्युपसंहराति तदेवेति तद्धर्मपरैर्विष्णुधर्मपरैः ॥ ३८ ॥ ब्राह्मणसेवाप्रसन्नश्रीनारायणप्रसादान्मौक्तिकपरमानंदोपिभवतीत्याह पुमानिति यस्यहरेर्नित्यसंबंधोयेषांतेयन्नित्यसंबंधाद्विजास्तेषांनिषेवयासेवालक्षणसंगतःपुमानतिवेलंक्षिप्रंतस्यात्मनोहरेः प्रसादतोत्यंतशमंभगवन्निष्ठाजन्यमुक्तिसुखंलभेततततस्तस्मान्मोक्षसुखात्परमन्यत्सुखंहविर्भुजामप्यत्रसंसारेस्तिाकिंनास्त्येव हविर्भुजोदेवताः । किंविशिष्टंस्वयंस्वरूपभूतं । अस्वरूपमपिस्वरूपवन्नोपचरितमित्याह स्वतइति महत्सेवांद्वारमाहुर्विमुक्तेरितिमहत्सेवायाअपिमुक्तिसाधनत्वंसिद्धं यद्वा यन्नित्यसंबंधानांसतांनिषेवयापुमानात्मनोमनसःप्रसादतोत्यंतशममतिशायितभगवन्निष्ठांलभेत ततःश्रीनारायणनिष्ठायाःस्वतोऽकृत्रिमंस्वयंस्वरूपसुखंलभेतततइत्युत्तरत्रापिसंबध्यतेशेषंपूर्ववत् ३९ इतोपिब्रह्मकुलसेवाकर्तव्येत्याह अश्नातीति । भगवत्तत्त्वकोविदैःपुरुषैरीड्यस्यहरेर्नामभिर्यन्मुखेश्रद्धयाहुतमनंतोयथाश्नाति तथाचेतनयाबहिष्कृतेजडेहुताशनेहुतंनाश्नातीत्यन्वयः अनंतइत्यनेनकेवलमात्रंफलंकिंतुअनंतमेवेतिध्वनयति अनुनयार्थःखलुशब्दः वाइत्यनेननाहंतथाश्नीतिप्रसिद्धिस्मारयति ब्राह्मणेष्वपियतिमुखाशनेनहरेर्विशेषतस्तृप्तिरित्यभिप्रेत्याह पारमहंस्येति पारमहंस्यैःपरमहंसाश्रमस्थैर्वर्यावरणीयागावोयस्यसपारमहंस्यवर्यगुः । तएवतद्वचनाभिप्रायंविदित्वाश्रद्धयानुष्ठातारइत्यर्थः यद्वापरमहंसविषयावर्ण्यमनोहरागावोयस्यसतथा यतीनधिकंस्तौतीतितेषामेवतत्त्वज्ञानाधिक्यादित्यर्थः चित्रगुशब्दवदयंशब्दः ४० नन्वग्नितआधिक्येचेतनावत्त्वंप्रयोजकंवेदवैदिकानामाराध

यत्सेवयाशेषगुणाश्रयःस्वराड्विप्रैःप्रियस्तुष्यतिकाममीश्वरः ॥ तदेवतद्धर्मपरैर्विनीतैःसर्वात्मनाब्रह्मकुलंनिषेव्यताम् ३८ पुमाँल्लभेताप्यतिवेलमात्मनःप्रसादतोत्यंतशमंस्वतःस्वयम् ॥ यन्नित्यसंबंधनिषेवयाततःपरंकिमत्रास्तिसुखंहविर्भुजाम् ३९ अश्नात्यनंतःखलुतत्त्वकोविदैःश्रद्धाहुतंयन्मुखइड्यनामभिः ॥ नवैतथाचेतनयाबहिष्कृतेहुताशनेपारमहंस्यवर्यगुः ४० यद्ब्रह्मनित्यंविरजंसनातनंश्रद्धातपोमंगलमौनसंयमैः ॥ समाधिनाबिभ्रदिहार्थसिद्धयेयत्रेदमादर्शइवावभासते ४१ तेषामहंपादसरोजरेणुमार्यावहेयाधिकिरीटमायुः ॥ यंनित्यदाबिभ्रतआशुपापंनश्यत्यमुंसर्वगुणाभजंति ४२ गुणालयंशीलधनंकृतज्ञंश्रद्धाश्रयंसंवृणतेनुसंपदः ॥ प्रसीदतांब्रह्मकुलंगवांचजनार्दनःसानुचरश्चमह्यम् ४३

नपात्रत्वंस्यादित्याशंक्यब्रह्मकुलस्यवैशिष्ट्यमाह यद्ब्रह्मेति अत्रयावद्ब्रह्मधिष्ठितंतावतीवागितिश्रुतिर्वेदस्यपरब्रह्मणश्चलक्षणसाम्यात्तद्वयमप्येकोक्त्यावक्तियद्ब्राह्मणकुलंनित्यत्वादिगुणविशिष्टब्रह्मवेदंहरेस्तत्त्वंचाविभ्रत् बिभर्ति तद्धारणेसामर्थ्यवाक्तिश्रद्धेति आचारहीनंनपुनंतिवेदाइतिवचनं मंगलंपुण्यं संयमोदमः समाधिरेकाग्रता । किमर्थमित्यतउक्तं अर्थसिद्धयइति पुरुषार्थोपयोगीतरज्ञानमपासोपिनकार्यइत्याह यत्रेति यत्रब्रह्मणिश्रीनारायणेइदंजगदादर्शेदर्पणइवावभासतेवेदेचेदंपुरुषार्थचतुष्टयंज्ञायते यद्वा यत्रब्रह्मकुलेइदमुक्तंब्रह्मद्वयंदर्पणइवावभाति ४१ एवंब्रह्मकुलमभिष्टूयात्मक्रियोपदेशतस्तत्सेवा यावदायुःकर्तव्येतिविधत्ते तेषामिति हेआर्याः तत्त्वज्ञानोत्पत्तौप्रथमसाधनंपापप्रणाशः सोप्यनेनस्यादित्याशयेनाह यंनित्यदेति उत्तरफलमाहामुमिति अमुंपुरुषम् ४२ एतदेवविशिनष्टिगुणालयमिति संपदोगुणालयत्वादिविशिष्टंपुरुषमनुसंवृणतइत्यन्वयः संवृणुतइतिपाठेसंवृण्वतइतिव्याख्येयंनित्यसंबंधनिषेवयेत्यादौप्रस्तुतोजनार्दनः पारमहंस्यवर्यगुरित्यनेनध्वनितागावश्चब्रह्मकुलंचप्रसीदत्विस्युपसंहराति प्रसीदतामिति ब्रह्मकुलसेवावद्गोकुलसेवाब्रह्मादिपरिवृतश्रीजनार्दनसेवाचयथाशास्त्रविहितंमुमुक्षुणाकर्तव्येत्यतोवाह प्रसीदतामिति ४३

---

१ अत्र येषां ब्राह्मणानां नित्यसंबंधनिषेवयेत्यादि प्रमाणं निराकरोति

इदानींमैत्रेयपृथूक्तावविमतिप्राप्तिःसर्वस्याभूदितिवाक्ति इतीति साधुवादेनानिर्दोषवाक्येन ४४ सूचितंस्पष्टयति पुत्रेणेति सोयंमनुष्यलोकःपुत्रेणजय्यइत्यादिकंश्रौतमपिदृष्टचारितमित्याहुरित्याह ब्रह्मदंडेति शश्वत्पुत्रेणपितरोत्यायन्बहुलंतमइतिश्रुतिरत्रप्रमाणं । पापस्यवेनस्यतमस्तरणंसत्यंचेत्सर्वेपिमुक्तिप्राप्तियोग्याइत्यायातं नतुनारकीकोपीतिचेन्न वेनशब्दस्यतामसराजससात्विकभेदे नाभिधेयत्रित्वस्यप्रामाणिकत्वाद्वेनस्थोराजसोजीवःपृथुनास्वर्गंतिंगतः स्वयंतुतमएवापसात्त्विकःपृथुतामगादितिस्मृतेः तथाचवाक्ययोजनाब्रह्मदंडहतोविप्रशापहतः पापोदैत्योनाम्नावेनस्तमोतर दितियत्तदितिप्रशंसामात्रंनतुसत्यं सत्यंतुसर्वस्मादत्याधिकंदुःखोदर्कंतमोत्यतरदगच्छत्तॄप्लवनतरणयोरितिधातोःप्लुगतावितिच अतिःस्यादाधिकार्थोक्तौप्रशंसायामतिक्रमइत्यभिधानात् यत्तामसोवेनःसर्व दुःखकरोदैत्यःसोत्यतरत्सुखभोगलोकमतिक्रम्यागच्छदंधंतमइतिशेषः ब्राह्मणानांविप्राणांदंडोराजयोग्यशिक्षातयाहतोगतः दंडोस्त्रीशासनेराज्ञामितियादवः हनहिंसागत्योरितिधातोः । रजोगुणपानं पातीतिवापापोराजसोवेनस्तमोत्यतरत् तमोतिक्रम्यस्वर्गंतिंगतः पृथुगुणेनेतिशेषः । यदतरत् तर्तुमशक्यं तमोगुणइतिशेषः तदतिक्रम्यवर्तमानंसत्त्वंवेत्तीतिज्ञानांशोवेनोत्यधिकारार्थंभक्त्यादिगुण

मैत्रेयउवाच ॥ इतिब्रुवाणंनृपतिंपितृदेवद्विजातयः ॥ तुष्टुवुर्हृष्टमनसःसाधुवादेनसाधवः ४४ पुत्रेणजयतेलोकइतिसत्यवतीश्रुतिः ॥ ब्रह्मदंडहतःपा पोयद्वेनोत्यतरत्तमः ४५ हिरण्यकशिपुश्चापिभगवन्निंदयातमः ॥ विविक्षुरत्यगात्सूनोःप्रह्लादस्यानुभावतः ४६ वीरवर्यपितःपृथ्व्याःसमाःसंजीवशा श्वतीः ॥ यस्येदृश्यच्युतेभक्तिःसर्वलोकैकभर्तरि ४७ अहोवयंह्यद्यपवित्रकीर्तेत्वयैवनाथेनमुकुंदनाथाः ॥ यदुत्तमश्लोकतमस्यविष्णोर्ब्रह्मण्यदेव स्यकथांव्यनंक्षि ४८ नात्यंतिकमिदंनाथतवजीव्यानुशासनम् ॥ प्रजानुरागोमहतांप्रकृतिःकरुणात्मनाम् ४९ अद्यनस्तमसःपारस्त्वयोपासादितः प्रभो ॥ भ्राम्यतांनष्टदृष्टीनांकर्मभिर्दैवसंज्ञितैः ५० नमोविवृद्धसत्वायपुरुषायमहीयसे ॥ योब्रह्मक्षत्रमाविश्यबिभर्तीदंस्वतेजसा ५१ ॥ इतिश्री भागवतेचतुर्थस्कंधेएकविंशोध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

विस्ताराभिधेयंपृथुत्वमतरदाप्नोदिति । पापानपातिनरक्षतीतिवापिबतिसंहरतीतिवापापः ब्रह्मवेदस्तदुक्तोदंडोहिंसायस्यपशोःसब्रह्मदंडः तंपशुंहंतीतिनान्यमविहितमिति ब्रह्मदंडहतः हिंसायांलकुडे गुडइतिच ४५ हिरण्यकशिपुरपिसनकादिशप्तोजयःश्रीहरिपार्षदस्तस्यतमोतिगमनंयुक्तं अन्यस्यतदाविष्टस्यासुरस्यतमोनिगमनमौपचारिकमर्थवादवत् ४६ एवंनृपाःसर्वेस्वमनोगतंविज्ञापयंति वीरवर्येति हेपृथ्व्याःपितःपातृत्वात्पितृत्वंननुत्वयैवनाथेनेत्युत्तरश्लोकेपृथावपिभक्तेःकर्तव्यत्वंप्रतीयतेअतःकथंभगवत्येवभक्तिःकर्तव्येतिचेदुच्यते तत्रपृथुस्थपरमेश्वरमपेक्ष्यैवकारेणान्ययोगव्यवच्छेदः क्रियते योब्रह्मक्षत्रमाविश्येत्युत्तरत्रपृथुस्थत्वप्रतीतेः ४७ मुकुंदोनाथोयेषांतेतथाअनेनाप्युक्तशंकापर्यहारि व्यनंक्षिअस्माभिरपृष्टामपिकथांव्यक्तांकरोषि ४८ तवभृत्यानामस्माकमनुशासनंनैकां तनियतमित्याहुरित्याह नात्यंतिकमिति ४९ उपासादितःप्रापितः भ्राम्यतामेकत्रावस्थानमलभमानानाम् ५० अहोवयमित्यत्रांतर्याम्यपेक्षयेत्युक्तं तत्तत्त्वज्ञानमेषांसिद्धमितिभावेनतत्सिद्धांतं प्रकटयति नमइति योविष्णुःक्षत्रंराजकुलोत्पन्नंपृथुमाविश्येदंब्रह्मब्राह्मणकुलंबिभर्तीत्यन्वयः ५१ ॥ ॥ इतिश्रीभागवतेचतुर्थस्कंधेएकविंशोध्यायः ॥ २१ ॥ ॥ छ ॥ ॥

१ यद्वेनोत्यतरत्तमः इतिवेनस्यतमस्तरणंभाति तदनुपपन्नमतआह

SGDF Sri Gangeshwar Digital Foundation

पृथुसनत्कुमारसंवादापदेशेनसर्वस्माद्भिन्नमनुग्रहमंतरेणदुर्ज्ञेयंभगवत्तत्त्वंनिरूप्यतेऽस्मिन्नध्याये तत्रादौसनत्कुमारादिमुनीनामागतिंवक्ति जनेष्विति १ अर्चिषालक्षितान्लक्षणतोज्ञातावचुष्टम
द्राक्षीत् २ तेषांदर्शनेनोद्गतान्प्राणान्प्रादातुमिच्छुरिव अयंभावः ऊर्ध्वंप्राणाह्युत्क्रामंतियूनःस्थविरआगते प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यतइतिश्रुतेः प्राणास्तावत्तेजसाक्षिप्तास्तान्प्र
त्यागच्छंतिअतःस्वयमनभिगच्छतःप्राणहानिःस्यादितिभयादिवससंभ्रमःप्रत्युद्गमनंचकारेति इंद्रियेशोजीवोगुणानिंद्रियाणीव ३ ४ ५ हाटकासनेसुवर्णपीठे स्वधिष्ण्येषुस्वस्थानेस्थितान् संयमः
प्रश्रयः भवाग्रजान्शिवज्येष्ठान् तृतीयस्कंधेहरात्पूर्वजातत्वोक्तेः संसाराग्रजातत्वंताद्विरुद्धत्वादुपेक्षणीयम् ६ संसारिणांसतांसंदर्शनस्यदुर्लभत्वात् अतःपूर्वाचारितंमंगलंममास्तीतिध्वनय
न्विस्मयीकरोति अहोइति कृष्णेकृष्णविषये ७ नैतच्चित्रमित्याह किंतस्येति अनुगतेनप्राणेनसहवर्ततइतिसानुगः कस्मिन्वहमितिश्रुतिः ८ दुर्दर्शत्वमधिकदृष्टांतत्वेनोपपादयति नैवेति ल
क्षयतेलक्षगवत्तयापिभवद्विषयंज्ञानंनाप्नोति असंभवपरिहारायपर्यटतइति सर्वेजनःसर्वदृशंसाक्षित्वेनपश्यंतमात्मानंपरमात्मानंयथानजानाति, ब्रह्मादीनांतद्विषयज्ञानसंभवात्कथंसर्वइतिसर्वैकवली

मैत्रेयउवाच ॥ जनेषुप्रगृणत्स्वेवंपृथुंपृथुलविक्रमम् ॥ तत्रोपजग्मुर्मुनयश्चत्वारःसूर्यवर्चसः १ तांस्तुसिद्धेश्वरान्राजाव्योम्नोवतरतोऽर्चिषा ॥ लोकानपा
पान्कुर्वत्यासानुगोऽचष्टलक्षितान् २ तद्दर्शनोद्गतप्राणान्प्रत्यादित्सुरिवोत्थितः ॥ ससदस्यानुगोवैन्यइंद्रियेशोगुणानिव ३ गौरवाद्यन्त्रितःसभ्यःप्रश्र
यानतकंधरः ॥ विधिवत्पूजयांचक्रेगृहीताघ्यर्हणासनान् ४ तत्पादशौचसलिलैर्मार्जितालकबंधनः ॥ तत्रशीलवतांवृत्तिमाचरन्मानयन्निव ५
हाटकासनआसीनान्स्वधिष्ण्येष्विवपावकान् ॥ श्रद्धासंयमसंपन्नःप्रीतःप्राहभवाग्रजान् ६ ॥ पृथुरुवाच ॥ अहोआचरितंकृष्णेमंगलंमंगलायनाः ॥
यस्यवोदर्शनंह्यासीद्दुर्दर्शानांकुयोगिनः ७ किंतस्यदुर्लभतरमिहलोकेपरत्रच ॥ यस्यविप्राःप्रसीदंतिशिवोविष्णुश्चसानुगः ८ नैवलक्षयतेलोकोलोका
न्पर्यटतोपियान् ॥ यथासर्वदृशंसर्वआत्मानंयेस्यहेतवः ९ अधनाअपितेधन्याःसाधवोगृहमेधिनः ॥ यद्गृहाह्यर्हवर्यांबुतृणभूमिसुवाग्धराः १० व्या
लालयद्रुमाह्येतेप्यरिक्ताखिलसंपदः ॥ यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ११

क्रियतेइत्यत्रउक्तं यइति येचब्रह्मादयोस्यजगतोहेतवः कारणभूतास्तेपिनविदंतीति अत्रेदंतात्पर्यं यथात्मानंस्वंहरिर्वेत्ति तथानजानंतीति तदुक्तं सवज्ञाश्चविरिंचाद्यानजानीयुर्हरिंपरं हेत
वोजगतोप्यस्ययथासौवेदकेशवइति अनेनवेदाहमेतमित्यादेर्गतिरप्युक्ताभवति दुष्टजनव्यामोहनायवातद्विषयज्ञानस्यदुःसाध्यत्वज्ञापनायवाधिकदृष्टांतप्रयोजनं किंचजगत्कारणतामाददानोपंहे
तुशब्दोविरिंचादीनांसार्वज्ञ्यमप्याक्षिपन्नसर्वात्मनाज्ञानाभावोयुक्तइतिश्रीनारायणवत्तद्विषयज्ञानाभावएवउच्यतइतिव्यनक्तीति ९ भवतांपुरुषेष्वनुग्राहकत्वेभगवद्भक्तिसामग्रीमत्त्वमेवप्रयोजकंनतु
धनिकत्वादिकमित्याशयेनाह अधनाअपीति अर्हवर्याःपूज्यश्रेष्ठास्तेभ्योदत्तमंबुचतृणंचभूमिश्चसुवाचश्चार्हवर्यांबुतृणभूमिसुवाचस्ताधारयंतिबिभ्रतीतितथोक्ताः १० तीर्थपादोविष्णुस्तस्यभक्तास्तीर्थपा
दीयास्तेषांपादतीर्थैर्वर्जिताःसंपर्करहिता हिशब्दोयथाशब्दार्थे यथाव्यालालयादुष्टसर्पाश्रयावृक्षावर्ज्यास्तथा तादृग्गृहाःसंपद्युक्तत्वेपिवर्ज्याइत्यर्थः ११

---

१ मनोर्वैवस्वतस्यादावथर्वाब्राह्मणोजनि । मित्रश्चवरुणश्चाथोप्रहेतिर्हेतिरेवच । ब्रह्मणःप्रथमेकल्पेशिवःप्रथमजःस्मृतः । सनकाद्यास्तुवाराहेब्रह्माविष्णोःसुताग्रजइतिब्रह्मांडे ।

किंबहुजल्पेनेतिभावेनतदागमनंलालयति स्वागतमिति वोयुष्माकंस्वागमनंसुष्ठुअस्माकंसुखहेतुत्वादितिशेषः कथमस्मदागमनंसुखहेतुरत्राह यद्व्रतानीति मुमुक्षवोधीराःश्रद्धयायद्व्रतानिचरंति
तेयूयंवयोदर्शनेनबालाअपि बृहंतिज्ञानेनवर्धंते ज्ञानवृद्धत्वादागमनंभद्रमित्यर्थः १२ राजास्वस्वागतवचनानंतरं पृथुंप्रतितुभ्यंचस्वास्तिकिमितिमुनिवचनात्पूर्वंस्वकुशलमाक्षिपति कच्चिदिति
व्यसनबीजान्युप्यंतेऽस्मिन्नितिव्यसनावापः तस्मिन्नेतस्मिन्संसारेस्वकृतकर्मभिःपतितानांनकुशलंकच्चित्किंनकिमपीत्यन्वयः आत्मनोवानेनकुशलंपृच्छति अस्माकंकुशलंभविष्यतिकच्चिदिति १३
नन्वभ्यागतास्मत्कुशलप्रशंसामंतरेणात्मकुशलप्रश्नःकथंसंजाघटीतीतितत्राह भवत्स्विति इदंकुशलमकुशलमितिमतिवृत्तयोयत्रयेषुभवत्सुनसंति अतोभवत्सुखप्रश्नोनेष्यते कुतः आत्मनासहआरा
मोरमणंक्रीडायेषांतेतथातेषु अतोभवत्सुकुशलप्रश्नांशाभावादौत्सुक्यादात्मकुशलप्रश्नइतिभावः १४ अस्तुतर्हितवकुशलंभविष्यतीत्यभिमतंचेद्यतोवयमकुशलाब्धिमग्नास्तस्मादेतादृशानांकेनप्रकारेण
कुशलंस्यादितितंप्रकारंपृच्छामीत्याह तदहमिति तपस्विनांसुहृदोत्रपूज्यान्भवेसंसारेक्षेमः संसारोच्छेदलक्षणंमंगलमंजसाक्षिप्रंस्यात् झटित्यंजसाह्नायेत्यमरः १५ ननुमोक्षविषयप्रश्नपरिहारोदुरवबोधो
ऽतोऽन्यंसुशकंपृच्छन्नाचिकेतोमरणंमानप्राक्षीरितिश्रुतेरित्याशंक्यभवंतोभगवद्विशेषसन्निधानपात्रत्वात्पृष्टार्थव्याख्यानसमर्थाइत्यभिप्रेत्याह व्यक्तमिति व्यक्तंस्पष्टेबुधेतुनेत्यभिधात् अत्रस्पष्टंव्यक्तमि

स्वागतंवोद्विजश्रेष्ठायद्व्रतानिमुमुक्षवः ॥ चरंतिश्रद्धयाधीराबालाएवबृहंतिवै १२ कच्चिन्नःकुशलंनाथाइंद्रियार्थार्थवेदिनाम् ॥ व्यसनावापएतस्मिन्प
तितानांस्वकर्मभिः १३ भवत्सुकुशलप्रश्नआत्मारामेषुनेष्यते ॥ कुशलाकुशलायत्रनसंतिमतिवृत्तयः १४ तदहंकृतविश्रंभःसुहृदोत्रतपस्विनाम् ॥
संपृच्छेभवएतस्मिन्क्षेमःकेनांजसाभवेत् १५ व्यक्तंह्यात्मवतामात्माभगवानात्मभावनः ॥ स्वानामनुग्रहायेमांसिद्धरूपीचरत्यजः १६ ॥ मैत्रेयउवाच
पृथोस्तत्सूक्तमाकर्ण्यसारंसुष्टुमितंमधु ॥ स्मयमानइवप्रीत्याकुमारःप्रत्युवाचह १७ सनत्कुमारउवाच ॥ साधुपृष्टंमहाराजसर्वभूतहितात्मना ॥ भव
ताविदुषाचापिसाधूनांगतिरीदृशी १८ संगमःखलुसाधूनामुभयेषांसुसंमतः ॥ सत्संभाषणसंप्रश्नःसर्वेषांवितनोतिशम् १९ अस्त्येवराजन्भवतोमधुद्विषः
पादारविंदेऽस्यगुणानुवादिनी ॥ रतिःसदायाविधुनोतिनैष्ठिकीकामंकषायंमलमंतरात्मनः ॥ २० ॥ ॥ ॥ ॥

त्यर्थः आत्मवतांब्रह्मादियोगिनामात्माभीष्टवर्षी हि आत्मभावनोमनःप्रेरकश्चेतनानांसत्ताप्रदोजन्मादिरहितोभगवान्स्वभक्तानामनुग्रहायेमांभूमिं सिद्धरूपी भवादृशाःसिद्धास्तएवरूपंप्रतिमास्यास्ती
ति चरतीत्यन्वयःहरेस्तुप्रतिमाःप्राज्ञास्तत्रस्थःकेशवःस्वयं ददातिज्ञानमीशेशःपरमात्मास्त्रयंप्रभुरित्यतोज्ञानिनांप्रतिमात्वंसिद्धमतोऽप्यत्रात्मवतांव्यक्तंस्पष्टमितिपुनरावृत्त्यायोज्यं १६ पृथोःकंठ
शोषणपर्यंतंतदुक्तंश्रुत्वानिरपेक्षत्वादन्यतोगतंतैरितिशंकामाभूत्सूक्तत्वात्सारत्वात्कर्णसुखत्वात्प्रत्युत्तरयितुंशक्तत्वाच्चेति तत्रसनत्कुमारस्तंप्रत्याहेत्याह मैत्रेयइति मधुनामसुखंविंद्यादित्यादेः १७
किमाह साध्विति तथाहि साधूनांगतिःस्थितिरीदृशीस्वयंविद्वानपिलोकोपकारायप्रवर्ततइति १८ नकेवलंतवैवास्मद्दर्शनेनशमस्माकमपीतिभावेनाह संगमइति शंभगवन्निष्ठालक्षणंसुखं १९ अत्राशिक्ष
णीयांशोऽस्माकंनास्तीतिभावेनाह अस्त्येवेति भवतोऽस्यमधुद्विषःपादारविंदेगुणानुवादलक्षणारतिरस्त्येव यारतिः कषायंमनःकलुषीकुर्वाणं कामंविषयतृष्णालक्षणं कषेणकर्षणेनगच्छतीतिकषायंपा
पंएवमुभयविधमंतरात्मनोमलंकिट्टंविधुनोतीत्यन्वयःअनेनहरौरतिरितरत्रहरिद्विष्यरतिर्विरक्तिरितिद्वयंपुरुषार्थस्यमुख्यसाधनमुक्तमितिज्ञेयं तदुक्तं रतिःपरात्मनिहरावन्यत्रारतिरेवच पुमर्थसाध
नंह्येयंनातोन्यन्मुख्यमिष्यतइति २०

SGDF
Sri Gangeshwari Digital Foundation

एतदेवविशिनष्टि शास्त्रेष्विति सम्यग्विमृशेषुसमीचीनविचारवत्सु कोसावित्यतआह असंगइत्ति आत्मनोव्यतिरिक्तेपरमात्मनोभिन्नेब्रह्मादितृणांतवस्तुनिअसंगोहेयलक्षणाबुद्धिर्ब्रह्मणिपरिपूर्णेनि र्गुणेसत्त्वादिगुणरहितेनिर्णीतानंदादिगुणेवा निर्निर्णयनिषेधयोरित्यभिधानात्हरौयारतिःएतत्द्वयंमुख्यसाधनमित्यर्थः २१ एतादृशंसाधनंकथंस्यादितितत्साधनान्याह तच्छ्रद्धयेति तस्मिन्हरौ श्रद्धया भगवद्धर्माणांवर्णाश्रमादिविहितानांचर्ययाचरणेन जिज्ञासयाब्रह्मविचारेण आध्यात्मिकयोगोष्टांगयोगस्तन्निष्ठया पुण्यश्रवाहरिस्तस्यकथया २२ अर्थस्यदेहस्यइंद्रियाणांवारामेषुक्रीडावने षुगुणेषुविषयेष्वतृष्णयाहेयत्वबुद्ध्या तेषांविषयाणांसंमतानांस्रक्चंदनवनितादीनामपरिग्रहेणास्वीकारेण आत्मन्देहभोगविषयेपारितोषोलंबुद्धिः २३ स्मृत्याजन्मजरादिर्चिंतया सीधुसुधा पूर्वत्रक थवाक्यप्रबंधइतिधातोः भगवद्गुणसंदृब्धशास्त्रेणउत्तरत्रतत्कृतकंसवधादिपराक्रमलक्षणकर्मामृतपानेन अहिंसासत्यमस्तेयंब्रह्मचर्यंदयार्जवं क्षमाधृतिर्मिताहारःशौचंचैतेयमादश कर्मणामनसावा चासर्वभूतेषुसर्वदा अक्लेशजननंप्रोक्तमहिंसात्विहयोगिभिः तपःसंतोषआस्तिक्यंदानमीश्वरपूजनं सिद्धांतश्रवणंचैवह्रीर्मतिश्चजपोव्रतं एतेतुनियमाःप्रोक्ताइतियाज्ञवल्क्ययोगशास्त्रेअभिधानात् अभिध्यया अखंडस्मरणेन निरीहयाअनिषिद्धचेष्टया २४ तत्पराहारिपरास्तेषांकर्णपूरयतीतिकर्णपूरणंकर्णाभरणंवायद्धरेर्मुहुर्गुणाभिधानंतेन लिंगव्यत्ययश्छांदसः यद्वा हरेर्गुणाभिधानेनविजृंभ

शास्त्रेष्वियानेवसुनिश्चितोनृणांक्षेमस्यसम्यक्विमृशेषुहेतुः ॥ असंगआत्मव्यतिरिक्तवस्तुनिदृढारतिर्ब्रह्मणिनिर्गुणेचया २१ तच्छ्रद्धयाभगवद्धर्मचर्य याजिज्ञासयाध्यात्मिकयोगनिष्ठया ॥ योगेश्वरोपासनयाचनित्यंपुण्यश्रवःकथयापुण्ययाच २२ अर्थेंद्रियारामगुणेष्वतृष्णयातत्संमतानामपरिग्रहे णच ॥ विविक्तरुच्यापरितोषआत्मन्विनाहरेर्गुणपीयूषपानात् २३ अहिंसयापारमहंस्यचर्ययास्मृत्यामुकुंदाचरिताग्र्यसीधुना ॥ यमैरकामैर्नियमैर भिध्ययानिरीहयाद्वंद्वतितिक्षयाच २४ हरेर्मुहुस्तत्परकर्णपूरयागुणाभिधानेनविजृंभमाणया ॥ भक्त्याह्यसंगःसदसत्परात्मनिस्यान्निर्गुणेब्रह्मणिचांजसा रतिः २५ यदारतिर्ब्रह्मणिनैष्ठिकीपुमानचार्यवान्ज्ञानविरागरंहसा ॥ दहत्यबीजंहृदयंजीवकोशंपंचात्मकंयोनिमिवोत्थितोऽग्निः २६ दग्धाशयोमुक्तस मस्ततद्गुणोनैवात्मनोबहिरंतर्विचष्टे ॥ परात्मनोर्यद्व्यवधानंपुरस्तात्स्वप्नेयथापुरुषस्तद्विनाशे २७

माणयाभक्त्याकीदृश्यातत्परकर्णपूरया एतैरुक्तैःसाधनैःसदसत्कार्यकारणात्मकप्रपंचविषयेऽसंगःस्यात् प्रथमासप्तम्यर्थे परात्मनिमुक्तप्रपंचस्वामिनिनिर्गुणेब्रह्मणिचरतिःस्यादित्यन्वयः यद्वा सदस तोजगतःपरश्चात्माचेतिसदसत्परात्मातस्मिन् २५ अस्तुब्रह्मण्यसंगनिशितारतिस्ततःकिंतत्राह यदेति यदाब्रह्मणिनैष्ठिकीसर्वोत्कृष्टारतिरपरोक्षज्ञानलक्षणाभवति तदाचार्यवांस्तदुपदिष्टार्थ साफल्यात्तद्भक्तिमान्पुमान्ज्ञानवैराग्ययोरंहसोद्रेकेणाबीजहृदयंस्वरूपोपाधिविनाबाह्योपाधिदहतीत्यन्वयः किमनेनजीवस्येत्यतउक्तंजीवकोशमिति जीवस्यगृहस्थानीयं तर्हितद्दाहेजीवोपिदग्धः स्यादित्यतउक्तं पंचात्मकमिति पंचभूतस्वरूपमतएवबाह्यमित्युच्यते जीवोपाधिर्द्विधाप्रोक्तःस्वरूपंबाह्यमेवच बाह्योपाधिर्लयंयातिमुक्तावन्यस्यतुस्थितिः सर्वोपाधिविनाशेहिप्रतिबिंबःकथंभवेत् कथंचात्मविनाशायप्रयत्नःसेत्स्यतेक्वचित् अपुमर्थताचमुक्तेःस्यादभावात्पुंसएवतु ज्ञानज्ञेयाद्यभावाच्चसर्वथानोपपद्यते तस्मादेतन्मतंयेषांतमोनिष्ठाहितेमताइतिवचनात् नस्वरूपबीजहृदयदाहोत्रार्थःकिंत्व स्वरूपोपाधेरित्यभिप्रायः तत्रदृष्टांतमाह योनिमिति अरणेरुत्थितोऽग्निरिवेति २६ बीजाशयनाशेतद्गुणानांज्ञानादीनामपिनाशादात्मनोबहिरंतरितिभेदंनाविचष्टेनाविपश्यति अन्यदर्शनाभावेपिस्वात्मानंप

१ अबीजहृदयमित्युक्ते संसारस्याकारणभूतांतःकरणमितियोजनाभातिसानुपपन्ना मनएवमनुष्याणां कारणं बंधमोक्षयोरितिहृदयस्य संसारबीजत्वोक्तेरित्यतः तात्पर्यानुसारेणव्याख्याति स्वरूपेति ।

SGF
Foundation

श्यतीत्यतएवेतिअंधवद्दृष्ट्यभावात्नकिंचिदपिपश्यतीत्यर्थः कथंतर्हिसंसारावस्थायामत्राह परात्मनोरीति परस्येश्वरस्यात्मनोजीवस्यचयद्यदा पुरस्तात्संसारावस्थायां व्यवधानंजवनिकास्थानीयाव
स्था तदायथास्वप्नेसंदिग्धज्ञानमेतावाज्ज्ञानंभवतीतितत्रतद्विनाशेबीजह्रदयनाशेत्वपुरुषएवात्मनाशएवातःस्वरूपज्ञाननाशात्संसारावस्थैवोत्तमास्यात्किंचित्ज्ञानस्यापिसंभवादित्यर्थः उक्तादन्यथास्वी
कारेभिदायदिनदृश्येतजीवात्मपरमात्मनोःमुक्तौतदाविमोक्षायकोयत्नंकर्तुमर्हति मम्रस्याहंपरेज्ञानेकिंनदुःखतरंभवेत् प्रवृत्तिधर्ममेवाहंमन्येभरतसत्तमेतिप्रमाणविरोधआपद्येतइति २७ अतःफलितमा
ह आत्मानमिति आत्मानंजीवमिंद्रियार्थंशब्दादिविषयंचयदप्युभयोरात्मेंद्रियार्थयोः परमुत्तममीश्वरतत्त्वंतदपिबीजाशयलक्षणउपाधौसत्येवपुमान्पश्यति अन्यदातदभावेनपश्यतीत्यन्वयः
२८ तत्रदृष्टांतमाह निमित्तइति जीवात्मपरमात्मनोर्भेदस्यान्वयव्यतिरेकासिद्धत्वेनप्रामाणिकत्वात्तदपलापेमहासुरत्वमेवस्यादितिभावः २९ जीवपरयोःसत्यभेदाप्रतीतौकिंकारणमित्याशंक्याज्ञान
मेवतत्रकारणंतदपिविषयातिसक्त्यास्यादित्याह इंद्रियैरिति पुंसोमनोबुद्धेश्चेतनांबहुस्मरणशक्तिंहरतइत्यन्वयः बहुस्मरणशक्तिस्तुचेतनेत्युच्यतेबुधैरितिवचनात् मनसोहरणेकारणानींद्रियाणी
त्याह इंद्रियैरिति हरिकथाश्रवणादियोग्यैःश्रोत्रादींद्रियैराक्षेपेचायंहेतुरित्याह विषयाकृष्टैरिति दृष्टांतेनबुद्ध्यारूढंकरोति स्तुंबइति स्तुंबोजलनिर्गमद्वारम् ३० बुद्धेर्बहुस्मरणशक्तिभ्रंशेसर्वानर्थाआप
धंतइत्याह भ्रश्यतीति भ्रष्टंचित्तमनुबहुस्मरणशक्तिभ्रंशानंतरंस्मृतिरनेकशास्त्रयथार्थस्मरणसामर्थ्यंभ्रश्यतिस्मृतिक्षयेऽनेकशास्त्रयथार्थस्मरणशक्तिनाशेसर्वोत्तमःस्वतंत्रःपंचविधभेदस्वामीमदादिसर्वं

आत्मानमिंद्रियार्थंचपरंयदुभयोरपि ॥ सत्याशयउपाधौवैपुमान्पश्यतिनान्यदा २८ निमित्तेसतिसर्वत्रजलादावपिपूरुषः ॥ आत्मनश्चपरस्यापिभि
दांपश्यतिनान्यदा २९ इंद्रियैर्विषयाकृष्टैराक्षिप्तंध्यायतोमनः ॥ चेतनांहरतेबुद्धेःस्तुंबस्तोयमिवह्रदात् ३० भ्रश्यत्यनुस्मृतिश्चित्तंज्ञानभ्रंशःस्मृतिक्षये ॥
तद्रोधंकवयःप्राहुरात्मापह्नवमात्मनः ३१ नातःपरतरोलोकेपुंसःस्वार्थव्यतिक्रमः ॥ यदन्यस्यप्रेयस्त्वमात्मनःस्वव्यतिक्रमात् ३२ अर्थेंद्रियार्थाभि
ध्यानंसर्वार्थापह्नवोनृणाम् ॥ भ्रंसितोज्ञानविज्ञानाद्येनाविशतिमुग्धताम् ३३ नकुर्यात्कर्हिचित्संगंतमस्तीव्रंतितीर्षुणा ॥ धर्मार्थकाममोक्षाणां
यदत्यंतविघातकम् ३४

तदधीनमेनंभावंमरणेपिनमुंचामीतिभगवत्पक्षपातलक्षणंज्ञानंभ्रश्यति तदस्तुततःकिंतत्राह तद्रोधमिति कवयआत्मनोज्ञानस्वरूपस्यतस्यतादृशस्यज्ञानस्यरोधंनाशमात्मनःस्वरूपस्यापह्नवंनाशंप्राहुरित्य
न्वयः ३१ अतश्चकिमनिष्टमापन्नमत्राह नातइति पुंसःस्वार्थव्यतिक्रमःस्वप्रयोजनस्यव्यतिक्रमोनाशोतःस्वरूपभूतज्ञाननाशात्परतरोन्यतमोनाशोलोकेनास्तीत्यन्वयः आत्मनोनिरवयवत्वात्तन्नाशोऽ
नवशेषोघटादीनांसावयवत्वेनतन्नाशःसावशेषोदृष्टइतिविशेषद्योतनायलोकइत्युक्तं ननुदेहपुत्रादेरपिप्रेयस्त्वात्तन्नाशस्यापिमहानाशत्वेनदुःखहेतुत्वात्किंज्ञाननाशोविशेष्योच्यतइतितत्राह यद्यस्तीति
आत्मनोन्यस्यदेहपुत्रादेर्यद्यपिप्रेयस्त्वमस्तितथापिपुत्रादेरात्मशेषत्वेनप्रियत्वात्तन्नाशस्यस्वव्यतिक्रमात्स्वरूपज्ञाननाशादाधिक्यंनास्तीतिपूर्वेणनञध्याहारेणान्वेतव्यं अतएवनातःपरतरइत्युक्तम् । केचि
न्नह्यस्तीतिपठंति । तत्पक्षेध्याहारंविनान्वयःकर्तव्यः ३२ अथतस्मात्तृणाामिंद्रियार्थानांविषयाणामभिध्यानंनिरंतरंसंचिंतनंसर्वार्थानांसर्वपुरुषार्थानामपह्नवोविनाशहेतुः येनेंद्रियेणेंद्रियार्थाभिध्यानेनज्ञा
नविज्ञानात्सामान्यविशेषलक्षणज्ञानात्स्रंसितोभ्रंशितोमुग्धवांविवेकराहित्यमाविशतिप्राप्नोतीत्यर्थः ३३ विषयाभिध्यानस्यापिदुष्टसंसर्गोमूलकारणंसविपश्चितानकार्यइत्याह नकुर्यादिति धर्मादीनामत्यं
तविघातकमिति यदतोविपश्चिचीव्रतमस्तितीर्षुणामनसाकदापिदुष्टसंगंतकुर्यादित्यन्वयः नकार्यःकर्हिचित्संगइतिवापाठः तदाविपश्चितेतियोज्यम् ३४

SGDF Sri Gangadharji Digital Foundation

धर्मादिभिःसहपाठात्मोक्षस्यापितत्तुल्यतास्यादितिशंकांपरिहरति तत्रापीति स्वपक्षपातस्त्वभ्यासाद्भोगार्थव्यापृतस्यतु भवेत्ततोऽनेकशास्त्रयथार्थस्मरणेशिवा नश्यत्यतःस्मृतेर्नाशाद्भगवत्पक्षपातोऽपि
विनश्येत्तेनचैवास्यभवेज्ज्ञानविपर्ययः नचज्ञानविपर्यासादन्यन्नाशकरंक्वचित् सर्वस्यैतस्यमूलंहिदुष्टसंसर्गएवतु दुष्टसंगोविरक्तस्याप्यन्यथाज्ञानकारणं दुष्टसंगाद्धिविष्णोश्चस्वात्मत्वंमन्यतेऽबुधः अ
भावंस्वात्मनोन्यस्यमुक्तिंचापिनिरात्मतामितिसमाख्यास्मृतिसिद्धत्वादयमेवार्थोनशुक्तीर्थाद्युक्तार्थोग्राह्यःतमोहेतुत्वात् मोक्षस्यात्यंतिकत्वंकस्माद्विशेष्योच्यतेधर्मादेरपिपुरुषार्थत्वादित्यत्राह त्रै
वर्ग्यइतित्रिवर्गसंबंधिपुरुषार्थः कृत.तस्यकालात्मनोहरेर्भ्रूविभ्रमजनितनाशलक्षणभयसंयुतोयतस्तस्मादितिशेषः भविष्यन्नाशमवलोक्य नित्यमिति ३५ त्रैवर्ग्यार्थोब्रह्मलोकादिसंबंधीनां
नित्यइतितत्राह परावरेचेति गुणव्यतिकरान्मूलप्रकृतेरनुअनंतरंयेभावाःपदार्थाःपरावरेएष्यदतीतकालेपेवर्तमानाउत्कृष्टनिकृष्टलक्षणावा ईशस्यकालनाम्नोहरेर्भ्रूविभ्रमणविध्वंसिताशिषांविनाशितशुभा
नांतेषांक्षेमीनित्यानंदीनास्तीत्यन्वयः अनेनब्रह्मलोकादिप्राप्तिलक्षणःपुरुषार्थोपिननित्यइत्युक्तंभवति ॥ ३६ ॥ जगतोहरिणाबुद्धिपूर्वंसृष्टत्वात्तत्प्रसादेनतस्यबंधनिवृत्तिरन्यथोक्तानर्थएवेत्याह
मनोमात्रमिति इदंप्रत्यक्षप्रमाणसिद्धं विश्वंब्रह्मादिस्तंबपर्यंतं हरेर्मनसामितंनिर्मितंत्रातंरक्षितंमीयतेसंन्ह्रियते मीहिंसायामितिधातोः अमात्रेअपरिच्छिन्नेमनसिस्थितत्वाद्वामनोमात्रं तदुक्तं
मनोमात्रंहरेर्यस्मान्मनसामीयतेजगदिति अत्रदृष्टांतमाह यथेति केयंक्रियानामेतितत्राह क्रियाचेति स्वप्नेहरेरिच्छयाजाग्रद्दृष्टकरितुरगादिवासनयानिर्मितामात्रंतिप्रवर्ततइतिवासनामात्रं व्याप्तेमन

तत्रापिमोक्षएवार्थआत्यंतिकतयेष्यते ॥ त्रैवर्ग्यार्थोयतोनित्यंकृतांतभयसंयुतः ३५ परावरेचयेभावागुणव्यतिकरादनु ॥ नतेषांविद्यतेक्षेमीईशविध्वं
सिताशिषाम् ३६ मनोमात्रमिदंविश्वंयथास्वप्नेमनःक्रिया ॥ क्रियाचवासनामात्रंसानीहायांप्रलीयते ३७ आत्मात्वनीहयासाक्षात्स्वयंज्योतिःप्रसिध्य
ति ॥ एवंव्युदस्यात्ममायांजानंस्तूपरमेन्मुनिः ३८ नयत्रनिद्रामूर्छावानार्थदृक्चमनोरथः ॥ नानुवृत्तिर्नप्रलयस्तद्ब्रह्मपरमंविदुः ३९ तत्त्वंनरेंद्रजगता
मथतस्थुषांचदेहेंद्रियासुधिषणात्मभिरावृतानाम् ॥ यःक्षेत्रवित्त्वमनयोर्हृदिविष्वगाधिःप्रत्यक्चकास्तिभगवांस्तमवेहिसोऽस्मि ४०

सिविष्णोश्चस्थितत्वाद्वासनामयमिति वसआच्छादनइतिधातोःईश्वरेच्छयाच्छाद्यमानत्वाद्वासनामयं वसआच्छादनेत्यस्माद्धातोर्वावासनामयमितिच यतएवंहरेरिच्छाधीनंजगदतोहरेरनीहायांसृ
ष्टिव्यापाररहित्यावस्थायांसत्त्वादिगुणसाम्यलक्षणायांलीयते स्वस्वकारणानुप्रवेशपूर्वकमव्यक्ततामाप्नोति नतुशून्यतां तदेतदाह अनीहायामिति यतोहरेरिच्छाधीनाजगतःस्थितिः अतोविष्णोरनी
हायांलीयतेसकलंजगदितिच ३७ ननुमुक्तैःकीदृशोविष्णुःप्राप्यतइतितत्राह आत्मेति स्वयंज्योतिर्नित्याविलुप्तप्रकाशःसाक्षात्तुर्यआत्मा जाग्रदाद्यवस्थानुभविनोजीवात्मनोभिन्नोविष्णुरनीहया
अवस्थितस्तुजाग्रद्व्यापारशून्यएवस्याप्तरूपी प्रसिध्यतिप्राप्यते । मुमुक्षुभिरितिशेषइत्यन्वयः अनीहावस्थएवासौमुमुक्षुभिरवाप्यतइतिच फलमाह एवमिति जीवपरयोरेवमुक्तविधयास्व
स्वामिभावंजानन्मुनिः भिदापरपर्यायामात्ममायांबंधशक्तिंव्युदस्योपरमेद्धरिमुपगम्यसुखलक्षणांरतिंप्राप्यनिर्मूलितसंसारोभवेदित्यर्थः एवंविद्वान्बंधशक्तिंव्युदस्यहरिमाप्नुते प्रकृतिर्भिदाचमायाचभ्र
मश्चेत्यभिधीयते बंधशक्तिर्ययालोकोबंभ्रमीत्यनिशंभुवीतिच ३८ अनीहावस्थएवमुमुक्षुभिःप्राप्यइत्युक्तं तत्स्पष्टमाचष्टे नयत्रेति निद्रासुषुप्तिर्मूर्च्छामोहः अर्थदृग्जाग्रत् अनुवृत्तिर्जीवन्मुक्तिः अनुवृ
त्तिरितिप्राज्ञैर्जीवन्मुक्तिरुदीर्यतइतिच एताः निद्राद्यवस्थाःयत्रनसंति स्वशक्तिव्यंजितानभवंति तद्विजितात्मनोमनोजयवतोमुमुक्षोःप्राप्यंब्रह्मेत्यन्वयः ३९ ननुजीवात्मातदुपजीव्यःपरमात्माचक
थंज्ञातव्यइत्याशंक्यतत्त्वंविविच्योपदिशन्नाह तत्त्वमिति हेनरेंद्रयस्त्वनयोःस्थावरजंगमयोर्मध्येविष्वगाधिर्नानादुःखःसन्नेकोजीवोसि सदुःखीतिश्रुतितस्त्वंहृदिस्थितमवेहि हृदिस्थोआत्मेतिश्रुतिः

SGPF

अनेनजीवात्मनोदेहेकुत्रावस्थानमितिशंकापरिहृतेतिज्ञापते त्वंकइतितत्राह सोस्मीति योहंतवसदृशोजीवोस्मि तंमांज्ञानान्महान्भवामीत्यवैमिअनेनतारतम्यज्ञानमावश्यकमित्युक्तंभवति अथजीवस्व
रूपज्ञानानंतरमीश्वरज्ञानंप्रददामीत्याह अथेति यःक्षेत्रवित्क्षेत्रज्ञःसर्वांतर्यामीसर्वस्यप्रत्यक् चकास्तिआभिमुख्येनप्रकाशते दुर्भगशरीरस्थोपितन्मलाद्यलिप्ततयाजीवव्यतिरिक्तोजीवस्यात्यंतोप
कारित्वेनसाक्षित्वेनावभासतेसभगवांस्तुभ्यंसुखादिप्रदःश्रीनारायणइत्यवैहि तंविशिनष्टि जगतामिति देहश्चेंद्रियाणिचासवःप्राणाश्चधिषणाबुद्धिश्चात्माहंकारश्चेत्येतैरावृतानांजगतांजंगमानांतस्थुषां
स्थावराणांचतत्त्वंसर्वसत्ताप्रदत्वात् तदुक्तं सर्वसत्ताप्रदत्वात्तुसर्वतत्त्वंहरिःस्मृतः सर्वत्रविततत्वाद्वासोहंत्वमितिचोच्यते सर्वांतर्यात्मकत्वात्तुनजीवात्मतयाहरिरितिच अभिमानस्त्वहंकारआत्माचेत्य
भिधीयतइतिवचनात्तत्रात्माहंकारः व्यवधानेनान्वयोपियोग्यतापेक्षयाभवेदितिवचनात् सात्त्विकानांजीवपरभेदज्ञानेविशिष्टमुक्तिसाधनेयोग्यतामपेक्ष्यव्यवधानेनान्वयोयुक्तः अनेनेतरेषामभेदज्ञानेत
मःसाधनेयोग्यतेतियथास्थितान्वयइतिदर्शितं किंच तत्त्वज्ञानस्यगोपनीयत्वेनपरोक्षत्वस्यदेवप्रीतिहेतुत्वात् परोक्षप्रियाइवहिदेवाःप्रत्यक्षद्विषइतिश्रुतेः अतोयथापाठमेवार्थंवदंतोसुरप्रकृतित्वान्नमो
क्षशास्त्राधिकारिणइतिनुक्तासद्भिस्तत्संगःपरिहर्तव्यश्चंडालसंगवदितितात्पर्यम् ४० ननुमायाकल्पितपंचभूतात्मदेहेब्रह्मैवसुखदुःखेअनुभवति ब्रह्मैवसंसरतिब्रह्मैवमुच्यतइत्याचार्योक्तेःविमुक्तश्चमुच्यतइ
तिश्रुतेश्चातोनस्वामिभृत्यभावेनात्रद्वयांगीकारोयुक्तइतितत्राह यस्मिन्निति इदंसत्पृथिव्यादिकमसद्गगनादिकंजगद्यस्मिन्भगवतिआत्मतयानिजस्वरूपतयाविभातीतियोयमयोगिराद्धांतःसमायाविवेक
विधुतिः मायायोर्ज्ञानप्रकृत्यभिधेययोर्विवेकात् विजिरपृथग्भावइतिधातोः ज्ञानदेहोहरिःपंचभूतदेहोजीवइतिपृथङ्निश्चितज्ञानाद्विधुतिर्विध्वंसोयस्यायोगिराद्धांतस्यसतथोक्तः एतदेवदृष्टांतेनस्पष्टय
ति स्रजीति स्रजिमालाकृतौरज्जावहिबुद्धिर्वा अयंभावः यथारज्जुतत्त्वाज्ञानाद्रज्जौसर्पज्ञानमुत्पन्नंगुरूपदेशात्सर्पणदर्वीशिरोलक्षणफणाद्यभावज्ञानाद्वास्पर्शकार्कश्यज्ञानाद्वाविधूयते तथाप्रमाणबा

यस्मिन्निदंसदसदात्मतयाविभातिमायाविवेकविधुतिःस्रजिवाहिबुद्धिः ॥ तंनित्यमुक्तपरिशुद्धविबुद्धतत्त्वंप्रत्यूढकर्मकलिलप्रकृतिंप्रपद्ये ४१ यत्पाद
पंकजपलाशविलासभक्त्याकर्माशयग्रथितमुद्ग्रथयंतिसंतः ॥ तद्वन्नतद्विमतयोपिविरुद्धमार्गस्रोतोगुणास्तमरणंभजवासुदेवम् ४२

हुल्यदर्शनात्तत्त्वज्ञानोपदेष्ट्राचार्यवाक्याद्वाब्रह्मणोजगदात्मत्वंविधूयते नित्यमुक्तत्वादिलक्षणानामनन्यसाधारणानांसत्त्वाब्रह्मणःसंसारोयुक्तइतिस्पष्टयन्यच्छब्देनोक्तंतच्छब्देनपरामृश्यप्रपद्यइति
क्रियापदेनान्वेति तमिति जीवव्यावृत्त्यर्थंनित्यशब्दःप्रत्येकमभिसंपद्यते नित्यमुक्तंनित्यपरिशुद्धंचनित्यविबुद्धंचयत्तत्त्वमनारोपितंरूपंतद्यस्यसत्त्व अतएवप्रत्यूढेनिरस्तेकर्मपुण्यपापलक्षणमदृष्टंसत्त्वादि
गुणकलिलाप्रकृतिश्चयेनसतथातं यत्स्वरूपतयाभातमज्ञानांगगनादिकं विवेकज्ञानिनारज्जौसर्पभावाद्विधूयते तंनित्यमुक्तभावेनानिरस्तप्रकृतिंभजेत् नभ्रांतिर्जगतोदृष्टिर्नभ्रांतिर्हरिदर्शनं अन्योन्यात्म
तयादृष्टिर्भ्रांतिरित्यवधार्यतां मायेतिज्ञाननामस्यान्मायेतिप्रकृतिस्तथा ज्ञानस्वरूपंविष्णोस्तुप्रकृतिर्नहरेस्तनुः एवंविवेकिनोविश्वंब्रह्मरूपेणनेष्यते पंचभूतात्मकंदेहंविष्णोःपश्यंत्ययोगिनः तथानयो
गिराद्धांतोज्ञानदेहोयतोहरेरितिप्रमाणबाहुल्यान्मायादिशब्दानामुक्तएवार्थोनदुर्वादिकल्पितइतिनिरवद्यं सर्पभावत्सर्पज्ञानवत् ४१ एवंविधसंसारोच्छेदेकारणंहरेः सर्वोत्तमत्वज्ञानंभक्त्याविनाभूतमतोभ
क्तिरेवप्रधानमित्याह यत्पादेति यस्यपादपंकजयोःपत्रायमाणास्वंगुलीषुतत्त्वंनोद्ग्रथयंति कुतइतिहेतुगर्भविशेषणमाह विरुद्धेति विरुद्धमार्गाःस्रोतोगुणाःसंसारगुणायेषांतेतथोक्ताः संसारगुणानांवि
रुद्धत्वेनहेयत्वेनप्रतीयमानत्वादित्यर्थः संसारगुणानांविरुद्धत्वेनप्रतीतौकिंकारणमितिचेन्ननैजःसर्वगुणोत्कर्षस्वभावोदुस्त्यजः तदुक्तं नैजःसर्वगुणोत्कर्षःसर्वेभ्योमहदुच्यतइतिच अनेनतत्त्वज्ञानिषु
तत्तद्गुणोत्कर्षःमहत्त्वकारणमित्युक्तंभवति द्विमतौचज्ञानदौर्बल्यंकारणं अनाद्यंतंपरंब्रह्मनदेवाऋषयोविदुः एकस्तद्वेदभगवान्प्रभुर्नारायणोविराडिति अनेनश्रीनारायणादन्येसर्वेषामितिद्वामत्यंसंभाव्य
तइतिसूचितं अतस्त्वंतंवासुदेवमरणंशरणंव्रजेत्यन्वयः ॥ ४२ ॥

SGLF
Sri Gargeshwari Digital Foundation

संसारोत्तारहेतुत्वाद्भक्तेरेवसर्वगुणोत्कृष्टत्वमित्यभिप्रेत्याह कृच्छ्रइति अल्पक्लेशाभक्तिलक्षणतरीरहिताः षड्वर्गएवनक्रोयस्मिन्सतथा तंभवार्णवंयेतितीर्षंतितर्तुमिच्छंतितेषामिहमहान्कृच्छ्रइतियस्मात्त स्मात्त्वंहरेर्भजनीयमंघ्रिमुडुपंनावंकृत्वा व्यसनंविविधापच्युक्तं दुस्तरार्णवंज्ञाननावंविनातर्तुमशक्यं संसारसमुद्रमुत्तरेत्यन्वयः इतःपरमुपदेष्टव्यांशोनास्त्यतःपरंराज्ञाकिमुक्तमत्राह सएवमिति आत्म नोहरेर्मेधाज्ञानंयस्यसतथातेन मनोयोगवतावा ॥ ४४ ॥ किमवोचत्तत्राह कृतइति ॥ ४५ ॥ तदपूरणेभगवदागमनेनापिकिंप्रयोजनमितिशंकांशोनास्तीत्याशयेनाह निष्पादितामिति घृणालुभिर्दया शीलैः एवमुपकर्तृभ्योयुष्मभ्यंकापिगुरुदक्षिणामयादातव्या तद्गुरुदक्षिणालक्षणंकिंधनमात्मनादेहेनसहददेददामि नममकिंचित्स्वाधीनमस्तीत्यर्थः राज्यादिकमस्तिचेत्सर्वंतत्साधुभ्योदत्तं तदधी नमहंकथंदास्यामिपरकीयदानाच्चौर्यमापद्यतइतिभावेनोक्तं साधुदत्तमिति ४६ ननुतथापिसाधुभिरात्मसात्कृतंराज्यादिकंतद्दातव्यमितिचेत्सत्यंतद्दातुंयोग्यंचेद्दास्यामीत्याह प्राणाइति रायोवित्तानि ४७ युष्मभ्यंसर्वंनिवेदितमितिमोहादुक्तंतत्क्षंतव्यं सर्वस्ययुष्मदीयत्वान्नमयादातव्यमित्याह सेनापत्यमित्यादिना ४८ किंबहुनानुलापेनेदमेवभवदर्हणमित्याह यैरीदृशीति निगमिभिर्वैदिकैरात्मवा

कृच्छ्रोमहानिहभवार्णवमप्लवेशाःषड्वर्गनक्रमसुखेनतितीर्षयंति ॥ तत्त्वंहरेर्भगवतोभजनीयमंघ्रिंकृत्वोडुपंव्यसनमुत्तर दुस्तरार्णम् ४३ ॥ मैत्रेयउवाच ॥ सएवंब्रह्मपुत्रेणकुमारेणात्ममेधसा ॥ दर्शितात्मगतिःसम्यक्प्रशस्योवाचतंनृपः ४४ ॥ पृथुरुवाच ॥ कृतोमेनुग्रहःपूर्वंहरिणार्तानुकंपिना ॥ तमापाद यितुंब्रह्मन्भगवन्यूयमागताः ४५ निष्पादितंचकात्स्न्र्येनभगवद्भिर्घृणालुभिः ॥ साधुदत्तंहिसर्वंमेआत्मनासहकिंददे ४६ प्राणादाराःसुताब्रह्मन्गृहाश्च सपरिग्रहाः ॥ रायोमहीबलंकोशइतिसर्वंनिवेदितम् ४७ सेनापत्यंचराज्यंचदंडनेतृत्वमेवच ॥ सर्वलोकाधिपत्यंचवेदशास्त्रविदर्हति ४८ यैरीदृशीभगव तोगतिरात्मवादएकांततोनिगमिभिःप्रतिपादितानः ॥ तुष्यंत्वदभ्रकरुणाःस्वकृतेननित्यंकोनामतत्प्रतिकरोतिविनोदपात्रम् ४९ ॥ मैत्रेयउवाच ॥ त आत्मयोगपतयआदिराजेनपूजिताः॥ शीलंतदीयंशंसंतःखेऽभूवन्मिषतांनृणाम् ५० वैन्यस्तुधुर्योमहतांसंस्थित्याध्यात्मशिक्षया ॥ आप्तकाममिवात्मा नंमेनआत्मन्यवस्थितः ५१ कर्माणिचयथाकालंयथादेशंयथाबलम् ॥ यथोचितंयथावित्तमकरोद्ब्रह्मसात्कृतम् ५२ फलंब्रह्मणिविन्यस्यनिर्विषंगःसमाहि तः ॥ कर्माध्यक्षंचमन्वानआत्मानंप्रकृतेःपरम् ५३ गृहेषुवर्तमानोपिससाम्राज्यश्रियान्वितः ॥ नासज्जतेंद्रियार्थेषुनिरहंमतिरर्कवत् ५४ एवमध्यात्मयोगे नकर्माण्यनुसमाचरन्॥पुत्रानुत्पादयामासपंचार्चिष्यात्मसंमतान् ५५ विजिताश्वंधूम्रकेशंहर्यक्षंद्रविणंवृकम् ॥ सर्वेषांलोकपालानांदधारैकःपृथग्गुणान् ५६

देवेदांते एकांततोमुख्येननिर्णीतत्वात् यैर्भवद्भिरीदृशीहरेर्गतिरस्माकंप्रतिपादितातेयूयंस्वकृतेनतुष्यध्वमित्यन्वयः किंनीरसमधुरवचनेनेत्युक्तं तुष्यंत्विति ॥ ४९ ॥ तत्प्रियवचनात्तेतैःकिम कारीत्यत्राह तआत्मेति आत्मयोगस्याध्यात्मयोगस्योपदेष्टृत्वेनपतयःमिषतांपश्यतां खेआकाशे ५० पृथुनातेभ्यःसमप्राप्तानुग्रहःप्राप्तइत्यस्यलक्षणमाह वैन्यइति महतांधुर्यःधूर्वोढा संस्थित्यासंपूर्णं याध्यात्मशिक्षयापरमात्मतत्त्वज्ञानादानलक्षणया इवशब्दएवार्थे ५१ तस्यकर्मकरणप्रकारमाह कर्माणीति ५२ निर्विषंगः कर्मफलेष्वनासक्तः प्रकृतेःपरमात्मानंश्रीहरिंकर्मणामध्यक्षंसाक्षिणंम न्वानः ५३ ५४ विषयासक्त्यावर्तमानस्यपुत्रानुत्पादनेनस्वपुरराज्यरक्षणपुण्यप्राप्तिःकथमत्राह एवमिति अर्चिषिभार्यायां ५५ एवंसंन्यस्तसर्वकर्मापिराजाभगवदनुग्रहाविरोधेनतत्तत्कर्मर्णेंद्रादि तत्तद्गुणानुदधारेत्याह सर्वेषामिति ५६

SGDF

जगत्सृष्टेर्गोपीथायरक्षणाय अच्युतेआत्मामनोयस्यसोऽच्युतात्मकः राजशब्दंनिर्वक्ति मनोवागिति ५७ रंजनाद्राजेति इंद्रादिगुणधारणप्रकारंविविच्यवक्ति सोमराजइत्यादिना वसुजलं
वसुरत्नंजलंरश्मिर्वसुर्देवोविभावसुरित्यभिधानम् ५८ ५९ अचलराट्मेरुः ॥ ६० ॥ कोशाढ्यःधनौघपतिः ॥ ६१ ॥ सर्वात्मासर्वांतरस्थः भूतराट्सदाशिवः ६२ मृगराट्सिंहःअ
जोब्रह्मा ६३ आत्मतत्त्वंपरमात्मतत्त्वज्ञाने अधिकदृष्टांतोयं अथापितमेवाह भक्त्येत्यादिना गवादिषुभक्त्यालज्जादिगुणेन ६४ पुंभिरूर्ध्वगीतयोच्चैःकीर्तितयाकीर्त्यास्त्रीणांकर्णरंध्रेषुप्रविष्टः
सतांकर्णरंध्रेषुप्रविष्टः परोच्चमेचात्मतुल्यःस्वकार्यसमोरामइवेत्यन्वयः गुरुविप्रेषुभक्त्याचपरेषांहितकृत्तया प्रश्रयेणचकीर्त्यांचपृथूराममनुव्रतइतिवचनात् नेदंस्तुतिमात्रंसत्यमित्यर्थः नगुरुर्नचधर्मोस्ति
रामदेवस्यकुत्रचित् तथापिधर्मरक्षार्थंगुरुभक्तिमदर्शयदित्यतोरामस्यलोकसंग्रहार्थं नस्वनवाप्तफलप्राप्त्यर्थंगुरुभक्त्यादिकर्मितिसंतोष्टव्यम् ६५ ॥ इतिश्रीभागवतेचतुर्थस्कंधेविजयध्वजकृतटीकायां

गोपीथायजगत्सृष्टेःकालेस्वेस्वेच्युतात्मकः ॥ मनोवाङ्मूर्तिभिःसौम्यैर्गुणैःसंरंजयन्प्रजाः ५७ राजेत्यधान्नामधेयंसोमराजइवापरः ॥ सूर्यवद्विसृजन्गृह्ण
न्प्रतपंश्चभुवोवसु ५८ दुर्धर्षस्तेजसेवाग्निर्महेंद्रइवदुर्जयः ॥ तितिक्षयाधरित्रीवद्द्यौरिवाभीष्टदोनृणाम् ५९ वर्षतिस्मयथाकामंपर्जन्यइवतर्पयन् ॥ स
मुद्रइवदुर्बोधःसत्त्वेनाचलराडिव ६० धर्मराडिवशिक्षायामाश्चर्येहिमवानिव ॥ कुबेरइवकोशाढ्योगुप्तार्थोवरुणोयथा ६१ मातरिश्वेवसर्वात्माबलेन
महतौजसा ॥ अविषह्यतयादेवोभगवान्भूतराडिव ६२ कंदर्पइवसौंदर्येमनस्वीमृगराडिव ॥ वात्सल्येमनुवन्नृणांप्रभुत्वेभगवानजः ६३ बृहस्पति
र्ब्रह्मवादेआत्मतत्त्वेस्वयंहरिः ॥ भक्त्यागोगुरुविप्रेषुविष्वक्सेनानुवर्तिषु ६४ ह्रियाप्रश्रयशीलाभ्यामात्मतुल्यःपरोद्यमे ॥ कीर्त्योर्ध्वगीतयापुंभिस्त्रैलो
क्येतत्रतत्रह ॥ प्रविष्टःकर्णरंध्रेषुस्त्रीणांरामःसतामिव ६५ ॥ इतिश्रीभागवतेचतुर्थस्कंधेद्वाविंशोध्यायः ॥ २२ ॥ मैत्रेयउवाच ॥ दृष्ट्वात्मानंप्रवयसमेकदा
वैन्यआत्मवान् ॥ आत्मनावर्धिताशेषसानुसर्गःप्रजापतिः १ जगतस्तस्थुषश्चापिवृत्तिदोधर्मभृत्सताम् ॥ निष्पादितेश्वरादेशोयदर्थमिहजज्ञिवान्
२ आत्मजेष्वात्मजांन्यस्यविरहाद्रुदतीमिव ॥ प्रजासुविमनास्वेकःसदारोऽगात्तपोवनम् ३ तत्राप्यदाभ्यनियमोवैखानससुसंमते ॥ आरब्धउग्रत
पसियथास्वविषयेपुरा ४ कंदमूलफलाहारःशुष्कपर्णाशनःक्वचित् ॥ अब्भक्षःकतिचित्पक्षान्वायुभक्षस्ततःपरम् ५ ग्रीष्मेपंचतपावीरोवर्षास्वासारषा
ण्मुनिः ॥ आकंठमग्नःशिशिरउदकेस्थंडिलेशयः ६

द्वाविंशोध्यायः २२ ॥ ॥ योगेनदेहत्यागप्रकारःपृथ्व्यादितत्त्वानांतदभिमानिदेवतानांचस्वस्वकारणप्रवेशलक्षणोलयश्चदेहत्यागकालेचिंतनीयइतिनिरूप्यतेऽस्मिन्नध्याये तत्रादौपृथोस्तपसि
प्रारंभप्रकारंवक्ति दृष्ट्वेत्यादिना प्रवयसंगतवयसंस्थविरं आत्मवान्जितमनाः साहितोनुसर्गःपुत्रपौत्रादिलक्षणोयेनजनेनससानुसर्गः वर्धिताशेषःसानुसर्गःस्वराज्यकालीनजनोयेनसतथा
१ आरामकरणेनस्थावरस्यवृत्तिदानम् २ आत्मजांपृथिवीं राज्ञएष्यद्वियोगाद्रुदतीमिवस्थितां ३ आत्मनियमःकंदमूलाद्याहारःशरीरयात्रार्थमापाद्योयेनसआपाद्यात्मनियमः पुरास्वविषये
स्वराष्ट्रेउग्राणांदुष्टानांतपसिसंतापेदंडेयथाप्रारब्धस्तथोग्रतपसिकायक्लेशादिलक्षणेप्रारब्धइत्यर्थः ४ आत्मनियमानाह कंदेति ५ चंडतपआह ग्रीष्मइति पंचतपांस्यग्नयोयस्यसपंचतपाः अग्निरर्कः आसारषाट्निराश्रयत्वेनाग्रवृष्टिसेवी शिशिरेहिमर्तौ स्थंडिलेशयोनिशीतिशेषः ६

SGDF Sri Gargeshwari Digital Foundation

आरिराधयिषुराराधयितुकामस्तदर्थमुग्रंतप आचरदित्यन्वयः ७ ८ योगमुपासनोपायम् ९ भक्तिःप्रेमपूर्वंभजनं अनन्यविषयाभगवदेकविषया १० भक्तेःफलमाह तस्येति येनज्ञानेनसंशयपदंसंशय विपर्ययज्ञानस्थानंनिजत्वेनाभिमतंजीवकोशंवाह्यांतःकरणंलिंगशरीरंवाचिच्छेदछिनत्तिस्मतादृशंभगवतोज्ञानंतस्यपृथोरभूदित्यन्वयः तस्यहरेरनुस्मरणंनिरंतरध्यानंतत्पूर्वयानयाभक्त्यापरिशुद्धकर्मा सत्त्वगुणयुक्तआत्मामनोयस्यसतथातस्य अभूदित्यनेनभूसत्तायामितिधातोः सतएवज्ञानस्याविर्भावउच्यते नतुप्रागसतः तस्यज्ञानित्वात्ज्ञानिनोज्ञानस्याविर्भावः नहिपुरोवर्तीघटःपटोवाआविरभवदि तिव्यवहारोदृष्टचरइतिचेन्न बलवत्प्रतिबंधकेनतिरोभावसंभावात्तदुक्तं आविर्भावतिरोभावौज्ञानस्यज्ञानिनोपितु अपेक्ष्याज्ञस्तथाज्ञानमुत्पन्नमितिचोच्यते ज्ञानिनोपिज्ञानस्याविर्भावतिरोभावावपेक्ष्यासा वज्ञस्तथातस्यज्ञानंसमुत्पन्नमितिव्यवहारोयुज्यतइत्यर्थः ११ उत्पन्नज्ञानस्यस्थितिमाह छिन्नेति येनवयुनेनेदमच्छिनत्तज्ज्ञानंतत्यजइत्यन्वयः अन्यथाज्ञानसंभवइदमुक्तंकथंयुक्तं स्यादित्यतउक्तं छिन्ना न्यधीरिति निरस्तान्यथाज्ञानः स्वरूपज्ञानाभावेकथमिदमित्यतउक्तं अधिगतात्मगतीरिति आत्मशब्देनस्वस्वरूपंपरमात्माचोच्यते अधिगतेअपरोक्षीकृतेपरमात्मास्वस्वरूपंचयेनसतथा अतएवतत्साधर्म्यमाह निरीहइति ज्ञानोत्तरकालीनप्रवृत्तिमात्रतुपूर्ववाह्निधिवद्धइत्यर्थः अत्रज्ञानत्यागोनामनिर्लेपेनस्वरूपज्ञानेनकरतलामलकवत्प्रत्यक्षत्वेनवृत्तिज्ञानस्यबाह्यांतःकरणजन्यस्यभेद

तितिक्षुर्यतवाक्दांतऊर्ध्वरेताजितानिलः ॥ आरिराधयिषुःकृष्णमाचरत्तपउत्तमम् ७ तेनक्रमानुसिद्धेनध्वस्तकर्मामलाशयः ॥ प्राणायामैःसन्निरुद्धषड्
गैश्छिन्नबंधनः ८ सनत्कुमारोभगवान्यदाहाध्यात्मिकंपरम् ॥ योगंतेनैवपुरुषमभजत्पुरुषर्षभः ९ भगवद्धर्मिणःसाधोःश्रद्धयायततःसदा ॥ भक्तिर्भगव
तिब्रह्मण्यनन्यविषयाभवत् १० तस्यानयाभगवतःपरिशुद्धकर्मसत्त्वात्मनस्तदनुसंस्मरणानुपूर्व्या ॥ ज्ञानंविरक्तिमदभून्निशितेनयेनचिच्छेदसंशयप
दंनिजजीवकोशम् ११ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदंवयुनेनयेन ॥ तावत्तुयोगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासुर
तिंनकुर्यात् १२ एवंसवीरप्रवरःसंयोज्यात्मानमात्मनि ॥ ब्रह्मभूतोदृढंकालेतत्याजस्वंकलेवरम् १३ संपीड्यपायुंपार्ष्णिभ्यांवायुमुत्सर्पयञ्छनैः ॥
नाभ्यांकोष्ठेष्ववस्थाप्यहृदुरःकंठशीर्षणि १४

निरीक्षणंमद्धित्रमिदंनश्वरामितिदर्शनं नत्वन्यः तदुक्तं अपरोक्षतयावृत्तिज्ञानभेदानिरीक्षणं स्वरूपज्ञानसंस्थित्याज्ञानत्यागउदर्यितइति अयंविशेषोपितत्यजइतिल्यप्त्यासेनसूचितइति । कथमस्य स्वरूपज्ञानमस्तीतिज्ञापकइतितल्लक्षयति तावदिति यावद्गदाग्रजस्यश्रीनारायणस्यकथासुरतिंनकुर्यात्तावद्यतिर्निर्जितेंद्रियग्रामोपिपुरुषोयोगगतिभिःप्राणायामादिलक्षणैर्योगसाधनैरप्रमत्तोऽनाविर्भूतस्व रूपज्ञानोभवति अनेनभगवत्कथारातिःस्वरूपज्ञानेनेतिलक्ष्यते तदप्युक्तं स्वरूपज्ञानतःसम्यग्रतिर्विष्णुकथासुचेति यद्वा योगादुत्पन्नैर्गतिशब्दवाच्यैर्ज्ञानैः स्वरूपविषयैर्भगवत्तत्त्वंब्रह्मादितारतम्यं पंचविधभेदंजीवस्वरूपमित्यादिविषयबाहुल्यात्स्वरूपज्ञानस्यबाहुल्यं प्रयत्नोनभवति १२ उपसंहरत्येवमिति ब्रह्मभूतःब्रह्मणिभूतः ब्रह्माधारतयास्थितइत्यन्वयः कालेप्रारब्धकर्मक्षयसमये । तत्याजेत्यनेनस्वकलेवरमेवात्याक्षीन्नतुस्वरूपज्ञानमित्यवगंतव्यं १३ स्वच्छंदमृत्यूनांयोगिनांदेहत्यागप्रकारंदर्शयितुमस्योत्क्रांतिप्रकारमाह संपीड्येति वज्रासनस्थितोवायुमुत्सर्पयन्नूर्ध्वंनयन्मूला धाराद्नाभ्यांहृदुरसिकंठचशीर्षणिभ्रूमध्येचेत्येषुकोष्ठेषुस्थानविशेषेषुशनैरवस्थाप्य १४

SGDF
Sri Gangeshwari Digital Foundation

अनेनक्रमेणासून्पंचवृत्त्याबहुवचनं मूर्ध्निशिरोमध्यप्रदेशेआवेश्यनिस्पृहःस्थिराचित्तस्तिष्ठेदित्यन्वयः देहेस्थितानांपंचभूतानांस्वस्वकारणेषुलयोऽनेनोच्यते देहेवायुभागंतत्कारणेधिदैववायावयूयुजत्
अध्यात्मवायोरधिदैववायुःकारणंतत्रैवलयइत्याचिंतयादित्यन्वयः तदुक्तं अस्येदंकारणमितिज्ञानमेवविलापनं समाधिकालेविज्ञेयंदेहादेर्दर्शनात्पुनरिति एवमेवोत्तरत्रापिज्ञातव्यम् १५ छिद्रबहुत्वा
पेक्षयाखानीतिबहुवचनं ग्रंथांतरोक्तेर्यत्तदपेक्षयाविभागशइति इदानींपंचभूतानांस्वकारणेषुलयध्यानमाह क्षितिमिति १६ इंद्रियलयप्रकारध्यानमाह इंद्रियाणीति समस्तानींद्रियाणियथोद्भवंय
थोत्पत्तिःस्वस्वकारणेषुलीयंतइतितन्मात्राणिशब्दादीनिचयथोद्भवंलीयंतइतिव्याचिंतयदित्यन्वयः अत्रायंविभागः इंद्रियाणितैजसाहंकारेतदभिमानिदेवावैकारिकाहंकाराभिमानिषुतेषांदेहावै
कारिकाहंकारेपृथिव्यादयोगंधादिभिःसहभूतादौतामसाहंकारेलीयंतइति भूतादिरित्युपलक्षणं एवंत्रिविधाहंकारस्तानिंद्रियादीन्समुत्क्षिप्यसंभृत्यमहत्यात्मनिमहत्तत्त्वेतदभिमानिनिचतुर्मुखेचाहंकारा
भिमानीरुद्रोलीयतइतिमनःसंदधइत्यन्वयः १७ सर्वेषांगुणानांभक्तिज्ञानादीनांविशेषेणन्यासोनिधानंयस्मिन्सतथातं सत्त्वादिगुणैर्विविधाप्रपंचरचनायेनसतथा तंवा तंमहांतंचतुर्मुखंतत्त्वलक्षणं
जडंचमायामयेमायाशब्दवाच्येजीवेप्राणधारणशक्तिमतिलक्ष्मीतत्त्वेन्यस्यातिप्रविशतीतिध्यायेत् अन्यत्तुजडप्रकृतौजीवतइतिजीवशब्दवाच्यत्वंचचेतनशरीराकारतयापरिणामादुपचारः प्रलयेके
शवमनुशेतइत्यनुशयशब्दवाच्यत्वंपुंशक्तियुक्तत्वात्पुल्लिंगशब्दवाच्यांप्रकृतिंचजगदादानादात्मशब्दाभिधेयस्यहरेराधारतयातिष्ठतीत्यात्मस्थमचिंतयत् अनुशयीचित्प्रकृत्यधीनत्वात्तद्द्वारागतत्वाद्वा

उत्सर्पयन्नसून्मूर्ध्निक्रमेणावेश्यनिस्पृहः ॥ वायुंवायौक्षितौकायंतेजस्तेजस्ययूयुजत् १५ खान्याकाशेद्रवंतोयेयथास्थानंविभागशः ॥ क्षितिमंभसितत्ते
जस्यदोवायौनभस्यमुम् १६ इंद्रियाणिसमस्तानितन्मात्राणियथोद्भवम् ॥ भूतादिस्तान्समुत्क्षिप्यमहत्यात्मनिसंदधे १७ तंसर्वगुणविन्यासंजीवेमा
यामयेन्यधात् ॥ तंचानुशयमात्मस्थमसावनुशयीपुमान् ॥ ज्ञानवैराग्यवीर्येणस्वरूपस्थेव्यधात्प्रभुः १८ अर्चिर्नाममहाराज्ञीतत्पत्न्यनुगतावनम् ॥
सुकुमार्यतदर्हाचयत्पद्भ्यांस्पर्शनंभुवः १९ अतीवभर्तुर्व्रतधर्मनिष्ठयाशुश्रूषयाचार्षदेहयात्रया ॥ नाविंदतार्तिंव्रतकर्शितापिसाप्रेयस्करस्पर्शनमाननिर्वृ
ता २० देहंविपन्नाखिलचेतनादिकंपत्युःपृथिव्यादयितस्यचात्मनः ॥ आलक्ष्यकिंचिच्चविलप्यसासतीचितामथारोपयदद्रिसानुनि २१ विधायकृत्यं
ह्रदिनीजलाप्लुतातिलोदकंभर्तुरुदारकर्मणः ॥ नत्वादिविस्थांस्त्रिदशांस्त्रिःपरीत्यविवेशवह्निंध्यायतीभर्तृपादम् २२

नुशयीशब्दवाच्योसौपुमानित्युपलक्षणंचेतनराशिः अप्राकृतशरीरत्वात्स्वरूपशब्दवाच्येब्रह्मणिचतुर्मुखेनसहतिष्ठतीतिध्यानंव्यधात्प्रभुरित्यनेनमनोनुसंधानमस्तीतिध्वनयति केनैतत्सामर्थ्य
मभूदित्यतउक्तंज्ञानेति यद्वा एवंविधोपासनाजनितसामर्थ्येनानुशयीपृथुः स्वस्वरूपेब्रह्मणिसायुज्यलक्षणंमोक्षमाप्तुंव्यधादित्यन्वयइति मायेतिप्रकृतिश्चेतिमायाजीवश्चकथ्यते शेतेनुकेशवंयस्मा
त्तस्मादनुशयोपिच एतैस्तुनामभिर्वाच्याश्रीविष्णोरनपायिनी तथैवानुशयीजीवस्तयाबद्धोयतःसदा पुरुषःशयनात्पूर्षुतथाऽहानादहंस्मृतः अप्राकृततनुत्वात्तुस्वरूपंहरिरुच्यते नित्यचिद्दर्शनाद्भि
त्यंब्रह्मपूर्णत्वतःसदेतिसमाख्यासिद्धत्वादुक्तएवार्थोनाद्वैतवादिकल्पितइतिसिद्धम् १८ पत्याचैवंगतेतत्रवनेऽर्चिषाभार्ययाकिमकारीतितत्राह अर्चिर्नामेति पद्भ्यांभुवःस्पर्शनंयत्तदनर्हा १९ भर्तुर्व्र
तंग्राम्यवर्जनादितदेवस्वस्याअपिधर्मः तत्रनिष्ठयाआर्षदेहयात्रयाकंदमूलफलाद्यशनलक्षणया एवंविधानुष्ठानेनपरिकर्शितापिप्रेयसःपत्युःकरस्पर्शलक्षणमानेननिर्वृतानंदाप्लुताआर्तिंव्रतानुष्ठानानि
मित्तक्लेशंनाविंदतेत्यन्वयः २० एवंतस्याःपृथोःपत्नीत्वयोग्यतामनुवर्ण्योत्तराक्रियांवक्ति देहमित्यादिना पृथिव्याआत्मनः स्वस्याश्चदयितस्यपत्युर्देहंविपन्नाखिलचेतनादिकंचैतन्यप्राणादिवृत्ति
लक्षणरहितमालक्ष्यचितां शवदहनसाधनकाष्ठं २१ ह्रदिनींनदींत्रिःपरीत्यप्रदक्षिणीकृत्य २२ ५३

SGLF Sri Gangeshwari Digital Foundation

सत्याःवनेपिराजस्त्रीभोगलक्ष्मीसामग्रीसमभूदित्याह विलोक्येति २३ कुसुमासारंपुष्पवृष्टिं २४ धन्यासवर्गुणैःपूर्णा अनपेक्षोगुणैपूर्णोधन्यइत्युच्यतेबुधैरित्यभिधानं २५ २६ यैमर्त्यनैष्कर्म्यं मोक्षलक्षणंभगवत्पदंसाधयंत्युत विद्युद्वल्लोलानिचलान्यायूंषियेषांतेतथातेषामन्यद्दुरापंकिंनकिमपीत्यर्थः२७आपवर्ग्यंमुक्तिसाधनकारणं२८पतिलोकंनाथवंतंलोकमितिशंकानिवृत्त्यर्थं वैन्योयंलोकंप्रापतं पतिलोकंगताभूदितिस्पष्टितं २९ उपसंहरति इत्थमिति योऽसौपृथुरित्थंभूतानुभावः अनुभावःप्रभावेस्यान्निश्चयेभावसूचकइतियादवः भगोयोन्यांभगोयत्नेयशोवीर्यार्कभूतिषु कांतीच्छाज्ञानवैराग्यंधर्मै श्वर्यतपःसुवेतिवचनात् सत्प्रयत्नादिगुणवतामतिशयेनप्रधानत्वात् भगवत्तमः ३० फलमाह यइति पदवींभक्तिज्ञानादिलक्षणां ३१ वर्णभेदेनफलंविविनक्ति ब्राह्मणइति ३२ श्रव णाद्यावृत्त्यासाधारणफलमाह त्रिःकृत्वइति ३३ प्रतिपंथिनिवारकंचेदभीष्टसिद्धिःस्यादनेनतत्कथंस्यादित्यतस्तद्विशिनष्टि इदमिति ३४ व्याख्यातुर्विशेषफलमाह धर्मार्थेति चारितस्यताहक्

विलोक्यानुगतांसाध्वींपृथुंवीरवरंपतिम् ॥ तुष्टुवुर्वरदादेवैर्देवपत्न्यःसहस्रशः २३ कुर्वंत्यःकुसुमासारंतस्मिन्मंदरसानुनि ॥ नदत्स्वमरतूर्येषुगृणंतिस्म परस्परम् २४ अहोइयंवधूर्धन्यायाचैवंभूभुजांपतिम् ॥ सर्वात्मनापतिंभेजेयज्ञेशंश्रीवधूरिव २५ सैषानूनंव्रजत्यूर्ध्वमनुवैन्यंपतिंसती ॥ पश्यतास्मा नतीत्यार्चिर्दुर्विभाव्येनकर्मणा २६ तेषांदुरापंकिंत्वन्य न्मर्त्यानांभगवत्पदम् ॥ विद्युल्लोलायुषोयेवैनैष्कर्म्यंसाधयंत्युत २७ सवंचितोबतात्मध्रुक्कृच्छ्रे णमहताभुवि ॥ लब्ध्वापवर्ग्यंमानुष्यंविषयेषुविषज्जते २८ ॥ मैत्रेयउवाच ॥ स्तुवंतीष्वमरस्त्रीषुपतिलोकंगतावधूः ॥ यंवाआत्मविदांधुर्योवैन्यःप्रा पाच्युताशयः २९ इत्थंभूतानुभावोऽसौपृथुःसभगवत्तमः ॥ कीर्तितंतस्यचरितमुद्दामचरितस्यते ३० यइदंसुमहत्पुण्यंश्रद्धयावहितःपठेत् ॥ श्रावये च्छृणुयाद्वापिसपृथोःपदवीमियात् ३१ ब्राह्मणोब्रह्मवर्चस्वीराजन्योजगतीपतिः ॥ वैश्यःपठन्विट्पतिःस्याच्छूद्रउत्तमतामियात् ३२ त्रिःकृत्वइदमाक र्ण्यनरोनार्यथवादृतः ॥ अप्रजःसुप्रजतमोनिर्धनोधनवत्तमः ३३ अस्पष्टकीर्तिःसुयशामूर्खोभवतिपंडितः ॥ इदंस्वस्त्ययनंपुंसाममंगल्यनिवारणम् ॥ धन्यंयशस्यमायुष्यंस्वर्ग्यंकलिमलापहम् ३४ धर्मार्थकाममोक्षाणांसम्यक्सिद्धिमभीप्सुभिः ॥ श्रद्धयैतदनुश्राव्यंचतुर्णांकारणंपरम् ३५ संग्रामा भिमुखोराजाश्रुत्वैतदभियातियान् ॥ बलिंतस्मैहरंत्यग्रेराजानःपृथवेयथा ३६ मुक्तान्यसंगोभगवत्यमलांभक्तिमुद्वहन् ॥ वैन्यस्यचरितंपुण्यंशृणुया च्छ्रावयेत्पठेत् ३७ वैचित्रवीर्याभिहितंमहन्माहात्म्यसूचकम् ॥ अस्मिन्कृतमतिर्मर्त्यःपार्थवींगतिमाप्नुयात् ३८ अनुदिनमिदमादरेणशृण्वन्पृथुचरितं प्रथयन्विमुक्तसंगः ॥ भगवतिभवसिंधुपारभूतेसचनिपुणांलभतेरतिंमनुष्यः ३९ ॥ ॥ इतिश्रीभागवतेचतुर्थस्कंधेत्रयोविंशोऽध्यायः ॥ २३ ॥

सामर्थ्याभावेतदिच्छयाकिमित्यतउक्तं चतुर्णामिति एतत्सामान्यस्वभावेकिमनेनेत्यतउक्तं परमिति परमुत्कृष्टं ३५ असकृदावृत्त्याक्षिप्रंदिग्विजयफलमपिस्यादित्याह संग्रामाभिमुखइति ३६ भगवद्भक्त्यविनाभावेनश्रवणादिकुर्वतउक्तंफलंस्यान्नान्यथाइत्याह मुक्तेति ३७ पुनस्तात्पर्यादस्मिन्भक्तिंग्रंथयति वैचित्रवीर्येति हेविदुर पार्थवींपृथोर्विद्यमानां ३८ तस्यचरितस्यशब्दादि विषयपरत्वेकथंभागवतानामुपकारइतितत्राह अनुदिनमिति प्रथयन्व्याख्यांकुर्वन् भवसिंधोःसंसारसमुद्रस्यपारभूतेतीरांतरीभूतेनिपुणांश्रीहरिप्रसादजननसमर्थां ३९ इतिश्रीभागवते चतुर्थेविजयध्वजकृतटीकायांत्रयोविंशोऽध्यायः २३

SGLF
Sri Gargeshwari Digital Foundation

ईश्वराज्ज्ञानमन्विच्छेन्मोक्षमिच्छेज्जनार्दनादित्यतोमोक्षसिद्धयेरुद्राज्ज्ञानोपदेशप्रकारोब्रह्मपदयोग्यानामृजूनांदेवानामुत्तमाधिकारित्वंचेतिद्वयमस्मिन्नध्यायेनिरूप्यते तत्रादावेतस्योपोद्घातमाह ।विजि
ताश्वइति काष्ठादिशः १ तुर्याचतुर्थीमुत्तरां २ अंतर्धानगतिमदृश्यविद्यांनाम्नाशिखंडिन्यांभार्यायां ३ पुरापूर्वजन्मनि । अग्नीनांमनुष्ययोनावुत्पत्तौनिमित्तमाह वसिष्ठेति तत्क्रम
माह पुनरिति ४ अंतर्धानोविजिताश्वएव तंविशिनष्टि यइंद्रमिति ५ कर्माधिकारेस्थितस्यतस्यसंन्यासप्रकारंवक्ति राज्ञामिति ६ भगवदर्पणक्रियया।क्रियमाणस्यकर्मणउत्पन्न
ज्ञानफलमाह तत्रापीति हंसंनिर्मलं ७ ८ हविर्धानपुत्रोबर्हिष्मत्कर्मकांडेषुप्रवृत्तमार्गोनिवृत्तिमार्गाविरोधेनोभयत्रानिष्णातोऽभूदित्याह बर्हिष्मन्निति ९ तत्रक्रियाकांडनैपुण्यंविशदय
ति यस्येति अनेनप्राचीनबर्हिरितिनामध्वनयति देवयजनंयज्ञक्षेत्रम् ॥ १० ॥ अपत्नीकस्यास्ययज्ञकरणंकथमितिशंकांनिवारयितुमाह सामुद्रीमिति समुद्रपुत्री देवदेवेनब्रह्मणो

॥ मैत्रेयउवाच ॥ विजिताश्वोथराजासीत्पृथुपुत्रःपृथुश्रवाः ॥ यवीयेभ्योददत्काष्ठाभ्रातृभ्योभ्रातृवत्सलः १ हर्यक्षायादिशत्प्राचींधूम्रकेशायदक्षिणाम् ॥
प्रतीचींवृकसंज्ञायतुर्यांद्रविणसंज्ञके २ अंतर्धानगतिंशक्राल्लब्ध्वांतर्धानसंज्ञितः ॥ अपत्यत्रयमाधत्तशिखंडिन्यांसुसंमतः ३ पावकःपवमानश्चशुचिरि
त्यग्नयःपुरा ॥ वसिष्ठशापादुत्पन्नाःपुनर्योगगतिंगताः ४ अंतर्धानोनभस्वत्यांहविर्धानमविंदत ॥ यइंद्रमश्वहर्तारंविद्वानपिनजघ्निवान् ॥ ५ ॥
राज्ञांवृत्तिंकरादानंदंडशुल्कादिदारुणम् ॥ मन्यमानोदीर्घसत्रव्याजेनविससर्जह ६ तत्रापिहंसंपुरुषंपरमात्मानमात्मदृक् ॥ यजंस्तल्लोकतामापपरमेणस
माधिना ७ हविर्धानाद्धविर्धानीविदुरासूतषट्सुतान् ॥ बर्हिष्मंतंगयंशुक्लंकृष्णंसत्यंजितव्रतम् ८ बर्हिष्मांस्तुमहाभागोहाविर्धानिःप्रजापतिः ॥ क्रिया
कांडेषुनिष्णातोयोगेषुचकुरूद्वह ९ यस्येदंदेवयजनमनुयज्ञंवितन्वतः ॥ प्राचीनाग्रैःकुशैरासीदास्तृतंवसुधातलम् १० सामुद्रींदेवदेवोक्तामुपयेमेशत
द्रुतिम् ॥ यांवीक्ष्यचारुसर्वांगींकिशोरींसुष्ठ्वलंकृताम् ॥ परिक्रमंतीमुद्वाहेचकमेऽग्निःशुकीमिव ११ विबुधासुरगंधर्वमुनिसिद्धमहोरगाः ॥ विजिताःसूर्यया
दिक्षुक्वणयंत्यैवनूपुरैः १२ प्राचीनबर्हिषःपुत्राःशतद्रुत्यांदशाभवन् ॥ तुल्यनामव्रताःसर्वेधर्मस्नाताःप्रचेतसः १३ पित्रादिष्टाःप्रजासर्गेतपसेऽर्णवमावि
शन् ॥ दशवर्षसहस्राणितपस्यंतस्तपस्विनः १४ यदुक्तंपथिदृष्टेनगिरिशेनप्रसीदता ॥ तद्ध्यायंतोजपंतश्चपूजयंतश्चसंयताः १५ ॥ विदुरउवाच ॥
प्रचेतसांगिरित्रेणयथासीत्पथिसंगमः ॥ यद्वाप्याहहरःप्रीतस्तन्नोब्रह्मन्वदार्थवत् १६

क्तां तांविशिनष्टि यामिति शुकीमिवयथानाम्नाशुकींराजपुत्रीमग्निःप्रदक्षिणीकुर्वाणांकामित्वादादापांतरधात्तथायामेनामप्यादातुंशक्त्यभावेप्यग्निश्चकमेइत्यन्वयः राजपुत्रींशुकीमग्निरावर्तंतींप्रद
क्षिणं आदायांतरधाद्दानसमयेमन्मथातुरइतिवचनादयंविशेषोज्ञातव्यः ॥ ११ ॥ अग्निश्चकमइतियन्नैतच्चित्रमितिभावेनाह विबुधेति अग्नेरपिविबुधेष्वेकत्वात् सूर्यानवोढा सूर्यांविहर्तुनासदे
तिश्रुतेः १२ तुल्यंनामव्रतंचयेषांतेतथा किंतत्तुल्यंनामेत्यत्राह प्रचेतसइति १३ तत्कर्माह पित्रादिष्टाइति १४ एष।कोगुरुःकिंजप्यंकिंध्येयमत्राह यदुक्तमिति १५ संक्षेपेणोक्तं विस्तरतःश्रोतुंविदुरः
पृच्छति प्रचेतसामिति यद्वाकिंवा अर्थवत्प्रयोजनवत् १६

पथिकानांपुरुषाणांतत्रसंगमःसुलभःस्यादतःकिंचोद्यमत्राह संगमइति असंगामुनयःसतामभीप्सितमदधुस्तेनशिवेनसहसंगमः १७ जगतोनिरोगत्वायविचरतोपिशिवस्यात्मारामत्वेननिस्पृहस्य संगमेपिसंभाषणंनसंभाव्यतइत्याशयेनाह आत्मारामोपीति यस्त्वस्यलोककल्पस्यजनस्यरोगान्मुक्तत्वस्यराधसेसिद्धये तीव्रयाशक्त्येत्यनेनसंभाषणानुपपत्तिंसूचयति ॥ १८ ॥ संभाषणस्ययोग्यावस्थांवक्ष्यन्मैत्रेयःप्रचेतसांकथामादितआवर्तयति प्रचेतसइति १९ समुद्रमुपसमुद्रस्यसमीपे विस्तीर्णंदक्षिणोत्तरायतं महतःकण्वस्यमुनेर्मनइवस्वच्छं यद्वा महतांश्रीनारायणस्यचरणारविंदपरायणानांमनोयथानिर्मलंतथा ॥ २० ॥ कतिपयैःश्लोकैःसरसःसेवनीयत्वंवक्ति नीलेत्यादिना नीलोत्पलानांरक्तोत्पलानामब्जानामंभोजानां इंदीवराणांपद्मविशेषाणां कह्लाराणांसौगंधिकानां आकरमुत्पत्तिस्थानं मद्गुःकारंडवःप्लवइत्यभिधानम् ॥ २१ ॥ मत्तभ्रमराणांसौस्वर्येणशोभनस्वरपरंपरयाहृष्टरोमलतायुक्ताअंघ्रिपावृक्षायत्रतत्तथा तद्रोमलोमत्वगित्यर्थः दिक्षुपद्मकोशरजोविक्षिपतःप्रसारयतःपवनस्योत्सवःशैत्यमांद्यसौरभ्यलक्षणोयस्मिंस्तथातत् कोशोस्त्रीमुकुलेदिव्येशास्त्रइतियादवः ॥ २२ ॥ दिव्योमार्गोयेषांतेदिव्यमार्गादेवास्तेषांमनोहरं दिव्यमार्गमितिपाठेदिव्याःक्रीडा

संगमःखलुविप्रर्षेशिवेनहिशरीरिणाम् ॥ दुर्लभोमुनयोदध्युरसंगाःसदभीप्सितम् १७ आत्मारामोपिय स्त्वस्य लोककल्पस्यराधसे ॥ शक्त्यायुक्तोविचरति तीव्रयाभगवान्भवः १८ ॥ मैत्रेयउवाच ॥ प्रचेतसःपितुर्वाक्यंशिरसाधायसाधवः ॥ दिशंप्रतीचींप्रययुस्तपस्याहतचेतसः १९ समुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः ॥ महन्मनइवस्वच्छंप्रसन्नसलिलाशयम् २० नीलरक्तोत्पलांभोजकह्लारेंदीवराकरम् ॥ हंससारसचक्राह्वकारंडवनिकूजितम् २१ मत्तभ्रमरसौस्वर्यहृष्टरोमलतांघ्रिपम् ॥ पद्मकोशरजोदिक्षुविक्षिपत्पवनोत्सवम् २२ तत्रगांधर्वमाकर्ण्यदिव्यमार्गमनोहरम् ॥ विसिस्म्यूराजपुत्रास्तेमृदंगपणवाद्यवत् २३ तर्ह्येवसरसस्तस्मान्निष्क्रामंतंसहानुगम् ॥ उपगीयमानममरप्रवरंविबुधानुगैः २४ तप्तहेमनिकर्षाभंशितिकंठंत्रिलोचनम् ॥ प्रसादसुमुखंवीक्ष्यप्रणेमुर्जातकौतुकाः २५ सतान्प्रपन्नार्तिहरोभगवान्धर्मवत्सलः ॥ धर्मज्ञान्शीलसंपन्नान्प्रीतान्प्रीतउवाचह २६ ॥ ॥ रुद्रउवाच ॥ यूयंबर्हिषदःपुत्राविदितंवश्चिकीर्षितम् ॥ अनुग्रहायभद्रंवएवंमेदर्शनंकृतम् २७ यःपरस्तमसःसाक्षात्त्रिगुणाज्जीवसंज्ञितात् ॥ भगवंतंवासुदेवंप्रपन्नःसप्रियोहिमे २८ स्वधर्मनिष्ठःशतजन्मभिःपुमान्विरिंचतामेतिततःपरंहिमाम् ॥ अव्याकृतंभागवतोथवैष्णवंपदंयथाहंविविधैःकलात्यये २९

दिकेहेतवोमार्गाःसप्तस्वरभेदायस्मिंस्तत्तथाताद्दशं गांधर्वंगानंमृदंगादीनामनुकूलं २३ २४ तप्तहेमनिकर्षस्तप्तसुवर्णकर्षणपाषाणस्तद्वान्निर्मलं नैर्मल्येदृष्टांतोयंनतुधावल्ये तप्तहेमनिकर्षाभइत्यतोऽन्यःकश्चिदित्यतःशितिकंठमिति । सोपिमयूरःकिंनस्यादित्यतस्त्रिलोचनमिति २५ प्रणतिफलमाह सतानिति २६ वोयुष्माकमनुग्रहायैवैवंविधंभद्रंकल्याणंदर्शनंकृतमित्यन्वयः अनेनतीव्रयाशक्त्याविचरतीत्यस्यपरिहारउक्तोभवति संभाषणयोग्यरूपदर्शनादिति २७ विष्णुभक्तानस्मान्कथंभवाननुगृह्णातीतिचेत्तत्राह यःपरइति योजीवसंज्ञितात्त्रिगुणात्तमसोलक्ष्मीतत्त्वात् साक्षात्परस्तंभगवंतंवासुदेवंशरणंप्रपन्नःसमेप्रियोहियस्मात्तस्माद्भवंतोमदनुग्रहयोग्याइत्यर्थः सजीवमायांप्रकृतिंसिसृक्षंतीं तमआसीत्तमसागूढमग्रेप्रकेतमितिवचनद्वयेनलक्ष्मीतत्त्वस्यजीवशब्दवाच्यत्वंतमःशब्दवाच्यत्वंचसिद्धं २८ इतोप्यनुगृह्णामीतिवक्तुमृजूनामपिबहुजन्मसाध्योभगवत्प्रसादःकिमुतान्येषामितिध्वनयन्विरिंचपदप्राप्तिसाधनसामग्रीमाह स्वधर्मेति वैराग्यभक्तिज्ञानादयःस्वधर्मास्तेषुनिष्ठानितरांस्थितिर्यस्यसतथा सऋजुष्वेकःपुमाञ्छतजन्मभिरेकोनशतजन्मभ्यःपूर्वकालमारभ्यसंचीर्णहरिगुरूपासनाजनितभगवत्प्रसादेनविरिंचतामेति ब्रह्मपदंप्राप्नोतीत्यन्वयः

ततःपरंब्रह्मपरानुभवानंतरंमांश्रियमेति हिशब्देनश्रीद्वारमात्रंब्रह्मणइतिसूचयति अव्याकृतंविशातियार्हैगुणत्रयात्माकालंपरंस्वमनुभूयेत्युक्तेरव्याकृतंनिर्विकारंलक्ष्मीतत्त्वमित्यर्थः ऋजवोनामयेदेवाये
ग्याब्रह्मपदस्यतु तएवशतजन्मानिविशेषोपासकाहरेः प्राप्यब्रह्मपदंपश्चाच्छ्रियंप्राप्यानुमोदिताः तयाततोहरिंयांतिवसंतिहरिसन्निधौ अनादिकालभक्ताश्चज्ञानिनस्तेनसंशयः विशिष्टाज्ञानभक्त्यादौ
सर्वजीवनिकायतः सर्वदापिविशेषेणशतजन्मप्रयत्नतः स्वपदप्राप्तिरुद्दिष्टाततोमुक्तिरवाप्यत इतिनिर्णायकवचनादुक्तएवार्थोनापरः उक्तलयंविशिनष्टि भागवतइति अथश्रियंप्रविश्यभागवतोभगव
द्भिर्भाग्यवद्भिर्युक्तोब्रह्मा यथार्हंयथायोग्यंविविधैःकार्यकारणसंघातैःसहकलात्ययेषोडशकलात्मकशरीरलयोपलक्षितजगत्प्रलये वैष्णवंपदमपरिच्छिन्नंभगवत्स्वरूपमेतीत्यन्वयः अस्मदादयोप्यनेनै
वव्याख्यातास्तथाहि यथाऋज्वेकःपुमान्बहुलजन्मसंचीर्णपुण्यसंचयेनब्रह्मपदंप्राप्यानुभूयश्रीद्वारासायुज्यलक्षणांमुक्तिमाप्नुतइतितथाहंचत्वारिंशज्जन्मभिरार्जितैःसुकृतैः शैवंपदंसमवाप्यानुभूयत
थेंद्रोपिविंशद्भिर्जन्मभिरापादितैःपुण्यैरैंद्रंपदंसमेत्यानुभूय तथेंद्रादन्येदशभिर्जन्मभिरुत्पादितैःशुभैःस्वस्वयोग्यंपदंप्राप्यतत्तत्पदभोग्ययोग्यसुकृतंभुक्त्वाब्रह्मणासहविमुक्तिमाप्नुमइति तदुक्तं तथैवचत्वा
रिंशद्भिःपदंशैवंचजन्मभिः विंशद्भिरैंद्रंदशभिरन्येषामप्युदीरितमिति यथाहमितिपाठेयथाहंश्रीहरिप्रसादेनशैवंपदमाप्तोस्मि तथाऋज्वेकःपुमान्शतजन्मभिर्विरिंचतामेतीतियोज्यं विदेहिरुद्रोरुद्रियं
महित्वमितिश्रुतिश्च ॥ २९ ॥ ततःप्रकृतेकिंफलितमत्राह अथेति अथैवमुक्तप्रकारेणानादिकालमारभ्यभगवद्भक्तोऽहंयस्मात्तस्माद्भागवताभगवद्भक्तत्वाद्यूयंमेप्रियाःस्थयथाभगवानित्यधिकदृष्टांतः
नकेवलंयूयमेवमत्प्रियाअन्येपिभगवद्भक्ताइत्याह नमइति भागवतानांसकाशात् चशब्दात्प्रेम्णोनिरुपमचरितत्वमाह अनेनासुरेभ्योवरदाननतत्प्रीतिरौपचारिकीतिदर्शितं यद्वा युष्माकमपि

अथभागवतायूयंप्रियाःस्थभगवान्यथा ॥ नमेभागवतानांचप्रेयानन्योऽस्तिकर्हिचित् ३० इदंविविक्तंजप्तव्यंपवित्रंमंगलंपरम् ॥ निश्रेयसकरंचापि
श्रूयतांयद्वदामिवः ३१ ॥ मैत्रेयउवाच ॥ इत्यनुक्रोशहृदयोभगवानाहताञ्छिवः ॥ बद्धांजलीन्राजपुत्रान्नारायणपरोवचः ३२ ॥ रुद्रउवाच ॥ जितं
तआत्मविद्धुर्याःस्वस्तयेस्वस्तिरस्तुवः ॥ भवतांराधसेराध्यंसर्वस्माआत्मनेनमः ३३ नमःपंकजनाभायभूतसूक्ष्मेंद्रियात्मने ॥ वासुदेवायशांतायकूट
स्थायस्वरोचिषे ३४ संकर्षणायसूक्ष्मायदुरंतायांतकायच ॥ नमोविश्वप्रबोधायप्रद्युम्नायांतरात्मने ३५

भागवतएवप्रियोनापरोऽन्यथाभागवतत्वहानिरित्याशयेनाह नमइति ममभागवतानांयुष्माकंचभागवतादन्यःप्रेयान्नास्तीत्यन्वयः अनेनयुष्माकंचाहमपिप्रियइतिध्वनितं ३० सुप्रसन्नेनभवता
यत्किंचिदुपदिश्यतेचेद्भवत्प्रियत्वमानुभाविकंस्यादित्यस्यवाक्यस्यावसरमाददानआह इदमिति अनेनबहुपुरश्चरणमंतरेणक्षिप्रंसत्यंफलतीत्युक्तंभवति ३१ नकेवलंप्रतिज्ञामात्रंकिंतूपदिष्टंचेत्याह इ
तीति अनुक्रोशेत्यादिविशेषणेनानुग्रहातिशयंद्योतयति किंचोपदेशकालेशिष्याणामित्थंभावंचसूचयति ३२ स्वोपदेशःफलितोयुष्माकमितिभावेनाह जितमिति हेआत्मविद्धुर्याःपरमात्मज्ञानिषुश्रे
ष्ठाः वोजितंसर्वमितिशेषः कुतःस्वस्तयेभगवदुपासनाख्यसत्कर्मणेमयोपदिष्टमितियत्तस्मादितिशेषः प्रशस्तेकर्मणितथासच्छब्दःपार्थयुज्यतइतिस्मृतिः किंच भगवतिभवतांभक्तिरनुदिनमेधतामिति
भावेनाह स्वस्तिरिति युष्माकंहरौस्वस्तिःसमीचीनसद्भावःसतीभक्तिरस्तु ततश्चतयाभक्त्याभवतांराधसेसिद्धयेभगवत्तत्त्वंराध्यंपूज्यं कथं सर्वस्मैसर्वांतर्यामिणेआत्मनेस्वामिनेनमइत्येतावदेवास्माकंशक्यं
नातोन्यदितिसंकल्प्येत्यर्थः सर्वांतर्यामिकत्वात्तुसर्वनामाजनार्दनः नतुसर्वस्वरूपत्वात्सर्वैशेशोहरिर्यतइतिवचनात्सर्वनामा नजगदात्मत्वमनेनोच्यतइत्यर्थः ३३ इदानींध्येयस्वरूपंनिर्दिशति
नमःपंकजनाभायेत्यादिना भूतानिपंचभूतानि पंचभूतसूक्ष्माणि शब्दादीनि इंद्रियाणिश्रोत्रादीनि पतित्वात्सततंव्याप्यतिष्ठतीति अतसातत्यगमनइतिधातुः तस्मै ३४ दुरंतायांतत्रयवर्जिताय
विश्वप्रबोधायपूर्णज्ञानाय विश्वस्यप्रबोधोयस्मादितिवासतथातस्मै ३५

SGDF
Sri Gurgeshwari Digital Foundation

हृषीकमिंद्रियंभोक्तमित्यतोहृषीकेशोजीवस्तस्येंद्रियस्वामिने किंचइंद्रियमिंद्रस्यविद्यमानंयच्च किंचतस्यात्मास्वामीहृषीकेशश्चायामिंद्रियात्माचेतिविग्रहस्तस्मैनिभृतात्मनेस्तिमितरूपाय ३६ शुचा वशौसीदतितिष्ठतीतिशुचिषत् तस्मै योग्नौतिष्ठन्निितिश्रुतेः हिनोतिदुःखंरतिंयापयतीतिहिरण्यंतादृशंवीर्यंयस्यसतथातस्मै स्वर्णवर्णरेतसइतिवा चतुर्षुहोतृषुस्थितत्वातैःक्रियमाणंयत्कर्मतत्कर्तृत्वाच्चातु र्होत्रस्तस्मै तंतवेव्याप्ताय संततिप्रवर्तकायवा ३७ ऊर्जेपित्रन्नदात्रे इषेदेवान्नदात्रेइच्छारूपायवा यज्ञेरेतोरतिर्यस्यसतथातस्मै सर्वरसात्मनेसर्वरसानांदात्रे ३८ सर्वसत्त्वानांसर्वप्राणिनामा त्मदाईहाचेष्टायस्यसतथातस्मै आत्मानंददातीत्यात्मदा यआत्मदेतिश्रुतेः सर्वप्राणिष्वात्मदेहस्तत्तदंगुष्ठमात्रस्वरूपंयस्यसतथातस्मैइतिवा विशेषायविशिष्टायपृथिव्यांस्थितत्वातस्याःसर्वस्माद्विशे षंकरोतीतिवा गुणगुणिनोरभेदाभिप्रायेणसहइत्याद्युक्तं सहस्तितिक्षाशक्तिः ओजोऽवष्टंभशक्तिः बलंबाह्याद्यवयवशक्तिः ३९ अर्थःशास्त्रंवेदाख्यंलिंगंज्ञापकंप्रमाणंयस्यसतथातस्मैअर्थस्यपुरुषा र्थस्यलिंगंहेतुस्तस्माइतिवा नभसेआकाशवदसंगाय नभस्यतेप्रकाश्यतेनज्ञायतइतिवा भसभक्षणदीप्त्योरितिधातुः पुण्यायपुनानाय लोकायप्रकाशाय अमुष्मैअधिदैववासिने पुण्यायलोका यस्वर्गादिलोकदात्रेवा ४० प्रवृत्तिनिवृत्तिमार्गप्रवर्तकत्वात्तस्मैपितृदेवेषुचस्थितत्वात्तत्तद्योग्यकारणवत्त्वात्तत्तच्छब्दवाच्याय कर्मणेविषयायक्रियारूपायवा धर्मविपाकायपुण्यफलप्रदाय मृतेरुद्गतोमृ

नमोनमोनिरुद्धायहृषीकेशेंद्रियात्मने ॥ नमःपरमहंसायपूर्णायनिभृतात्मने ३६ स्वर्गापवर्गद्वारायनित्यंशुचिषदेनमः ॥ नमोहिरण्यवीर्यायचातुर्हो त्रायतंतवे ३७ नमऊर्जइषेत्रय्याःपतयेयज्ञरेतसे ॥ तृप्तिदायचजीवानांनमःसर्वरसात्मने ३८ सर्वसत्त्वात्मदेहायविशेषायस्थवीयसे ॥ नमस्त्रैलोक्यपा लायसहओजोबलायच ३९ अर्थलिंगायनभसेनमोंतर्बहिरात्मने ॥ नमःपुण्यायलोकायअमुष्मैभूरिवर्चसे ४० प्रवृत्तायनिवृत्तायपितृदेवायकर्मणे ॥ नमोधर्मविपाकायमृत्यवेदुःखदायच ४१ नमस्तआशिषामीशमनवेकारणात्मने ॥ नमोधर्मायबृहतेकृष्णायाकुंठमेधसे ४२ पुरुषायपुराणायसांख्य योगेश्वरायच ॥ शक्तित्रयसमेतायमीढुषेहंकृतात्मने ४३ चेतआकूतिरूपायनमोवाचोविभूतये ॥ दर्शनंनोदिदृक्षूणांदेहिभागवतार्चितम् ४४ रूपंप्रिय तमंस्वानांसर्वेंद्रियगुणांजनम् ॥ स्निग्धप्रावृड्घनश्यामंसर्वसौंदर्यसंग्रहम् ४५ चार्वायतचतुर्बाहुंसुजातरुचिराननम् ॥ पद्मकोशपलाशाक्षंसुंदरभ्रुसुना सिकम् ४६ सुद्विजंसुकपोलास्यंसमकर्णविभूषितम् ॥ प्रीतिप्रहसितापांगमलकैरुपशोभितम् ४७ लसत्पंकजकिंजल्कदुकूलंमृष्टकुंडलम् ॥ स्फुर त्किरीटवलयहारनूपुरमेखलम् ४८

त्युस्तस्मै मृत्यौस्थितत्वात्तत्करणाद्वामृत्युस्तस्मै दुःखदायअसुरेभ्यइतिशेषः दुःखदायिनइतिपाठे दुरशोभनदुःखयोरितियादवः संसुखमितिश्रुतिः दुःखंदायतिशोषयतीति तस्माइतिवा दै शोषणइतिधातुः ४१ मनवेमननशीलायमंत्रवाच्यायवा ४२ सांख्यंयथार्थज्ञानं योगउपायोऽष्टांगविशिष्टोवातयोरीश्वराय शक्तित्रयसमेतायज्ञानक्रियेच्छाशक्तियुक्ताय मीढुषेवर्षित्रे अभीष्टदा त्रेवा अहंकृतेरुद्रेआत्मायस्यसतथातस्मै ४३ चेतसआकूतिरभिप्रायस्तद्रूपयतिसमर्थयतिइतिचेतआकूतिरूपस्तस्मै वाचोविविधाभूतिःसृष्टिर्येनतस्मै किमभिप्रेत्यस्तुतामितितत्राह दर्शनमिति कीदृशंदर्शनंसाकारविषयंनिराकारविषयंवा द्वितीयेगगनवत्सर्व्याप्तमुतघटाकाशवत्परिमितं पक्षद्वयमप्यनभीष्टमनधिकारात्तस्मात्प्रथमएवपक्षस्तत्रापिरूपाणामानंत्यादीदृशंरूपंप्रकाशयेत्याहुः भा गवतर्चितमिति यदेतदीदृशंरूपंप्रदर्शयेत्यन्वयः ४४ सर्वसौंदर्याणांसंग्रहंपात्रं ४५ सुजातंकोमलंविदुरित्यभिधानं शोभनाद्विजादंतायस्यतत्सुद्विजं ४६ ४७ कर्णाभरणानांबहु त्वद्योतनायमृष्टकुंडलमितिपुनर्वचनं ४८

SGF

शंखादयोयस्मिंश्चिह्निताास्तच्छंखचक्रगदापद्ममालामणिना उत्तमाऋद्धयोस्यसंतीत्युत्तमार्द्धिमत् सौभगेत्युभयत्रसंबध्यते सौभाग्ययुक्तौग्रीवाकौस्तुभौयस्मिंस्तत् उरोबिभ्रद्विस्तीर्णमितिशेषः ४९
संक्षिप्तमुरोविशिनष्टि अनपायिन्येति नित्ययाश्रिया आक्षिप्तंसन्निहितंचानिकषाश्मास्वर्णघर्षणपाषाणस्तद्वद्वर्त्तमानमुरः आक्षिप्तनिकषाश्मोरस्तेनोल्लसत् श्वासानांपूरकरेचकाभ्यांसंविग्नाःसंचालि
तावलयोरेखाअस्यसंतीतिपूररेचकसंविग्नवलिमत् तच्चपल्लवेनांकुरदलेनसदृशंतत्तथा ५० दक्षिणावर्तेनगभीरयानिम्नयानाभ्याविश्वंप्रतिसंक्रामयत्प्रसदिवास्थितम् ५१ समानानिचारूणिअंघ्र्या
दीनियस्मिंस्तत्तथोक्तं सुदर्शनंसुचक्षुः ५२ नखद्युभिर्नखानांतेजोभिः नोतुःस्तोतुरघंपापंविधुन्वतानाशयतापदोपलक्षितः पुरोमार्गगुरुरुत्क्रांतस्याऽर्चिरादिमार्गोपदेष्टात्वं कीदृशानांनस्तमोजु
षामज्ञानिनांपुरइत्यस्मत्पदान्वयोवा अस्माकंपुनःप्रदर्शयेति ५३ विनियोगमाह एतदिति आत्मनःस्वस्यशुद्धिःसंसारमुक्तिलक्षणातामिच्छतामितोन्यथास्मच्छुद्धिर्नस्यादित्यतोध्येयमिति व
र्णाश्रमादिविहितस्वधर्मएवमुक्तिसाधनमितिभ्रांतिंनिवारयति यद्भक्तियोगइति वर्णाश्रमादिविहितस्वधर्मंकुर्वतांपुंसांभगवद्भक्तियोगोनित्याभयप्रदइतियत् ५४ तस्मादभक्तिमतांदुर्लभोभवान्
सर्वदेहिनांभक्तिमतांलभ्यइति नकेवलंमुक्त्यर्थमस्मदादेर्ध्येयंकिंत्विंद्रादेर्वाप्त्यभिप्रेत्याह स्वाराज्यस्येति स्वःस्वर्गेराज्यंयस्येंद्रादेरात्मविदात्मज्ञःपरमात्मातदात्मानमेवावेदाहंब्रह्मास्मीतिश्रुतेः

शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ॥ सिंहस्कंधमुरोबिभ्रत्सौभगग्रीवकौस्तुभम् ४९ श्रियानपायिन्याक्षिप्तंनिकषाश्मोरसोल्लसत् ॥ पूररेचकसंवि
ग्नवलिमत्पल्लवोदरम् ५० प्रतिसंक्रामयद्विश्वंनाभ्यावर्तगभीरया ॥ श्यामश्रोण्यधिरोचिष्णुदुकूलस्वर्णमेखलम् ५१ समचार्वंघ्रिजंघोरुनिम्नजानुसुदर्श
नम् ५२ पदाशरत्पद्मपलाशरोचिषानखद्युभिर्नोंतुरघंविधुन्वता ॥ प्रदर्शयस्वीयमपास्तसाध्वसंपदंपुरोमार्गगुरुस्तमोजुषाम् ५३ एतद्रूपमनुध्येय
मात्मशुद्धिमभीप्सताम् ॥ यद्भक्तियोगोभयदःस्वधर्ममनुतिष्ठताम् ५४ भवान्भक्तिमतांलभ्योदुर्लभःसर्वदेहिनाम् ॥ स्वाराज्यस्याप्यभिमताएकांते
नात्मविद्गतिः ५५ त्वांदुराराध्यमाराध्यसतामपिदुरापया ॥ एकांतभक्त्याकोवांछेत्पादमूलंविनाबहिः ५६ यत्रनिर्विष्टमरणंकृतांतोनावमन्यते ॥ वि
श्वंविध्वंसयन्वीर्यशौर्यविस्फुरितभ्रुवा ५७ क्षणार्धेनापितुलयेनस्वर्ग्यंनापुनर्भवम् ॥ भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः ५८ अथानघांघ्र्योस्तवकी
र्त्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मनाम् ॥ भूतेष्वनुक्रोशसुसत्त्वशीलिनांस्यात्संगमोनुग्रहएषनस्तव ५९

तस्यगतिर्मुक्तिलक्षणाएकांतेननियमेनाभिमताअविप्रतिपन्नामुक्त्यर्थमेवभक्तिर्नस्वर्गाद्यर्थमित्यस्तोवाह स्वाराज्यस्येति इंद्रादेरित्यध्याहार्यं इंद्रादेःस्वाराज्यस्यावाप्तावपिआत्मवित्परमात्मागम्यतेन
येतिआत्मविद्गतिर्भक्तिर्यात्वेकांतेनाभिमतेत्यन्वयःयद्वा आत्मविदांपरमात्मज्ञानिनगांतिरूपायाभक्तिर्यादृशीतादृशीति भक्त्यात्वनन्ययाशक्यइतिस्मृतेः ५५ भगवदिच्छाविनाभूतत्वादिंद्रादीनांस्व
र्गादिकंतद्भक्त्याकामितंनस्वतोऽतोबुद्धिमान्नस्वातंत्र्येणान्यत्ज्ञायतइत्तिभावेनाह त्वांदुराराध्यमिति सतामपिदुरापयाबहिरैहिकं ५६ पादमूलंविशिनष्टि यत्रेति अरणंशरणंवीर्यशौर्याभ्यांविस्फू
र्जितयास्फुरितयाभ्रुवाविश्वंविध्वंसयन्वशेकुर्वन् ५७ भक्त्यायत्फलंस्वर्गादिकंनतुलयइत्यन्वयः भागवतसंगलब्धयाभक्त्यामुक्तावानंदोद्रेकलाभाभिप्रायेणेतितात्पर्यं तदुक्तं संगोभागवतैर्भूयानपुन
र्भवमात्रतः यतोविशिष्टमानंदंमुक्तौजनयतिस्फुटमिति ५८ ननुसत्संगएवंफलोऽस्तुततोयुष्माकंकिमपेक्षितमत्राह अथेतियस्मात्त्वद्भक्तानांसंगएवंविधफलोऽथास्मात्तवांघ्र्योजतियोः कीर्तितीर्थ
योर्भागवतादिशास्त्रश्रवणलक्षणाकीर्तिस्तीर्थंविष्णुपद्यादितयोरंतर्बहिःस्नानाभ्यांविधूतपाप्मनां अतएवभूतेषुअनुक्रोशसुतत्वशीलिनांसात्विकस्वभावानांसतांसंगमोनोऽस्माकंस्यात् अतोनेनवयंकृता
र्थाइत्यतउक्तं अनुग्रहइति ५९ ५६

SGDF
Sri Gargeshwari Digital Foundation

सत्संगयाज्ञायाः कोभिप्रायइत्यतआह । नयस्येति यद्यदासत्संगमस्तत्रतदासत्संगमेभक्तियोगेनानुगृहीतंयस्यपुंसश्चित्तंस्मृतिकारणमंतःकरणंबाहिरर्थेषुशब्दादिषुविभ्रमंविविधभ्रमणंनाविशेत्नगच्छाति यस्यमनश्चगुहायांहृदयेनिविष्टमात्मानमाविशतिसमुनिस्तेतवपदंस्वरूपमंजसाविचष्टेपश्यतिनन्वित्यन्वयः सत्संगत्यासमुत्पन्नभगवद्भक्त्यावैराग्यदृढयाप्रबलीकृतयाभगवदुपासनयापरोक्षज्ञानंभवतीत्यभिप्रायः भक्त्यात्वनन्ययेसादेः ६० सत्संगतिःसर्वथासंपाद्येतिप्रतिपाद्याधुनाभक्तिविषयतत्त्वंनिर्दिशति यत्रेति केचिज्जगद्ब्रह्माज्ञानकल्पितमितिसंगिरंते अन्येशून्यमेवसंवृत्यासदिवाभातीति अपरेतत्परिणतमिति इतरेप्रागसतःसत्तासमवायि येनजातमित्यदृष्टत्वान्नेश्वरोप्येकइति तान्सर्वानपिनिरस्यतीत्यतोवाह यत्रेति यत्रयदाधारतयाव्यज्यतेइत्यनेनैतेपक्षाःप्रतिक्षिप्ताःपूर्वंसतएवव्यक्तिसंभवात्तदनुगतपंचविधभेदानांव्यक्तत्वेनसत्यत्वसिद्धेः विश्वस्मिन्स्थितमप्यज्ञानांनभातीत्युक्त्यासुतरामीश्वरसद्भावोदर्शितः ब्रह्मतत्त्वमित्यनेनसुतरां परंज्योतिरित्यनेनाज्ञानसंपर्काभावःस्पष्टः आकाशइवेति निराकारपक्षोपिनिरासीतिविज्ञायते अपरिच्छिन्नत्वएवाकाशदृष्टांतोनशून्यत्वेइतिग्रंथप्रपंचतयाउपरम्यतइति ६१ यत्रेत्यधिकरणनिर्देशाच्छुक्तिकायांरजतव्यक्तिवद्यस्मिन्कल्पितत्वान्मिथ्याभूतंजगदितिभ्रांतिंनिराचष्टे योमाययेति योहारिःपुरुरूपयाशुक्ललोहितकृष्णभेदेनबहुरूपयामाययाप्रकृत्येदंजगदसृजत्बिभर्तिपुनःसंहरति अत्रप्रकृतेरेवमहदाद्यात्मनाविकारोनतुपरमात्मनइत्याशयेनोक्तं अविक्रियइति अनेनशुक्त्याज्ञानविकारोरजतमित्यपास्तं एवमपिपरमात्माजीवादिभ्योभिन्नतयासम्यक्किमितिनमतीपतइत्याशंक्यसाम्प्रतीतिःसम्यक्ज्ञानविषयेत्याह यद्भेदेति यस्यहरेर्जीवादिभ्योभेदबुद्धिः सदिवानिर्दोषज्ञानविषयैवेत्यर्थः दिनवाचिनादिवाशब्देनकथंज्ञानार्थतोच्यते प्रसिध्द्यभावादितिनवाच्यं रात्रिरज्ञानमुद्दिष्टंसम्यक्ज्ञानंदिवास्मृतइतिवचनात् शुक्तिरजत

नयस्यचित्तंबहिरर्थविभ्रमंमनोगुहायांचनिविष्टमाविशेत् ॥ यद्भक्तियोगानुगृहीतमंजसामुनिर्विचष्टेननुतत्रतेपदम् ६० यत्रेदंव्यज्यतेविश्वंविश्वस्मिन्नवभाति यत् ॥ तत्त्वंब्रह्मपरंज्योतिराकाशमिवविस्तृतम् ६१ योमाययेदंपुरुरूपयासृजद्बिभर्तिभूयःक्षपयेदविक्रियः ॥ यद्भेदबुद्धिःसदिवात्मसंस्थयातमात्मतंत्रं भगवन्प्रतीमहि ६२ क्रियाकलापैरिदमेवयोगिनःश्रद्धान्विताःसाधुयजंतिसिद्धये ॥ भूतेंद्रियांतःकरणोपलक्षणंवेदेचतंत्रेचतएवकोविदाः ६३ त्वमेकआद्यः पुरुषःसुप्तशक्तिस्तयारजःसत्त्वतमोविभिद्यते ॥ महानहंखंमरुदग्निवार्धराःसुरर्षयोभूतगणाइदंयतः ६४

ज्ञानवद्भेदंपुरुषार्थोपयोगीतिचेन्न जीवेभ्योजडतश्चैवभेदज्ञानंहरेःसदा वास्तवंज्ञानमुद्दिष्टंतेनमुक्तिरवाप्यतइतिवचनात् तत्रयुष्मत्प्रतीतिःकीदृशीतितत्राह आत्मसंस्थयेति ययास्वाधीनयाप्रकृत्यानिर्विकारःसृष्ट्यादिकरोतितयात्मसंस्थयापरमात्मव्यवस्थयास्थितंत्वांप्रतीमहिविजानीमहे स्वाधीनामपिप्रकृतिंविहायसृष्ट्यादिकर्तुंसमर्थइतिद्योतनायात्मतंत्रमिति अतएवभगवन्नितिसंबोधयांबभूवुरिति ६२ अस्तुसृष्ट्यादिकर्तृब्रह्मस्वर्गकामोयजेतेत्यादिवाक्यप्रमाणेनेज्यमिंद्रादिकंस्याच्चाहक्प्रमाणसंभवादितितत्राह क्रियाकलापैरिति इदंप्रेत्यापिनमुंचामीतिश्रद्धयान्वितायेकर्मयोगिनः क्रियासमूहैर्ज्ञानसिद्ध्येइदंजगत्कर्तृब्रह्मैवसाधुयजंतेनेंद्रादिकं । तएवस्वर्गकामोमजेतेत्यादिवेदेशुद्धस्फटिकसंकाशंवासुदेवंनिरंजनमित्यादितंत्रेचकोविदास्तद्धृदयज्ञाइत्यर्थः ॥ नकेवलंश्रुतिस्मृतिभ्यांज्ञात्वायजंति किंत्वनुमानेनापीतिभावेनाह भूतेति भूतेंद्रियांतःकरणैरुपलक्ष्यतेज्ञायतइतिभूतेंद्रियांतःकरणोपलक्षणंभूतादीनामचेतनत्वेनस्वतःप्रवृत्त्यसंभवात्तत्प्रेरकोन्यश्चेतनोस्ति । सचेश्वरएवान्यस्यान्वयव्यतिरेकाभ्यांशक्त्यदृष्टेरिति यद्वावेदेतंत्रेचश्रद्धान्वितायेयोगिनइदंयजंतितएवकोविदाःकर्मकांडसारस्यज्ञानपटवइति |अनेनेंद्रादिकंयजंतोवेदादितात्पर्यार्थंनजानंतीतिज्ञापितम् ६३ ननुजीवादिदंजगत्केचित्संगिरंते । इदंनिपुणप्रणीतंविशिष्टकार्यत्वाच्चित्रादिकार्यवदित्यनुमानं जीवाद्भवंतिभूतानीतिकानिचिद्वाक्यानिचोदाहरंत्यतइदंलक्षणमतिव्याप्तमितिशंकानिरासायाह त्वमेकइति आद्यःप्रपंचोत्पत्तेःपूर्वंभवः पुरुषस्त्वमेकएवाभूदित्यन्वयः। ब्रह्मैवेदमग्रआसीदित्यादेः पुरुषइत्यनेनकर्तारमीशंपुरुषंब्रह्मयोनिमितिवाक्यंसूचितं अनेनजीवश्चव्यावृत्तोस्यब्रह्मयोनित्वोक्तेः लक्ष्मीतत्त्वस्यद्वितीयस्यविद्यमानत्वा

SGDF

त्कथमेकइति विशेष्टुंशक्यतइतितत्राह सुप्तेति अत्रसुप्तेत्यनेनप्राप्तिरुपलक्ष्यते यदायंपुरुषःस्वपितिनामसतासौम्यतदासंपन्नोभवतीतिश्रुतेः स्वात्मन्येवाप्तशक्तिः मुख्यार्थांगीकारेऽज्ञस्वापत्तेरन्यैरदृष्टत्वमंगी
कर्तव्यं प्रकृतेःस्वापउद्दिष्टहर्यन्यत्रत्वदर्शनमितिवचनात् एवंप्रलयावस्थांसंक्षिप्यसृष्ट्यवस्थामाह तयेति याप्रलयेहरावेवरतासृष्टिकालेप्राप्तेहरेःकटाक्षेणसिसृक्षुत्वाविशेषमाप्तश्चातयाशक्तिशब्दशब्दितयाप्रकृ
५७ त्यासाम्यावस्थामाप्तयाविभिद्यतेविषमावस्थामापद्यते सृष्टिक्रमम्पेक्ष्यरजःसत्त्वतमइतिव्यत्यस्योक्तंस्थित्यादेःसृष्ट्यनंतरत्वात् रजःसृष्टौसत्त्वंस्थितौतमःसंहृतौचेतिभिद्यतेरजः सत्त्वतमोभ्यांविभिद्यतेसत्त्वंर २४
जस्तमोभ्यांतमश्चसत्त्वरजोभ्यामित्ययंभेदःप्रमाणांतरत्वात्तत्कार्यस्वभावदर्शनादवगंतव्यः उक्तंभेदंविशिनष्टि महानहमिति ततोगुणवैषम्यात्सत्त्वप्रधानंमहत्तत्त्वंतदभिमानीब्रह्माचाभूदितिबोद्धव्यं तत्रा
हंकारंत्रिविधाभिन्नं। तामसाहंकारात्खादि। वैकारिकाहंकारादिंद्रियाभिमानिनोदेवाः। तैजसाहंकारात्ज्ञानहेतुत्वाद्दृषिशब्दवाच्यानींद्रियाणिखादिभ्यःसुरनरतिर्यगादिभूतगणाअभूवन् किंबहुनोक्तेने
दंचराचरंजगद्यतोयस्मादुत्पन्नंतदेवंविभिन्नमितिज्ञातव्यं आत्मनआकाशःसंभूतइत्यादिश्रुत्यनुग्रहीतंमानमस्मिन्नर्थे ६४ अचेतनस्यस्वतःप्रवृत्त्यनुपपत्तेश्चेतनप्रकृत्वावस्वातंत्र्यप्रतीतेर्वैचित्रप्रपंचरचना
न्यथानुपपत्त्याविशिष्टचेतनासिद्धिःसचेश्वरएवार्थापत्तेरन्यथासिद्धिपरिहारायाह सृष्टमिति अनुप्रविश्येत्यनेनार्थापत्तेरन्यथासिद्धिःपरिहृताति प्रपंचस्तुग्रंथाधिक्यात्प्राज्ञानांसुबोधत्वाच्चोपरम्यते आत्मां
शकेनस्वरूपांशेन तत्सृष्ट्वेत्यादिश्रुतेः जरायुजादिभेदेनचतुर्विधंपुरंप्रविश्यहृषीकैर्जीवेंद्रियैः सारघंसारमात्रंमधुसुखंभुंक्ते यस्मादथोतस्मात् अत्रपुरेसंतंत्वांपुरुषंविदुरित्यन्वयः तदस्यास्तीत्यस्मिन्नर्थेउ
षप्रत्ययः संतमित्यनेननिर्दोषत्वंसूचयाति अवधारणेघशब्दःस्यादितिवचनात् पुनर्मधुनामसुखंविंद्यात् केवलंसारमेवभुंक्तेनत्वसारमित्याशयेन सारवत्सारमात्रंतुसारघमित्यतोपिकाथितएवार्थः ६५ सं

सृष्टंस्वशक्त्येदमनुप्रविष्टश्चतुर्विधंपुरमात्मांशकेन ॥ अथोविदुस्त्वांपुरुषंसंतमत्रभुंक्तेहृषीकैर्मधुसारघंयतः ६५ सएषलोकानतिचंडवेगोविकर्षसित्वंख
लुकालयानः ॥ भूतानिभूतैरनुमेयतत्त्वोघनावलीर्वायुरिवाविषह्यः ६६ प्रमत्तमुच्चैरितिकृत्यचिंतयाप्रवृद्धलोभंविषयेषुलालसम् ॥ त्वमप्रमत्तःसहसा
भिपद्यसेक्षुल्लेलिहानोहिरिवाखुमंतकः ६७ कस्त्वत्पदाब्जंविजहातिपंडितोयत्तेपुमानप्ययमब्जकेतनः ॥ विशंकयास्मद्गुरुरर्चतिस्मयद्विनोपपत्तिंमन
वश्चतुर्दश ६८ यत्स्पृष्टोहरहर्मुक्तक्लेशःशेतेऽमृतांबुधौ ॥ तावद्वेदाथतत्तेंघ्रिंजनोनुस्मरतेचतत् ६९ हर्तृलक्षणस्यकालाधीनतयाप्रतीयमानत्वात्तत्रातिव्याप्तमितितत्राह

सएषइति योग्रतःस्रष्टासएवलोकान्कालयानः कालद्रावणइतिधातुः कालरूपीभूत्वात्वंभूतैःकरणैर्धर्मादिभिर्भूतानिविचकर्षसिसंहरिष्यसीत्यन्वयः अविषह्योऽपरिहार्यः अत्रहेतुंध्वनयाति अतिचंडेति
अत्रानुमानंमानमित्याह अनुमेयेति उदाहरणमाह घनावलीरिति चलंतीर्घनावलीर्दृष्ट्वाचलनंवायुकर्तृकमितियथाकल्प्यतेतथाऽत्रापीति ६६ अवांतरसंहारस्त्वदन्येनकिंनस्यादत्राह प्रमत्तमिति
क्षुधालेलिहानःपुनःपुनर्जिह्वयासृक्किणींलिहन् ६७ एवंभगवतःस्वरूपंनिरूप्यतदुपासनात्याग्यसुरएवनविद्वानितिभावेनाह कइति पंडितएवंज्ञातेश्वरतत्त्वःपुमान्कस्त्वत्पदाब्जंत्यजति यद्यदाचरति
श्रेष्ठइत्येतावदेतत्ध्वनयातित्यजातिचेत्सुरेतरः इतोपिमोक्तुंनिमित्तंनास्तीत्याह यत्तइति अयमब्जकेतनःपुमानपिविगतशंकयातेतवयत्पदाब्जमर्चतिस्मस्मरतेइत्यन्वयः स्मृतौवृतौनिषेधेस्मेति
यादवः कोयमब्जकेतनइत्यतोस्मद्गुरुरितिजनकत्वाज्ज्ञानोपदेष्टृत्वाच्चगुरुरिति अनेनततःपरंहिमामित्यत्रश्रीरेवोच्यतेनरुद्रइतिनिरणायीत्यतोमायावादिनांव्याख्यानंपूर्वापरविरुद्धत्वादुपेक्षणीयमि
त्यस्माभिस्तन्मतनिरासायप्रयासोनक्रियतइति इतोपितत्पादसेवानहातव्येत्याह यद्विनेति चतुर्दशमनवोऽस्मादेतत्फलंभवतीत्युपपत्त्यपेक्षांविनापियच्चरणारविंदमर्चीति ६८ अनुदिनंसुसिद ५७
शायांश्रीनारायणस्पर्शेनपरमानंदोऽनुभूयतेकिंमुतकैवल्यइतिवदयंस्तस्यदौर्लभ्यमाह यत्स्पृष्टइति येनांघ्रिणास्पृष्टोहरहर्मुक्तक्लेशोजनोऽमृतांभोधौपरमानंदसमुद्रेशेते यावत्तावत्तदानींवेदसुखंवेत्यथो
त्थानानंतरंतेंऽघ्रिंवेदनुकिमित्याक्षेपः तत्सुखंस्मरतेच यद्यपिसुखमहमस्वाप्समितिपरामृशति तथापितवांघ्रिंनवेधिनस्मरतीतिभावः अनेनतादृशः पुरुषोदुर्लभइतिसूचितम् ६९

विचित्रेजगतिकश्चिद्धीरोऽस्मदभयदः किंनस्यादितिशंकांविहायैवंप्रार्थनीयइतिवक्ति अथेति विश्वंरुद्रभयध्वस्तमितियस्मात् अथतस्मादेवंविपश्चितांनस्त्वमकुतश्चिद्भयागतिरसीत्यन्वयः ब्रह्मन्पर
मात्मन्नितिपदद्वयेनबहिरंतश्चत्वांविनान्योऽभयदोनास्तीतिसूच्यते ७० ध्येयस्वरूपंनिरूप्याधुनापूर्वोक्तंजाप्यंविधायोपसंहरति इदंजपतेति सर्वस्माआत्मनेनमइत्यारभ्यवाचोविभूतयइत्यंतंयदुक्तं त
दिदंजपतेत्यन्वयः ७१ आत्मस्थमित्युपदिश्यसर्वभूतेष्ववस्थितमितिवचनंपरिच्छिन्नत्वपरिहारायोक्तमितिज्ञायते ७२ ७३ श्रद्धांजनयति । इदमाहेति । विश्वसृक्पतिर्ब्रह्मा ७४ नेदंश्रवण
मात्रंकिंत्वनुभवसिद्धमित्याह तेवयमिति ७५ नकेवलमिदंयुष्माकमेवान्येषामपिश्रेयस्करमित्याह अथेति ७६ तत्किंश्रेयइतितदाह श्रेयसामिति श्रेयसामस्यैवप्रधानश्रेयस्त्वमित्याह सुखंतरतीति ७७
नकेवलमनेनापवर्गिकंफलंकिंत्वपेक्षितंचेदैहिकमपिस्यादित्याह यइदामिति ७८ मद्गीतामित्यनेनगांधर्वंनस्तवामिति अस्मत्सेविनोमूढाइतिद्योतनायश्रेयसामित्युक्तं ७९ फलविशेषार्थंकालविशेष

अथत्वमसिनोब्रह्मन्परमात्मन्विपश्चिताम् ॥ विश्वंरुद्रभयध्वस्तमकुतश्चिद्भयागतिः ७० इदंजपतभद्रंवोविस्रभ्यन्नृपनंदनाः ॥ स्वधर्ममनुतिष्ठंतोभगव
त्यर्पिताशयाः ७१ तमेवात्मानमात्मस्थंसर्वभूतेष्ववस्थितम् ॥ पूजयध्वंगृणंतश्चध्यायंतश्चासकृद्धरिम् ७२ योगादेशमुपासाद्यधारयंतोमुनिव्रताः ॥
समाहितधियःसर्वेएतदभ्यसतादृताः ७३ इदमाहपुरास्माकंभगवान्विश्वसृक्पतिः ॥ भृग्वादीनामात्मजानांसिसृक्षुःसंसिसृक्षताम् ७४ तेवयंचोदिताः
सर्वेप्रजासर्गेप्रजेश्वराः ॥ अनेनध्वस्ततमसःसिसृक्ष्मविविधाःप्रजाः ७५ अथेदंनित्यदायुक्तोजपन्नवहितःपुमान् ॥ अचिराच्छ्रेयआप्नोतिवासुदेवपरायणः
७६ श्रेयसामिहसर्वेषांज्ञानंनिःश्रेयसंस्मृतम् ॥ सुखंतरतिदुष्पारंज्ञाननौर्व्यसनार्णवम् ७७ यइदंश्रद्धयायुक्तोमद्गीतंभगवत्स्तवम् ॥ अधीयानोदुरा
राध्यंहरिमाराधयत्यसौ ७८ विंदतेपुरुषोऽमुष्माद्यद्यदिच्छतिसत्वरम् ॥ मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ७९ यइदंकल्यउत्थायप्रांजलिःश्रद्ध
यान्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्योमुच्यतेकर्मबंधनैः ८० गीतंमयेदंनरदेवनंदनाःपरस्यपुंसःपरमात्मनःस्तवम् ॥ जपंतएकाग्रधियस्तपोमहच्चरध्वमंतेत
तआप्स्यथेप्सितम् ८१ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेचतुर्विंशोऽध्यायः ॥ २४ ॥ मैत्रेयउवाच ॥ इतिसंदिश्यभगवान्बार्हिषदैरभिपूजितः ॥
पश्यतांराजपुत्राणांतत्रैवांतर्दधेहरः १ रुद्रगीतंभगवतःस्तोत्रंसर्वेप्रचेतसः ॥ जपंतस्तेतपस्तेपुर्वर्षाणामयुतंजले २

माह कल्यइति कल्येउषसि ८० श्रद्धातिशयजननार्थंपुनरुक्तंकरोति गीतंमयेति एकाग्रधियः ध्येयादनन्यविषयाधीर्येषांतेतथोक्ताः अग्रेजगदादावेकएववयः सएकाग्रस्तद्वरावेवधीर्येषांतेत
थेतिवा अंतेदेहांतेयुष्मद्धितायेदमुक्तमितिप्रकाशनायचरध्वमित्यात्मनेपदप्रयोगः ८१ इतिश्रीभागवतेचतुर्थस्कंधेवीज०टीकायांचतुर्विंशोऽध्यायः २४ अध्यात्मगर्भपुरंजनोपाख्यानप्रकथनेन
संसारसागरेदुराग्रहग्राहदुरवरोहेनिमज्जतांदूरीकृतसत्संगानांहरिचरणारविंदमकरंदसेवानभिज्ञानांगमागमादिनानाव्यसनभराक्रांतशिरोधराणां शिशुकलभाषणाहतश्रवणानांकुटुंबभरणातिवाहित
दिनकरगमागमानांपुरुषाणांवैराग्यरसानुभावितनिपुणबलभक्तिप्रदीपानुगृहीतापवर्गलक्षणपुरुषार्थसाधनभगवदपरोक्षज्ञानललनाकटाक्षप्रसन्नमुरमथनप्रसादपरशुमतंरेणसंसारतरुच्छेदोनस्यादितिता
दृशीसाधनसामग्रीनिरूप्यते पंचस्वध्यायेषु तत्रोपोद्घातंरचयति इतीति १ रुद्रांतर्धानानंतरंप्रचेतोभिःकिमकारीतितत्राह रुद्रगीतामिति २

एतदंतरेश्रोतुंयोग्यांकथांवद तत्कथाशेषंतदनंतरंश्रोष्यामइतिक्षत्तुरांतरींशंकांमैत्रेयःपरिहरतीत्याह प्राचीनबर्हिषमिति स्यात्कृपालुःकारुणिकइतिवचनात्साधुरयंशब्दः ३ ईहयाकर्मणाश्रेयसामवाप्तिरिष्यते त्वंतत्रश्रेयसांकतमच्छ्रेयआत्मनईहसेकर्मणेच्छसि एतदेवविशिनष्टि दुःखहानिरिति अत्रायंभावःपुरुषार्थिनापुरुषेणप्रार्थ्यानिश्रेयांसिबहूनिसंतितेषांकतमच्छ्रेयोदुःखहानिलक्षणमुतसुखावाप्तिमथवोभयमथान्यत्सदपत्यादिलक्षणमिति इहकर्मणितदुभयंन ४ अत्रराजासर्वश्रेयोवाप्तौमुख्यसाधनंज्ञानमेवेतिनारदस्यहार्दंविद्वांस्तदेवभवतोपदेष्टव्यमितिप्रार्थयते नजानामीतिनारदेनसहोत्तरमत्युत्तरायासान्नजानामीतिवाक्यंसुखमितिमन्वानेनतत्तथोक्तं ५ काम्यधर्ममयेषुगृहाश्रमेषुपुत्रादिरेवार्थइतिधीर्यस्यसतथा ६ यद्यपिकर्मज्ञानोत्पत्तौसहकारितथापिकर्तुमसुशकमितिमत्वानिंदति भोभोइति यथावत्कर्मकर्तुस्तुज्ञानंसाहाय्यकारकं अन्यथाकुर्वतःकर्मनिरयायभविष्यति तथापिकर्मनिंदंतिनयतःकर्तुमंजसा शक्यंज्ञानफलस्यापिबहुत्वान्मोहनायचेतिवचनान्निंदनंयुक्तं तस्मात्कर्मविधानंचनव्यर्थमितितात्पर्यार्थइतिनिरणायि संज्ञापितान्हिंसितान् ७ संप्रतितेभ्यउपद्रवाभावेपिपरत्रास्तीत्याह एतेत्वामिति वैशसंशस्त्रेणछेदनं संपरेतंमृतं अयोनिर्मिताआयुधविशेषाःकूटाः, कूटोस्त्रीमुंजमायाचेष्वद्रिशृंगेषुभेदयोरितियादवः ८ अत्रेममर्थमितिहासेनबोधयिष्यामीत्याह अत्रेति पुरेशरीरेअततिसततंविषयीकृत्यवर्ततइतिपुरातनं अध्यात्मविषय

प्राचीनबर्हिषंक्षत्तःकर्मस्वासक्तमानसम् ॥ नारदोध्यात्मतत्त्वज्ञःकृपालुःप्रत्यबोधयत् ३ नारदउवाच ॥ श्रेयस्त्वंकतमद्राजन्कर्मणात्मनईहसे ॥ दुःखहानिःसुखावाप्तिःश्रेयस्तन्नेहचेष्यते ४ प्राचीनबर्हिरुवाच ॥ नजानामिमहाभागपरंकर्मापविद्धधीः ॥ ब्रूहिमेविमलंज्ञानंयेनमुच्येयकर्मभिः ५ नारदउवाच ॥ गृहेषुकूटधर्मेषुपुत्रदारधनार्थधीः ॥ नपरंविंदतेमूढोभ्राम्यन्संसारवर्त्मसु ६ भोभोप्रजापतेराजन्पशून्पश्यत्वयाध्वरे ॥ संज्ञापिताञ्जीवसंघान्निर्घृणेनसहस्रशः ७ एतेत्वांसंप्रतीक्षंतेस्मरंतोवैशसंतव ॥ संपरेतमयःकूटैश्छिंदंत्युत्थितमन्यवः ८ अत्रतेकथयिष्येहमितिहासंपुरातनम् ॥ पुरंजनस्यचरितंनिबोधगदतोमम ९ आसीत्पुरंजनोनामराजाराजन्बृहच्छ्रवाः ॥ तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः १०

मित्यर्थः अतसातत्यगमनइतिधातुः अन्यथाइतिहासःपुरावृत्तमितिवाक्यात्पुनरुक्तंस्यात् कमधिकृत्यवर्ततइत्यतउक्तं पुरंजनस्येति ९ पुरंजनोनामकः यमाश्रित्येयंकथावर्तते बृहच्छ्रवाइत्यनेनविशिष्टोजीवोभवतीत्युच्यते अभिमानेन सर्वेषांजीवानांमुख्याभिमानीचतुर्मुखोब्रह्मादेवानांविशेषतः अत्रपुरंजनस्तुजात्याक्षत्रियोमुक्तियोग्योऽसुरान्विनामनुष्यजीवाभिमानी असुराणांकलिःतत्रजीवसंसारज्ञप्त्यैश्रोतॄणांपापपरिहारायपुण्यवृद्धयेचनारदेनपुरंजनस्यकथाप्रसंगोकारीति तदुक्तं देवजीवाभिमानीतुब्रह्मैवतुचतुर्मुखः । मनुष्याणांतुजीवानामभिमानीपुरंजनः । सतुराजाहरेःपुत्रश्चासुराणांकलिःस्वयं । जीवसंसृतिवित्तस्मात्पुरंजनकथापितु । तस्माज्जीवसृतिज्ञप्त्यैपुरंजनकथांमुनिः । नारदोश्रावयत्तस्मान्नृपंप्राचीनबर्हिषं । प्रायस्तुतत्कथाजीवेस्थिताप्रत्येकशोपितु । प्रत्येकंपत्तुयुज्येततदुन्नेयंयथातथा । उक्तंभागवतेप्येतत्पुराणेयावदिष्यते । प्रत्येकशस्तुजीवानांतदन्यत्तस्यकेवलमिति । अतोत्रयथासंभवंतत्तत्पदानितत्तदर्थपरतयायोज्यानीतितात्पर्यंज्ञायते पुरंस्वयोग्यानंदपूर्त्तिंजनयिष्यतिव्यक्तीकरिष्यतीतिपुरंजनः पॄपालनपूरणयोः अन्यस्तुकर्मभिः पुराणिशरीराणिचतुर्विधानिजनयतीतिनिर्वक्तव्यं भाचतुर्दशमाद्वर्षादित्यादेः क्षत्रजातिज्ञापनायराजेति इतिहासत्ववद्योतनायासीदितितस्यपुरंजनस्य शरीरिणोपिनामरूपादिभिःस्वरूपंनज्ञायतइसविज्ञातंनामयस्येतिसोऽविज्ञातनामा परमात्मासखासीदित्यन्वयः द्वासुपर्णेत्यादिश्रुतेः अन्यस्तुप्रसिद्धः तर्हिशून्यइत्यतोविज्ञातेति विज्ञातंचेष्टितंजगत्सृष्ट्यादिलक्षणंयस्यसतथा अन्यत्रनीतिशास्त्रप्रसिद्धव्यापारः १०

SGDF Sri Gargeshwari Digital Foundation

सः स्वर्गादिस्थानादर्वाग्गतः कर्मणाशरणं सुखदुःखभोगयोग्यंशरीरमन्वेषमाणः पृथिवींकर्मभूमिंबभ्राम अन्यत्रपुरंप्रभवंत्यस्मात्कर्माणीतिप्रभुः अन्यत्रपरपापमर्दनसमर्थः अनुरूपंदुःखभोगमंतरेण
सुखभोगयोग्यं अन्यत्रदुर्गादिलक्षणं ११ यावतीस्तिर्यगादिलक्षणाःपुरःशरीराणि । अभिपत्तयेप्राह्यै ताभ्योगामानयत्ताअब्रुवन्नवैनोयमलमित्यादिश्रुतिः अन्यत्रशत्रुसाध्यत्वात् १२ एकदाभी
प्सितशुभकर्मफलोदयसमये । हिमवतोदक्षिणेषुसानुषुकर्मफलसंभजनपटुषु वनषणसंभक्ताविति धातुः भारतभूप्रदेशेषु मत्येकंयत्तुपूज्येततदुन्नेयंयथातथेत्युक्तत्वात् यथासंभवमुन्नीयते
श्रोत्रादिनवद्वारैर्लक्षितलक्षणां अंधपंगुबधिरत्वादिदुर्लक्षणशून्यांपुरींपुरुषशरीरंददर्श दृष्ट्वाप्राविशदित्यध्याहार्यं ताभ्यःपुरुषमानयत् ताअब्रुवन्सुकृतंबतेतिश्रुतिः अन्यत्रस्पष्टं ॥ १३ ॥ पुरीमित्यु
पक्रांतत्वात्तदनुसारेणतद्वर्णनंक्रियते प्राकारेत्यादिना अध्यात्मंतैःशब्दाद्यैरास्थिनाड्यादयोयथानुकूलंलक्षणीयाः प्राकारोदुर्गभित्तिः अट्टालोभित्त्यंतर्भूप्रदेशः परिखादुर्गबाहिःपरितःखातनदी स्व
र्णादिभीरचितैः शृंगैःशिखरैः अन्यत्रसात्विकराजसतामसैःसंकुलां १४ नीलादिभिरिंद्रनीलरत्नादिभिः क्लृप्ताविरचिताहर्म्यस्थल्योयस्यांसातथातांभोगवतींनागपुरीं ॥ १५ ॥ आक्रीडाक्रीडाभूमिः
आपणःक्रयस्थानं चैत्यंवंदनशाला वेदिःपरिष्कृताभूमिरित्यमरः ॥ १६ ॥ सराजाविषयलक्षणबाह्योद्यानेस्थितः तत्रयदृच्छयागतांप्रमदोत्तमांददर्शेतिचतुर्थश्लोकेनान्वयः ॥ १७ ॥ हिमनिर्झरा

सोन्वेषमाणःशरणंबभ्रामपृथिवींप्रभुः ॥ नानुरूपंयदाविंददभूत्सविमनाइव ११ नसाधुमेनेताःसर्वाभूतलेयावतीःपुरः ॥ कामान्कामयमानोसौतस्यत
स्याभिपत्तये १२ सएकदाहिमवतोदक्षिणेष्वथसानुषु ॥ ददर्शनवभिर्द्वारैःपुरींलक्षितलक्षणाम् १३ प्राकारोपवनाट्टालपरिखैरुन्नतोरणैः ॥ स्वर्णरौप्या
यसैःशृंगैःसंकुलांसर्वतोगृहैः १४ नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः ॥ क्लृप्तहर्म्यस्थलींदीप्तांश्रियाभोगवतीमिव १५ सभाचत्वररथ्याभिराक्री
डायतनापणैः ॥ चैत्यध्वजपताकाभिर्युक्तांविद्रुमवेदिभिः १६ पुर्यास्तुबाह्योपवनेदिव्यद्रुमलताकुले ॥ नदद्विहंगालिकुलकोलाहलजलाशये १७ हि
मनिर्झरविप्रुष्मत्कुसुमाकरवायुना ॥ चलत्प्रवालविटपिनलिनीतटसंपदि १८ नानारण्यमृगव्रातैरनाबाधेमुनिव्रतैः ॥ आहूतंमन्यतेपांथोयत्रको
किलकूजितैः १९ यदृच्छयागतांतत्रददर्शप्रमदोत्तमाम् ॥ भृत्यैर्दशभिरायांतीमेकैकशतनायकैः २०

णांशीतलतुंगस्थलपतज्जलधाराणांविप्रुष्मतातोयबिंदुमत्ताकुसुमाकरसौरभवतावायुना चलंतःप्रवालायेषुतेतथातेचाविटपिनश्चलत्प्रवालविटपिनस्तैर्युक्तानांनलिनीतटानांपद्माकरतीराणांसंपदोयस्मिंस्त
त्तथातस्मिन् १८ आबाधामहतीपीडेत्यभिधानं अनाबाधेउपद्रवरहितेकोकिलकूजितानांमात्राविशेषैरेहिआविशेत्याहूतमात्मानंनिरूपयति अन्यत्रप्राकारोदेहचर्म उपवनंरोमादि अट्टालंतन्मध्येमे
दोवसादि परिखामांसबहिस्त्वक् तोरणस्थानीयोबाहुः अंगुल्यःपताकाःपार्श्वद्वयस्योर्ध्वमुखवंशस्यास्थिवातोरणं शृंगंशृंगस्थानीयंकर्णादि गुहाःउदरादिप्रदेशाःनीलवैदूर्याद्यैस्तोरणविशेषैःसमलंकृतं
हर्म्यस्थलीस्थानीयंचर्मादि भोगसाधनत्वाद्भोगवती सभाहृदयं सर्वदेवानांनिवासस्थानीयत्वात् चत्वरंनाडीसंधिः रथ्याब्रह्मनाडी आक्रीडाहस्तःआयतनानींद्रियगोलकानि आपणोवाक् चैत्यंमस्तकं
ध्वजःकेशपाशःविद्रुमवेदीरत्नाद्यलंकृतकटिप्रदेशः । ब्राह्मोपवनंदेहबाह्यविषयोद्यानं तस्यरमणीयतांवर्णयति दिव्येत्यादिना वक्ताद्यध्यात्मार्थोवर्णनीयः बाह्येत्युक्तत्वात् प्रकर्षेणमदयंतीतिप्रमदाः
वैषयिक्योबुद्धयस्तासांमध्येउत्कृष्टंतमोस्थानंपुरुषाणांयस्याःसाप्रमदोत्तमा प्रधानेत्युक्ते आत्मानात्मविवेकविचक्षणाबुद्धिरित्यर्थःस्यात् सचानुपपन्नः तांबुद्धिंविहायवैषयिकींबुद्धिंप्राप्यमुग्धोभूदित्यर्थः
अन्यथाऽप्रतीतएव कीदृशींदशभिर्भृत्यैर्ज्ञानकर्मेंद्रियसंज्ञैःसहागच्छंतीतिच कीदृशाः । एकैकस्यशतमित्यनंताः यावृत्तयस्तासांनायकाश्चकेचनवृत्तिविशेषास्तैर्युक्तैः १९ २०

१ स्पष्टंचैतदग्रे एकविंशतितमश्लोक टीकायां प्रमाणेन ।

SGDF
Sri Gargeshwari Digital Foundation

अत्रपुरंजनस्ययेभृत्यायाश्चभार्याद्यास्तेसर्वेपिमानुर्षेद्रियाभिमानिनः गायत्र्याद्यादेवेंद्रियतद्वृत्तीनामभिमानिन्यइति तदुक्तं येपुरंजनभृत्याद्याभार्याद्याःसर्वएवच तेपिमानुषबुद्ध्यादेर्विज्ञेयाअभिमानिनः । गायत्र्याद्यास्तुदेवानांतेपिचैतेषुसंस्थिताः । अलक्ष्मीद्वापराद्यास्तुआसुरास्तेपिमानुषाइति तेषांसर्वेषांपरिवृढोमनोनामाजीवोवा तत्तद्विषयवैचित्र्यमपेक्ष्यमनसोबहुरूपत्वं जीवस्यतुयोनीनांवैचित्र्यात् २१ पंचशीर्षाहिनाप्राणादिपंचवृत्त्याख्यशिरसामुख्यप्राणाख्यसर्पेणप्रतीहारेणद्वारपालकवद्वर्तमानेन ऋषभंपतिंस्वकृत्यनुकूलवृत्तिलक्षणंपुरुषमित्यर्थः अतएवाप्रौढामनूढामपरिगृहीतपाणिमिव स्थितामित्यर्थः कामरूपिणींविषयवैचित्र्यात्तत्तदाकारानुमिताकाराम् २२ उन्नताभिमानलक्षणनासिकां सुदतींविषयवृत्तिलक्षणदंतां बालांसुकुमारवृत्तिं बाह्याभ्यंतरवृत्तिलक्षणाभ्यांशोभनाभ्यां वरंवरणीयमाननंचेष्टायस्याःसातथातां अनचेष्टायामितिधातुः समंयथातथाविन्यस्ताभ्यांकल्पिताभ्यांबाह्यांतःकरणविशेषाभ्यांसंकल्पविकल्पभेदेनद्वाभ्यांमनोरूपाभ्यांकुंडलश्रियंविषयेषुपरिवर्तन श्रियंबिभ्रतींवर्तयंतीम् २३ पिशंगाविषयोपरक्तानीवीआच्छादनवृत्तिर्यस्याःसातथातां सुश्रोणींसुष्ठ्वाश्रयवृत्तिमतीं श्यामांतमोगुणप्रचुरां कनकमेखलांरजोगुणलक्षणसुवर्णकांचीं पद्भ्यांरजस्तमोवि कृतवृत्तिविशेषाभ्यांनूपुरैःशिशुकलभाषणलक्षणैः क्वणद्भ्यामित्यादिप्रयोगाल्लक्षणावृत्त्याऊहनीया नवाऽन्यवृत्त्या क्वचिच्चानयेति क्वचित्सद्वृत्तिविषयत्वाद्देवतामिवेति २४ व्यंजितकैशोरौ अभिव्यंजि

तेषांपरिवृढो राजन्सर्वेषांबलिमुद्वहन् ॥ सस्त्रीकाणांसखातस्याबहुरूपोग्रणीःस्त्रियः २१ पंचशीर्षाहिनागुप्तांप्रतीहारेणसर्वतः ॥ अन्वेषमाणामृषभम प्रौढांकामरूपिणीम् २२ सुनासांसुदतींबालांसुकपोलांवराननाम् ॥ समविन्यस्तकर्णाभ्यांबिभ्रतींकुंडलश्रियम् २३ पिशंगनीवींसुश्रोणींश्यामांकनक मेखलाम् ॥ पद्भ्यांक्वणद्भ्यांचलतींनूपुरैर्देवतामिव २४ स्तनौव्यंजितकैशोरौसमवृत्तौनिरंतरौ ॥ वस्त्रांतेननिगूहंतींव्रीडयागजगामिनीम् २५ तामाहल लितांवीरःसव्रीडस्मितशोभिनीम् ॥ स्निग्धेनापांगपुंखेनस्पृष्टःप्रेमभ्रमद्भ्रुवा २६ कात्वंकंजपलाशाक्षिकस्यासीहकुतःसति ॥ इमामुपपुरींभीरुर्किंचिकी र्षसिशंसमे २७ कएतेनुपथाएतएकादशमहाभटाः ॥ एतावाललनाःसुभ्रुकोयंतेऽहिःपुरःसरः २८ त्वंह्रीर्भवान्यस्यथवाक्रमापतिंविचिन्वतीकिं मुनिवद्रहोवने ॥ त्वदंघ्रिसाम्याप्तसमस्तकामःक्वपद्मकोशःपतितःकराग्रात् २९

तमध्यमावस्थौ मध्यमांबुद्धिसंस्थामित्युक्तेः ध्वनस्तनशब्दइतिधातोःस्तनौशब्दौ समवृत्तौवर्णवृत्तलक्षणोपेतौ निरंतरमेकाऽभिन्नेववृत्तोविद्यमानौगुरुलघुभेदराहित्यावित्यर्थःव्रीडयावृत्तिविशेषेणवस्त्रांतेनव सआच्छादनइतिधातोराच्छादनशीलवृत्तिभागेननिगूहंतीमनभिव्यक्तिंकुर्वाणांगजगामिनीं गजवदूर्ध्वमूलाधारादायांतींबुद्धिम् २५ तामाहेति । स्वकार्यविषयेप्रवर्त्तयितुमभिमुखीचकार वीरोविशिष्टप्राणब लोपेतःसव्रीडस्मितशोभिनींस्वकार्याभिमुखीं अपांगप्रेमेत्यादिनापितत्तद्योगवृत्तिविशेषंलक्षयति प्रेम्णाभ्रमंतीभ्रूःप्रेमभ्रमद्भ्रूस्तया २६ कात्वमित्यादिलोकानुकारवचनंभ्रांत्याप्रलापोवाउपपुरीमित्यनेनज्ञाय तेअन्यथोपपुरीतिहस्वत्वेनप्रयोगःस्यात् देहसमीपेवर्तमानाम् २७ अनुपथाःस्वमार्गमनुवर्तमानाः येइमेमनसासहएकादशभटाएते ललविलासइतिधातोः । ललनाविलासोपेतावृत्तिविशेषाःहिगता विति धातोः । अहिरगतः सहव्रजः । पुरःसरोनासिकारंध्रचरःश्वासः २८ त्वंह्रीरित्यादिकमनुकरणं लज्जावृत्तिविशिष्टत्वात्ह्रीः । संकल्पवृत्त्याभवानीति वचनवृत्त्यावाक् रमणवृत्त्यारमाप तिंदेहस्वामिनं वनेदेहलक्षणेवासनावनेमुनिवन्मनोवत् त्वदंघ्रिसाम्येनाप्ताःसमस्ताःकामायेनसतथा अघिरघिलघिगत्यर्थाइतिधातोः यथा अंघ्र्योर्गतिसाधनत्वं तथामनसोपि मनसासंकल्प्यपुरुषस्य विषयोपगमनात् पद्मकोशः कंदुकलक्षणंमनः कराग्राद्वृत्तिविशेषात्पतितोगतः क्वकांवृत्तिमुपगतइति बाह्यार्थःस्पष्टः २९

SGDF
Sri Gangeshwari Digital Foundation

हेवरोरुयदित्वमासांह्रीमुखानांवृत्तिविशेषाणामन्यतमावृत्तिविशिष्टानासि किंतुस्थिरवृत्तिविशिष्टासि भुविसत्कर्मणिस्पृक्आशावतीतर्ह्यदभ्रकर्मणामहापराक्रमवतावीरवरेणमयासाकमिमांपुरींदे
हलक्षणामलंकर्तुमर्हसि कथमिवयज्ञपुंसाश्रीनारायणेनसहश्रीःपरंलोकंवैकुंठाख्यमिवेत्यन्वयः अदभ्रकर्मणेतिकमार्नंत्यंलक्षयाति ३० हेशोभनेव्रीडयासहितोहासःव्रीडाहासस्तेनयुक्तेनेक्षणेनावि
भ्रमंत्यौभ्रुवौयस्याःसातथातस्यास्तवसकाशादुपसृष्टःप्राप्तएषमनोभवोमनसोजातोरागलक्षणोवृत्तिविशेषो भगवांस्ताभिःपूज्योमामांप्रबाधते स्वानुकूलकर्मणायःसन्नद्धंकरोति यद्यस्मादथतस्मा
दनुगृहाणेत्यन्वयः कथंभूतं मामपांगेनशरीररहितेनवृत्तिविशेषेणविखंडितानींद्रियाणियस्यसतथातम् ३१ हेशुचिस्मितेनिर्मलविलासे त्वदाननंतवचेष्टाविशेषंमेदर्शयेत्यन्वयः सुभ्रुशोभना
भ्रूर्भ्रमणशीलंविषयेषुयस्यतत्तथासुतरां शोभनंलोचनमालोचनंयौक्तिकंज्ञानंयस्यतत्तथा ततस्तर्हिकिमितिनप्रकाशतइत्यतउक्तं व्यालंबीति व्यालंबिनामविस्रंसिनांचंचलानांनीलालकोपमवर्णा
न।तामसानांवृत्तिविशेषाणांवृंदेनसंवृतंगूढं तस्मान्नप्रकाशतइत्यर्थः तर्हिकथंदर्शनमितितत्राह उन्नीयेति तामसवृत्तिविशेषान्पृथक्कृत्य पुनरपिकीदृशं वल्गुसुंदरंवाचकंवक्त्रंवाक्यंयस्यतत्तथा
यदाननंव्रीडयावृत्तिविशेषेणममानभिमुखंनसंमुखंतदितिशेषः ३२ नरःपुरुषस्तत्संबंधिनीनारीवैषयिकीबुद्धिः हसंतीउल्लसंती विशिष्टईरोज्ञानंयस्यसवीरस्तमपिमोहयितुंशीलमस्याअस्तीतिवीरमोहि

नासावरोर्वन्यतमाभुवि स्पृक्पुरीमिमांवीरवरेणसाकम् ॥ अर्हस्यलंकर्तुमदभ्रकर्मणालोकंपरंश्रीरिवयज्ञपुंसा ३० यदेषमापांगविखंडितेंद्रियंसव्रीडहा
सेक्षणविभ्रमद्भ्रुवः ॥ तवोपसृष्टोभगवान्मनोभवःप्रबाधतेथानुगृहाणशोभने ३१ त्वदाननंसुभ्रुसुतारलोचनंव्यालंबिनीलालकवृंदसंवृतम् ॥ उन्नीय
मेदर्शयवल्गुवाचकंयद्व्रीडयानाभिमुखंशुचिस्मिते ३२ इत्थंपुरंजनंनारीयाचमानमधीरवत् ॥ अभ्यभाषततंवीरंहसंतीवीरमोहिनी ३३ नविदामवयं
सम्यक्कर्तारंपुरुषर्षभ ॥ आत्मनश्चपरस्यापिगोत्रंनामचयत्कृतम् ३४ इहाद्यसंतमात्मानंविदामनततःपरम् ॥ येनेयंनिर्मितावीरपुरीशरणमात्मनः ३५
एतेसखायःसख्योमेनरानार्यश्चमानद ॥ सुप्तायांमयिजागर्तिनागोयंपालयन्पुरीम् ३६ दिष्ट्यागतोसिभद्रंतेग्राम्यान्भोगानभीप्ससे ॥ उद्वहिष्यामित्वां
स्नेहंस्वबंधुभिररिंदम ३७ इमांत्वमधितिष्ठस्वपुरींनवमुखींविभो ॥ मयोपनीतान्गृह्णानःकामभोगान्छतंसमाः ३८ कान्नुत्वदन्यंरमयेदरतिज्ञम
कोविदम् ॥ असांपरायाभिमुखमश्वस्तनविदंपशुम् ३९

नीति ३३ यदुक्तंकस्यासीतितत्राह नेति हेपुरुषश्रेष्ठकर्तारमुत्पादकंभर्त्तारंपोषकंवासम्यग्लक्षणवत्त्वयानाविदामनजानमिहे गुणवदाश्रयःकश्चिदस्तीतिसामान्यमेवनतुविशिष्टमित्यतःसम्यागिति
किंचात्मनोममपरस्योत्पादकस्यापियथानामकृतंयच्चगोत्रंतदपिनजानीमहइत्यन्वयः अनामगोत्रमितिश्रुतेः ३४ तर्हिकिमपिनवेत्सिचेद्बुद्धित्वहानिरितितत्राह इहेति इहसंतमात्मानंमामहामि
त्यद्येदानींजानीमहे उत्तरकालेसंदेहःकर्मवशात् ततःपरंततोन्यत्किमपिनविदामइत्यन्वयः तस्मात्परमीश्वरंनविदामयेनेश्वरेणममशरणंनिवासयोग्येयंपुरीविरचितेतिवा ३५ केतेनुपथाइ
तितत्राह एतइति ३६ स्वबंधुभिरिंद्रियैः ३७ हस्तपादयोरेकत्वेननवत्वं मुखानिद्वाराणि शतंसमाइत्यनेनशतायुर्वैपुरुषइतिश्रुतेः मनुष्याणांशतायुष्ट्वनिर्देशान्मनुष्यशरीरमिहाभिप्रेतम्
३८ तत्रहिज्ञानोत्पत्तिःकुतइतितत्राह कान्विति काबुद्धिस्त्वदन्यंमनुष्यशरीरप्रविष्टंचेतनंविहायान्यंपश्वादिशरीरगतंरमयेत्सुखिनंकुर्यादित्यन्वयः कुतइत्यतउक्तं अरतिज्ञमिति यस्त्वात्मरति
रेवस्यादात्मतृप्तश्चमानवइतिस्मृतेः परमात्मरतिज्ञानरहितं शब्दादिविषयरतिज्ञानहीनंवा तदपिकुतइत्यतउक्तं अकोविदमिति अपंडितत्वादित्यर्थः पांडित्याभावःकथमित्यत्राह असांपरायेति सांप
रायेमोक्षस्तत्राभिमुखोनभवतीत्यसांपरायाभिमुखस्तं युद्धाभिमुखकामोनज्ञानाभिमुखस्त्वंकथमित्यतउक्तमश्वस्तनविदामिति श्वस्तनंभविष्यन्नवेत्तीत्यश्वस्तनवित्त नाविदुःश्वस्तनंनलोकालोकावितिश्रुतिः

SGPF

श्वस्तनत्वमपीदृशमितिनवेत्तीत्यश्वस्तनविर्त्तवा कोसावेवंविधइत्युक्तंपशुमिति तत्त्वज्ञानराहित्ं अत्रसद्बुद्ध्यसद्बुद्धीद्वेयथासंभवंविशेषणैस्तत्तदर्थतयाज्ञातव्येअसद्बुद्धिविवक्षायांपाशुपतागमज्ञानशून्यं
अन्यत्रोक्तार्थं असद्बुद्धिपक्षेपिस्वमतानुसारेणमोक्षादिकंस्वस्यैवार्थतइदंसमस्तमुपपन्नमिति ३९ इतोपिश्वस्तनोपिनास्त्येवेत्याह धर्मइति अत्रभवति धर्मादयःसंतीतिहियस्मात्तस्मात्प्रजानंदः
पुत्रसुखममृतंमोक्षः अन्योन्यमविरोधेनधर्माद्यनुष्ठानंनसुशकमितिभावेनाह यानिति केवलिनोनिर्ष्किचनाउदरंभरिजनावा ४० सर्वाश्रमाणामुपजीव्यत्वात्गृहाश्रमएवज्यायानित्याह पितृदेवेति
आत्मनोस्यदेहस्यक्षेम्यंमोक्षयोग्यंशरण्यंवदंतीतियत्तस्मादितिशेषः ४१ किंबहुनोक्तेनफलितंवक्तीत्याह कानामेति वदान्यंपुत्रकलत्राद्यभीष्टदानशीलंस्वयंप्राप्तत्वात् ४२ त्वादृशमित्युक्तांकांचिद्विशिन
ष्टि कस्यामनइति अनाथवर्गस्यास्मदादेराधिमनोदुःखंमलमपोहितुंचरसि घृणयादययोद्धतमुज्जृंभितंयत्स्मितंतत्पूर्वकोयोऽवलोकस्तेनदर्शनेनकस्याःस्त्रियाः ४३ परमफलितमाह इतीति समयंप्रमाण
पूर्वकंसंमुह्यसंवादंकृत्वादेहप्राप्तेःपूर्वंतदनंतरंवा बाह्यार्थविवक्षयैतद्वचः पुरींदेहं शतंसमा इति शतंवर्षाण्यभ्यार्छदितिश्रुतेरर्थमनुकरोति मुदहर्षइतिधातोःहर्षशोकयोःसुखदुःखवद्वंधुत्वादुभयंपर्यायेणबु
द्धिपुरुषौप्राप्तवंतावित्यर्थः ४४ तत्रप्रथमंमोदप्रकारमाह उपगीयमानइतिजाग्रदाद्यवस्थायांतत्रतत्रप्रतींद्रियविषयंगायकलक्षणैःशब्दादिभिर्विषयैरुपगीयमानःसेव्यमानः स्वप्नावस्थायांस्त्रीभिःकेवलंम
नोवृत्तिलक्षणाभिःपरिवृतःस्त्रीभिर्वायानैर्वाइतिश्रुतेः शुचौतन्निमित्तेशोकेप्राप्तेशीतलामगाधतोयधारामिवसुषुप्तिकालेसच्छब्दवाच्यांब्रह्मस्वरूपास्थितिमाविशत् सुप्तावस्थायामभूदित्यन्वयः ललितंयथा

धर्मोह्यत्रार्थकामौचप्रजानंदोऽमृतंयशः ॥ लोकाविशोकाविरजायान्नकेवलिनोविदुः ४० पितृदेवर्षिमर्त्यानांभूतानामात्मनश्चह ॥ क्षेम्यंवदंतिशरणं
भवेस्मिन्यद्गृहाश्रमम् ४१ कानामवीरविख्यातंवदान्यंप्रियदर्शनम् ॥ ननृणीतपतिंप्रासंमादृशीत्वादृशंस्वयम् ४२ कस्यामनस्तेभुजगेंद्रभोगयोःस्त्रियोन
सज्जेद्भुजयोर्महाभुज ॥ योऽनाथवर्गाधिमलंघृणोद्धतस्मितावलोकेनचरस्यपोहितुम् ४३ नारदउवाच ॥ इतितौदंपतीतत्रसंमुह्यसमयंमिथः ॥ तांप्रवि
श्यपुरींराजन्मुमुदातेशतंसमाः ४४ उपगीयमानोललितंतत्रतत्रचगायकैः ॥ क्रीडन्परिवृतःस्त्रीभिर्हृदिनीमाविशच्छुचौ ४५ सप्तोपरिकृताद्वारःपुर
स्तस्यास्तुद्वेअधः ॥ पृथग्विषयगत्यर्थंतस्यांयःकश्चनेश्वरः ४६ पंचद्वारस्तुपौरस्त्यादक्षिणैकातथोत्तरा ॥ पश्चिमेद्वेअमूषांतेनामानिनृपवर्णये ४७
खद्योताविर्मुखीचप्राग्द्वारावेकत्रनिर्मिते ॥ विभ्राजितंजनपदंयातिताभ्यांद्युमत्सखः ४८

तथा अन्यत्रशुचौऋतुविशेषे सतासोम्यतदासंपन्नोभवतीतिश्रुतेः सत्पुरुषःस्त्रीशब्दवाच्यैर्भक्त्यादिभिःपरिवृतःक्रीडन्विहरन्कालंयापयन् हृदिनींहृदिन्यांब्रह्मनाड्यांहृदयस्थानेष्टदलपद्मेस्थितम् श्री
नारायणमाविशदध्यायादित्यर्थः ४५ देहाख्यंपुरंप्रसिद्धपुरसाम्येनवर्णयति सप्तेति तस्याःपुरउपरिसप्तद्वारःकृताः द्वेनेत्रेद्वेनासिकेकर्णौवदनंचेति अधोद्वेपायूपस्थे इतिकृत्यमाह विषयगत्यर्थमिति रू
पादिविषयज्ञानार्थनिर्मिताइत्यर्थः तस्यांपुर्यांकश्चनेश्वरः अनामरूपोलोकविलक्षणःश्रीनारायणोस्तीत्यन्वयः। जीवोवा जगत्सामर्थ्योपेतत्वादीश्वरइत्युच्यते देहस्वामित्वाद्वा अल्पशक्त्यादिमत्त्वात्तु
कश्चित्त्वेनयःकश्चनेति ४६ तत्रापिविभागमाह पंचेति तासामुपरिद्वारांमध्येपौरस्त्याःपुरस्ताद्भवाःपंचद्वारानेत्रादयइत्यर्थः पश्चाद्वे एकादक्षिण कर्णलक्षणादक्षिणा तथोत्तरावामकर्णलक्षणा पश्चिमेद्वेअधो
भागेद्वेपायूपस्थेअमूषांनवद्वारां ४७ खेआकाशेसतिद्योततेरूपंगृह्णातीतिखद्योता खद्योतवत्द्योततइतिवा दक्षिणचक्षुर्लक्षणा आविःप्रकाशेसतिमुखयत्यभिमुखीभवतीतिसाविर्मुखीप्रकाशमुखीनतमो
मुखीतमसिरूपग्रहणाभावादितिवामचक्षुर्लक्षणा ताभ्यांविभ्राजितंप्रकाशितंजनस्यद्रष्टुःपदमालंबनंरूपाख्यंयातिविषयीकरोतिगृह्णातीत्यर्थः कथंभूतः द्युमानादित्यश्चक्षुर्लक्षणःसखायस्यसतथा चक्षुरिं
द्रियसहितइत्यर्थः द्युमानादित्यस्तस्यावासहेतुत्वाच्चक्षुषोपितन्नाम आदित्यश्चक्षुर्भूत्वाक्षिणीप्राविशदितिश्रुतेः आदित्योहवैचक्षुस्तेनानुगृहीतंरूपंगृह्णातीतिच ४८

SGDF Sri Gargeshwari Digital Foundation

हेवरोरुयदित्वमासांह्रीमुखानांवृत्तिविशेषाणामन्यतमावृत्तिविशिष्टानासि किंतुस्थिरवृत्तिविशिष्टासि भुविसत्कर्माणिस्पृक्आशावतीतर्ह्यदभ्रकर्मणामहापराक्रमवतावीरवरेणमयासाकमिमांपुरींदे
हलक्षणामलंकर्तुमर्हसि कथमिवयज्ञपुंसाश्रीनारायणेनसहश्रीःपरंलोकंवैकुंठाख्यमिवेत्यन्वयः अदभ्रकर्मणेतिकर्मानंत्यंलक्षयति ३० हेशोभनेव्रींडयासहितोहासःव्रीडाहासस्तेनयुक्तेनेक्षणेनावि
भ्रमंत्यौभ्रुवौयस्याःसातथातस्यास्तवसकाशादुपसृष्टःप्राप्तएषमनोभवोमनसोजातोरागलक्षणोवृत्तिविशेषो भगवांस्ताभिःपूज्योमामांप्रबाधते स्वानुकूलकर्मणायःसन्नद्धंकरोति यद्यस्मादथतस्मा
दनुगृहाणेत्यन्वयः कथंभूतं मामपांगेनशरीररहितेनवृत्तिविशेषेणविखंडितानींद्रियाणियस्यसतथातम् ३१ हेशुचिस्मितेनिर्मलविलासे त्वदाननंतवचेष्टाविशेषंमेदर्शयेत्यन्वयः सुभ्रुशोभना
भ्रूर्भ्रमणशीलंविषयेषुयस्यतत्तथासुतरां शोभनंलोचनमालोचनंयौक्तिकंज्ञानंयस्यतत्तथा ततस्तर्हिकिमितिनप्रकाशतइत्यतउक्तं व्यालंबीति व्यालंबिनामविस्रंसिनांचंचलानांनीलालकोपमवर्णा
न.तामसानांवृत्तिविशेषाणांवृंदेनसंवृतंगूढं तस्मान्नप्रकाशतइत्यर्थः तर्हिकथंदर्शनमितितत्राह उन्नीयेति तामसवृत्तिविशेषान्पृथक्कृत्य पुनरपिकीदृशं वल्गुसुंदरंवाचकंवक्रंवाक्यंयस्यतत्तथा
यदाननंव्रीडयावृत्तिविशेषेणममानभिमुखंनसंमुखंतदितिशेषः ३२ नरःपुरुषस्तत्संबंधिनीनारीवैषयिकीबुद्धिः हसंतीउल्लसंती ।विशिष्टईरोज्ञानंयस्यसवीरस्तमपिमोहयितुंशीलमस्याअस्तीतिवीरमोहि

नासावरोर्वन्यतमाभुवि स्पृक्पुरीमिमांवीरवरेणसाकम् ॥ अर्हस्यलंकर्तुमदभ्रकर्मणालोकंपरंश्रीरिवयज्ञपुंसा ३० यदेषमापांगविखंडितेंद्रियंसव्रीडहा
सेक्षणविभ्रमद्भ्रुवः ॥ तवोपसृष्टोभगवान्मनोभवःप्रबाधतेथानुगृहाणशोभने ३१ त्वदाननंसुभ्रुसुतारलोचनंव्यालंबिनीलालकवृंदसंवृतम् ॥ उन्नीय
मेदर्शयवल्गुवाचकंयद्व्रीडयानाभिमुखंशुचिस्मिते ३२ इत्थंपुरंजनंनारीयाचमानमधीरवत् ॥ अभ्यभाषततंवीरंहसंतीवीरमोहिनी ३३ नविदामवयं
सम्यक्कर्तारंपुरुषर्षभ ॥ आत्मनश्चपरस्यापिगोत्रंनामचयत्कृतम् ३४ इहाद्यसंतमात्मानंविदामनततःपरम् ॥ येनेयंनिर्मितावीरपुरीशरणमात्मनः ३५
एतेसखायःसख्योमेनरानार्यश्चमानद ॥ सुप्तायांमयिजागर्तिनागोयंपालयन्पुरीम् ३६ दिष्ट्यागतोसिभद्रंतेग्राम्यान्भोगानभीप्ससे ॥ उद्वहिष्यामित्वां
स्नेहंस्वबंधुभिररिंदम ३७ इमांत्वमधितिष्ठस्वपुरींनवमुखींविभो ॥ मयोपनीतान्गृह्णानःकामभोगान्छतंसमाः ३८ कानुत्वदन्यंरमयेदरतिज्ञम
कोविदम् ॥ असांपरायाभिमुखमश्वस्तनविदंपशुम् ३९

नीति ३३ यदुक्तंकस्यासीतितत्राह नेति हेपुरुषश्रेष्ठकर्तारमुत्पादकंभर्त्तारंपोषकंवासम्यग्लक्षणवत्त्वयानाविदामनजानमिहे गुणवदाश्रयःकश्चिदस्तीतिसामान्यमेवनतुविशिष्टमित्यतःसम्यागिति
किंचात्मनोममपरस्योत्पादकस्यापियथानामकृतंयच्चगोत्रंतदपिनजानीमहइत्यन्वयः अनामगोत्रमितिश्रुतेः ३४ तर्हिकिमपिनवेत्सिचेद्बुद्धित्वहानिरितितत्राह इहेति इहसंतमात्मानंमामहामि
त्यद्येदानींजानीमहे उत्तरकालेसंदेहःकर्मवशात् ततःपरंततोन्यत्किमपिनविदामइत्यन्वयः तस्मात्परमीश्वरंनविदामयेनेश्वरेणममशरणंनिवासयोग्येयंपुरीविरचितेतिवा ३५ केतेनुपथाइ
तितत्राह एतइति ३६ स्वबंधुभिरिंद्रियैः ३७ हस्तपादयोरेकत्वेननवत्वं मुखानिद्वाराणि शतंसमाइत्यनेनशतायुर्वैपुरुषइतिश्रुतेः मनुष्याणांशतायुष्ट्वनिर्देशान्मनुष्यशरीरमिहाभिप्रेतम्
३८ तत्रहिज्ञानोत्पत्तिःकुतइतितत्राह कान्विति काबुद्धिस्त्वदन्यंमनुष्यशरीरप्रविष्टंचेतनंविहायान्यंपश्वादिशरीरगतंरमयेत्सुखिनंकुर्यादित्यन्वयः कुतइत्यतउक्तं अरतिज्ञमिति यस्त्वात्मरति
रेवस्यादात्मतृप्तश्चमानवइतिस्मृतेः परमात्मरतिज्ञानरहितं शब्दादिविषयरतिज्ञानहीनंवा तदपिकुतइत्यतउक्तं अकोविदमिति अपंडितत्वादित्यर्थः पांडित्याभावःकथमित्यत्राह असांपरायेति सांप
रायोमोक्षस्तत्राभिमुखोनभवतीत्यसांपरायाभिमुखस्तं युद्धाभिमुखकामोनज्ञानाभिमुखस्त्वंकथमित्यतउक्तमश्वस्तनविदामिति श्वस्तनंभविष्यन्नवेत्तीत्यश्वस्तनवित्त नाविदुःश्वस्तनंनलोकालोकावीतिश्रुतिः

SGDF

श्वस्तनत्वमपीदृशमितिनवेत्तीत्यश्वस्तनविर्त्तवा कोसावेवंविधइत्युक्तंपशुमिति तत्त्वज्ञानरहितं अत्रसद्बुद्ध्यसद्बुद्धीद्वेयथासंभवंविशेषणैस्तत्तदर्थतयाज्ञातव्येअसद्बुद्धिविवक्षायांपाशुपतागमज्ञानशून्यं अन्यत्रोक्तार्थं असद्बुद्धिपक्षेपिस्वमतानुसारेणमोक्षादिकंस्वस्यैवार्थतइदंसमस्तमुपपन्नमिति ३९ इतोपिश्वस्तनोपिनास्त्येवेत्याह धर्मइति अत्रभवति धर्मादयःसंतीतिहियस्मात्तस्मात्प्रजानंदः पुत्रसुखममृतंमोक्षः अन्योन्यमविरोधेनधर्माद्यनुष्ठानंनसुशकमितिभावेनाह यानिति केवलिनोनिष्किंचनाउदरंभरिजनावा ४० सर्वाश्रमाणामुपजीव्यत्वात्गृहाश्रमएवज्यायानित्याह पितृदेवेति आत्मनोस्यदेहस्यक्षेम्यंमोक्षयोग्यंशरण्यंवदंतीतियत्तस्मादितिशेषः ४१ किंबहुनोक्तेनफलितंवक्तीत्याह कानामेति वदान्यंपुत्रकलत्राद्यभीष्टदानशीलंस्वयंप्राप्तत्वात् ४२ त्वादृशमित्युक्तांकिंचिद्धिशिनष्टि कस्यामनइति अनाथवर्गस्यास्मदादेराधिंमनोदुःखंमलमपोहितुंचरसि घृणयादययोद्धतमुज्जृंभितंयत्स्मितंतत्पूर्वकोयोऽवलोकस्तेनदर्शनेनकस्याःस्त्रियाः ४३ परमफलितमाह इतीति समयंप्रमाणपूर्वकंसंमुह्यसंवादंकृत्वादेहप्राप्तेःपूर्वंतदनंतरंवा बाह्यार्थविवक्षयैतद्वचः पुरींदेहं शतंसमा इति शतंवर्षाण्यभ्यार्छदितिश्रुतेरर्थमनुकरोति मुदहर्षइतिधातोःहर्षशोकयोःसुखदुःखवद्वंधुत्वादुभयंपर्यायेणबुद्धिपुरुषौप्राप्तवंतावित्यर्थः ४४ तत्रप्रथमंप्रमोदप्रकारमाह उपगीयमानइतिजाग्रदाद्यवस्थायांतत्रतत्रमर्तींद्रियविषयंगायकलक्षणैःशब्दादिभिर्विषयैरुपगीयमानःसेव्यमानः स्वप्नावस्थायांस्त्रीभिःकेवलंमनोवृत्तिलक्षणाभिःपरिवृतःस्त्रीभिर्वायानैर्वाइतिश्रुतेः शुचौतन्निमित्तेशोकेप्राप्तेशीतलामगाधतोयधारामिवसुषुप्तिकालेसच्छब्दवाच्यांब्रह्मस्वरूपास्थितिंमाविशत् सुप्तावस्थायामभूदित्यन्वयः ललितंयथा

धर्मोह्यत्रार्थकामौचप्रजानंदोऽमृतंयशः ॥ लोकाविशोकाविरजायान्नकेवलिनोविदुः ४० पितृदेवर्षिमर्त्यानांभूतानामात्मनश्चह ॥ क्षेम्यंवदंतिशरणंभवेस्मिन्यद्गृहाश्रमम् ४१ कानामवीरविख्यातंवदान्यंप्रियदर्शनम् ॥ नत्वणीतपतिंप्राप्तंमादृशीत्वादृशंस्वयम् ४२ कस्यामनस्तेभुजगेंद्रभोगयोःस्त्रियोनसज्जेद्भुजयोर्महाभुज ॥ योऽनाथवर्गाधिमलंघृणोद्धतस्मितावलोकेनचरस्यपोहितुम् ४३ नारदउवाच ॥ इतितौदंपतीतत्रसंमुह्यसमयंमिथः ॥ तांप्रविश्यपुरींराजन्मुमुदातेशतंसमाः ४४ उपगीयमानोललितंतत्रतत्रचगायकैः ॥ क्रीडन्परिवृतःस्त्रीभिर्ह्रदिनीमाविशच्छुचौ ४५ सप्तोपरिकृताद्वारःपुरस्तस्यास्तुद्वेअधः ॥ पृथग्विषयगत्यर्थंतस्यांयःकश्चनेश्वरः ४६ पंचद्वारस्तुपौरस्त्यादक्षिणैकातथोत्तरा ॥ पश्चिमेद्वेअमूषांतेनामानिनृपवर्णये ४७ खद्योताविर्मुखीचप्राग्द्वारावेकत्रनिर्मिते ॥ विभ्राजितंजनपदंयातिताभ्यांद्युमत्सखः ४८

तथा अन्यत्रशुचौऋतुविशेषे सतासोम्यतदासंपन्नोभवतीतिश्रुतेः सत्पुरुषःस्त्रीशब्दवाच्यैर्भक्त्यादिभिःपरिवृतःक्रीडन्विहरन्कालंयापयन् ह्रदिनींह्रादिन्यांब्रह्मनाड्यांहृदयस्थानेष्टदलपद्मेस्थितम् श्रीनारायणमाविशद्ध्यायादित्यर्थः ४५ देहाख्यंपुरंप्रसिद्धपुरसाम्येनवर्णयति सप्तेति तस्याःपुरउपरिसप्तद्वारःकृताः द्वेनेत्रेद्वेनासिकेकर्णौवदनंचेति अधोद्वेपायूपस्थे इतिकृत्यमाह विषयगत्यर्थमिति रूपादिविषयज्ञानार्थनिर्मिताइत्यर्थः तस्यांपुर्यांकश्चनेश्वरः अनामरूपोलोकविलक्षणःश्रीनारायणोस्तीत्यन्वयः। जीवोवा जगत्सामर्थ्योपेतत्वादीश्वरइत्युच्यते देहस्वामित्वाद्वा अल्पशक्त्यादिमत्त्वात्तुच्छत्वेनयःकश्चनेति ४६ तत्रापिविभागमाह पंचेति तासामुपरिद्वारांमध्येपौरस्त्याःपुरस्ताद्भवाःपंचद्वारानेत्रादयइत्यर्थः पश्चाद्वे एकादाक्षिण कर्णलक्षणादक्षिणा तथोत्तरावामकर्णलक्षणा पश्चिमेद्वेअधोभागेद्वेपायूपस्थेअमूषांनवद्वारां ४७ खेआकाशेसतिद्योततेरूपंगृह्णातीतिखद्योता खद्योतवत्द्योततइतिवा दक्षिणचक्षुर्लक्षणा आविःप्रकाशेसतिमुखयत्याभिमुखीभवतीतिसाविर्मुखीप्रकाशमुखीनतमोमुखीतमसिरूपग्रहणाभावादितिवामचक्षुर्लक्षणा ताभ्यांविभ्राजितंप्रकाशितंजनस्यद्रष्टुःपदमालंबनंरूपाख्यंयातिविषयीकरोतिगृह्णातीत्यर्थः कथंभूतः द्युमानादित्यश्चक्षुर्लक्षणःसखायस्यसतथा चक्षुरिंद्रियसहितइत्यर्थः द्युमानादित्यस्तस्यावासहेतुत्वाच्चक्षुषोपिसनाम आदित्यश्चक्षुर्भूत्वाक्षिणीप्राविशदितिश्रुतेः आदित्योहवैचक्षुस्तेनानुगृहीतंरूपंगृह्णातीतिच ४८

SGLF Sri Gargeshwari Digital Foundation

नलोनामश्वासःसोस्याअस्तीतिनलिनीनलोदस्राभिधेयोस्याविद्यतइतिनालिनी नलनालौश्वासोच्छ्वासौतयोःसंचारेहेतुत्वान्नलिनीनालिनीतिद्वेगोलकेनासिकारंभे अवागुपरितिर्यक्धुनोतीत्यवधूतोवा
युः घ्राणेंद्रियाभिमानीतेनप्रेर्यमाणंघ्राणेंद्रियमपितच्छब्दवाच्यंतदेवसखायस्यसतथा घ्राणेंद्रियसहितइत्यर्थः सौरभंविषयंगंधलक्षणंगृह्णाति ४९ पुरस्तान्मुख्यानामद्वाःआस्यच्छिद्रलक्षणास्तिपुरराट्
ट्पुरंजनस्तयाद्वाराआपणबहूदनौ पणव्यवहारइतिधातोः आपणोवदनव्यापारः बहूदनोनानाविधभोज्यजातम् तौयातिव्यवहरतिअभ्यवहरतिच रसज्ञोजिह्वेंद्रियंविपणोवागिंद्रियंताभ्यामन्वितः।
५० नाम्नापितृभूःपातृत्वात्पितरोदेवाःप्रियाभवंत्यस्ययजमानस्यदक्षिणकर्णलक्षणा शरीरलक्षणायाःपुर्याद्वारस्थितेनदक्षिणकर्णलक्षणेनद्वारेणउत्क्रांतः पुरंजनोयजमानोदक्षिणपांचालंदक्षिणानांदे
वानांलोकलक्षणंराष्ट्रंयातिप्राप्नोति पंचेंद्रियाण्यलंयातिभूषयति अलभूषणइतिधातोः पंचेंद्रियाणामलंबुद्धिहेतुत्वादितिवा पुरंब्रह्मलक्षणंजनयतिप्रादुर्भावयतिप्रकाशयतीतिपुरंजनः तत्त्वज्ञानीदक्षिण
पांचालंनिवृत्तशास्त्रंयात्यवगंतुमितिवा दक्षिणस्तत्त्वज्ञापनसमर्थः इतिहासादिनासहपंचसंख्योपेतोवेदः सएवालंतत्त्वज्ञानायनान्यापेक्षेतिकृत्वा मध्यमपुरंजनोदक्षिणपांचालंपंचविषयसंज्ञंराष्ट्रंयाति रं
तुमिवायम् । पंचानांशब्दानांसमूहःपांचःसएवालंभोक्तुमितिबुद्धिहेतुत्वादितिकृत्वा सर्वत्राप्ययमेवसखेत्याह श्रुतधरेति श्रुतंलोकंशास्त्रंवाविषयंवाधारयतीतिश्रुतधरःश्रोत्रेंद्रियंतेनसख्यासहितः ५१
पुर्यावामकर्णलक्षणादेवभूर्नामद्वास्थितः प्रजादिरूपेणक्रीडादिगुणोपेतत्वाद्देवःपितृगणःप्रियोभवत्यस्यश्राद्धादिकर्तुरिति तेनोत्तरेणवामकर्णलक्षणद्वारेणोत्क्रांतःपुरंजनः उत्तरपांचालमूर्ध्वलोकप्राप्ति

नलिनीनालिनीचप्राक्द्वारावेकत्रनिर्मिते ॥ अवधूतसखस्ताभ्यांविषयंयातिसौरभम् ४९ मुख्यानामपुरस्ताद्वास्तयापणबहूदनौ ॥ विषयौयातिपुरराट्
रसज्ञविपणान्वितः ५० पितृभूर्नृपपुर्याद्वादक्षिणेनपुरंजनः ॥ राष्ट्रंदक्षिणपांचालंयातिश्रुतधरान्वितः ५१ देवभूर्नामपुर्याद्वाउत्तरेणपुरंजनः ॥ राष्ट्रमुत्त
रपांचालंयातिश्रुतधरान्वितः ५२ आसुरीनामपश्चाद्वास्तयायातिपुरंजनः ॥ ग्राम्यकंनामविषयंदुर्मदेनसमन्वितः ५३ निर्ऋतिर्नामपश्चाद्वास्तयायातिपुरं
जनः ॥ वैशसंनामविषयंलुब्धकेनसमन्वितः ५४ अंधावमीषांपौराणांनिर्वाक्पेशस्कृतावुभौ ॥ अक्षण्वतामधिपतिस्ताभ्यांयातिकरोतिच ५५ सयर्हिंतः
पुरगतोविषूचिनासमन्वितः ॥ मोहंप्रसादंहर्षंवायातिजायात्मजोद्भवम् ५६

हेतुत्वादुत्तराः उत्तरंतिविस्तरंतिददतीत्युत्तराःपितरस्तेषांलोकलक्षणंराष्ट्रंयाति अत्रापिपूर्वोक्तेनसख्योपेतः पुत्रलक्षणंपुरंजनयतीतिपुरुषप्रजननकर्मालोकोजीवः उत्तरंउत्कृष्टंपांचालंप्रवृत्तशास्त्रमितिवा
अन्यस्तुपूर्वोक्तएव किमेतत्प्रतीतार्थपरित्यज्यव्यत्यस्यकथनेकारणमितिचेदुच्यते दक्षिणश्रोत्रमार्गेणदेवलोकंव्रजत्यसौ । वामश्रोत्रेणपितॄणामितिवेदविदोविदुरितिप्रमाणम् ५२ असुरजनहितत्वा
दासुरीनामपश्चाद्वाःशिश्नलक्षणास्ति तयाद्वाराग्राम्यकंनाममैथुनकंसुखंविषयंयात्यनुभवति दुष्टोमदोयस्यसतथातेनोपस्थेंद्रियेणसहितः असूनामिंद्रियाणांरतिहेतुत्वादासुरीतिवा सुखहेतुत्वाद्वास
वामपिग्राह्यम् ५३ निर्गच्छत्यस्मात्पुरीषलक्षणमलमितिनिर्ऋतिनामावोद्वाः गुदलक्षणंछिद्रं वैशसंपुरीषोत्सर्गलक्षणम् विषयम् पापंहिंसालक्षणनरकंवा लुब्धकेनावींगिंद्रियेण कृच्छ्रेणमलमोचनादेषा
संज्ञा ५४ अमीषांद्वाराणांमध्येउभौनिर्वाक्पेशस्कृतौपादौहस्तश्चांधौज्ञानशून्यौभवतः । निर्गतंवाक्यंयस्मात्सनिर्वाक्यःपादःकर्तुःपुरुषस्योपकरणभूतत्वादुपस्करोहस्तः हसआदानइतिधातो
रादातृत्वात् अक्षाणींद्रियाणिविद्यंतेयेषांतेऽक्षण्वंतोजीवास्तेषांपतिःपुरंजनस्ताभ्यांपादहस्ताभ्यांयातिकरोतिचेत्यन्वयः ५५ क्वचिद्धृदयाख्यांतःपुरंगतोविष्वक्सर्वतोंचतीतिविषूचिमनस्तेनस
हितःस्वयंपुरंजनोजायात्मजेभ्यउद्भवोजन्मयस्यसतथा तमोमोहाद्यन्यतमंयातीत्यन्वयः जायाभक्तिरात्मजोज्ञानंभक्तिज्ञाने तज्ज्ञानादुत्पन्नम् प्रसीदत्यनेनेतिप्रसादःपरमानंदः मुह्यत्यनेनेतिमोहोनिरयः
हृष्यत्यनेनेतिहर्षःस्वर्गस्तान् ५६

भा०च० इदानीमसद्बुद्धेःप्रकारंदर्शयति एवमिति ग्राम्यकर्मसुकाम्यंतइतिकामाविषयास्तेष्वात्मामनोयस्यसतथा वंचितोदेवेनेतिशेषः अबुधोविवेकशून्यः महिषीबुद्धिलक्षणा मतंहिनस्तीतिमहिषी अन्यत्र वि०अ०
मतंददातीतिमहिषी यद्यत्कर्मकारयितुमीहेततत्तत्कर्मान्ववर्तत अन्वकरोदेव ५७ तत्किंतदाह क्वचिदिति पिबंत्यांपातुमिच्छंत्यामित्याद्यूह्यं अनेनसद्बुद्धिरपिध्वनितेतिज्ञातव्यम् ५८ ५९ ६० ६१
६१ ६२ तथाहि महोस्यास्तीतिमहिब्रह्म तस्मिन्नित्योत्सवसमुद्रेहरौसीदतिविषयीकृत्यवर्ततइतिमहिषीसद्बुद्धिस्तयाविशेषेणप्रलब्धःप्राप्ताभीष्टकार्यलाभःसर्वप्रकृतिवंचितोवंचितसर्वस्त्रीजनस्वभावः अंविष्णुं २९
जानातीत्यज्ञः सद्बुद्ध्यधीनत्वात्क्रीडामृगत्वमपिपुक्तम् ६३ इतिश्रीभागवतेचतुर्थस्कंधेविजय०क्र०टीकायांपंचविंशोऽध्यायः २५ अधुनाजाग्रदवस्थाप्रकारकथनेनसंसारप्राप्तिंकथयन्जाग्रदवस्था
प्रवेशंतावदाह सएकदेति सपुरंजनः एकदास्वप्नविषयभोगप्रापककर्मक्षये जाग्रद्भोगप्रापककर्मागमनेसति पंचेंद्रियद्वारेणसूनार्थमात्माप्रतिष्ठतेयस्मिन्नितिपंचप्रस्थंवनंजाग्रद्विषयलक्षणकांतारमगादनुबभूवे
त्यग्रेणान्वयः किंकृत्वाकथंभूतइतितदाह महेष्वासइति महानितिमहःप्रणवःसएवेष्वासोधनुर्यस्यसतथा यथार्थकथनमेतत् अन्यत्रमहांश्चासौइष्वासोयस्येति स्वर्णवर्णलक्षणंरजोगुणाख्यं
वर्मयस्यसतथा अक्षयेप्रवृत्तिनिवृत्तिलक्षणेइषुधीयस्यसतथा एकादशेंद्रियलक्षणायाश्चम्वानाथःपंचेंद्रियाण्येवाश्वायस्यसतथातम् आशुगच्छत्यस्तिजायतइत्यादिविकारंपरिणामलक्षणमित्याशुगस्तम्

एवंकर्मसुसंसक्तःकामात्मावंचितोबुधः ॥महिषीयद्यदीहेततत्तदेवान्ववर्तत ५७ क्वचित्पिबंत्यांपिबतिमदिरांमदविह्वलः॥ अश्नंत्यांक्वचिदश्नातिजक्षत्यांस
हजक्षति ५८ क्वचिद्गायतिगायंत्यांरुदंत्यांरुदतिक्वाचित् ॥ क्वचिद्धसंत्यांहसतिजल्पंत्यामनुजल्पति ५९ क्वचिद्धावतिधावंत्यांतिष्ठंत्यामनुतिष्ठति ॥
अनुशेतेशयानायामन्वास्तेक्वचिदासतीम् ६० क्वचिच्छृणोतिशृण्वंत्यांपश्यंत्यामनुपश्यति॥ क्वचिज्जिघ्रतिजिघ्रंत्यांस्पृशंत्यांस्पृशतिक्वचित् ६१ क्वचि
च्छोचतींजायामनुशोचतिदीनवत् ॥ अनुहृष्यतिहृष्यंत्यांमुदितामनुमोदते ६२ विप्रलब्धोमहिष्यैवंसर्वप्रकृतिवंचितः॥ नेच्छन्ननुकरोत्यज्ञःक्लैब्यात्क्रीडा
मृगोयथा६३ इतिश्रीभागवतेच०पंचविंशोऽध्यायः २५ नारदउवाच॥ सएकदामहेष्वासोरथंपंचाश्वमाशुगम्॥ द्विकर्मचक्रमेकाक्षंत्रिवेणुंपंचबंधुरम् १ ए
करश्म्येकदमनमेकनीडंद्विकूबरम् ॥ पंचप्रहरणंसप्तवरूथंपंचविक्रमम् २ हेमोपस्करमारुह्यस्वर्णवर्माक्षयेषुधिः॥ एकादशचमूनाथःपंचप्रस्थमगाद्वनम् ३

द्वेपुण्यपापलक्षणेकर्मणीएवचक्रेयस्यसतथातं एकःसूत्रात्मावायुरक्षोयस्यसतथातं त्रयःसत्त्वादिगुणाएववेणवोध्वजायस्यसतथातं पंचप्राणाएवविनतोन्नतप्रदेशाबंधुराख्यायस्यसतथातं अनेनप्राण
संचारहेतवोनाडीविशेषाःकथ्यंतेआधारोवा १ एकोमनआख्योरश्मिःप्रग्रहोयस्यसचएकोबुद्ध्याख्योदमनःसारथिर्यस्यसचैकरश्म्यैकदमनस्तं बुद्धिंतुसारथिंविद्धिमनःप्रग्रहमेवच ।प्राणाबंधुरमुद्दिष्टागु
णाःसत्त्वादयोध्वजाः। मूलवायुरक्षसंज्ञश्चक्रेद्वेपुण्यदुष्कृते । इंद्रियाण्यश्वसंज्ञानिहृदयंनीडमुच्यते । शीतोष्णलक्षणौद्वौतुकूबरौशब्दपूर्वकम् । पंचप्रहरणंसप्तत्वगाद्यागुप्तयःस्मृताः । पृथिव्याद्याविक्रमा
ख्यादेहाख्योरथउच्यते । इत्यध्यात्मयोगे एकंहृदयलक्षणंनीडंयस्यसतथातं द्वौशीतोष्णलक्षणौकूबरौयुगंधरौयस्यसतथातंपंचानामिंद्रियाणांपंचशब्दादिविषयाणांचसन्निकर्षलक्षणानिप्रहरणा ६१
नियस्मिन्सतथातं पंचसूनासाधनानिप्रहरणानियस्मिन्नितिवा सप्तत्वगाद्याधातवोवरूथोगुप्तिर्यस्यसतथातंपंचानांभूतानांविक्रमःप्रभावोयस्मिन्सतथातम् २ हेमोपस्करंमुकुटकुंडलाभरणैःस्वर्णकारै
र्भूषितंरथं रथगताविविधातोः ज्ञानलक्षणगमनसाधनंदेहमारुह्याधिष्ठायेति अक्षयेषुधिरनंतवृत्त्यालंबमानांतःकरणोपाधिरितिवा इषून्रागादीनस्यतिनिरस्यतिग्लापयतीतिइष्वासोज्ञानलक्षणः
सचमहानूयस्यसइतिवा ३

SGLF
Sri Gargeshwari Digital Foundation

इषवश्चकार्मुकंचात्तंगृहीतंयेनसतथा रागाद्याइषवः। कार्मुकंविवेककार्यंस्वकृत्यंमुंचत्यनेनेतिनिरुक्त्या । तत्रजाग्रद्विषयकानने मृगयांशब्दादिभोगलक्षणां चचारबुभुजइत्यन्वयः अतदर्हांत्यागायो ग्यांसद्बुद्धिलक्षणांविहायासद्बुद्धिलक्षणांचादायेतिशेषइ।ि विवेकः मृग्यंतइतिमृगाविषयास्तेषांव्यसनेभोगलक्षणेलालसउत्सुकः अन्यत्रहरिणानांहिंसनायोत्कटव्यापारवान् ४ आसुरींहिंसाल क्षणांवृत्तिं घोरात्माविषयप्रसंगानिमित्तसंसारभयरहितः निर्गतोनुग्रहोदयालक्षणोयस्मात्सतथान्यहनत् हनहिंसागत्योरिति नितरामगच्छदसेवतेत्यर्थः निशितैर्बाणैःकपटमनोवृत्तिभिः वनेषुजाग्र द्विषयप्रदेशेषु वनगोचरांस्तत्रन्यशब्दादिविषयलक्षणान्मृगान् ५ ननु राज्ञोहिमृगयानिष्टातमयापशुहिंसया । राजामृगार्थीमृगयांचरन्दोषैर्नलिप्यतइति अग्नीषोमीयंपशुमालभेतेत्यादौविहित त्वात्कथमासुरींवृत्तिमाश्रित्येतिनिंद्यतइतितत्राह तीर्थेष्विति श्रुतिदृष्टेषु श्रुतिस्मृतिविहितेषुतत्तत्स्थानेषुराजास्वविहिताचारनिष्ठयाशोभमानोमेध्यान्पशूनजमृगप्रभृतीन्यावदर्थंयावत्प्रयोजनंलुब्धः फलार्थीहन्यादित्यलंनियम्यते विधिवाक्यैरितिशेषः अध्यात्मेतिप्रमाणकेषुतीर्थेषुशास्त्रेषुविहितान्मेध्यान्मेधयोग्यान्ज्ञानयोग्यान् पशून्गोसधर्मान्रमणीयान्विषयान्वनेविषयव्यवहारेवर्तमानोलुब्धो गृध्नुर्यावतादेहावस्थितिस्तावन्मात्रमलमत्यर्थंहन्याद्गच्छेत्सेवार्थमितिशेषइतिनियम्यते शिक्षाविषयीक्रियतइति अलमितिविशेषणादलुब्धोलोकोपकारार्थंपशून्घ्नन् आत्मार्थादधिकमपिहननमपि कुर्वन्नदुष्यतीतितात्पर्यंज्ञायते तदुक्तं उपकारःसतांयेनतत्कृत्वानैवदुष्यति । अतीवनिंदितमपिबहुहिंसायुगेववा । अथवाज्ञानिनःकर्मनदुष्टमपिलिप्यतइति ६ ननु नियतकर्माकरणेज्ञानिनोपि

चचारमृगयांतत्रदृप्तआत्तेषुकार्मुकः ॥ विहायजायामतदर्हांमृगव्यसनलालसः ४ आसुरींवृत्तिमाश्रित्यघोरात्मानिरनुग्रहः ॥ न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ५ तीर्थेषुश्रुतिदृष्टेषुराजामेध्यपशून्वने ॥ यावदर्थमलंलुब्धोहन्यादितिनियम्यते ६ यएवंकर्मनियतंविद्वान्कुर्वीतवानवा ॥ कर्मणातेन राजेंद्रज्ञानेनसनलिप्यते ७ अन्यथाकर्मकुर्वाणःकामरूढोनिबध्यते ॥ गुणप्रवाहपतितोनष्टप्रज्ञोव्रजत्यधः ८ तत्रनिर्भिन्नगात्राणांचित्रवाजैःशिलीमु खैः ॥ विप्लवोभूद्दुःखितानांदुःसहःकरुणात्मनाम् ९ शशान्वराहान्महिषान्गवयान्रुरुशल्यकान् ॥ मेध्यानन्यांश्चविविधान्विनिघ्नन्श्रममध्यगा त् १० ततःक्षुत्तृट्परिश्रांतोनिवृत्तोगृहमेयिवान् ॥ कृतस्नानोचिताहारःसंविवेशगतक्लमः ११

दुष्कर्मलेपःस्यादितितत्राह यएवमिति योनियतमनियतंवाविद्वान्जानन्नेवंविविधंपुण्यंपापंवाकर्मकुर्वीतनवाकुर्वीत सज्ञानीतेनोभयविधेनकर्मणानलिप्यते केननिमित्तेनेत्यतउक्तंज्ञानेनेतिकर्मलेपा भावेज्ञानंकारणमित्यर्थः । तद्यथापुष्करपलाशआपोनश्लिष्यंतएवंविदिपापकर्मनश्लिष्यतइतिश्रुतेः अथवाज्ञानिनःकर्मनदुष्टमपिलिप्यतइतिस्मृतेश्च ७ अन्यपक्षेबाधकमाह अन्यथेति अन्यथा ज्ञानाभावे । अनर्थोपिभवतीत्याह गुणप्रवाहइति ८ एवंप्रासंगिकींकथांसमाप्यप्रकृतमनुसरति तत्रेति तत्रविषयलक्षणेवनेचित्रवाजैरनेकांकुरमुखाख्यपक्षोपेतैः शिलीमुखैः शिलावत्दृढमु खैर्लपटेंद्रियमनोवृत्तिविशेषैर्निर्भिन्नगात्राणांमृदितनानावयवानांकरुणात्मनांपापनिमित्तेनमुक्तानामस्माकंपरलोकेपिनगतिरस्तीतिरुदितानामिवस्थितानांयथाशास्त्रमुक्तानांविषयाणांविप्लवोविनाशःस माप्तिलक्षणोभूदित्यन्वयः अन्यत्रव्यक्तं ९ शशान्वराहानितिमेध्यान्महिषानित्यादिनात्वमेध्यान् शशानतिशयितानंदलक्षणान्वरणीयत्वेनाहेयान्महिषान्महितंददातीति निरुक्त्या सनदान इतिधातुस्तस्माद्दप्रत्ययेसकारस्यमूर्धन्यादेशः गवयान्गतवयसः जरसंगतानितिशेषः रुरून्रोदनहेतून् शंसुखंविलापयतीतिशल्यकानित्येवमादिविषयान्निघ्नन्गच्छन्भुंजानइत्यर्थः १० जाग्रद्वि षयाननुभूयसुषुप्तिप्राप्तिप्रकारमाह ततइति ततोजागरणान्निवृत्तःक्षुत्तृड्लक्षणमनोवृत्तिभ्यांव्याप्तः श्रांतः । हृल्लक्षणनाडीविशेषंप्राप्तःकृतंजाग्रद्विषयभोगरजोमार्जनलक्षणंस्नानंयेनसः उचितआ हारःस्वरूपसुखावाप्तिलक्षणोयस्यसतथा संविवेशसुप्तोभूदित्यन्वयः ११

SGF
Sri Gargeshwari Digital Foundation

स्वापात्पूर्वव्यापारमाह आत्मानमिति महिष्यांबुद्धौ अथवाधूपादिलक्षणवृत्तिभिरात्मानमंतर्यामिलक्षणंब्रह्मस्वरूपमर्हयांचक्रेसंपत्तिलक्षणमलंकारमकरोत् सतासोम्यतदासंपन्नोभवतीतिश्रुतेः सं
पत्तिलक्षणालंकारयुक्तसर्वावयवः हृष्टइत्यादिनासुप्तावस्थाविशिष्टउच्यते अनेनस्वप्नप्राप्तिरपिनिरूप्यतइतिज्ञातव्यं तदावृत्त्याद्यवस्थानुभवःस्पष्टएव स्वप्नप्रापककर्मोद्रेकेसतिमहिष्यांबुद्धौमनआद
धइत्युपपद्यते कंस्वरूपसुखंदर्शयतिप्रकटयतीतिकंदर्पःस्वापस्तेनोत्कृष्टंमानसंयस्यसतथा स्वप्नावस्थायामपिस्वापस्यसत्त्वात् १२ बुद्ध्याहितमनाःकिमकृतेतितत्राह नव्यचष्टेति गृहमेधिनी
मुपात्तज्ञानवर्तीं गृहिणींनानावासनाकारमनोवृत्तिमतीं वरस्यहरेरारोहोविषयतयायस्याःसावरारोहातांशास्त्रीयांबुद्धिंनव्यचष्ट दर्शनंनामानिश्चयज्ञानंनोपैतीतिज्ञातव्यं स्वप्नस्यवासनात्मकत्वात्निर्णय
ज्ञानवान्नाभूदित्यर्थः ह्वेवेदिषन् प्राचीनबर्हिः अंतःपुरस्त्रियःइंद्रियवृत्तीर्मनोवृत्तीर्वाअपृच्छत् स्वप्नव्यापारमकरोत् १३ हेरामाइतिवृत्तयःसंबोध्यंते ईश्वरीबुद्धिः गृहसंपदःशरीरेंद्रियादिशोभाः बुद्धौवि
द्यमानायांरोचंतेनान्यदेति १४ व्यंगेचक्राश्वादिरहितेरथे प्राज्ञोबुद्धिमान्रथीअंगलक्षणेनप्राणेनहीनेदेहेप्राज्ञःसुषुप्तिप्रवर्तकःपरमात्मा १५ पदेपदेऽनुक्षणंममप्रज्ञांदीपयतीभगवद्विषयज्ञानमुद्बोधयं
ती यामामुद्धरतिसंसारादितिशेषः साललना शोभनाबुद्धिःक्ववर्ततइत्यन्वयः १६ बाह्यकथामनुसृत्योत्तरकथाप्रत्युत्तरमाह नरनाथेतियद्व्यवस्यतियन्निश्चित्यतिष्ठतितन्नजानीमइत्यन्वयः निं

आत्मानमर्हयांचक्रेधूपालेपस्रगादिभिः ॥ साध्वलंकृतसर्वांगोमहिष्यामादधेमनः ॥ तृप्तोहृष्टःसुदृप्तश्चकंदर्पाकृष्टमानसः १२ नव्यचष्टवरारोहांगृहिणीं
गृहमेधिनीम् ॥ अंतःपुरस्त्रियोपृच्छद्विमनाइववेदिषन् १३ अपिवःकुशलंरामाःसेश्वरीणांयथापुरा ॥ नतथैतर्हिरोचंतेगृहेषुगृहसंपदः १४ यदिनस्या
द्गृहेमातापत्नीवापतिदेवता ॥ व्यंगेरथइवप्राज्ञःकोनामासीतदीनवत् १५ क्ववर्ततेसाललनामज्जंतंव्यसनार्णवे ॥ यामामुद्धरतिप्रज्ञांदीपयंतीपदेपदे
१६ ॥ रामाऊचुः ॥ नरनाथनजानीमस्त्वत्प्रियायद्व्यवस्यति ॥ भूतलेनिरवस्तारेशयानांपश्यशत्रुहन् १७ ॥ नारदउवाच ॥ पुरंजनःस्वमाहिषींनि
रीक्ष्यावधुतांभुवि ॥ तत्संगोन्मथितज्ञानोवैक्लव्यंपरमंययौ १८ सांत्वयन्श्लक्ष्णयावाचाहृदयेनविदूयता ॥ प्रेयस्याःप्रेमसंरंभलिंगमात्मनिनाध्यगात्
१९ अनुनिन्येऽथशनैर्वीरोनुनयकोविदः ॥ पस्पर्शपादयुगलमाहचोत्संगलालिताम् २० नूनंत्वकृतपुण्यास्तेभृत्यायेष्वीश्वराःशुभे ॥ कृतागःस्वा
त्मसात्कृत्वाशिक्षादंडंनयुंजते २१ परमानुग्रहोदंडोभृत्येषुप्रभुणार्पितः ॥ बालोनवेदतत्तन्विबंधुकृत्यममर्षणः २२ सात्वंमुखंसुदतिसुभ्र्वनुरागभारव्रीडा
विलंबविलसद्धसितावलोकम् ॥ नीलालकालिभिरुपस्कृतमुन्नसंनःस्वानांप्रदर्शयमनस्विनिवल्गुवाक्यम् २३

रवस्तारेआस्तरणरहितेभूतलेपूर्णेभगवत्पादमूलेशयानांविषयाकुर्वाणांयथार्थवर्णनमेतत् १७ इदानीमसद्बुद्धिनिमित्तप्रवृत्तिप्रकारमाह पुरंजनइति प्राचीनकर्मवैचित्र्यात्प्रतिक्षणंवृत्तिभेदोपिप्रामाणिकएवे
त्यतएतद्वचनमुपपद्यतइति अवधुतांसद्वृत्तिभिरितिशेषः तस्यावैषयिक्याबुद्धेःसंगेनस्वीकारेणतादृशकर्मणाप्राप्तेनोन्मथितंनष्टंज्ञानंयथार्थलक्षणंयस्यसतथा १८ प्रेयस्याबुद्धेःप्रेम्णासंरंभोहिंसालक्षणोनाशो
यस्तस्यलिंगंकारणमात्मनिस्वस्मिन्नाध्यगात्नज्ञातवान् रंजसाकुलितांतरत्वात् रंभहिंसायां १९ अनुनिन्यइत्यादिकथालंकारः अनुनयंनामविषयबुद्धिवश्यत्वप्रकटनं बुद्धेर्मनआदिचत्वारः
पादास्तेष्वंघ्रद्वयंपस्पर्शस्वीकृतवान् मनोलक्षणउत्संगेसंभाविताामिदमेवस्वीकरणम् २० येयेपुकृतापराधेषुशिक्षालक्षणंदंडंनकुर्वते नूनंतेऽकृतपुण्याइत्यन्वयः २१ दंडस्यनिग्रहलक्षणत्वात् कथंमा
र्ष्यतइत्यतआह परमइति तर्हिलोकःकथंदुःखंमन्यतइति तत्राह बालइतिदंडस्यपापप्रायश्चित्तरूपत्वान्नजानातीत्यर्थः अनुतापादिवृत्तिविशेषइतिज्ञातव्यं २२ उपस्कृतंमंडितम् २३

SGPF

भूसुरकुलात् ब्रह्मकुलात् क्रुद्धस्य मे सकाशाद्भीतभयं नष्टभयं तं न पश्ये २४ इतःपूर्वं वक्त्रादिकं विगततिलकादिकं न पश्यामीत्यन्वयः शुचाशोकाश्रुणोपहतौ सुजातौ कोमलौ २५ कुसुमास्त्रस्य कामस्य वेगेन विस्रस्तं श्लथितं पौंस्यं पौरुषं यस्य स तथा तं देवं रतिक्रीडादिकं राति ददातीति देवरः पतिस्तं कृत्ये प्रयोजननिमित्ते प्राप्तं उशती कामयमाना का स्त्री न भजेत २६ इतिश्रीभागवते चतुर्थस्कंधे वि०टीकायां षड्विंशोध्यायः २६ ॥ ॥ ७ ॥ ॥ पुरंजननाम्नो जीवस्य जाग्रत्स्वप्नयोरन्यस्यामवस्थायां विषयप्रसरणमाह इत्थमिति विभ्रमैर्वृत्तिविशेषैररेमे । विषयेषु व्यावृत्तवत्यां जयलक्षणवृत्त्यां सुषुप्तजनवत्स्थितं १ रुचिरेण कमनीयेनांबरेण नानावसनेन संवृतां कृतं स्वस्त्ययनं स्वस्त्याशीर्वचनस्यायनं वृत्तिविशेषो यस्याः सा तथा तां तामसानां तामससंगमो सुखकारणइति द्योतनायैवमुक्तिः २ कया चिद्वृत्त्या परिरब्धवृन्यंतरारूयकंधरः कंठो ग्रीवा कंधरा चेत्यभिधानं रहोनुमंत्रैर्भणितादिलक्षणवृत्तिभिरपकृष्टं चेतनं स्वरूपज्ञानं यस्य स तथा इदं दिवाज्ञानमियं निशाऽज्ञानमिति कालरंहो ज्ञानाज्ञानविशेषावस्थां प्रमदावैषयिकबुद्धिरेव परिग्रहो यस्य स तथा ३ शयानस्तत्त्वमजानन्महार्हतल्पे ज्ञाननाशिनिवृत्तिविशेषे महिषीभुजोपधे बुद्धेरहंकारलक्षणवृत्तिशिरोधिष्टाने तामेवामनुत कर्ताभोक्ता

तस्मिन्दधे दममहं तव वीरपत्नि योन्यत्र भूसुरकुलात्कृतकिल्बिषस्तम् ॥ पश्ये न वीतभयमुन्मुदितं त्रिलोक्यां क्रुद्धस्य वै मुररिपोरितरत्र दासात् २४ वक्त्रं न ते वितिलकं मलिनं विहर्षसंरंभभीममविमृष्टमपेतरागम् ॥ पश्ये स्तनावपि शुचोपहतौ सुजातौ बिंबाधरं विगतकुंकुमपंकरागम् २५ तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगया व्यसनातुरस्य ॥ का देवरं वशगतं कुसुमास्त्रवेगविस्रस्तपौंस्यमुशती न भजेत कृत्ये २६ इतिश्रीभागवते चतुर्थस्कंधे षड्विंशोध्यायः २६ ॥ नारद उवाच ॥ इत्थं पुरंजनं सम्यग्वशमानीय विभ्रमैः ॥ पुरंजनी महाराज रेमे रमयती पतिम् १ स राजा महिषीं राजन्रुचिरांबरसंवृताम् ॥ कृतस्वस्त्ययनां तृप्तामभ्यनंददुपागताम् २ तयोपगूढः परिरब्धकंधरो रहोनुमंत्रैरपकृष्टचेतनः ॥ न कालरंहो बुबुधे दुरत्ययं दिवा निशेति प्रमदापरिग्रहः ३ शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधे ॥ तामेव वीरोऽमनुत व्यवायतस्तमोभिभूतो न निजं परं हि तत् ४ तयैवं रममाणस्य कामकश्मलचेतसः ॥ क्षणार्धमिव राजेंद्र व्यतिक्रांतं नवं वयः ५ तस्यामजनयत्पुत्रान्पुरंजन्यां पुरंजनः ॥ शतान्येकादश विराडायुषोर्धमथात्यगात् ६ दुहितॄर्दशोत्तरशतं पितृमातृयशस्करीः ॥ शीलौदार्यगुणोपेताः पौरंजन्यः प्रजापते ७ स पांचालपतिः पुत्रान्पितृवंशविवर्धनान् ॥ दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ८

सुखी दुःखीति तद्धर्मानात्मन्यमन्यत तत्र कारणमाह व्यवायतइति मैथुनलक्षणाज्ज्ञानवृत्तिविशेषात् इदमेवाह तमइति निजमात्मानं तत्परं ब्रह्मलक्षणं तत्त्वं नामन्यत निजमात्मीयमित्यभिधानं ॥ ४ ॥ वयः शुद्धज्ञानानंदरूपलक्षणं व्यतिक्रांतं गतप्रायमासीत् ५ अभिभूतनिजज्ञानस्य तस्य विषयबुद्धेर्नानावृत्त्युत्पत्तिप्रकारमाह तस्यामिति चक्षुरादीनि मनोंतानींद्रियाण्येकादश संज्ञानि विषयीकृत्य शतमनंताः परिणामावृत्तयो भवंति ताः शतान्येकादशपुत्राउच्यंते बाल्यावस्थायां बुद्धिविस्ताराभावाद्यौवनावस्थायां तत्संभावनमपेक्ष्यायुषोर्धमगादित्युच्यते विषयमेवराजयतीति विराट् ६ परिणामानंतरं बुद्धिवृत्तयो दुहितॄरित्युच्यंते पितृशब्दवाच्यानामिंद्रियाणां परिणामानां भ्रातृशब्दवाच्यानां ज्ञानानंदलक्षणयशसो नाशिनीः कृविक्षेपइतिधातुः स्वजातिप्रसिद्धशीलौदार्यगुणयुक्ताः बाह्यविवक्षयासंख्याकथनं तत्स्वनेकत्वसंख्यैव पौरंजन्योऽनेकदेहजननहेतवः हे प्रजापते ७ पुत्रान्बुद्धिपरिणामान् दारैः परिणामानंतरचेष्टाभिः संयोजनं दुहितॄर्बुद्धिवृत्तीः सदृशैर्वरैर्वृत्तियोग्यविषयैः ८

SGDF

पुत्राणांपुत्राश्चभवन्निति परिणववृत्तिभ्योवृत्त्यंतराणीति पांचालेषुविषयेषु ९ तस्यरिक्थंविषयधनंहरंतीतितद्रिक्थहारास्तेषु नानावासनागृह्णातीतिगृहंतत्त्वकोशोमनस्तदुपजीव्यवर्ततइतिगृहकोशा
नुजीविनस्तेषु निगूढेनप्रविष्टेनममैतेपरिणामादयइतिकल्पितेनममत्वेनविशेषेणसक्तोनात्मानंपरंचजानातीत्यन्वयः १० देवान्काम्यफलदान्भूतपतीन्भैरवादीन् ११ एवंविधयाक्रिययायुक्तेषुकाम्ये
षुसक्तस्येतिशेषः हरौमनोयोगवत्सुज्ञानेषुएवमुक्तप्रकारेणप्रमत्तस्यतद्वार्तारहितस्येतिवा प्रियाहृद्यायोषितोयेषांतेतथातेषां विषयिणामपियोऽप्रियोनपेक्षितः १२ गंधर्वाणांकलाकाष्ठादीनांस्वावयवा
नामधिपतिश्चंडोवेगोयस्यसतथेतिख्यातःसकालआससादेत्यन्वयःगंधर्वादिवसाः १३ गंधर्व्योरात्रयस्तावतीस्तावत्यः मिथुनीभूयवर्तमानामैथुन्यःसितादिवसाअसितारात्रयइतिसितासितपरिवृत्त्या
परिभ्रमणेनपुनःपुनरावर्तनेनकामान्विलुंपंतिक्षपयंतीत्यन्वयः १४ हर्तुंजीर्णबलांकर्तुंप्रजागरःप्राणःप्राणाग्नयएवैतस्मिन्पुरेजाग्रतीतिश्रुतेः प्राणबलाद्धर्यापारायप्रवर्ततइत्यर्थः १५ ससप्तभिः
शतैर्विंशद्भिश्चाहोरात्रैःशतंसमाःशतवर्षपर्यंतंयुयुधे तेषांपराक्रमंनिरुध्यस्वयंप्राणबलाद्देहमपालयदित्यर्थः १६ राष्ट्रेणविषयेणपुरेणदेहेनबांधवैरिंद्रियैःसहवर्तमानः १७ स्त्रीजितोबुद्ध्याऽविवेकंप्राप्तः

पुत्राणांचाभवन्पुत्राएकैकस्यशतंशतम् ॥ यैर्वैपौरंजनोवंशःपांचालेषुसमेधितः ९ तेषुतद्रिक्थहारेषुगृहकोशानुजीविषु ॥ निगूढेनममत्वेनविषयेष्वन्वब
ध्यत १० ईजेचक्रतुभिर्विप्रैर्दीक्षितःपशुमारकैः ॥ देवान्पितॄन्भूतपतीन्नानाकामोयथाभवान् ११ युक्तेष्वेवंप्रमत्तस्यकुटुंबासक्तचेतसः ॥ आससाद
सवैकालोयोऽप्रियःप्रिययोषिताम् १२ चंडवेगइतिख्यातोगंधर्वाधिपतिर्नृप ॥ गंधर्वास्तस्यबलिनःषष्ट्युत्तरशतत्रयम् १३ गंधर्व्यस्तावतीरस्यमैथुन्य
श्चसितासिताः ॥ परिवृत्त्याविलुंपंतिसर्वकामान्विनिर्मिताम् १४ तेचंडवेगानुचराःपुरंजनपुरींयदा ॥ हर्तुमारेभिरेतत्रप्रत्यषेधत्प्रजागरः १५ ससप्त
भिःशतैरेकोविंशकेनशतंसमाः ॥ पुरंजनपुराध्यक्षोगंधर्वैर्युयुधेबली १६ क्षीयमाणेस्वसामर्थ्येएकस्यबहुभिर्युधि ॥ चिंतांपरांजगामार्तःसराष्ट्रपुरबांध
वः १७ सएवपुर्यांमधुभुक्पांचालेषुस्वपार्षदैः ॥ उपानीतंबलिंगृह्णन्स्त्रीजितोनाविदद्भयम् १८ कालस्यदुहिताकाचित्त्रिलोकींवरमिच्छती ॥ पर्यटंती
नबर्हिष्मन्प्रत्यनंदतकश्चन १९ दौर्भाग्येनात्मनोलोकेविश्रुतादुर्भगेतिसा ॥ यांतुष्टोराजऋषयेपितादात्पूरवेवरम् २० कदाचिदटमानासाब्रह्मलोकान्म
हींगतम् ॥ वव्रेबृहद्व्रतंमांतुजानतीकाममोहिता २१ मयिसंरभ्यविपुलमदाच्छापंसुदुःसहम् ॥ स्थातुमर्हसिनैकत्रमद्याच्ञाविमुखोमुने २२ ततोवि
हतसंकल्पाकन्यकायवनेश्वरम् ॥ मयोपदिष्टमासाद्यवव्रेनाम्नाभयंपतिम् २३ ऋषभंयवनानांत्वांवृणेवीरेप्सितंपतिम् ॥ संकल्पस्त्वयिभूतानांकृतःकि
लनरिष्यति २४

विषयेषुस्वपार्षदैरिंद्रियैरुपनीतंबलिंरूपादिविषयंगृह्णन्मधुभुक्कर्मफलभुक्कालनिमित्तंभयंनाज्ञासीदित्यन्वयः १८ अस्तिजायतेपरिणमतेवर्धतइतिचतुरूर्मिप्रकारप्राप्तिनिरूप्यप्रक्षीयतेविनश्यतीत्येतद्
कुजंरामाक्षिप्याह कालस्येति कालात्जराजायतइतिकालस्यदुहितेति विशेषनामाश्रवणात्काचिदिति १९ या सात्मनःशरीरस्यदौर्भाग्यत्वेनसौंदर्याभावेनलोकेदुष्टोभगोयस्याःसातथेतिविश्रुता
यांजरांतुष्टःपितायया तिःराजश्रेष्ठायपूरवेवरमदात् तांकश्चननप्रत्यनंदतेत्यन्वयः २० तुशब्दोप्यर्थे यामांबृहद्व्रतंब्रह्मचारिणंजानंत्यपिब्रह्मलोकान्महीमागतंवव्रइत्यन्वयः तत्रहेतुःकाममोहितेति २१
ततःकिमभूदितितत्राह मयीति २२ साकन्यायवनेश्वरंनामाख्याधीनांस्वामिनंनाम्नाभयंमृत्युंपतिंवव्रइत्यन्वयः २३ नारिष्यति नदह्यति २४ ६३

१ विंशकेनसहितैःसप्तभिः शतैः विंशत्याधिकसप्तभिः शतैरित्यर्थः ।

पुत्राणांपुत्राश्चभवन्निति परिणववृत्तिभ्योवृत्त्यंतराणीति पांचालेषुविषयेषु ९ तस्यरिक्थंविषयधनंहरंतीतितद्रिक्थहारास्तेषु नानावासनागृह्णातीतिगृहंतच्चकोशोमनस्तदुपजीव्यवर्ततइतिगृहकोशानुजीविनस्तेषु निगूढेनप्रविष्टेनममैतेपरिणामादयइतिकल्पितेनममत्वेनविशेषेणसक्तोनात्मानंपरंचजानातीत्यन्वयः १० देवान्काम्यफलदान्भूतपतीन्भैरवादीन् ११ एवंविधयाक्रिययायुक्तेषुकाम्येषुसक्तस्येतिशेषः हरौमनोयोगवत्सुज्ञानेषुएवमुक्तप्रकारेणप्रमत्तस्यतद्वार्तारहितस्येतिवा प्रियाहृद्यायोषितोयेषांतेतथातेषां विषयिणामपियोऽप्रियोनपेक्षितः १२ गंधर्वाणांकलाकाष्ठादीनांस्वावयवानामधिपविश्चंडोवेगोयस्यसतथेतिख्यातःसकालआससादेत्यन्वयःगंधर्वादिवसाः १३ गंधर्व्योरात्रयस्तावतीस्तावत्यः मिथुनीभूयवर्तमानामैथुन्यःसितादिवसाअसितारात्रयइतिसितासितपरिवृत्त्या परिभ्रमणेनपुनःपुनरावर्तनेनकामान्विलुंपंतिक्षपयंतीत्यन्वयः १४ हर्तुंजीर्णबलांकर्तुंप्रजागरःप्राणः प्राणाग्नयएवैतस्मिन्पुरेजाग्रतीतिश्रुतेः प्राणबलाद्व्यापारायप्रवर्ततइत्यर्थः १५ ससप्तभिः शतैर्विंशद्भिश्चाहोरात्रैःशतंसमाःशतवर्षपर्यंतंयुयुधे तेषांपराक्रमंनिरुध्यस्वयंप्राणबलाद्देहमपालयदित्यर्थः १६ राष्ट्रेणविषयेणपुरेणदेहेनबांधवैरिंद्रियैःसहवर्तमानः १७ स्त्रीजितोबुद्ध्याऽविवेकंप्राप्तः

पुत्राणांचाभवन्पुत्राएकैकस्यशतंशतम् ॥ यैर्वैपौरंजनोवंशःपांचालेषुसमेधितः ९ तेषुतद्रिक्थहारेषुगृहकोशानुजीविषु ॥ निगूढेनममत्वेनविषयेष्वन्वबध्यत १० ईजेचक्रतुभिर्विप्रैर्दीक्षितःपशुमारकैः ॥ देवान्पितॄन्भूतपतीन्नानाकामोयथाभवान् ११ युक्तेष्वेवंप्रमत्तस्यकुटुंबासक्तचेतसः ॥ आससाद सवैकालोयोऽप्रियःप्रिययोषिताम् १२ चंडवेगइतिख्यातोगंधर्वाधिपतिर्नृप ॥ गंधर्वास्तस्यबलिनःषष्ट्युत्तरशतत्रयम् १३ गंधर्व्यस्तावतीरस्यमैथुन्यश्चसितासिताः ॥ परिवृत्त्याविलुंपंतिसर्वकामान्विनिर्मितान् १४ तेचंडवेगानुचराःपुरंजनपुरींयदा ॥ हर्तुमारेभिरेतत्रप्रत्यषेधत्प्रजागरः १५ ससप्तभिःशतैरेकोविंशकेनशतंसमाः ॥ पुरंजनपुराध्यक्षोगंधर्वैर्युयुधेबली १६ क्षीयमाणेस्वसामर्थ्येएकस्यबहुभिर्युधि ॥ चिंतांपरांजगामार्तःसराष्ट्रपुरबांधवः १७ सएवपुर्यांमधुभुक्पांचालेषुस्वपार्षदैः ॥ उपनीतंबलिंगृह्णन्स्त्रीजितोनाविदद्भयम् १८ कालस्यदुहिताकाचित्त्रिलोकींवरमिच्छती ॥ पर्यटंतीनबर्हिष्मन्प्रत्यनंदतकश्चन १९ दौर्भाग्येनात्मनोलोकेविश्रुतादुर्भगेतिसा ॥ यांतुष्टोराजऋषयेपितादात्पूरवेवरम् २० कदाचिदटमानासाब्रह्मलोकान्महींगतम् ॥ वव्रेबृहद्व्रतंमांतुजानतीकाममोहिता २१ मयिसंरभ्यविपुलमदाच्छापंसुदुःसहम् ॥ स्थातुमर्हसिनैकत्रमद्याच्ञाविमुखोमुने २२ ततोविहतसंकल्पाकन्यकायवनेश्वरम् ॥ मयोपदिष्टमासाद्यवव्रेनाम्नाभयंपतिम् २३ ऋषभंयवनानांत्वांवृणेवीरेप्सितंपतिम् ॥ संकल्पस्त्वयिभूतानांकृतःकिलनरिष्यति २४

विषयेषुस्वपार्षदैरिंद्रियैरुपनीतंबलिंरूपादिविषयंगृह्णन्मधुभुक्कर्मफलभुक्कालनिमित्तंभयंनाज्ञासीदित्यन्वयः १८ अस्तिजायतेपरिणमतेवर्धतइतिचतुरूर्मिप्रकारप्राप्तिनिरूप्यप्रक्षीयतेविनश्यतीत्येतद्वक्तुंजरामपिमाह कालस्येति कालात्जराजायतइतिकालस्यदुहितेति विशेषनामाश्रवणात्काचिदिति १९ या सात्मनःशरीरस्यदौर्भाग्यत्वेनसौंदर्याभावेनलोकेदुष्टोभगोयस्याःसातथेतिविश्रुता यांजरांतुष्टःपिताययातिःराजश्रेष्ठायपूरवेवरमदात् तांकश्चननप्रत्यनंदतेत्यन्वयः २० तुशब्दोप्यर्थे यामांबृहद्व्रतंब्रह्मचारिणंजानंत्यपिब्रह्मलोकान्महीमागतंवव्रइत्यन्वयः तत्रहेतुःकाममोहितेति २१ ततःकिमभूदितितत्राह मयीति २२ साकन्यायवनेश्वरंनामाव्याधीनांस्वामिनंनाम्नाभयंमृत्युंपतिंवव्रइत्यन्वयः २३ नारिष्यति नदह्यति २४

१ विंशकेनसहितैःसप्तभिः शतैः विंशत्याधिकसप्तभिः शतैरित्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

असन्नवग्रहआग्रहोययोस्तौतथाबालौस्वकार्यांज्ञौ । अनुशोचंतिसर्वइतिशेषः। कौतौयौलोकशास्त्रयोरविरोधतयोपनतंप्राप्तमर्थिभ्योनरातिनददातिदायंस्वीयंनेच्छतितावितिशेषः नन्वनेनलोक
विद्विष्टंचेच्छास्त्रीयमपिनकर्तव्यमित्यायातंसमत्वेनसहोक्तेन तस्माच्छास्त्रंप्रमाणंतेकार्याकार्यव्यवस्थितावित्यादिविधानंव्यर्थमितीयंशंका अलौकिकंचशास्त्रीयंकर्तव्यंलौकिकंकुतः । लोकार्थंशास्त्र
हायातिनिरयंत्विलरःसुशनित्यनेनपरिहर्तव्या तस्माच्छास्त्रानुसारिलौकिकंकर्तव्यंनेतरादिति तात्पर्यं इतरःशास्त्रानुकूललौकिकंकुर्वाणःसुरान्यातिस्वर्गादिपुरुषार्थमाप्नोतीत्यर्थः २५ उपसंहरति
अथोइति यस्मादिदंशास्त्रीयमथोतस्मात्संक्षिप्यस्वकार्यस्यकर्तव्यतामाह एतावानिति पौरुषःपुरुषनिष्ठः २६ तस्मादुर्भगत्वमनपेक्ष्यतद्वचनस्यादरप्रकारमाह कालकन्येति देवस्यविधातुर्गु
ह्यंरहस्यंवक्ष्यमाणमर्थंसास्मितमभाषतेत्यन्वयः २७ तत्रभोगोपायमुपादिशति नाभिनंदतीति अयंलोकोऽसंमतांत्वांनाभिनंदतीतियस्मात् २८ तस्मात्त्वमज्ञातगतिर्लोकंभुंक्ष्व २९ योयं
ममभ्राताप्रज्वारःशैववैष्णवोभयलक्षणःसोऽप्रजोऽनपत्यस्त्वांप्रणेष्यातिग्रहीष्यतीत्यन्वयःभीमाभयंकराःसैनिकाःसेनापतयोयस्यसतथासः३० इतिभागवतेचतुर्थस्कंधेविज॰कृतटीकायांसप्तविंशोध्यायः

द्वाविमावनुशोचंतिबालावसदवग्रहौ ॥ यल्लोकशास्त्रोपनतंनरातिनतदिच्छति २५ अथोभजस्वमांभद्रभजतींमेदयांकुरु ॥ एतावान्पौरुषोधर्मोयदार्ता
ननुकंपते २६ कालकन्योदितांवाचंनिशम्ययवनेश्वरः ॥ चिकीर्षुर्देवगुह्यंससस्मितंतामभाषत २७ मयानिरूपितस्तुभ्यंपतिरात्मसमाधिना ॥ नाभिनं
दतिलोकोयंत्वामभद्रामसंमताम् २८ त्वमज्ञातगतिर्भुंक्ष्वलोकंकर्मविनिर्मितम् ॥ याहिमेपृतनायुक्तासोऽप्रजस्त्वांप्रणेष्यति २९ प्रज्वारोयंममभ्राता
त्वंचमेभगिनीभव ॥ चराम्युभाभ्यांलोकेस्मिन्नव्यक्तोभीमसैनिकः ३० इतिश्रीभागवतेच०सप्तविंशोऽध्यायः २७ ॥ नारदउवाच ॥ सैनिकाभयना
म्नोयेबर्हिष्मन्निष्टकारिणः ॥ प्रज्वारकालकन्याभ्यांविचेरुरवनीमिमाम् १ तएकदातुरभसापुरंजनपुरींनृप ॥ रुरुधुर्भौमभोगाढ्यांजरत्पन्नगपालिताम् २
कालकन्यापिबुभुजेपुरंजनपुरींबलात् ॥ ययाभिभूतःपुरुषःसद्योनिःसारतामियात् ३ तयोपभुज्यमानांवैयवनाःसर्वतोदिशम् ॥ द्वार्भिःप्रविश्यसुभृ
शंप्रार्दयन्सकलांपुरीम् ४ तस्यांप्रपीड्यमानायामभिमानीपुरंजनः ॥ अवापोरुविधांस्तापान्कुटुंबीममताकुलः ५ कन्योपगूढोनष्टश्रीःकृपणोविषया
त्मकः ॥ नष्टप्रज्ञोहतैश्वर्योगंधर्वयवनैर्बलात् ६ विशीर्णांस्वपुरींवीक्ष्यप्रतिकूलाननादृतान् ॥ पुत्रपौत्रानुगामात्याञ्जायांचगतसौहृदाम् ७ आत्मानं
कन्ययाग्रस्तंपांचालानरिदूषितान् ॥ दुरंतचिंतामापन्नोनलेभेतत्प्रतिक्रियाम् ८

२७॥ ७ ॥ ईश्वरेच्छोपनतकर्मवशाच्छरीरमनुविश्यस्थितस्यजीवस्यजाग्रदाद्यवस्थाभेदंप्रतिपाद्याधुनाशरीरवियोगलक्षणामवस्थांवक्तुमुपक्रमते । सैनिकाइत्यादिना वातादिव्याधिसमूहाइमा
मवानींविचेरुरित्यनेनजरादिव्याधयोऽस्मिन्प्रपंचएवनान्यत्रेतिज्ञायते १ भौमभोगाअशनपानवसनलक्षणाः । रुरुधुःशरीरंविविशुः जरत्पन्नगइतिप्राणबलाच्चेष्टाल्पत्वंलक्ष्यते नतुप्राणस्य ।
तस्यानिस्सीमबलत्वात् २ कन्यापिबुभुजइतियौवनानंतरंविवेश ३ प्रार्दयन्निति जराग्रस्तस्यपालितस्याक्षिमांद्यंबधिरत्वंदंतभंगंक्षामाकुलत्वमग्निदौर्बल्यंकंठेघुरुघुरुत्वमित्यादिनानाव्याधयोदृश्यंतेर
ति ४ ५ ६ पुत्रान्गोलकलक्षणान् पौत्रानिंद्रियाणि अमात्यानमासहवर्तनीयाअमात्याइंद्रियाभिमानिनोदेवास्तांश्च अतसातत्यगमनइतिधातोः बुद्धेरपिपूर्ववदतिशयोनास्तीतिगत
सौहृदाम् ७ कन्ययाजरसापांचालान्विषयानारिदूषितान्विघ्नप्रतिहतान् ८

SGDF
Sri Gangadhar Digital Foundation

यातयामान्गतयामान् गतात्मसंविन्नष्टपरमात्मज्ञानः अतएवनिःस्नेहः परमात्मनिभक्तिरहितोविरुद्धस्नेहोवा ९ अनिकामतोऽनिच्छातः १० प्रज्वारःपुरींददाहेतिशरीरेचज्वरःप्रवृत्तइत्यर्थः भ्रातुर्मृत्युनाम्नोहितकरणेच्छया ११ १२ यवनैर्व्याधिभिरुपरुद्धमायतनंपत्तनंशरीरनाडीलक्षणंयस्यसतथा पुरपालः प्राणःअनुतापोजीवक्लेशंप्रेक्ष्य १३ सानलादग्निवृक्षात्गृहबिलादिव १४ १५ अधुनाकामिनांमरणव्यवस्थांदर्शयति दुहितॄरिति अत्रप्रवृत्तिमंतरेणबाह्यदुहित्रादयोपिग्रहीतुंशक्यंते १६ विप्रयोगेमरणलक्षणे प्रमदयाबुद्ध्याअन्ययाच १७ लोकांतरंगतवसीत्यादिकथालंकारः १८ अनशितेअभुक्ते भर्त्सितेभर्त्सनेकृते यतवाक्तूष्णींभावमाश्रिता १९ व्युषितेन्यत्रस्थिते नेष्यत्यनुवर्तयिष्यतिकिं २० भिन्नानौर्येषांतेभिन्ननावः २१

कामानभिलषन्दीनोयातयामांश्चकन्यया॥गतात्मसंविन्निःस्नेहःपुत्रदारांश्चलालयन् ९ गंधर्वयवनाक्रांतांकालकन्योपमर्दिताम् ॥ हातुंप्रचक्रमेराजातांपुरीमनिकामतः १० भयनाम्नोग्रजोभ्राताप्रज्वारःप्रत्युपस्थितः ॥ ददाहतांपुरींकृत्स्नांभ्रातुःप्रियचिकीर्षया ११ तस्यांसंदह्यमानायांसपौरःसपरिच्छदः ॥ कौटुंबिकःकुटुंबिन्याउपातप्यतसान्वयः १२ यवनोपरुद्धायतनोग्रस्तायांकालकन्यया ॥ पुर्यांप्रज्वारसंस्पृष्टःपुरपालोन्वतप्यत १३ नशेकेसेवितुंतत्रपुरुकृच्छ्रोरुवेपथुः ॥ गंतुमैच्छत्ततोवृक्षकोटरादिवसानलात् १४ शिथिलावयवोयर्हिगंधर्वैर्हृतपौरुषः ॥ यवनैररिभीराजन्नुपरुद्धोरुरोदह १५ दुहितॄःपुत्रपौत्रांश्चजामिजामातृपार्षदान् ॥ सत्वावशिष्टंयत्किंचिद्गृहकोशपरिच्छदम् १६ अहंममेतिस्वीकृत्यगृहेषुकुमतिर्गृही ॥ दध्यौप्रमदयादीनोविप्रयोगउपस्थिते १७ लोकांतरंगतवतिमय्यनाथाकुटुंबिनी ॥ वर्तिष्यतेकथंत्वेषाबालकाननुशोचती १८ नमय्यनशितेभुंक्तेनास्नातेस्नातिमत्परा ॥ मयितुष्टेसुसंतुष्टाभर्त्सितेयतवाग्भयात् १९ प्रबोधयतिमांनित्यंव्युषितेशोककर्शिता ॥ वर्त्मैतद्गृहमेधीयंवीरसूरपिनेष्यति २० कथंनुदारिकादीनादारकामत्परायणाः ॥ वर्तिष्यंतेमयिगतेभिन्ननावइवोदधौ २१ एवंकृपणयाबुद्ध्याशोचंतमतदर्हणम् ॥ ग्रहीतुंकृतधीरेनंभयनामाभ्यपद्यत २२ पशुवद्यवनैरेषनीयमानःस्वकंक्षयम् ॥ अन्वद्रवन्ननुपथाःशोचंतोभृशमातुराः २३ पुरींविहायोपगतउपरुद्धोविहंगमः ॥ तदातमेवानुपुरीविशीर्णाप्रकृतिंगता २४ विकृष्यमाणःप्रसभंयवनेनबलीयसा ॥ नाविंदत्तमसाविष्टःसखायंसुहृदंपरम् २५ तंयज्ञपशवोनेनसंज्ञप्तायेऽदयालुना ॥ कुठारैश्चिच्छिदुःक्रुद्धाःस्मरंतोवैशसंतुतव २६ अनंतपारेतमसिमग्नोनष्टस्मृतिःसमाः ॥ शाश्वतीरनुभूयार्तीःप्रमदासंगदूषितः ॥ २७ तामेवमनसागृह्णन्बभूवप्रमदोत्तमा ॥ अनंतरंविदर्भस्यराजसिंहस्यवेश्मनि २८

अतदर्हणंशोकायोग्यंमरणायोग्यमितिवा २२ स्वकंक्षयंकर्मणाशरीरांतरं अनुपथाःप्राणेंद्रियादयः २३ यदाविहंगमोभुजंगमः पुरींविहायोपगतस्तदातमनुशरीरंचविशीर्णंप्रकृतिंपंचभूतात्मतांगतंपंचभूतेभ्यउत्पन्नंपुनस्तदवशेषमापेत्यर्थः २४ तमआविष्टः अज्ञाननिमित्तमोहंप्राप्तः सखायंपरंसदासहवर्तमानंपरमात्मानं सुहृदमनिमित्तबंधुंनाविंदन्नास्मरदित्यन्वयः २५ अदयालुनाक्रूरेणहिंसाकर्मरतेनेत्यर्थः तुशब्देनब्रह्मार्पणबुद्ध्याऽननुष्ठानंसूचयति २६ अनंतपारेऽवसानरहितेतमसिनिरये प्रमदासंगेनविषयबुद्धिस्वीकारेणदूषितोऽशुद्धः २७ तांविषयबुद्धिमेवउत्तमाउद्गततमा प्रगतमदामदरहिताबुद्धिरभूत् अत्रमरणजननेकथालंकारार्थे अध्यात्मार्थस्यमंडूकप्लुतिन्यायेनपदाक्षिप्तस्यापिसंभवात् बाध्यामपच्युत्येतिवचनात् २८

SGDF Sri Gargeshwari Digital Foundation

उपयमनंनामस्वाधीनताकरणं वीर्यपणांब्रह्मचर्यादिसाधनसाध्यां वैदर्भींनिशितां कउपयेमे मलंयापयतीतिमलयः शांतमनःसंस्कारः सएवध्वजोयस्यसतथा हरिसेवादिनासंस्कृतमनाइत्यर्थः रूपक मात्रस्यांलिंगव्यत्ययोनदोषाय मनसावाअग्रेसंकल्पयत्यथवाचाव्याहरतीतिश्रुतेः मनसोपिबुद्ध्यधीनकरणशक्तिरुपपत्तिमतीतिबोद्धव्यं किंकृत्वा युधियमनियमादिलक्षणेयुद्धे राजन्यान् राजृदीप्ता वितिधातोर्दीपकानींद्रियाणिवशीकृत्य चंचलस्यमनसोबुद्ध्यधीनकरणशक्तिःकथमितितत्राह पांड्यइति पंडोधर्मात्जातांविवेकज्ञानंतेनसंपन्नः तत्कुतइतितत्राह परेति परेषामिंद्रियाणांविषयल क्षणंपुरंजयतीति आत्मानभिमतमार्गगंतृत्वादिंद्रियाणांपरत्वंतदभावेसुहृत्त्वमेव मननान्मनउद्दिष्टंइतिमनश्चेतनोवा बाह्यार्थस्त्वेवं पुरंजनःपुरंजनीसंगेनतद्वासनादूषितोनाम्नावैदर्भीप्रमदोत्तमाऽभूत्पु रंजनीतत्पुरंजनसंगातिशयेनवासनावशान्नाम्नामलयध्वजः पुमानभूत् विषयसंगातिरेकलक्षणकारणात्पुंसःस्त्रीत्वंस्त्रियाःपुंस्त्वंच ततःस्त्रीत्वमेवावशिष्यते विषयसंगातिरेकोनकर्तव्यइतिशिक्षणार्थंचेदमु क्तमितितात्पर्यंज्ञातव्यं २९ तस्यांबुद्धौ असितोनित्यमुक्तोहरिस्तस्येक्षणंययाभवत्यसितेक्षणात्मजाविष्णुभक्तिः विरागविनयदानधैर्यास्पर्धनविवेकदमाःसप्तसंख्याताःबुद्धेर्जातत्वात्सुताइत्युच्यंतेविष्णु भक्त्यनंतरकालेस्पष्टत्वाद्यवीयसइति सप्तेत्यनेनजरायुबंधोलक्ष्यते सबंधोद्रविलःप्राप्तगर्भलक्षणगतिस्तस्यजीवस्यभूःस्थानंमुक्तिलक्षणंबिभ्रतिउत्पाद्यददातीतिसप्तद्रविडभूभृतः डलयोरभेदः मृळाजरित्रइति दर्शनात् सप्तेंद्रियाणिवानेनोच्यंते रागादिभ्योमुक्ताःप्रकाशितरूपाःसुताइतिउच्यंते ३०अर्बुदमर्बुदमित्यनेनसत्योवृत्तयोगृह्यंते महाशास्त्राविरुद्धाविषयलक्षणामन्वंतरंमनुष्यजविनावाधिपरशंतवर्षप्रारब्धपुण्य

उपयेमेवीर्यपणांवैदर्भींमलयध्वजः ॥ युधिनिर्जित्यराजन्यान्पांड्यःपरपुरंजयः २९ तस्यांसंजनयांचक्रेआत्मजामासितेक्षणाम् ॥ यवीयसःसप्तसुतान्सप्त द्रविडभूभृतः ३० एकैकस्याभवत्तेषांराजन्नर्बुदमर्बुदम् ॥ भोक्ष्यतेयद्वंशधरैर्महीमन्वंतरंपरम् ३१ अगस्त्यःप्राग्दुहितरमुपयेमेधृतव्रताम् ॥ यस्यांदृढ च्युतोजातइध्मवाहात्मजोमुनिः ३२ विभज्यतनयेभ्यःक्ष्मांराजर्षिर्मलयध्वजः ॥ आरिराधयिषुःकृष्णंसजगामकुलाचलम् ३३ हित्वागृहान्सुतान्भोगा न्वैदर्भीमदिरेक्षणा ॥ अन्वधावतपांड्येशंज्योत्स्नेवरजनीकरम् ३४ तत्रचंद्रवदानामताम्रपर्णीवटोदका ॥ तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनोमृजन् ३५

वशात् बुद्ध्यावरणादिभिःप्राणैरिंद्रियैरेवविषयान्भुंक्तइत्यर्थः ३१ स्त्यैष्ट्यैशब्दसंघातइतिधातोः अगंभगवंतंस्त्यायतिशब्दसमूहेनस्तुतिंकरोतीत्यगस्त्योभक्तःप्रांचंपुरातनंश्रीनारायणंदोग्धीतिदुहिताभ क्तिस्तामुपयेमे संसारनिवर्तनेशक्तिमत्तयाऽचलामकरोदित्यर्थःकीदृशींब्रह्मचर्यादिव्रतसाध्यां दृढंच्युतःपुत्रादिस्नेहोयस्मात्सदृढच्युतःपूर्वस्माद्विरागोदृढतरोभूदित्यर्थः इध्मवाहोगुरुकुलवासएवात्मजोय स्यसतथावैराग्यादेवगुरुकुलवासोभवति परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेनतद्विज्ञानार्थंसगुरुमेवाभिगच्छेदितिश्रुतेः सौम्येमाःसमिधआहरेतिच ३२ वैराग्यादिसंपत्त्याराजत इतिराजा विवेकित्वादृषिःराजाचासावृषिश्चेतिराजर्षिःवैराग्यविवेकज्ञानसंपन्नः शुद्धवासनांकितःपुरुषस्तनयस्थानीयेभ्योविरागादिभ्यइंद्रियेभ्योवाक्ष्मांशास्त्रलक्षणांभोग्यलक्षणांवाविभज्येदंश्रोतव्यंनेद मितिविविच्यायंविषयःसेवनीयोनायमितिकुलाचलंनिश्चलंवासार्थंगुरुकुलंजगामवैराग्यादिगुणसंपन्नः शरीरयात्रानिर्वाहकविषयभोगीगुरुकुलसन्निधिमवात्सीदित्यर्थःकृष्णंपूर्णानंदमाराध्यापरोक्षीकर्तुका मइत्यर्थः ३३मदिरेदृष्टिस्तांरातीतिमदिरंतादृशमीक्षणंज्ञानंयस्यांसातथा शुद्धज्ञाना विषयानुषंगंविहायतदनुसारिणीबभूवेतिपांड्येशमन्वपद्यतेत्यभिप्रायः अत्रसुतशब्देनरागादयोलक्ष्यंते तान्विहायेत्यर्थः मु क्तावपिबुद्ध्यात्मनोराहित्यंनास्तीतिदर्शयितुंज्योत्स्नेवेति ३४तत्रगुरुकुलवासेचंद्रवदाह्लादकंनिर्मलंचवदतिज्ञापयतीतिवेदांतशास्त्रं ययौचंद्रमदेतिपाठेशसावितिसूत्राद्वकारस्यमकारः चंद्रबिंबविषयीकरो तीतिवा नामलोकप्रसिद्धं पर्णआच्छादनइतिधातोः ताम्रंरजस्तमश्चपर्णयत्याच्छादयतिपरिभवतीतिताम्रपर्णीवेदांतव्याख्या ततश्चामरश्चेतिताम्रंब्रह्मपृणातीतिप्रकाशलक्षणंदानंकरोतीतिवापृणदानइतिधा

SGF

तोः नदीवत्पदवर्णस्वरलक्षणप्रवाहात् श्रोतॄणामुदकवदाह्लादजननाद्वावरोदका तस्याव्याख्यायाःप्रकाशितैःपुण्यैःशोधकैःसलिलैर्युक्तिलक्षणैरात्मनोंतःकरणस्य उभयत्रप्रविवादिनिमित्तबाह्यंदुर्युक्तिमलंसं
शयाद्यंतरमलंमृजन्शोधयन् ३५ मूलप्रतिष्ठायामितिधातोः मूलंजगदाधारंब्रह्मफलंतिनिष्पादयंतीतिमूलफलानितैःकंसुखंददातीतिकंदंमिताशनंतदादिर्येषांमितस्वापादीनांतानिकंदादीनियोगसाधना
नितैः नात्यश्नतस्तुयोगोस्तिनचैकांतमनश्नतइतिस्मृतेः पुष्पवन्मृदुलैःपर्णैराच्छादनैरुद्गतमकंदुःखंयेभ्यस्तान्युदकानितृणानिआस्तरणानितैरेतैश्चवर्तमानःशरीरयात्रांकुर्वाणः गंज्ञानंगमयतीतिगात्र
मज्ञानम् कर्शयत्यल्पीकरोतीतिगात्रकर्शनम् तपआलोचनइतिधातोरालोचनंमननमनुतिष्ठन् ३६ शीतोष्णादीनिद्वंद्वान्यजयत्सहमानोवर्ततइत्यन्वयः शीतोष्णादिशब्दैःकामादयो
लक्ष्यंतेइतिज्ञातव्यं उभयेषांशरीराधिकरणत्वात् ३७ तपसामननलक्षणेनजातयाविद्ययाज्ञानेननियमादिभिश्चपक्वकषायः शिथिलीकृतपापआत्मानमंतःकरणंब्रह्मणायुयुजेविषयेभ्यआ
नीयश्रीनारायणेनसहवर्तमानमकरोत् तदेकनिष्ठमकुरुतेत्यर्थः यद्वात्मानमंतर्यामिरूपंब्रह्मणाव्याप्तरूपेणयुयुजे एकत्वेनदध्याविसर्थः । विजिताक्षानिलाशयः वशीकृतेंद्रियप्राणांतःकरणः
आशयोऽभिलाषोवा ३८ स्थाणुरिवस्थितएकत्रगुरुकुलेश्रुतमतशास्त्रेबुद्धिप्रसादजनकेविविक्तस्थानेवा दिव्यंवर्षशतंबहुकालमुपासीनआस्तइत्यन्वयः मुक्तिसाधनंभक्तिरेवनान्यादितितस्याअति
शयफलमाह वासुदेवइति उपासकोवासुदेवेभगवति वेदांतविचारानिर्णीतगुणरत्नाकरेहरावुपासनालक्षणांरतिमुद्वहन्कुर्वन्नन्यत्स्वतंत्रंवस्तुनवेद किंतुसर्वंतदधीनमेवज्ञातवानित्यर्थः ३९ ननुब्रह्म

कंदादिभिर्मूलफलैःपुष्पपर्णैस्तृणोदकैः ॥ वर्तमानःशनैर्गात्रकर्षणंतपआस्थितः ३६ शीतोष्णवातवर्षाणिक्षुत्पिपासेप्रियाप्रिये ॥ सुखदुःखेइतिद्वंद्वान्यजय
त्समदर्शनः ३७ तपसाविद्ययापक्वकषायोनियमैर्यमैः ॥ युयुजेब्रह्मणात्मानंविजिताक्षानिलाशयः ३८ आस्तेस्थाणुरिवैकत्रदिव्यंवर्षशतंस्थितः ॥वा
सुदेवेभगवतिनान्यद्वेदोद्वहन्रतिम् ३९ सव्यापकतयात्मानंव्यतिरिक्ततयात्मनि ॥ विद्वान्स्वप्नइवामृश्यसाक्षिणंविरराम ह ४० साक्षाद्भगवतोक्तेनगु
रुणाहरिणानृप ॥ विशुद्धज्ञानदीपेनस्फुरताविश्वतोमुखम् ४१ परेब्रह्मणिचात्मानंपरंब्रह्मतथात्मनि ॥ वीक्षमाणोविहायेक्षामस्मादुपरराम ह ४२
पतिंपरमधर्मज्ञंवैदर्भीमलयध्वजम् ॥ प्रेम्णापर्यचरद्धित्वाभोगान्सापतिदेवता ४३

व्यतिरिक्तस्यवस्तुनोऽभावादेकमेवाद्वितीयमितिश्रुतेरेतदेवनान्यद्वेदेतिप्रतीतएवार्थःकिंनस्यादितितत्राह सव्यापकतयेति सआमृश्यविचार्यात्मनिजीवेस्थितंसाक्षिणं स्वप्नेनशारीरमभिप्रहत्यासुप्तः
सुप्तानभिचाकशीतीतिश्रुतेः साक्षात्द्रष्टृत्वेनवर्तमानं स्वप्नेयथापरतंत्रतयाजविंपश्यातितथा अन्यदापीतिविद्वांस्तथात्मानंपरमात्मानंव्यापकतयासर्वव्यापित्वेनचेतनाचेतनात्मकजगद्व्यतिरिक्ततयाचविद्वा
न्विरराम संसाराद्विरक्तोजीवन्मुक्त्यवस्थामापेत्यन्वयः यद्वात्मानंव्यापकतयात्मनिजीवेव्यतिरिक्ततयाचविद्वान्स्वप्नइवस्वतंत्रंसाक्षिणंजीवंपरतंत्रमामृश्यनिश्चित्यविररामेति हेत्यनेनजीवस्यास्वा
तंत्र्येहरेस्तदन्यत्वे यतःस्वप्नेनस्वतंत्रस्ततस्तद्दर्शकःपरः । जीवादन्यस्तुविज्ञेयःसविष्णुरवधार्यतामितिप्रसिद्धिःसूच्यते ४० तर्ह्यभेदश्रुतेःकोभिप्रायइत्याशंक्यजीवांतर्यामिणोहरेः ब्रह्मविदा
प्नोतिपरमितिश्रुतिप्रतिपाद्यस्यव्याप्तस्यापिनकश्चिद्भेदोस्तीत्यर्थइत्यभिप्रेत्याह साक्षादिति ४१ आत्मानंजीवांतर्यामिणं ईक्षां तयोर्भेददर्शनं अस्माच्छरीरात् हेत्यनेनअस्यप्रामाणिकत्वंद्योत
यति ४२ पतिंस्वाश्रयं इंद्रियद्वारेणभोमान्विहायपरिचरणंनामतस्यहितप्रेरकत्वम् ४३

---

१ स्वप्नेइवेतिदृष्टांतत्वेनोच्यते स्वप्नेहि जीवस्यास्वातंत्र्यं सिद्धम् अतस्तत्रपरमेश्वराधीनत्वंप्रासिद्धमेव । ता०

SGLF Sri Gargeshwari Digital Foundation

चीरवासाःसत्त्वगुणलक्षणंवेणीचक्षुषिशिरोरुहलक्षणावृत्तयोयस्याःसातथा उपपतिंपत्युःस्वमनसःसमीपे शांतमित्यनेनधूम्रराहित्यंनतुनिर्वाणत्वं नहिनष्टस्याग्नेःशिखा कथापक्षेयथास्थितएवार्थः
अभूतदृष्टांतस्यसंभवात् तस्मिन्निर्धूमतयाज्वलतोग्नेः शिखेवनिर्मलतयाश्रेयसोंतरंगमित्यर्थः ४४ इदानींबुद्धेर्वृत्तिविशेषान्लक्षयतिअजानतीति अंगनाभगवज्ज्ञानसाधना उपरतंजीवन्मुक्त्यवस्था
प्राप्तं प्रियतमंस्वस्याआत्यंतिकंप्रियंतमजानतींबाह्यवृत्तिविशिष्टासुस्थिरासनंतदेकवृत्तिनिष्ठालक्षणंपीठमाप्यपूर्वसंस्कारवशात् यथापूर्वमुपाचरत् शुभकर्मणिप्रेरयामास ४५ यदैवंप्रेरयतिचयदाप
त्युरंघ्र्यवयवैकदेशेऊष्माणमौष्ण्यंनोपलभेत् शुष्कजलनारिकेलफलवत्देहाभिमानंविहायस्थितत्वादौष्ण्यानुपलंभस्तस्याइति ततोपिवृत्त्यंतरवैशिष्ट्यमाह आसीदिति तदासंविग्नहृदयावृत्त्यंतर
विशिष्टासीत् मिश्रबुद्धिमपहायस्वरूपबुद्ध्याऽवतिष्ठते तदेवमवस्थाविशेषइतितात्पर्यंज्ञातव्यम् ४६ बंधुःस्वामीतदनुमानराहित्यादबंधुः शोचंतीप्रकाशयंती विक्लवेत्यादिनाप्रतिक्षणमनंतबुद्धिवृ
त्तयोलक्ष्यंते विपिनेदेहलक्षणेस्थित्तासुस्वरंप्ररुरोदेतीदंबुद्धेर्लक्षणं अस्यामुक्तिकालेनाशात्चिदचिद्बुद्ध्याव्यापारविशेषाल्लक्षणवैलक्षण्यंप्रतिक्षणंज्ञातव्यं ४७ उदधिःकर्मतदेवमेखलास्थानीयंयस्याः
सातथातां दस्युभ्योऽहंकारादिभ्यःक्षत्रबंधुभ्योमिथ्याज्ञानादिभ्योबिभ्यतींमांरक्षितुमर्हसित्वदनुगृहीतयाबुद्ध्याऽज्ञानादयोनिवर्ततइत्यर्थः ४८ विपिनेवासनावनेविलपतीवधावतीवदर्शयतीभर्तुःपाद
योःपतितास्वामिनंविहायस्थिता अश्रूण्यवर्तयन्मुग्धेवाभवत् ४९ दारुमयींभेदविषयांचितिंसंविदंकृत्वाप्रकाश्यतस्यासंविदिपत्युःकलेवरंसंसारकारणमादीप्यदग्ध्वाअनुमरणेअनुस्यूतदोषनाशेमनोद

चीरवासाव्रतक्षामावेणीभूतशिरोरुहा ॥ बभावुपपतिंशांताशिखाशांतमिवानलम् ४४ अजानतीप्रियतमंयदोपरतमंगना ॥ सुस्थिरासनमासाद्ययथा
पूर्वमुपाचरत् ४५ यदानोपलभेतांघ्रावूष्माणंपत्युरर्चती ॥ आसीत्संविग्नहृदयायूथभ्रष्टामृगीयथा ४६ आत्मानंशोचतीदीनमबंधुर्विक्लवाश्रुभिः ॥
स्तनावासिच्यविपिनेसुस्वरंप्ररुरोदसा ४७ उत्तिष्ठोत्तिष्ठराजर्षेइमामुदधिमेखलाम् ॥ दस्युभ्यःक्षत्रबंधुभ्योबिभ्यतींपातुमर्हसि ४८ एवंविलपतीबाला
विपिनेऽनुगतापतिम् ॥ पतितापादयोर्भर्तूरुदंत्यश्रूण्यवर्तयत् ४९ चितिंदारुमयींकृत्वातस्यापत्युःकलेवरम् ॥ संदीप्यचानुमरणेविलपंतीमनोदधे ५०
तत्रपूर्वतरःकश्चित्सखाब्राह्मणआत्मवान् ॥ सांत्वयन्वल्गुनासाम्नातामाहरुदतींप्रभो ५१ कात्वंकस्यासिकोवायंशयानोयस्यशोचसि ॥ जानासिकिं
सखायंमांयेनाग्रेविचचर्थह ५२ अपिस्मरसिचात्मानमविज्ञातसखंसखे ॥ हित्वामांपदमन्विच्छन्भौमभोगरतोगतः ५३

धेतादृशींवृत्तिंप्राकाशयत् ५० तत्रतस्यामवस्थायांकश्चिद्वेदांतवाक्यार्थो हितोपदेष्टृत्वेनसखिधर्मेवर्तमानोब्राह्मणोब्रह्मसंबंधीनिर्दोषशब्दलक्षणागमसंबंधीवात्मवान् परमात्मगुणप्रतिपादनपरःसा
म्नाअखिलार्थप्रकाशनेन सांत्वयन्प्रतिपदंदर्शितान्वयःबुद्धिमाह अबोधयदिति कथापक्षेप्रतीतएवार्थः ५१ तदनुकरणतयाबोध्यतइत्याह केति कांकिंजातिविशिष्टानकापि किंचकस्यासिकं
पुरुषमाश्रित्यातिष्ठसि नकमपि सर्वचेतनानुस्यूतत्वान्नविशिष्टुंशक्यत यस्यशोचसियदीत्याहोमितिप्रकाशयवर्तसेअयंशयानःशरीरलक्षणःपदार्थःकःपांचभौतिकत्वात्तवचास्यनकोपिसंबंधःकिंतुचेतन
स्यैवेत्यर्थः त्वंका नामतोगोत्रतोलिंगतश्च नतवत्रयमप्यस्ति कस्यासिपुत्रीभार्यावानकस्यापीत्यर्थः कोवाऽयंशयानस्तवनिरूपितेसत्यनेनसंबंधः यस्यमरणंशोचसिसइतिवा अग्रेपूर्वकालेयेनम
याविचचर्थविचारितवानसिवेदांतवाक्यमितिशेषःविचार्यमांज्ञातवानसितंसखायंत्वयासहवर्तमानंमांजानासिकिंसखित्वात् ज्ञातुंप्राप्तिरस्तीत्येतद्धशब्देनाह ५२ किंचहेसखेअविज्ञातःपरमात्मासखायस्यस
तथातमात्मानंत्वंस्मरस्यपिनस्मरासिचेत्तंस्मरेतिचार्थः चिद्बुद्ध्यात्मनोरभेदादिदमुभयविषयं इदानींज्ञानात्मानंचेतनमविभज्येवाह हित्वेति विषयभोगरतस्तदर्थंभोगस्थानमन्विच्छन्मृगयन्मां
हित्वागतःपृथग्गतइव अग्रतइतिपाठेपदमन्विच्छन्नभूदित्यन्वयः ५३

SGDF
Sri Gurudev Digital Foundation

वाक्यार्थोभिमानीकश्चिच्चेतनःस्वात्मनोरूपंबोध्यस्वरूपंचतत्त्वतउपदिशति हंसाविति आर्यप्राज्ञ अहंचत्वंचहंसौस्वतोनिर्लेपौमानसंज्ञानमयनंययोस्तौतथा सहस्रपरिवत्सरान्बहुकालंरमणौरममाणौ
अवात्स्व अन्यत्रमानससरोवराश्रयौहंसौप्रसिद्धौ प्राक्चीर्णपुण्यनिचयादवाप्तजातिस्मृती ५४ पुनःप्रारब्धकर्मवशात्ग्राम्यमतिर्मांविहायकर्मभूमिंगतोविचरन्पर्यटन्किंचित्पदंभोगस्थान
मद्राक्षीःस्त्रियाविषयबुद्ध्यारचितं ५५ एकःपालःप्राणोयस्मिंस्तत्तथातत्स्त्रीधवःपतिःस्वामीयस्मिन्तत्स्त्रीधवं ५६ पंचारामार्थमाह पंचेति इंद्रियार्थाःशब्दादयः नवद्वारमित्यस्यार्थमाह
द्वारइति घ्राणादयोद्वारइत्युच्यंते त्रिकोष्ठमाह तेजइति षट्कूलमाह गोलकेति गोलकेष्विंद्रियाणिगृह्यंतइतिगोलकेंद्रियसंग्रहः ५७ विपणोव्यवहारः क्रियाशक्तिःकर्मेंद्रियशक्तिःपंचप्रकृती
त्येतदाह भूतेति पंचभूतानांयाप्रकृतिर्मूलकारणंसापंचप्रकृतिरित्युच्यते अव्ययानित्या स्त्रीधवमाह शक्तीति शक्तिर्बुद्धिःसैवाधीशापुरोपभोगेकारणंयस्यसशक्त्यधीशः अन्यत्रकोष्ठानिभांडा
गारस्थानानिकूलानिबहिःस्थपदार्थदर्शनायनिर्मितस्थानानि ५८ रामयाविषयबुद्ध्यास्पृष्टोवशीकृतः हतस्मृतिःशास्त्रज्ञानरहितः विषयबुद्धिसंगफलंनरकादिभवतीत्यर्थः ५९ नत्वमित्या
दिविषयवैराग्यमुच्यते ६० प्रारब्धकर्मणैवंविधफलानुभवार्थमपामदंतर्यामिणाहरिणासृष्टासंक्लेषामायाबंधकशक्तिरिच्छावा साचाचिंत्यमहिमेत्याह यदिति तर्हिकिंतत्त्वज्ञातमितितद्विविच्याह
हंसमिति तत्त्वतोनामगोत्रादिराहित्येनचेतनंहंसंनिर्मलंपश्य आत्मनोहरेर्गतिंतत्तत्सत्ताप्रदत्वेनस्थितांपश्य आत्मनोममगतिं त्वांप्रबोध्यगच्छतोममयात्रांपश्येतिवा अनेनबोध्यबोधकयो

हंसावहंचत्वंचार्यसखायौमानसायनौ ॥ अवात्स्वरमणौचोभौसहस्रपरिवत्सरान् ५४ सत्वंविहायमांबंधोगतोग्राम्यमतिर्महीम् ॥ विचरन्पदमद्राक्षीःकया
चिन्निर्मितंस्त्रिया ५५ पंचारामंनवद्वारमेकपालंत्रिकोष्ठकम् ॥ षट्कूलंपंचविपणंपंचप्रकृतिस्त्रीधवम् ५६ पंचेंद्रियार्थाआरामाद्वारःप्राणादयःप्रभो ॥
तेजोबन्नानिकोष्ठानिगोलकेंद्रियसंग्रहः ५७ विपणस्तुक्रियाशक्तिर्भूतप्रकृतिरव्यया ॥ शक्त्यधीशःपुमानत्रप्रविष्टोनावबुध्यते ५८ तस्मिंस्त्वंरामया
स्पृष्टोरममाणोहतस्मृतिः ॥ तत्संगादीदृशींप्राप्तोदशांपापीयसींविभो ५९ नत्वंविदर्भदुहितानायंवीरःसुहृत्तव ॥ नपतिस्त्वंपुरंजन्यारुद्धोनवमुखेयया
६० मायाह्येषामयासृष्टायत्पुमांसंस्त्रियंपतिम् ॥ मन्यसेनोभयंयद्वैहंसंपश्यात्मनोगतिम् ६१ अहंभवान्नचान्यस्त्वंत्वमेवाहंविचक्ष्वभो ॥ ननौ
पश्यंतिकवयश्छिद्रंजातुमनागपि ६२

रनुभवसिद्धत्वादबाधितोभेदइतिज्ञातव्यं ६१ ननुकर्माणिविज्ञानमयश्चात्मापरेव्ययेसर्वएकीभवंति तत्त्वमस्यहंब्रह्मास्मीत्यादिश्रुतिभिरैक्यस्यप्रतिपाद्यत्वात्कथंभेदोऽबाधितइतिज्ञायते नचेदमौपचारि
कं गुरुशिष्योपदेशत्वाद्विप्रलंभानुपपत्तेरित्याशंक्यजीवसत्ताप्रदत्वाच्चेतनत्वेनतत्सदृशत्वाच्चाभेदव्यपदेशः तद्गुणसारत्वात्तुतद्व्यपदेशःप्राज्ञवदितिसूत्रात् जीवसत्ताप्रदत्वात्तुसदृशत्वाच्चकेशवः कथ्यते
त्वदभेदेननतुजीवस्वरूपतः इतिप्रमाणविरोधबाहुल्याद्यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदितिदूषितत्वाच्चाभेदस्येत्यभिप्रेत्याह अहमिति भवानहंत्वंमत्तोन्योनच त्वंतुअहमेवेतिविचक्ष्वपश्य अत्रप्रमा
णमाह नेति कवयस्तत्त्वदर्शिनः क्वचिन्मनागल्पमपिनावयोश्छिद्रमंतरंपश्यंति द्रव्यंकर्मचकालश्चेतिवाक्यार्थंपश्यंतोऽस्मदंतर्यामिणमंतरेणावयोःसत्तापिनास्ति किमुतइष्टानिष्टप्राप्तिपरिहारलक्षणा
प्रवृत्तौशक्तिरित्यतःशून्यदेशीययोरंतर्यामिणस्तप्तस्वर्पराग्न्योरिवभेदंपश्यंतोपिनपश्यंतीत्यभिप्रायः भवदंतर्यामिमंदतर्यामीचान्योनभवति किंतुत्वमेवाहमेकएवेतिजानीहित्वयिस्थितस्त्वामित्यसाविति
प्रमाणयतांकवीनांदर्शनादितिवाहंभवान्नकिंतुत्वमन्यःअतस्त्वंत्वमेवाहमहमेवेतिविचक्ष्व अन्यथानपश्य कुतः नौमनाक्छिद्रंकिंपानेवाविशेषइतिनपश्यंति किंतुमहांतंभेदंपश्यंतीतिवा ६२

जीवसत्ताप्रदत्वाज्जीवेनाभेदःपरस्येत्यत्रदृष्टांतमाह यथेति आदर्शचक्षुषोःप्रतीयमानस्यप्रतिबिंबस्यसत्तादेर्द्रष्टृबिंबाधीनत्वात्तद्देवेदमितिवदावयोरंतरंमत्सत्तायाअप्यस्मत्स्वाम्यधीनत्वादावां तद
भिन्नावितिव्यवहारःयथादर्पणाद्युपाधिष्वेकमात्मानंबहुधापश्यंतितथावयोरंतर्यामिणोरंतरामितिवा ६३ उपसंहरति एवमिति तद्व्यभिचारेणविषयबुद्धिप्रसंगातिशयेननष्टांतिरोहितांस्मृतिंशास्त्र
विषयामापेत्यन्वयः ६४ कथाबाह्याध्यात्मपक्षभेदेनानिरूप्यते इत्येतत्कथमवगतामितितत्राह बर्हिष्मन्निति परोक्षेणान्यापदेशेन एवंकथनेकिंकारणंतत्राह यत्परोक्षेति परोक्षप्रियाइवहिदेवाइ
त्यादिश्रुतिः अनेनाहंभवानित्यादेरप्यस्मदुक्तएवार्थोनप्रातीतिकइत्येतत्सुतरामबोधि ६५ ॥ इतिश्रीभागवतेचतुर्थस्कंधेविज०कृतटीकायामष्टाविंशः ॥ २८ ॥ छ ॥ ॥ भक्तिजनितज्ञानमेवहरेः
प्रसादजनकंनकर्मादिकंतत्रसाधनमित्येतदास्मिन्नध्यायेनिरूप्यते तत्रादौप्राचीनबर्हिःस्वयंविद्वानपिलोकोपकारायसम्यक्पृच्छाति भगवन्निति नारदस्यहर्षार्थंभगवन्नितिसंबोधनं अस्माभिरस्मादृशैःप्रवक्तृ
बोधकशक्त्यभावपरिहारार्थंसम्यगिति तत्रकिंकारणंतत्राह नवयमिति कवीनांकर्माभावेनविविदिषंति यज्ञेनदानेनेत्यादिविधानंव्यर्थमितीमांशंकांकवयइत्यनेनपर्यहारि कर्मणाशुद्धांतःकरणस्यहर्युपास
नासाध्यप्रकारेणातिक्रांतदर्शनस्यकवित्वात् ॥ १ ॥ व्यनक्तीत्यनेनपुरंजनपदंनिरुक्तं पुरस्यदेहस्यांजनंयस्मात्सपुरंजनइत्यर्थः अंजूव्यक्तिकरणइतिधातुः पुरंजनयातिप्रकाशयतीतिवापुरंज

यथापुरुषआत्मानमेकमादर्शचक्षुषोः ॥ द्विधाभूतमिवेक्षेततथैवांतरमावयोः ६३ एवंसमानसोहंसोहंसेनप्रतिबोधितः ॥ स्वस्थस्तद्व्यभिचारेणनष्टामा
पपुनःस्मृतिम् ६४ बर्हिष्मन्नेतदध्यात्मंपारोक्ष्येणप्रदर्शितम् ॥ यत्परोक्षप्रियोदेवोभगवान्विश्वभावनः ६५ इतिश्रीभागवतेचतुर्थस्कंधेअष्टाविंशोऽध्यायः
२८ ॥ छ ॥ प्राचीनबर्हिरुवाच ॥ भगवंस्तेवचोस्माभिर्नसम्यगवगम्यते ॥ कवयस्तद्विजानंतिनवयंकर्ममोहिताः १ ॥ नारदउवाच ॥ पुरुषंपुरंजनं
विद्यायद्व्यनक्त्यात्मनःपुरम् ॥ एकद्वित्रिचतुष्पादंबहुपादमपादकम् २ योविज्ञाताह्वयस्तस्यपुरुषस्यसखेश्वरः ॥ यन्नविज्ञायतेरूपैर्नामभिर्वाक्रियागु
णैः ३ यदाजिघृक्षन्पुरुषःकात्स्न्येंनप्रकृतेर्गुणान् ॥ नवद्वारंद्विहस्तांघ्रिंपुरंमनुतसाध्विति ४ बुद्धिंतुप्रमदांविद्यान्ममाहमितियत्कृतम् ॥ यामधिष्ठायदे
हेऽस्मिन्पुमान्भुंक्तेक्षिभिर्गुणान् ५ सखायइंद्रियगणोज्ञानंकर्मचयत्कृतम् ॥ सख्यस्तद्वृत्तयःप्राणःपंचवृत्तिर्यथोरगः ६ बृहद्बलंमनोविद्यादुभयेंद्रिय
नायकम् ॥ पंचालाःपंचविषयायन्मध्येनवखंपुरम् ७

नः जनीप्रादुर्भावइतिधातुः पुरमपिनैकविधमित्याह एकेति एकपादादिजातिजंतुशरीरापेक्षयापिशाचशरीरमपेक्ष्यवा द्वौपादौमनुष्यादेस्त्रयःपादाज्वरादेः चत्वारःपादाःपश्वादेः बहवःपादाःसहस्र
पादादेः अपादकंसर्पादि २ ननु परमाणोरप्यविज्ञातत्वात्किंविशिष्योच्यतइतितत्राह यन्नेति अनेनभक्तानुग्रहार्थंनामरूपादिग्रहणंनस्वतोस्तिनतथापरमाणोःशुक्लभासुरमपाकजमित्यादिनिरूपितत्वादि
त्यादिप्रदर्शितम् ३ यदाप्रकृतेर्गुणान्जिघृक्षन्स्रक्चंदनादिविषयानादातुमिच्छतितदानवद्वारादिलक्षणंसाधुतत्साधनमितिन्यरूपयत् ४ अधिष्ठाय खमक्षमिंद्रियंश्रोत्रमित्यभिधानादक्षिभिरिंद्रियैश्चक्षु
षारूपंदृष्ट्वानंतरमन्येंद्रियप्रवृत्तिरितिचक्षुषःप्राधान्यद्योतनायाक्षैरित्युक्तिंविहायाक्षिभिरिति गुणान्विषयान् ५ यद्येनेंद्रियगणेनतेषांइंद्रियाणांविषयेषुवृत्तयोव्यापाराः पुररक्षणेयथोरगोनिरूपितस्त
थादेहरक्षणे उरस्तुवक्षसिश्रेष्ठइत्यभिधानात् उरःश्रेष्ठश्चगमकोब्रह्मप्रापकश्चेत्युरगोमुख्यप्राणः श्रेष्ठश्च सएनान्ब्रह्मगमयतीतिसूत्रश्रुत्योरयमर्थः अन्यत्रउरसावक्षसागच्छतीत्युरगःसर्पःपंचधावृत्तिं
स्यसपंचवृत्तिःविस्तृतव्यापारोवा फणोत्क्षेपणंफणायाभूमावाक्षेपणंमंडलीकरणमाकुंचनं मंडलंमोक्षःप्रसारणंदीर्घीभूयगमनमितिपंचवृत्तिःनागस्य ६ मनसावाअग्रेसंकल्पयत्यथवाचाव्याहरतीति
श्रुतेः ज्ञानकर्मेंद्रियाणांविषयंप्रतिनेतृत्वादुभयेंद्रियनायकमित्युक्तं एषांविषयाणांमध्येनवखानिद्वारलक्षणानिछिद्राणियस्यतत्तथोक्तं तत्पुरंशरीरम् ७

तत्तदिंद्रियसंयुतः अक्षादिद्वारेणबाहिर्विषयन्नुभुक्षोसातिनेत्रादींद्रियेणविषयंभुंक्तइत्यर्थः ८ अक्षिणीइत्यादिनाद्वेद्वेद्वारइत्युक्तंतद्विवेचयाति अक्षिणीइति ९ पश्चिमेद्वेइत्युक्तंतत्राह पश्चिमेइति
खद्योतेत्याद्युक्तंविवृणोति खद्योतेति १० नलिन्याद्याह नलिनीति ११ अवधूतमाह घ्राणइति मुख्यानामपुरस्ताद्वाइत्यस्यार्थमाह मुख्येतियामुख्यानामद्वाः आस्यंरसज्ञं विपणान्वि
तइत्येतदाह विपणइति विपणोवागिंद्रियं रसवित्रसज्ञः रसोरसनेंद्रियं आपणंव्याचष्टे आपणइति चित्रमंधइत्यादौबहूदनमित्यस्यार्थविविधौदनः १२ पांचालशब्दस्यार्थांतरमाह प्रवृत्तमिति १३
श्रुतधरेत्यस्यश्रोत्रमिति तेनोत्क्रांतःपितृयानादिमार्गंव्रजति आसुर्याःकृत्समाह मेहनार्थमिति मेहनंपुरीषोत्सर्जनं ग्रामिणांरतिर्मैथुनं १४ १५ १६ तद्गुणैर्मनोगुणैर्बुद्धिगुणै
र्वाएतदेवप्रतिपादयाति यथेति स्वप्नकालेकरितुरगादिदृष्टश्रुतवस्तुवासनावासितंमनोबुद्धिर्वाविक्रियतेदैवेनेतिशेषः बहुसंस्कारााधिवासितत्वादन्यत्रप्रवाहमंतरेणैवस्वयंवाविकरोतीत्याह गुणेति

अक्षिणीनासिकेकर्णौमुखंशिश्नगुदाविति ॥ द्वेद्वेद्वारौबहिर्यातितत्तदिंद्रियसंयुतः ८ अक्षिणीनासिकेआस्यमितिपंचपुरस्कृताः ॥ दक्षिणादक्षिणःकर्ण
उत्तराचोत्तरःस्मृतः ९ पश्चिमेइत्यधोद्वारौगुदशिश्नाविहोदिते ॥ खद्योताविर्मुखीचात्रनेत्रेएकत्रनिर्मिते १० रूपंविभ्राजितंताभ्यांविचष्टेचक्षुषेश्वरः ॥
नलिनीनालिनीनासेगंधःसौरभउच्यते ११ घ्राणोवधूतोमुख्यास्यंविपणोरसविद्रसः ॥ आपणोव्यवहारोत्रचित्रमंधोबहूदनम् १२ पितृभूर्दक्षिणःक
र्णउत्तरोदेवभूःस्मृतः ॥ प्रवृत्तंचनिवृत्तंचशास्त्रंपांचालसंज्ञितम् १३ पितृयानंदेवयानंश्रोत्रंश्रुतधरोव्रजेत् ॥ आसुरीमेहनार्थंद्वार्व्यवायोग्रामिणांरतिः १४
उपस्थोदुर्मदःप्रोक्तोनिर्ऋतिर्गुदउच्यते ॥ वैशसंनरकंपायुर्लुब्धकोंधौतुमेशृणु १५ हस्तपादौपुमांस्ताभ्यांयुक्तोयातिकरोतिच ॥ अंतःपुरंचहृदयं
विषूचिर्मनउच्यते १६ तत्रमोहंप्रसादंवाहर्षंप्राप्नोतितद्गुणैः ॥ यथायथाविक्रियतेगुणाक्तोविकरोतिवा १७ तथातथोपद्रष्टात्मातद्वृत्तिरितिकीर्त्यते ॥
देहोरथस्त्विंद्रियाश्वःसंवत्सररवयोगतिः १८ द्विकर्मचक्रस्त्रिगुणध्वजःपंचासुबंधुरः ॥ मनोरश्मिर्बुद्धिसूतोहृन्नीडोद्वंद्वकूबरः १९ पंचेंद्रियार्थप्रक्षेपःसप्त
धातुवरूथकः ॥ आकूतिर्विक्रमोबाह्योमृगतृष्णांप्रधावति २० एकादशेंद्रियचमूःपंचसूनाविनोदकृत् ॥ संवत्सरश्चंडवेगःकालोयेनोपलक्षितः २१
तस्याहानीहगंधर्वागंधर्व्योरात्रयःस्मृताः ॥ हरंत्यायुःपरिक्रांत्याषष्ट्युत्तरशतत्रयम् २२ कालकन्याजरासाक्षाल्लोकस्तांनाभिनंदति ॥ स्वसारंजगृहेमृत्युः
क्षयाययवनेश्वरः २३ आधयोव्याधयस्तस्यसैनिकायवनाःखलाः ॥ भूतोपसर्गाशुरयःप्रज्वारोविविधोज्वरः ॥ २४

१७ यथायथाविषयविकारेणपरिणमतेतथातथास्वप्रादेरुपद्रष्टात्माजीवस्तद्वृत्तिर्बुद्धिमनोवृत्तेरनुकूलवृत्तिरितिकीर्त्यते यथायथामनोविक्रियतेगुणान्कामात्मनागुणरूपिताबुद्धिस्तथाविकरोतिबु
द्धिर्यथाविकरोतितथात्मापीतिवा । उभयेंद्रियनायकइत्युक्तेर्मनोविकारानुकारिबुद्ध्यनुकारिप्रवृतिमत्त्वमात्मनोयुज्यते इंद्रियाण्येवाश्वायस्यसतथा संवत्सरेत्युपलक्षणं दिनरात्रिपक्षमाससंवत्सर
लक्षणैर्वयोभिर्गतिर्यस्यसतथा १८ द्विकर्मेत्यादिषुबहुव्रीहिःपंचासुबंधुरःपंचासवःप्राणाएवबंधुरोयस्यसतथा एकरश्म्येकदमनामित्यस्यार्थमाह मनइति १९ पंचप्रहरणमित्यस्यार्थमाहपं
चेति प्रतीतितंःसुखमनुभवेयत्दुःखंसामृगतृष्णिकातां सदुक्तं सुखवद्दूरतोदृश्यंतत्कालेदुःखमेवयत् । मृगतृष्णेत्यतःप्राहुर्भोगंवैषयिकंबुधाइति २० पंचेंद्रियद्वारेणविषयसेवालक्षणाहिंसाकला
विनोदंकरोतीतिपंचसूनाविनोकृदत् येनसंवत्सरेणद्विपरार्धायुर्लक्षणःकालः २१ परिक्रांत्यापरिवृत्त्यापुनःपुनरावर्तनेनेत्यर्थः २२ क्षयायजगतइतिशेषः २३ भूतोपसर्गाग्रहोपद्रवाः २४

१ मृगतृष्णांप्रधावतीत्यनेनवैषयिकभोगस्यमृगतृष्णात्वोक्त्यामिथ्यात्वमुच्यतइतिभातिअतस्तदुक्तेरभिप्रायंप्रमाणेनाहप्रतीतितइति ।

SGLF
Sri Gargeshwari Digital Foundation

थ धुनालक्षणयावृत्त्या उक्तमर्थंविवृत्त्यर्थंप्रत्यक्षमाह एवमिति दैवभूतात्मसंभवैराधिदैवाधिभूताध्यात्मविषयतयाजातैरेवंबहुविधैर्दुःखैःक्लिश्यमानस्तमोवृतस्तत्परिहारोपायमजानन्देहीशेतेइति श्लोकद्वयेनान्वयः कियंतंकालंशतवर्षंक्षप्तत्वात् शतायुर्वैपुरुषइतिन्यूनातिरेकसंभवेप्येवमुक्तं दुःखोत्पत्तौकारणमाह कामेति प्राणधर्मानशनपिपासादीनिंद्रियधर्मानंधत्वादीन्मनोधर्मान्शोकमो हादीनात्मनिस्वस्मिन्नध्यस्यारोप्यबुभुक्षितःपिपासितोहमंधःकाणोहंशुष्कोहंमुग्धोहमिति निर्गुणश्चेतनत्वेनस्वतोगुणरहितः ननुशरीरकारणक्षयेमोक्षसंभवात्क्लेशानुभवोप्युपकारायस्यादेहिनइत्य त्राह कर्मकृदिति आचतुर्दशमाद्वर्षात्कर्माणिनियमेनतु । दशावराणांदेहानांकारणानिकरोत्ययमित्यादेर्नकर्मक्षयान्मुक्तिः । नन्वस्तुकर्मकर्तृत्वंहर्यर्पणेनाक्रियमाणानांनदुःखदातृत्वमित्यत्राह ममेति २५ ॥ २६ ॥ कर्मकृदित्यत्रकीदृशंकर्मकरोतीतितत्राह यदेति यदाअदृग्गज्ञानीपुरुषःसंसारेइष्टानिष्टफलदमात्मानंस्वांतर्यामिणमविज्ञायप्राकृतेषुगुणेषुविषज्जते तदास्वगुणाभिमानीदेहीशुक्लादीनिसा त्विकादीनिकर्माणियथाकुरुतेतथासात्विकादिशरीरतयाजायते अवशःविष्णुवशःसइत्यनेनकर्मणःस्वातंत्र्यंनिराह आत्मशब्दस्यसाधारणत्वेनकथंनिर्णयइत्यतोभगवंतमित्यादिविशेषणत्रयम् २७

एवंबहुविधैर्दुःखैर्दैवभूतात्मसंभवैः ॥ क्लिश्यमानःशतंवर्षंदेहेदेहीतमोवृतः २५ प्राणेंद्रियमनोधर्मानात्मन्यध्यस्यनिर्गुणः ॥ शेतेकामलवंध्यायन्ममाह मितिकर्मकृत् २६ यदात्मानमविज्ञायभगवंतंपरंगुरुम् ॥ पुरुषस्तुविषज्जेतगुणेषुप्राकृतेष्वदृक् २७ गुणाभिमानीसतदाकर्माणि कुरुतेऽवशः ॥ शुक्लंकृष्णंलोहितंवायथाकर्माभिजायते २८ शुक्लान्प्रकाशभूयिष्ठाँल्लोकानाप्नोतिकर्हिचित् ॥ दुःखोदर्कान्क्रियायासान्तमःशोकोत्कटान्क्वचित् २९ क्वचित्पुमान्क्वचिच्चस्त्रीक्वचिन्नोभयमंदधीः॥ देवोमनुष्यस्तिर्यग्वायथाकर्मगुणंभवः ३० क्षुत्परीतोयथादीनःसारमेयोगृहंगृहम् ॥ चरन्विंदतियद्दिष्टंदंडमो दनमेववा ३१ तथाकामाशयोजीवउच्चावचपथाभ्रमन् ॥ उपर्यधोवामध्येवायातिदिष्टंप्रियाप्रियम् ३२ दुःखेष्वेकतरेणापिदैवभूतात्महेतुषु ॥ जीवस्य नव्यवच्छेदःस्याच्चेत्तत्तत्प्रतिक्रिया ३३ यथाहिपुरुषोभारंशिरसागुरुमुद्वहन् ॥ तंस्कंधेनसआधत्तेतथासर्वाःप्रतिक्रियाः ३४ नैकांततःप्रतीकारःकर्मणां कर्मकेवलम् ॥ द्वयंह्यविद्योपसृतंस्वप्नेस्वप्नइवानघ ३५

॥ २८ ॥ त्रिविधानांकर्मणांफलमाह शुक्लानिति प्रकाशभूयिष्ठांस्तेजोमयान्देवादीन्क्रियायासान्क्लेशकर्मसाध्यान्राजसान्दुःखोदर्कान्दुःखप्रचुरान्मनुष्यादीन्तमःशोकोत्कटान्तामसान्स्वक र्मणःशोकभूयिष्ठान्तिर्यगादीनाप्नोतीत्यन्वयः २९ क्वचित्क्वचिदितिबहुजन्मापेक्षया नोभयंनपुंसकत्वं एतदेवविशिनष्टि देवइति यथाकर्मगुणंयथायथाकर्मणांगुणानामानुगुण्यंतथाभवउत्प त्तिर्देवादिविषया ३० तत्रदृष्टांतमाह क्षुदिति दंडंप्रहारं दिष्टंदैवतःप्राप्तं ३१ कामेविषयेआशयोयस्यसतथा ३२ एवंभ्रमतःसुखंक्वापिनस्यात्किंकतत्राह । दुःखेष्विति दैवादिहेतुषुदुःखेषुमध्येएकतरेणदुः खेनापिजीवस्यव्यवच्छेदोवियोगोनास्तीत्यन्वयः प्रतिक्रियपासुखंस्यादत्राह स्याच्चेदिति तस्यतस्यदुःखस्यप्रतिक्रियापरिहारःसोपिदुःखमेव ३३ स्कंधस्पयथाभवति तथासर्वाःप्रतिक्रियादुःखरूपाइ त्यन्वयः ३४ अग्निष्टोमादिकर्मणाऽन्यकर्मनिवृत्तौप्रबोधकाभावात्सर्वदुःखव्यवच्छेदोघटतइतिचेत्तत्राह नैकांततइति केवलंश्रीनारायणार्पणबुद्धिरहितंकर्मकर्मणामेकांततोनियमेनप्रतीकारोनभवति कुतइतितत्राह द्वयमितिनिवार्यंनिवर्तकंचोतिकर्मद्वयमविद्योपसृतं ईश्वराज्ञानानुविद्धंहियस्मात्तस्मादितिशेषः तत्रदृष्टांतः स्वप्नेवर्तमानःस्वप्नोयथातस्यनिवर्तकोनभवति किंतु अतःप्रबोधोस्मादिततत्र प्रबोधादाविश्वरएव स्वप्नसंसृत्योःकियानेवविशेषइति ३५

स्वप्नवद्धरेः संसारो निवर्ततामितितत्राह अर्थेइति हरेरपरोक्षज्ञानलक्षणपदार्थे अविद्यमाने संसृतिर्ननिवर्तते कथमिव लीनानांवासनानांगमकेनोद्बोधकेनमनसास्वप्नेविचरतोविषयान्भुंजानस्यपुंसःसंसारो यथाननिवर्तते निद्रायाअनिवृत्तत्वात् तथात्र ननुस्वप्नसंसारयोःकथंसाम्यंस्वप्नदृष्टानांतत्क्षणंनष्टत्वात्संसारदृष्टानांकिंचित्स्थायित्वदर्शनादित्यस्यापीदमेवोत्तरमित्यभिप्रायेणोक्तमर्थइतिअयंभावः यथा र्थज्ञानाभावादुभयोःसाम्यंनतुस्थायित्वास्थायित्वात् नहिदृष्टांतदार्ष्टांतिकयोःसर्वसाम्यंक्वापिदृष्टं संसृतेःस्वप्नसाम्यंतुयथार्थज्ञानवर्जनमितिवचनात् जाग्रत्यविद्यमानंतुदेहात्मत्वंतुकेवलं । अविद्य मानंस्वप्नेतुजाग्रत्त्वज्ञानमेवचेतिवचनात् उभयत्रयथार्थज्ञानाभावोपिज्ञायते संसारेलब्धजन्मायदिभगवज्ज्ञानंनापादयेत्तर्ह्ययंसंसारोनिष्प्रयोजनःस्यादित्यतोह्यर्थेह्यविद्यमानेपीतिनतुमिथ्यात्वादितीमम र्थंहिशब्देनसूचयति ३६ एवंविधज्ञानोत्पत्तौकिंमुख्यसाधनमत्राह अथेति यस्मात्केवलकर्मणोदुःखहेतुःसंसारःसतिभगवज्ज्ञानेचनिवर्तते अथतस्मात्संसारनिवृत्त्यर्थेऽर्थभूतस्यपुरुषार्थयो ग्यस्यात्मनोजीवस्ययतोयस्यहरेरज्ञानादनर्थपरंपराश्वयोनेःकृकलासयोनिरित्यादिलक्षणासंसृतिर्यातद्व्यवच्छेदस्तस्यसंसारस्यनिवृत्तिर्ययाहरिभक्त्यास्यादितिय तस्तस्मात्तस्यहरेः ज्ञानजननींभक्तिमेव कुर्यादित्यन्वयः ३७ ज्ञानद्वाराभक्तेःसंसारोच्छेदकत्वमितिभावेनाह वासुदेवइति सध्रीचीनेनप्राणायामादिवह्निनानिर्दग्धमलेनांतःकरणेनसमाहितःसम्यक्स्थापितः सध्रीचीनेननिष्कामेनपुरुषे

अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते ॥ मनसालिंगरूपेणस्वप्नेविचरतोयथा ३६ अथात्मनोर्थभूतस्ययतोनर्थपरंपरा ॥ संसृतिस्तद्व्यवच्छेदोभक्त्यापरम याहरौ ३७ वासुदेवेभगवतिभक्तियोगःसमाहितः ॥ सध्रीचीनेनवैराग्यंज्ञानंचजनयिष्यति ३८ सोचिरादिवराजर्षेस्यादच्युतकथाश्रयः ॥ शृण्वतःश्र द्धधानस्यनित्यदास्यादधीयतः ३९ यत्रभागवताराजन्साधवोविशदाशयाः ॥ भगवद्गुणानुकथनश्रवणाव्यग्रचेतसः ४० तस्मिन्महन्मुखरितामधुभिच्च रित्रपीयूषशेषसरितःपरितःस्रवंति ॥ तायेपिबंत्यनुसवंनृपगाढकर्णैस्तान्नस्पृशंत्यशनतृड्भयशोकमोहाः ४१ एतैरुपद्रुतोनित्यंजीवलोकःस्वभावजैः ॥ नकरोतिहरेर्नूनंकथामृतनिधौरतिम् ४२ प्रजापतिपतिःसाक्षाद्भगवान्गिरिशोमनुः ॥ दक्षादयःप्रजाध्यक्षानैष्ठिकाःसनकादयः ४३ मरीचिरत्र्यंगिरसौपुल स्त्यःपुलहःक्रतुः ॥ भृगुर्वसिष्ठइत्येतेमदंताब्रह्मवादिनः ४४ अद्यापिवाचस्पतयस्तपोविद्यासमाधिभिः ॥ पश्यंतोपिनपश्यंतितद्विष्णोःपरमंपदम् ४५ शब्दब्रह्मणिदुष्पारेचरंतउरुविस्तरे ॥ मंत्रलिंगैर्व्यवच्छिन्नंभजंतोनविदुःपरम् ४६

णेतिवा यद्यपिभक्तेःपूर्वभाविवैराग्यंतथापिपश्चात्दृढंकृतवतीत्यतोवैराग्यंजनयिष्यतीतिज्ञानंद्विविधं ॥ ३८ ॥ भक्तियोगस्यसाधनमाह सोचिरादिति अच्युतकथाआश्रयोयस्यसतथा अनेनह रिकथाभक्तियोगस्यसाधनमच्युतकथाधिकारप्रकारमाह शृण्वतइति श्रद्धादिगुणसंपत्तिरधिकारलक्षणम् ३९ कुत्रेयंसंभूयतइतितत्राह यत्रेति अव्यग्रचेतसस्तदेकचित्ताः ॥ ४० ॥ तस्मिन्सतां समाजेमहद्भिर्मुखरिताःशब्दात्मनानिर्गमितायास्ताःसरितस्तान्पुरुषान् ४१ अशनादिस्पर्शफलमाह एतैरिति एतैरशनादिभिःस्वभावजैःसहजैर्हरिकथामृतानिधिरातिविघ्नफलैः ४२ अधुनाश नाद्युपद्रवविधुरेणापिसाकल्येनश्रीहरिज्ञानंदुर्लभमित्याह प्रजापतिरित्यादिना प्रजापतिपतिर्ब्रह्माविरिंचश्चेतिकथ्यतइतिवचनात्प्रजापतिपतिर्ब्रह्मा ४३ अहमेवांतोयेषांतेमदंताः ४४ अथवा दित्वेपिवाक्पटुत्वाभावान्नपश्यंतीत्यतोवाचस्पतयइति यत्पश्यंतोपिनपश्यंतितद्विष्णोःपरमंपदमित्यन्वयः ॥ ४५ ॥ तत्साधनमानबाहुल्याभावात्तद्विषयज्ञानानुदयान्नपश्यंतिचेदत्राह शब्देति निर्दोषःशब्दआगमइतिनिर्दोषशब्दराशौदुष्पारेऽनंते कुतइत्यतउक्तं उरुविस्तरइति चरंतोजिज्ञासयावर्तमानाअपिमंत्रलिंगैर्वेदोक्तलक्षणैर्व्यवच्छिन्नमुक्तमात्रंनतुसम्यगुक्तं एवंविधंपरंपरमात्मा नंभजंतउपासमानाअपितन्नविदुरित्यन्वयः बिभ्रद्द्रापिंहिरण्मयंवरुणोवस्तनिर्णिजमित्यादिवेदोवदन्नप्यनुभवानारोहयितृत्वेनवक्तिअतोऽप्रसिद्धस्वरूपत्वेनसम्यक्नजानंति तस्यसेवापिनव्यर्थातत्प्रसादे

१८

SGLF Foundation

नानुभवारोहोपिक्रमेणस्यादिति तदुक्तं वेदोवदन्नपिहारिंनसम्यग्वक्तिकुत्रचित् । नारोहयत्यनुभवमप्रसिद्धस्वरूपतः । तथाप्यनुभवारोहःप्रसन्नेकेशवेभवेत् । किंचिदेवसम्यक्स्वयंचानुभवत्य
मुमिति यद्वा मंत्राख्यैर्लिंगैर्हेतुभिर्व्यवच्छिन्नंक्रोडीकृतंकृष्णरामादिलक्षणंपरमंभजंतोपितत्प्रसादमंतरेणपरंव्याप्तंसाकल्येननविदुरिति । शबलंभजंतःपरंशुद्धंनविदुरित्यर्थोनुपपन्नः परमार्थभेदाभावेनै
कस्मिञ्ज्ञातेऽन्यज्ञानस्यनांतरीयकत्वात् येनाश्रुतंश्रुतंभवतीतिश्रुतेश्चयथारामस्मरणेनकृष्णस्वरूपज्ञानंजांबवतस्तयोरेकत्वादित्याहुः ४६ नन्विदानींमाययाक्षिप्तमपिचेतनसमवेतंज्ञानमदृष्टवशात्क
स्मिंश्चित्कालेनुसंधानलक्षणंकिंचिद्विशेषमापादयेत् अतोनुसंधानाननुसंधानेयुक्तेइतितत्राह सर्वेषामिति इहकर्मभुविसर्वेषांजंतूनांसंततंदेहपोषणेप्रज्ञाबुद्धिःसमायत्तासततास्ति नृणांतयाप्रज्ञयाकोवि
शेषः स्वरूपानुसंधानलक्षणःसमापन्नो नकोपीत्यन्वयः त्वत्पक्षेत्वदृष्टादीनांमिथ्यात्वेनार्थक्रियायामसामर्थ्यादेवनकस्यचिदैक्येनसंधानमवश्यंभावीति ४७ जीवन्मुक्त्यवस्थायामपिजीवात्मत्वा
हानेर्हरेर्भेदःसत्यइतिभावेनस्वरूपत्वसिद्धयेसाधनमाह लब्ध्वेति इहबहुजन्मनामंतेभगवदुद्बोधितपूर्वादृष्टविशेषान्मनुष्यत्वंलब्ध्वा ममाहमितिदेहाद्यसद्ग्रहंसंसारेदेहीहित्वात्मसत्त्यात्मज्ञानेनेदंकलेवरं
विहाययःसंसारीजीवात्माविशिष्यते नतुब्रह्मेत्यन्वयः ४८ हरिप्रसादंविनातज्ज्ञानंनस्यात्तस्मिन्सत्युत्पद्यमानस्यज्ञानस्यफलमाह यदेति यदात्मेतितूपगच्छंतिग्राहयंतिचातिसूत्रोक्तप्रकारेणात्मभावितः
ममस्वामीहरिर्नित्यमितिभावेनोपासितोभगवान्यस्योपासकस्यानुगृह्णात्यात्मानंप्रकाश्यानुभवमुत्पादयाति सपुमांल्लोकेवेदेचपरिनिष्ठितांमतिंजहाति बाह्यपदार्थविषयांसंविदमपहायपरमात्मानमेवस
वैंद्रियैरनुभवन्नास्तइत्यन्वयः अनेनोपासकस्यमुक्तिकल्पनेकथांध्वनयति तदुक्तं यदात्वनुभवीभूयाच्छब्दमात्रानुरोधनम् । त्यक्त्वाथतांविदुःप्राज्ञास्त्यक्तवेदइतिस्मह । यदैवत्यक्तवेदःस्या

सर्वेषामपिजंतूनांसततंदेहपोषणे ॥ अस्तिप्रज्ञासमायत्ताकोविशेषस्तयान्नृणाम् ४७ लब्ध्वेहांतेमनुष्यत्वंहित्वादेहाद्यसद्ग्रहम् ॥ आत्मसत्त्याविहाये
दंजीवात्मासाविशिष्यते ४८ यदायस्यानुगृह्णातिभगवानात्मभावितः ॥ सजहातिमतिंलोकेवेदेचपरिनिष्ठिताम् ४९ तस्मात्कर्मसुबर्हिष्मन्नज्ञानादर्थ
काशिषु ॥ मार्थदृष्टिंकृथाःश्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ५० स्वलोकंनविदुस्तेवैयत्रदेवोजनार्दनः ॥ आहुर्धूम्रधियोवेदंसकर्मकमतद्विदः ५१

दथास्मान्मुच्यतेभयादिति । निर्दोषशब्दलक्षणवेदप्रहाणेबौद्धराद्धांतानुप्रवेशःस्यादित्यतउक्तं प्रायस्तुवैदिकाएवरुद्राद्याअपिवैपुरेति आदिशब्देनमुक्तियोग्यमात्रंगृहीतं पुरेत्यनेनजन्मप्रभृतिवै
दिकत्वमस्तीतिज्ञापयाति प्रायइत्यनेनत्यक्तवेदत्वंपश्चादिति तदप्येतत्द्वयंकस्यमुख्यमित्यतउक्तं वैदिकस्त्यक्तवेदश्चब्रह्मैवैकःप्रजापतिरिति । रुद्रादीनांकथंकारंपश्चादपित्यक्तवेदत्वंप्राप्तमित्यत
उक्तं ततस्तुकेशवंभक्त्यासंपूज्यबहुजन्मसु त्यक्तवेदत्वमापन्नाःप्रसादात्परमेष्ठिनइतिकेवलंवेदशब्देनजानन्वैदिकउच्यते वेदंविनाप्यनुभवाज्जानंस्तुत्यक्तवैदिकइत्यनेनामिथोविरुद्धयोर्वैदिकत्यक्तवेद
शब्दयोरेकाधिकारणत्वंकथंयुज्यतइतीदंचोद्यमपनोदितं तन्त्वंवेदानुसारेणचिंतयन्वैदिकोभवेत् । वेदऊहामनुसरेद्यस्यसत्यक्तवैदिकइत्यनेनवेदशब्देनज्ञातृत्वंतमंतरेणानुभावितृत्वंचकथंविविच्यतइति
चोद्यंपरिहृतं त्यक्तवैदिकस्त्यक्तवेदराशिरित्यर्थः ४९ उपसंहराति तस्मादिति यस्माज्ज्ञानेनैवमोक्षस्तस्मादज्ञानाद्भगवत्तत्त्वापरिज्ञानादर्थकाशिषु प्रयोजनत्वेनप्रकाशमानेष्वग्निष्टोमादिलक्षणे
षुकर्मस्वर्थदृष्टिंमाकृथानकुरुइत्यन्वयः तत्प्रवृत्तौनिमित्तमाह श्रोत्रस्पर्शिष्विति अपामसोमममृताअभूमेतिश्रवणेश्रोत्रसुखंस्पृशंतीति श्रोत्रस्पर्शीनितेषु । हेयत्वेकारणंवक्ति अस्पृष्टवस्तुष्विति परमा
त्माख्यवस्तुसंबंधगंधरहितेषु ५० अज्ञानादित्युक्तंविवृणोति स्वलोकमिति येकर्मनिष्ठास्तेयत्रलोकेजनार्दनोदेवोस्तितंस्वलोकंस्वेनप्राप्यंवैकुंठादिस्थानंनविदुरित्यन्वयः अनेनवैकुंठादिस्थानमपि
शमितिनजानंति किमुतहरिमित्यर्थात्ध्वनितमितिज्ञायते अन्यथाविदुश्चेत्याह आहुरिति धूम्रेधूमरतेधूममार्गेधीर्येषांतेधूम्रधियःतत्रनिमित्तमाह अतद्विदइति तस्यवेदस्यतत्त्वंब्रह्मलक्षणंनविदं
तीति कर्मणासहवर्ततइतिसकर्मकस्तम् ५१

कर्मविनान्यन्नवक्तीतिसकर्मकत्वमित्ययमविवेकइत्याह आस्तीर्येति बृहतांबहूनांवधात्संज्ञपनलक्षणात् यष्टाहमितिमानीत्वंकर्मनावैषिप्राचीनाग्रदर्भास्तरणंकृत्वापशुसंज्ञपनमेवजानासिनतुकर्मस्व
रूपमित्यर्थः कुरुकर्मैवतस्मात्त्वंपूर्वैःपूर्वतरंकृतमित्यादिनाविधीयमानंयत्परंकर्मतन्नजानासीत्युच्यते नतुकर्ममात्रं ५२ कल्पोक्तद्रव्यसामग्र्याक्रियमाणस्यकर्मणःकथंपरत्वाभावइतितत्राह तत्कर्मेति
हरेस्तोषोनुग्रहलक्षणोयस्मात्तत्कर्म । तस्मात्ब्रह्मार्पणबुद्ध्याक्रियमाणस्यकर्मणःपरत्वं नद्रव्यसामग्र्या तस्यावरत्वेनदारिद्र्यहेतुत्वात् ननुममापिवेदविद्याधिकारित्वेनकर्मानुष्ठानस्यतत्पूर्वकत्व
मस्तीतितत्राह साविद्येति ययाविद्ययातस्यहरेर्मतिर्ज्ञानमुत्पद्यते साविद्यावेदार्थज्ञानलक्षणानान्याअन्यात्वविद्याकर्मविषयाहेयपक्षइति कोसौहरिर्येनतज्ज्ञानपूर्वकमनुष्ठितंकर्मसफलंस्यादत्राह
हरिरिति दुरितहरणशीलत्वाद्धरिर्देहभृतांजीवानामात्मास्वामीस्वयंसर्वव्यावृत्तःप्रकृतिर्मूलकारणमीश्वरोणिमाद्यैश्वर्यरूपएषांगुणानामधिकरणभूतोयःसहरिरितिज्ञातव्यम् ५३ हरिरेवंविधश्चेत्ततः
किमत्राह तत्पादेति यतोयस्मात्क्षेमोभवेन्नृणांतस्यहरेःपादमूलंशरणंरक्षकं शरणंगृहरक्षित्रोरित्यभिधानं . ननुपित्रादीनांवयासिगतेपुत्रादीनामपिशरणत्वदर्शनात्किंविशिष्योच्यतइतितत्राह सवाइति
भगवत्संपर्कात्पुत्रादीनांप्रियत्वात् हरेःप्रियतमत्वं । कुतइतितत्राह यतइति श्रीनारायणचरणारविंदशरणंगतस्यास्यसंसारिणोऽण्वपिभयंनास्तियतोऽथतस्माद्धरिः पुत्रादेःप्रेष्ठइतिकृत्वापुंस

आस्तीर्यदर्भैःप्रागग्रैःकार्त्स्न्येनक्षितिमंडलम् ॥ ततोबृहद्वधान्मानीकर्मनावैषियत्परम् ५२ तत्कर्महरितोषंयत्साविद्या
तन्मतिर्यया ॥ हरिर्देहभृतामात्मास्वयंप्रकृतिरीश्वरः ५३ तत्पादमूलंशरणंयतःक्षेमोनृणामिह ॥ सवैप्रियतमोह्यस्य
यतोनभयमण्वपि ॥ इतिवेदसवैविद्वान्योविद्वान्स्वगुरुर्हरिः ५४ ॥ नारदउवाच ॥ प्रश्नएवंहिसंछिन्नोभवतःपुरुषर्षभ
अत्रमेवदतोगुह्यंनिशामयसुनिश्चितम् ५५ क्षुद्रंचरंसुमनसांशरणेमिथित्वारक्तंषडंघ्रिगणसामसुलुब्धकर्णम् ॥ अग्रेवृ
कानसुहृदोविगणय्ययांतंपृष्ठेमृगंमृगयुलुब्धकबाणभिन्नम् ५६

स्तत्पादमूलंशरणमित्यन्वयः एवंवेत्तुरेवविद्वत्तानानेवंविदइत्याह इतीति इतिशब्दोहेत्वर्थः यस्माद्धरिस्त्वरणशरणस्यमोक्षादिसर्वपुरुषार्थावाप्तिस्तस्माद्यएवंवेदसवाएवविद्वान्नान्यः कुतः
स्वगुरुःस्वापेक्षिताशेषज्ञानोपदेष्टा तत्रहरेःसन्निधानविशेषात्तत्सामर्थ्यमस्येतिभावेनाह हरिरिति अनेनगुर्वादिशब्दप्रयोगेणदेवादीनांमुख्यविद्वत्तेत्याह ५४ अत्रेति निशामयशृणु ५५ स्वा
भीष्टप्रकाशनायस्वयमेवव्याचष्टे सुमनसामिति सुमनसांसमानधर्माणांपुष्पवत्कोमलशरीराणांशरणआश्रमे अन्यत्रपुष्पाश्रयेवने क्षुद्रंपुष्पमधुगंधवदल्पं किंतत्काम्यकर्मविपाकजंऽवृत्तकर्मफलंवि
षयसुखलेशंजैह्वयोपस्थादिविषयं चरंचरंतं भुंजानमितस्ततोगत्वाविचिन्वंतमन्विच्छंतंतदर्थित्वामिथुनीभूयतदभिनिविष्टचेतनंषडंघ्रिगणसामगानवत्भ्रमरानिकरसुंदरगानवदतिमनोहरस्त्रीजनसंला
पेषुअतितरामत्यंतंप्रलोभितौकर्णौयस्यसतथातं तदेकमग्नश्रोत्रमित्यर्थः कुतोऽग्रेवृकान्वृकसधर्मानसुहृदः असुलक्षणमायुर्हरतोहोरात्रादिकालविशेषानविगणय्यागणयित्वायांतंक्रीडायहेविहरंत
मित्यर्थः पृष्ठेपरोक्षमवस्थितःउपशयेस्थितोलुब्धकसमानःकृतांतःशरसमेनाहष्टेनयमात्मानंपराविध्यति तमिममात्मानंजीवंभिन्नहृदयंमृगपर्यालोचनयालोच्यचद्रष्टुमर्हसीत्यर्थः कथमिवमृगयुहतं
मृगंहरिणमिवेति ५६

मद्वाक्येश्रद्धाचेद्भितमुपदिशामीत्याह सत्वमिति यःपूर्वकर्मठःसत्वंमृगवच्चेष्टितंचेष्टायस्यसतथातं मृगस्येवविषयानन्विच्छतोजीवस्यचेष्टितमितिवा विचक्ष्वपश्य आत्मनस्तवचित्तंपूर्वकृतस्मरणस
मर्थमंतःकरणविशेषमंतःस्थितेहृदिसर्वपापहरेहृन्नाम्निहरौनियच्छतत्रैवस्थापय कर्णधुनींकर्णधारमिवास्थितां चित्तिंबुद्धिंचहरौस्थापय कर्णादींद्रियप्रवृत्तिहेतुभूतांवा कर्णाख्यधुनींवा तत्कथाश्रवणे
बुद्धिंचतद्गुणनिर्णयेवा असत्तमानांविषयिणांयूथस्यगाथाविषयवार्तावदाकारोयस्मिन् तमंगनाश्रमंजहि हंसोनिर्दोषःपरमात्माममशरणमितिकृत्वाप्रीणीहितृप्तोभव यद्वा हंसानांसंन्यासिनांशरणंप्रीणी
हीति क्रमेणसाधनसामग्र्यनुसारेणविरमसंसाराद्विरताभूयाइत्यन्वयः ५७ राजातावदियंतंकालंमयाभाषितं तदस्यहृद्गतंनाभूत्प्रतिवाक्याश्रवणादितिसंशयनिरासायाह श्रुतमिति श्रुतंश्रुति
प्रसिद्धमन्वीक्षितंविचारितमात्मयोग्यज्ञानंयद्भगवानभाषतनैतन्ममोपाध्यायाजानंति तत्रहेतुमाह किंनेति प्रथमंत्वन्मुखाच्छ्रुतंपश्चादन्वीक्षितमाम्रेडितमितिवा ५८ अथकिंतत्राह संशयइति अत्रास्मि
न्नर्थेमेसंशयोनछिन्नःअल्पत्वान्मयानच्छेदितइति नेत्याहतत्कृतइति तत्कृतेतदर्थविषयेमहान्संशयइत्यर्थः। सूक्ष्मत्वेनाज्ञातविषयत्वात् महत्त्वं नतुस्थूलपरिमाणत्वादितिभावेनाह ऋषयइति
कुत्रमुह्यंतीत्यत्राह यत्रेति यत्रसंशयार्थेचक्षुरादींद्रियव्यापारागोचरत्वादित्यर्थः अतस्त्वांपृच्छामीतिशेषः ५९ कोसौसंशयइत्यत्राह कर्माणीति इहपुमान्येनदेहेनकर्माण्यारभतेतस्यप्रारब्धकर्मक्षयेतं

अस्यार्थःसुमनसांसमानधर्माणांस्त्रीणांशरणेआश्रमेपुष्पमधुगंधवत्क्षुद्रकाम्यकर्मविपाकजंकामसुखलवंजैह्व्योपस्थादिविचिन्वंतंमिथुनीभूयतदभिनि
वेशितमनसंषडंघ्रिगणसामगीतवदतिमनोहरवनितादिजनालापेष्वतितरामतिप्रलोभितकर्णमग्रेवृकयूथवदात्मनआयुर्हरतोऽहोरात्रांतान्कालविशेषान
विगणय्यगृहेषुविहरंतंपृष्ठतःपरोक्षमनुप्रवृत्तोलुब्धकःकृतांतःशरेणयमिहपराविध्यतितमिममात्मानमहोराजन्भिन्नहृदयंद्रष्टुमर्हसीतियथामृगयुहतंमृगमि
ति॥सत्वंविचक्ष्वमृगचेष्टितमात्मनोंतश्चित्तंनियच्छहृदिकर्णधुनींचचित्तिम्॥जह्यंगनाश्रममसत्तमयूथगाथंप्रीणीहिहंसशरणंविरमक्रमेण५७॥ राजोवाच॥
श्रुतमन्वीक्षितंब्रह्मन्भगवान्यदभाषत ॥ नैतज्जानंत्युपाध्यायाःकिंनब्रूयुर्विदुर्यदि ५८ संशयोत्रनमेविप्रसंछिन्नस्तत्कृतेमहान् ॥ ऋषयोपिहिमुह्यं
तियत्रनेंद्रियवृत्तयः ५९ कर्माण्यारभतेयेनपुमानिहविहायतम्॥ अमुत्रान्येनदेहेनजुष्टान्यसकृदश्नुते ६० इतिवेदविदांवाचःश्रूयंतेतत्रतत्रह ॥ कर्मचक्रि
यतेप्रोक्तंपरोक्षंनप्रकाशते ६१ ॥ नारदउवाच ॥ येनैवारभतेकर्मतेनैवामुत्रतत्पुमान् ॥ भुंक्तेह्यव्यवधानेनलिंगेनमनसास्वकम् ६२

देहंविहायामुत्रपरलोकेसपुमान्येनप्रेताख्येनजुष्टानिकर्मफलानिअश्नतइतियत्कथमन्यःकर्तान्योभोक्तेत्यकृताभ्यागमादिदोषापत्तेः ६० तदप्रामाणिकमितिचवक्तुंनशक्यमित्याह इतीतिश्रूयं
तइत्यनेनश्रुतयःस्मृतयोपिगृह्यंते तेनाबालवृद्धप्रसिद्धिर्द्योत्यते अतोमहान्संशयइत्यर्थः अनेनदेहव्यतिरिक्तात्मसद्भावेकथमितिसंशयोयुज्यते सएवनास्ति देहभस्मीभावेनतस्यापिभस्मीभूत
त्वादितिमतमपिप्रत्युक्तं आगमस्याप्रामाण्ये तद्गुरुवाक्यस्यापिसमन्यायःस्यादिति किंच स्वर्गादिकामैर्जनैःकर्मक्रियते तत्परोक्षंपश्चान्नप्रकाशतेनष्टत्वादतस्ताहशंकर्माऽर्थफलंनददाति नहिमृतः
पितापुत्रायानीयकदलीफलंराति।तियुज्यतइत्ययमन्योपिसंशयः ६१ प्रथमप्रश्नंप्रत्याह येनेति लिंगंशरीरंतस्यमनःप्रधानत्वाल्लिंगेनमनसेतिसामानाधिकरण्यं मनसाप्रेरितेनयेनलिंगेनदेहेन
पुमान्कर्मारभतेतेनैवामुत्रस्वर्गादावव्यवधानेनप्रत्यक्षेणकालेनस्वकंकर्मभुंक्तेतत्फलंसुखदुःखलक्षणमनुभवतीत्यन्वयः स्थूलशरीरस्यलिंगनिमित्तत्वात्तन्नाशेपिकर्तुर्लिंगस्याविनष्टत्वान्नाकृताभ्यागमा
दिदोषप्रसक्तिःसूक्ष्मरूपेणसत्त्वात् । लिंगेनलीनकर्मफलज्ञापकेनमनसातत्फलानुभवोपपत्तेरितिवा ६२

कथमिवस्वप्नकालेश्वसंतंप्राणवृत्तिमंतंपर्यंकेशयानंदृष्टिविषयंदेहमुत्सृज्यपुरुषोभोक्तातादृशेनशयनेशयानशरीरसदृशेनइतरेण पतितदेहाविलक्षणदेहेनवात्मानिमनस्याहितंसंनिहितंकर्मभुंक्तेएतदुक्तंभवति स्थूलदेहस्यशय्यायांशयनत्वात्स्वप्नभोगनिमित्तकर्मोपार्जितेनदेहेनलिंगिनएवयथाभोक्तृत्वमत्राप्येवमिति आत्मन्याहितमित्यनेनद्वितीयप्रश्नोपिप्रत्युक्तइतिज्ञायते ६३ ननुसाक्षात्कर्तृत्वंभोक्तृत्वंमनसोलिंगस्योतोभयोस्तद्वतोवेतिसंशयनिरासार्थमाह ममेति यःपुमान्ममेदंसुखसाधनमितिमनसासंकल्प्यकृष्णमित्रस्याहिताग्नेःपुत्रोसावहंनारायणमित्रोयाज्ञिकःकथंस्यामितिवाचावदन्यद्यत्कर्मकर्तुंगृह्णीयादुपादत्तेसएवपुमांस्तद्राद्धंसिद्धंकर्मभुंक्ते येनभुक्तशेषेणकर्मणापुनर्भवःपुनरुत्पत्तिर्मर्त्येलोकइतिशेषः तस्मात्साक्षात्कर्ताभोक्ताचपुरुषएवतत्रमनसोंतरंगत्वंमितिभावः अनेनजन्मांतरेपिकर्मणःफलदातृत्वप्रतीतेःकिंपुनःपरलोकइतिदर्शितं ६४ ननुकर्मणोदेहाद्यारंभकत्वंकथंसंजाघटीतिति आचरणानंतरक्षणएवनष्टत्वादतएवमनसोप्यंतरंगत्वमितिनशक्यं कृष्णचापमुक्तशरवेगसंस्कारवत्कर्मणोपिकार्यकारणक्षमत्वोपपत्तिरंतरंगत्वंमनसोन्वयव्यतिरेकसिद्धमित्यभिप्रेत्याह यथेति उभयेषांज्ञानकर्मेंद्रियाणामुभयविधैरीहितैश्चित्तमंतःकरणापरपर्यायमस्तीत्युनुमीयते तस्मिन्सतिज्ञानकर्मचोत्पद्यते असतिआलोकादिसाधनसामग्र्यांसत्यामपि । तस्मात्तन्नियामकमंतःकरणंकिंचिदस्तीतिज्ञायतेयथा तथांतःकरणवृत्तिविषयेषुमनोव्यापारैःप्राग्देहजातंकर्मदृशंशुक्लरक्तकृष्णान्यतममितिलक्ष्यतेऽनुमीयतेदेहवतएवेदृशज्ञानसंभवात्कर्मणोदेहाद्यारंभकत्वंचयुक्तमितिबोद्धव्यं ६५ किंचप्राणिनांप्रवृत्तिवैचित्र्यंदृश्यतेतदपिवासनावैचित्र्यविनानचघटतइत्यभिप्रायेणाह नानुभूतमिति यद्रूपंयस्यशुक्लादिरूपंतद्यद्रूपं

शयानमिममुत्सृज्यश्वसंतंपुरुषोयथा ॥ कर्मात्मन्याहितंभुंक्तेतादृशेनेतरेणवा ६३ ममेतिमनसायद्यदसावहमितिब्रुवन् ॥ गृह्णीयात्तत्पुमान्राद्धंकर्मयेनपुनर्भवः ६४ यथानुमीयतेचित्तमुभयैरिंद्रियेहितैः ॥ एवंप्राग्देहजंकर्मलक्ष्यतेचित्तवृत्तिभिः ६५ नानुभूतंक्वचानेनदेहेनादृष्टमश्रुतम् ॥ कदाचिदुपलभ्येतयद्रूपंयादृगात्मनि ६६ तेनास्यतादृशोराजन्लिंगिनोदेहसंभवः ॥ श्रद्धस्वाननुभूतार्थंनमनःस्प्रष्टुमर्हति ६७ मनएवमनुष्यस्यपूर्वरूपाणिशंसति ॥ भविष्यतश्चभद्रंतंतथैवनभविष्यतः ६८

यादृग्यज्जातिलक्षणंयस्यतद्यादृक् यद्वस्तु स्वात्मनिकचित्क्वस्मिंश्चिद्देशेकदाचित्कालेऽनेनेदृग्देहेनादृष्टमश्रुतंवानुभूतमननुभूतंवात्मानिमनस्युपलभ्येततेनोपलंभेनपूर्वस्मिन्जन्मनिदृष्टंश्रुतमनुभूतमित्युपलभ्येतबुध्येतनत्वन्यथा । अनेनदेहेनजाग्रदवस्थायामदृष्टमश्रुतमननुभूतंनोपलभ्येतस्वप्नेकिंतुस्वप्नेदृष्टादिकमेवयथातथापूर्वस्मिन्जन्मनिदृष्टादिकमनेनदेहेनपश्यतीतिवा ६६ ननुकर्मणोदेहाद्यारंभकत्वंकथमित्यस्यद्योद्यस्यपरिहारःकथंस्फुटितइतितत्राह तेनेति यतःपूर्वकर्मानुसारेणदर्शनादिकंतेनतदनुसारेणास्यलिंगिनोदेहसंभवः तादृशःपूर्वानुभूतइतिश्रद्धस्वास्तिकुरु कुतइत्यतउक्तमेवार्थंस्मारयति अननुभूतार्थमिति यतःपूर्वस्मिन्जन्मन्यननुभूतोयोर्थस्तंमनःस्प्रष्टुंनार्हतिइत्यन्वयः ६७ ननुदेहवन्मनसोप्यनेकत्वेकथमेतदुक्तंघटतइत्याशंक्यामोक्षांलिंगशरीरवद्बाह्यांतःकरणमेकमेवेत्यभिप्रेत्याह मनइति मनसोनेकत्वेपूर्वानुभूतहितादिज्ञापनमनुपपन्नंत्यादित्यर्थः रूपंशब्देपशीश्लोकेग्रंथावृत्तौहितादिष्वितियादवः स्वानुभवसिद्धःसर्वानुभूतार्थोपि । कर्मणोदेहाद्यारंभकत्वंयुक्तंमनसासंयुक्तत्वादित्यतोवाह मनइति यथोततवमनोभविष्यतस्तथानभविष्यतःस्ववस्तुनोविषयंभद्रंशंसतिज्ञापयति तथामनुष्यस्यमनःपूर्वरूपाणिसात्त्विकानिकर्माणिशंसति यथानभविष्यतोवर्तमानस्यतवमनःपूर्वरूपाणिशंसत्येवंभविष्यतोपितावद्भद्रंज्ञापयतीतिवा ६८

१ कथंसंजाघटीतिपूर्वेणान्वयः २ यथामनएवपूर्वरूपाणिशरीराणिशंसतिज्ञापयति तथैव भविष्यतःस्वर्गादिकंमच्छतः नभविष्यतःवर्तमानस्यचतेतवभद्रंपूर्वोत्तरकालगतंपुण्यरूपमदृष्टंमनएवशंसतिअस्तीतिज्ञापयति कथमन्यथा तवेदानींसाम्राज्याधिपत्यमुत्तरत्रस्वर्गप्राप्तिःस्यादित्याशयः

७०
SGDF
Sri Gargeshwari Digital Foundation

ननुयदवादिपूर्वानुभूतमेवमनःस्प्रष्टुमर्हतिनाननुभूतामितितदयुक्तं यतःस्वप्नादौस्वशिरश्छेदनादिकमत्यंताहष्टचरंदृश्यतेतत्राह अदृष्टमिति इहजन्मन्यदृष्टमश्रुतंवाक्कचिन्मनसिदृश्यतेतद्यथाघटतेतथा नुमंतव्यंघटनीयं कथमत्राह देशेति देशकालक्रियाआश्रयोयस्यदर्शनस्यतत्तथादेशांतरेशिरःकालांतरेछेदनक्रियांदृष्ट्वास्वप्नेतयोःसामानाधिकरण्यंभ्रांत्यापश्यतीति अथवानानुभूतमित्यनेनयदवा दित्तदनेनानुमीयते अत्रजन्मनियददृष्टादिकंदृश्यतेमनासितद्यथापूर्वजन्मनिदृष्टंश्रुतमनुभूतंतथानुमानंकर्तव्यं जाग्रतिबाह्यालीप्रदेशेपूर्वाह्लेचरंतमश्वंदृष्ट्वास्वप्नेपथातदवस्थंपश्यतितथाकर्माण्यपित थार्यावर्तेद्वापरेसंभूतोर्जुनःपंचतामुपेत्यकेरलदेशेकलिकालेजातोयदत्राहष्टादिकंपश्यतिकरोतिवातदार्यावर्तेद्वापरेनुष्ठितमितिज्ञातव्यं दृष्टश्रुतदर्शनादिमात्रएवदृष्टांतइतिनविरोधः ६९ ननुयदि पूर्वदृष्टादिकमेवेदानींदृश्यतेश्रूयतेइतिमतंतर्हिजन्मनामनंतत्वादहमहमिकयायुगपद्दर्शनादिकंप्रसज्येततदयुक्तंविरोधादत्राह सर्वइति येसर्वेशब्दादयोविषयाबहुजन्मस्विंद्रियद्वारेणमनसिप्रविष्टावासनारू पेणस्थितास्तेसर्वेंद्रियगोचराविषयाः सुमनसोदेवस्यहरेरिच्छयाक्रमानुरोधेनक्रममनुसृत्यमनसिजीवेवर्गशआयांति जवाद्वेगात्यांतिचनदीप्रवाहवदित्यन्वयः इंद्रियद्वारेणमनसिप्रविष्टाइंद्रियगो चराःशब्दादयः क्रमशोजीवेवर्गशः आयांतिपुनःसुष्ठुमनसोवेगाद्यांतिच सर्वपदार्थानामिहजन्मनिजन्मांतरेवामनसींद्रियद्वारेणप्रवेशात्संस्काररूपेअस्थिरत्वादिहादृष्टस्यवाश्रुतस्यानुभवोयुज्यते इत्यतोवाह सर्वइति दवीयसिदेशेकालेचानुभूतानामधुनानुभवःकथंघटतइत्यतोवाह सर्वइति अचिंत्यानंतेश्वरशक्तिःप्रयोजकेतिसंतोष्टव्यम् ७० जीवस्यमनआदेःस्वरूपत्वेऽनेकजन्मानुभूतपदार्थ संस्काराणामनेकत्वेनतदनुभवेनैवकालगमनात्कदाचिन्मुक्त्यनुदयेनयावज्जीवंसंसारएवस्यात् अस्वरूपत्वेलिंगशरीरादेः स्थूलदेहनाशएवनाशसंभवेनपूर्वदृष्टादिपदार्थदर्शनाद्यनुपपत्तिरितितत्राह

अदृष्टमश्रुतंचेहक्वचिन्मनसिदृश्यते ॥ यथातथानुमंतव्यंदेशकालक्रियाश्रयम् ६९ सर्वैक्रमानुरोधेनमनसींद्रियगोचराः ॥ आयांतिवर्गशोयांतिसर्वेसु मनसोजवात् ७० सत्त्वैकनिष्ठेमनसिभगवत्पार्श्ववर्तिनि ॥ तमश्चंद्रमसीवेदमुपरज्यावभासते ७१ नाहंममेतिभावोयंपुरुषेव्यवधीयते ॥ तावद्बुद्धि मनोक्षार्थगुणव्यूहोह्यनादिमान् ७२ सुप्तिमूर्च्छोपतापेषुप्राणायनविघाततः ॥ नेहतेहमितिज्ञानंमृत्युप्रज्वारयोरपि ७३

सत्त्वैकनिष्ठइति सत्त्वोजीवस्तदेकनिष्ठेतद्रूपेभगवत्पार्श्ववर्तिनिभगवद्विषयेमनसिइदंलिंगशरीरादिकमुपरज्यस्वेच्छयासंगमय्यावभासते भिन्नतयेतिशेषः कथमिवचंद्रमसितमोराहुरिवमेघांधकारो वा लिंगशरीरादेरस्वरूपत्वेपिभगवदपरोक्षज्ञानंविनास्थूलदेहनाशएवनाशाभावाच्चिरायुष्ट्वेनास्थितिसंभवात्पूर्वकर्मनिमित्तसुखदुःखानुभवोघटतइतिभावः यद्वा सत्त्वगुणस्यैकत्वनिष्ठोत्कर्षोयस्मिंस्त त्सत्त्वैकनिष्ठंतस्मिन्भगवत्पार्श्ववर्तिनीत्यनेनसत्त्वगुणोत्कर्षलक्षयति अन्यथातमस्यादेवंविधमनसिइदंदुःखादिकमुपरज्यावभासतेप्रतीयतेनिदर्शनंव्याख्यातार्थम् ७१ नन्वेवंतर्हिकियंतंकालमिदंदुः खादिकमवभासतेइतितत्राह नाहमिति यावत्पुरुषेऽनादिमानयमहंममेतिभावोनव्यवधीयतेतिरोहितोनष्टोनभवति तावद्बुद्धिमनोक्षार्थगुणव्यूहःसंसारोपिनतिरोहितोभवतीत्यर्थः अनादिमानिति व्यूहविशेषणंवाअनेनसंसारस्यामिथ्यात्वंनिराचष्टे अक्षमिंद्रियंश्रोत्रइत्यभिधानम् ७२ ननुयद्यहंममेतिभावतिरोभावःपुरुषार्थस्तर्हि सुप्त्यादौतत्सद्भावात्तदनुदयः कथमत्राह सुप्तीति सुप्त्यादौ प्राणानामिंद्रियाणामयनस्यप्रवृत्तिलक्षणस्यविघाततोनिरोधादभावादहमितिज्ञानंनेहतेनाभिव्यज्यते तथापिस्वरूपेंद्रियेणास्त्येवसुखमहमस्वाप्समित्युत्तरकालीनानुभवदर्शनात्तदातदभावेपरामर्शा नुपपत्तेः उपतापः पुत्रादिवियोगदुःखानलज्वालाप्रवेशनं मृत्युरपमृत्युरत्रदेवदूतैर्नीतस्यकिमर्थमानीतोयंनयतस्वस्थानमितिवचनात् मत्यानयनदर्शनानुभवात् साक्षाद्देहवियोगलक्षणमरणेह मितिज्ञानसंदेहात् प्रज्वारोतिरोगावस्था ७३

SGDF Sri Gargeshwari Digital Foundation

ननुहंतैवंतर्हिगर्भादेरुत्क्रांतस्यतत्कालीनसुखदुःखपरामर्शादर्शनादत्राह गर्भइति गर्भेवर्तमानस्यबाल्येवयसिस्थितस्यायूनःबालस्यपुंसोऽपौष्कल्यादनुपचितावयवत्वात् पंचपंचज्ञानकर्मभेदेनसंख्या तानींद्रियाणिमनश्चेत्येकादशविधमेकादशभ्योविधीयतेउत्पाद्यतेऽहंममेतिज्ञानाख्यंलिंगंलक्षणंनदृश्यते नज्ञायतेउक्तहेतोरित्यन्वयः यावान्यावाञ्छरीरस्योपचयस्तावादींद्रियाणांपौष्कल्यंतस्मिन्नुपचिते तेषामितिनियमात्तन्निमित्तमहंममेतिज्ञानंतदभावेतदभावइति गर्भादौतदभावइत्यर्थः अत्रास्पष्टमात्रेदृष्टांतमाह चंद्रमसइति यथाऽमावास्यायांचंद्रमसोलिंगंशरीरंनदृश्यतेतथेति ७४ ननुचंद्रबिं बावरणनिवृत्तिवदयंगर्भवासादिलक्षणःसंसारोपिकालेनस्वतोनिवर्ततइतितत्राह अर्थइति अपिसंभावितेज्ञानलक्षणेर्थेऽविद्यमानेसत्यस्यजीवस्यसंसृतिर्ननिवर्ततेहियस्मात्तस्मान्निवर्तकमपेक्षितमित्य न्वयः निवर्तकानुदयेनिमित्तमाह ध्यायतइति शब्दादिविषयध्यानंप्रतिबंधकमित्यर्थः स्वप्नेप्रवर्तमानस्यपुंसःप्रबोधाद्यभावेऽनर्थागमोयथाननिवर्तते तथेति विषयध्यानेनसंसारपरंपरास्यादित्य भिप्रायेणानर्थागमइत्युक्तं चंद्रबिंबावरणानांमेघादीनांवाय्वादिसद्भावएवकारणंप्रत्यक्षसिद्धमितिज्ञातव्यं ७५ देहात्मबुद्धेःसंसारस्यतत्त्वेनप्रतीतिःकथमित्याशंक्यपोन्यग्न्योरिवाचिदचितोःसंयो गलक्षणसंपर्कादौपचारिकीयंप्रतीतिरित्यभिप्रेत्यतत्स्वरूपंनिरूपयति एकमिति एकंलिंगंलिंगशरीरंषोडशविस्तरं कथं त्रिवृत्प्राणेंद्रियांतःकरणभेदेनात्रिविधं अनेनषोडशविस्तरत्वमवगतं कथं पंच विधंत्रिधाभिन्नयापंचविधयापंचप्राणाःपंचज्ञानेंद्रियाणिपंचकर्मेंद्रियाणीतिपंचदशविधंमनसाषोडशविधं तदुक्तं प्राणेंद्रियांतःकरणभेदेनात्रिविधंमतं । पंचपंचैवतेसर्वेप्राणाबुद्धींद्रियाणिच । कर्मेंद्रिया

गर्भेबाल्येप्यपौष्कल्यादेकादशविधंतदा ॥ लिंगंनदृश्यतेऽयूनःकुह्वांचंद्रमसोयथा ७४ अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते ॥ ध्यायतोविषयानस्यस्वप्ने नर्थागमोयथा ७५ एकंपंचविधंलिंगंत्रिवृत्षोडशविस्तरम् ॥ एषचेतनयायुक्तोजीवइत्यभिधीयते ७६ अनेनपुरुषोदेहानुपादत्तेविमुंचति ॥ हर्षंशोकं भयंदुःखंसुखंचानेनविंदति ७७ यथातृणजलूकाचनोपयात्यपयातिच ॥ नत्यजेन्म्रियमाणोपिप्राग्देहाभिमतिंजनः ॥ यावदन्यंनविंदेतव्यवधानेनक र्मणाम् ७८ मनएवमनुष्येंद्रभूतानांभवभावनम् ॥ यदक्षैश्वरितंध्यायन्कर्माण्याचिनुतेऽसकृत् ७९ सतिकर्मण्यविद्यायांबंधःकर्मण्यआत्मनः॥ अतस्तद पबाधार्थंभजसर्वात्मनाहरिम् ८०

णिचतथावस्मात्पंचविधंस्मृतं । लिंगंषोडशकंप्राहुर्मनसासहतत्पुनरिति एषषोडशविस्तारोदेहश्चेतनयायुक्तोजीवःप्राणीत्युच्यते इतिशब्दोत्रसमाप्तिवचनः ॥ ७६ ॥ अनेनलिंगशरीरेणस्थूलदे हानुपादत्ते अनेनस्थूलदेहेनहर्षादिकमाप्नोति ७७ ननुयदानेनसंसारीस्थूलदेहानुपादत्तेतदाहर्षादिकंविंदते यदातान्मुंचतितदानिवृत्तहर्षादित्वेनमुक्तिःस्यादित्यत्राह यथेति तृणजलूकाकीट विशेषः यावदन्यत्तृणंनविंदेततावत्त्रोपयाति यावद्विंदेततावदेवापयातिपूर्वंगृहीतंविसृज्यपश्चात्तृणांतरंयथायातितथाऽयंजनोम्रियमाणोपिपूर्वदेहाभिमतिंनत्यजेद्देहांतरंप्राप्यपूर्वंत्यजतीत्यर्थः किमिति झटितिनत्यजतीतितत्राह व्यवधानेनेति कर्मणांप्राचीनानांव्यवधानेनविलंबफलदातृत्वेनहेतुनाअनेकेषांपूर्वेषांकर्मणांसत्त्वेनभगवत्प्रसादमंतरेणविनाशानुपपत्तेः सर्वदेहवियोगासंभवेनमुक्त्यनुदयइति भावः ७८ अनर्थदर्शनेरजातयाविरक्त्याकर्माकरणेनतत्समाप्तेर्देहारंभककर्माभावेनदेहाभावान्निर्वाणोपपत्तिरितितत्राह मनएवेति मनःसंप्रयुक्तैरक्षैश्चरितंकर्मध्यायंस्तदनुसारेणासकृत् कर्माण्या चिनुतेकरोतीतियत्तस्मान्मनएवभूतानांभवंसंसारंजन्मवाभावयतिउत्पादयतीतिभवभावनंमनःप्रधानत्वद्योतनार्थएवशब्दः नाहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृदितिस्मृतेः ॥ ७९ ॥ अविद्यायां विषयेच्छायांसत्यांकर्मभवतितास्मिन्सत्यात्मनोजीवस्यबंधः कर्मण्यःकर्महेतुकइतियदतस्तदपबाधार्थंकर्मनिवृत्त्यर्थंसर्वात्मनापुत्रादिस्नेहत्यागेनहरिंभजेत्यन्वयः एनंजीवंबंधयामीतीश्वरेच्छायांवा तस्ये च्छायाअपसरणार्थंनबंधयामीति ॥ ८० ॥

SGDF Sri Gangeshwari Digital Foundation

भजनंनामगुणोपसंहारस्तदर्थंतद्गुणानाह पश्यन्निति यतोहरेर्विश्वस्यस्थित्यादयःस्युस्तद्विश्वंतदात्मकंतद्व्याप्तंतदधीनसत्ताकंपश्यंश्चितयन्नितिपूर्वेणान्वयः तत्तदधिकार्युपास्तियोग्यानांगुणानां
स्थित्यादावंतर्भावात्तदर्थंस्थित्यादिग्रहणम् ८१ नन्वेवमुपासीनस्यकदासाधनसामग्र्यामुक्तिःस्यादित्यत्राह भक्तिरिति । कृष्णेपूर्णानंदेहरावपरोक्षज्ञानजननीभक्तिः उपलक्षणमेतत् स्वगुरुमार
भ्यब्रह्मांतेषुस्वोत्तमेषुतत्तद्योग्यतानुसारेणानिष्कपटाभक्तिश्च जीवेषुस्वावरेषुयाचितस्यद्रवीभावतादया दयदानगतिशोषणोष्वितिधातोःतत्त्वविरोधिषुशोषणहेतुर्द्वेषश्चात्मनिस्वस्वरूपेऽकुंठज्ञानंहारिद
र्शनानंतरंदेहादिव्यतिरेकेणज्ञानानंदरूपोहमित्यव्यवधानेननिरंतरानुभवलक्षणमितीयंसाधनसामग्रीयादियदास्यात्तदाकालव्यवधानमंतरेणात्मनस्तवसंसारादपवर्गःक्रियासाध्यफलावाप्तिःस्यादित्यन्व
यः देहादिव्यतिरेकेणचिद्रूपोहमितिस्फुटम् । सदैवानुभवोभक्तिर्विष्णौतद्दर्शनादनु । यस्यासौमुच्यतेक्षिप्रंसंसारान्नात्रसंशयइत्यनेनहेतुवाचितुशब्दसूचितेनोक्तएवार्थोनाद्वैतार्थः ८२ ननुप्रथमभाविवैरा
ग्याख्यसाधनमंतरेणभक्त्यादिनाकथंमुक्त्युदयइत्यतःसिंहावलोकनन्यायेनतदाह अदृष्टमिति अदृष्टंस्वर्गादिफलंसस्यादिदृष्टफलवन्नंक्ष्येन्नश्यति भूतमुत्पन्नामिदंसर्वंजगदन्यथाऽनित्यंकथमिवस्वप्न
दृष्टंपदार्थसमंनश्वरत्वात्स्वप्नसमंनतुबोधनिवर्त्यत्वात् संसारस्थमिदंसर्वमनित्यत्वाद्वृथायतः । अतःप्राहुःस्वप्नसमंप्राज्ञाजगदिदंमृषेतिवचनान्नमिथ्यात्वंप्रपंचस्योतिअस्तुभूतमनित्यत्वात्स्वप्नसमंभविष्य
च्चस्वप्नसमंनस्यादित्याशंक्ययथाभूतमनित्यत्वात्स्वप्नसमंतथाभविष्यच्चसर्वमनित्यत्वेनस्वप्नसममित्याह भूतमिति सुप्तशब्दस्यकथंस्वप्नार्थत्वमपर्यायित्वादितीयमाशंका सुषुप्तिस्वप्नयोश्चैवस्वर्गव्योम्नो
स्तथैवच । अन्योन्यनामताज्ञेयामनोबुद्ध्योस्तथैवचेत्यनेनपरिहर्तव्येति सर्वमनित्यंचेन्नित्यंवस्तुकिंतदाह सर्वरहोरहइति सर्वरहःसर्वशास्त्रप्रतिपाद्येषुरहस्यंगुरूपदेशत्वाद्रहइतिस्वभक्तदोषात्स्वयंच

पश्यंस्तदात्मकंविश्वंस्थित्युत्पत्त्यप्ययायतः ८१ भक्तिःकृष्णेदयाजीवेष्वकुंठज्ञानमात्मनि ॥ यदिस्यादात्मनोभूयादपवर्गस्तुसंसृतेः ८२ अदृष्टंदृष्टव
न्नंक्ष्येद्भूतंस्वप्नवदन्यथा ॥ भूतंभवद्भविष्यच्चसुप्तंसर्वरहोरहः ८३ ॥ मैत्रेयउवाच ॥ भागवतमुख्योभगवान्नारदोहंसयोर्गतिम् ॥ प्रदर्श्यह्यमुमामंत्र्यसि
द्धलोकंततोगमत् ८४ प्राचीनबर्हीराजर्षिःप्रजासर्गाभिरक्षणे ॥ आदिश्यपुत्रानगमत्तपसेकपिलाश्रमम् ८५ तत्रैकाग्रमनावीरोगोविंदचरणांबुजम् ॥
विमुक्तसंगोनुभजन्भक्त्यातत्साम्यतामगात् ८६ एतदध्यात्मपारोक्ष्यंगीतंदेवर्षिणानघ ॥ यःश्रावयेद्यःशृणुयात्सलिंगेनविमुच्यते ८७

निर्दोषतयासदास्थितंरहोब्रह्म तदुक्तं रहोब्रह्मतथायज्ञःस्वःसत्यमितिगीयतइति नित्यनिर्दोषंब्रह्मेतरत्सर्वमनित्यमसारंचेति विज्ञानंवैराग्यमितिभावः विरक्त्याभक्तिस्तयागुणोपसंहारलक्षणमुपास
नंतेनापरोक्षज्ञानंतेनश्रीनारायणप्रसादस्तेनस्वयोग्यमुक्तिरितिक्रममुल्लंघ्य वैराग्यस्यसर्वत्रानुसंधानार्थंपश्चादप्युक्तमितिज्ञातव्यम् ८३ उपसंहरति भागवतमुख्यइति हंसयोर्जीवपरमात्मनोर्गतिंस
च्चिदानंदलक्षणांहरेर्जगदुत्पत्त्यादिलक्षणांजीवस्यतदधीनत्वादिलक्षणांवा सिद्धजातिषुनारदस्यप्राधान्यद्योतनायप्रथमपादस्याक्षराधिक्यम् ८४ सर्गःस्वभावनिर्मोकनिश्चयाध्यायसृष्टिष्वित्याभिधानात्
प्रजानांस्वभावविद्याधर्मादिपुरुषार्थरक्षणे तत्परिपंथिनिरासेनेतिशेषः ८५ विमुक्तसंगोनिष्कामस्तस्यहरेःसाम्यतांनिर्दोषत्वलक्षणाम् ८६ एतस्येतिहासस्याभ्यासेनकिंफलमुदेतियेनायमवश्यं
ज्ञातव्यःस्यादन्यथानारदेनबाललीलाकथावद्विनोदार्थमुक्तंफलानुक्तेरितिपरीक्षितोहार्दचोद्यंशुकःपरिहरतीत्याह एतदिति अधिकात्मनःपरमात्मनोधिगतात्मनःप्रत्यक्षासिद्धस्यजीवात्मनोवास्वरूपंपा
रोक्ष्यंपरोक्षतयाशब्दलक्षणतयागीतं शब्दितंनसाक्षादुक्तंदेवप्रियत्वात् परोक्षप्रियाइवहिदेवाइतिश्रुतेरित्यर्थः देवर्षिणेत्यनेननारदस्यविनोदकथाकथनस्वभावोनास्तीतिध्वनयति लिंगेनशरीरेणमु
च्यतेरहितोभवतीत्यनेनतृतीयावचनेनपूर्वमपिस्वरूपाद्भिन्नमितिध्वनयति स्वरूपभूतदेहेनसहसैवगच्छतीतिच सोनानंदाद्विमुक्तआनंदीभवतीतिश्रुतेः ८७

१ वृथायतइत्येतन्मृषेत्यस्यव्याख्यानम् मृषाश्रुबिंदूनीतिवत्

SGDF
Sri Gangeshwari Digital Foundation

नकेवलमिदंप्राचीनबर्हिषःप्रयोजनंकिंतुसर्वेषामपीतिभावेनपुनरुक्तंविशिनष्टि १ एतदिति मुकुंदस्ययशसासहितमेतत्पुरंजनोपाख्यानमात्मशौचमात्मनोमनसःशुचितायस्मात्तत्तथा पारमेष्ठ्यंपर मेष्ठिनःसर्वोत्तमस्यहरेर्ज्ञप्तौपरमसाधनमधिगच्छतिगुरोःसकाशाज्जानाति भवेसंसारेयस्मिन्जन्मानिजानातिअस्मिन्नितिवा । अनेनसंसारभ्रमएवनिवार्यमे नतुतद्बंधइतिमंदाशंकांनिवारयति मुक्ते ति ८८ शिष्टजनेष्वेकेनमैत्रेयेणाधिगतत्वादेतच्चावश्यमधिगंतव्यमितिभावेनाह अध्यात्मेति मयामैत्रेयनाम्ना गहनत्वादद्भुतमिदंनारदेनप्राचीनबर्हिषेउपादिष्टमध्यात्मपारोक्ष्यमधिकात्गुरुमुखा दधीतमेवतवोपदिष्टमतएवत्वयाप्यतिश्रद्धयाधीत्याभ्यसनीयमितिशेषः नन्वेतदधिगमेनयद्विवेदविषयोपिसंशयाश्छिन्नःस्यात्तर्ह्यधिगंतव्यांतराभावेनधन्यःस्यामतःकथंनिर्णयःस्यादत्राह एवमिति यःपुंसोजिज्ञासोस्त्रय्यआश्रयस्त्रिवेदीविषयःसंशयोध्यात्मस्वरूपेछिन्नएवामुत्राधिदैवादिस्वरूपेचसंशयोममछिन्नोतएवतवापिछिन्नःस्यादितिशेषः अनेनपुरंजनोपाख्यानस्यवेदविषयत्वप्रतीतेस्तदति श्रद्धयाऽध्येयमितिसिद्धं यद्वा । एतदध्यात्मपारोक्ष्यमधिगतंयथा एवंत्रयीचाधिगताएकविषयात् ततःकिंफलमत्राह आश्रयइति पुंसआश्रयइहामुत्रचसंशयश्छिन्नोभवतीत्येतत्फलंभवतीत्यर्थः अतिगहनंजलनिधिवत्क्षुराग्रमिवदुर्ग्रहंनिशितं तीक्ष्णंपुरंजनोपाख्यानंव्याख्याछलेनमयातारीतरणिरिवव्यामेतलं पवनात्मजइवपयोराशिंक्षुरधारामिवनिगदतो (?) तारिषमध्यात्मपारोक्ष्यम् ८९ इ तिश्रीभागवतेमहापुराणेच०विज०टी०एकोनत्रिंशोध्यायः ॥ २९ ॥ ७ ॥ अव्यक्तस्वभावोहरिस्तपआदिसाधनसामर्थ्येनप्रसन्नोव्यक्तोभवतीत्येतद्रुद्राद्युत्तमत्वंचनिरूप्यतेस्मिन्नध्याये तत्रपूर्वप्रस क्तमप्येयंविस्तरतःश्रोतुकामोविदुरोमैत्रेयंपृच्छति ।येत्वयेति रुद्रगीतेनसदाशिवोपदिष्टेनस्तोत्रेणहरिंप्रतोष्यकांसिद्धिंपुरुषार्थरूपांप्रापुरित्यन्वयः १ विष्णुतद्भक्तभक्तानांसिद्धिरस्त्येवसातुकीदृशी

एतन्मुकुंदयशसाभुवनंपुनानंदेवर्षिवर्यमुखनिःसृतमात्मशौचम् ॥ यःकीर्त्यमानमधिगच्छतिपारमेष्ठ्यंनास्मिन्भवेभ्रमतिमुक्तसमस्तबंधः ८८ अध्यात्म पारोक्ष्यमिदंमयाधिगतमद्भुतम् ॥ एवंत्रय्याश्रयःपुंसश्छिन्नोमुत्रचसंशयः ८९ ॥ ॥ इतिश्रीभागवतेचतुर्थस्कंधेएकोनत्रिंशोऽध्यायः ॥ २९ ॥ वि दुरउवाच ॥ येत्वयाभिहिताब्रह्मन्सुताःप्राचीनबर्हिषः ॥ तेरुद्रगीतेनहरिंसिद्धिमापुःप्रतोष्यकाम् १ किंबार्हस्पत्यपरत्रवासुखंकैवल्यनाथप्रियपार्श्वव र्तिनः ॥ आसाद्यदेवंगिरिशंयदृच्छयाप्रापुःपरंनूनमथप्रचेतसः २ ॥ मैत्रेयउवाच ॥ प्रचेतसोंतरुदधौपितुरादेशकारिणः ॥ जपयज्ञेनतपसापुरंजनमतोषयन् ३

तिभावेनपृच्छतीत्याह किंचेति तदेतत्प्रेयइतिश्रुतेः कैवल्यनाथश्चासौप्रियश्चकैवल्यनाथप्रियस्तस्यकैवल्यनाथप्रियस्यविष्णोः कैवल्यस्यनाथःकैवल्यनाथस्तस्यकैवल्यनाथस्यप्रियोरुद्रस्तस्यवापार्श्वव र्तिनः समीपेवर्तमानाःपुरुषाइहलोकेथवामुष्मिंल्लोकेकिंपुरुषार्थलक्षणंसुखंनार्हतीति सर्वमर्हंतीति तत्रप्रचेतसोयदृच्छयादेवेच्छयागिरिशमासाद्यपरमुत्कृष्टंसुखंनूनंकिंप्रापुरित्यन्वयः गिरेर्ब्रह्मणःप्रसादेनशंसु खंयस्यसगिरिशः तंब्रह्मगिरिरित्याचक्षतइतिश्रुतेः गिरिवाचिशेतइतिवागिरौकैलासेशेतइतिगिरिशः पूर्वत्रालुक्समासः शीङोडप्रत्ययश्च पूपालनपूरणयोरितिधातोः परंजगत्पालनंमुक्तिलक्ष णपूर्णानंदसुखेति अनेनप्रचेतसोयानियोग्यानिकल्याणान्यर्हंति तेषुकिंमुख्यामापुरितिप्रश्नतात्पर्यार्थः २ जगत्पालनादिसर्वाःसिद्धीरापुरितिपरिहारंवक्तुमुपक्रमतेइत्याह मैत्रेयइति जपयज्ञे नरुद्रगीताख्यस्तोत्रयज्ञेन पुराणांशरीराणांजननाज्जन्मनाव्यंजयितृत्वात्पुरंजनोविष्णुःपुरेअंजनात्व्यंजनात्पुरंजनोजीवः । यतस्तपसापुरंजनंजीवनामानमशोषयंस्तेनपुरंजनंविष्णुमतोषन् प्रसादाभिमुखंचक्रुरित्यर्थद्वयद्योतनायपुरंजनपदंप्रायोजीत्यतःपूर्वोक्तःपुरंजनोनात्रोच्यते पुरेषुव्यंजनाज्जीवःपुरंजनइतीरितः । पुराणांजननाद्विष्णुर्व्यंजनत्वंद्वयोरपीतिवचनात्सिद्धमिदमर्थद्व यमिति लतुलसानांदंताः इचुयशानांतालुस्थिरस्यतस्वकारशकारयोः स्थानसामीप्यात् उपूपध्मानीयानामोष्ठावित्यनुबंधोकारस्यैकस्थानत्वाच्चवाशोषयन्नतोषयन्नितियुज्यते ३

SGDF Sri Gargeshwari Digital Foundation

प्रचेतसांशांतेनभगवन्निष्ठयाजातयानुग्रहलक्षणयारुचातेषांकृच्छ्रंदुःखंशमयन् ४ मणिग्रीवःकंठामुक्तकौस्तुभः वितिमिरानिरस्तांधकराः ५ कान्सृदीप्तौ भ्राजद्भ्यांराजद्भ्यांकपोलाभ्यांयुक्तं
वदनंयस्यसतथा भ्राजदित्युक्त्यात्मनेपदेपरस्मैपदित्वंकाल्पनिकमितिध्वनयति ६ पीनानामायतानामष्टानांभुजानांमंडलस्यमध्येवक्षसिस्थितयालक्ष्म्यासहस्पर्धमानावद्वर्तमानाश्रीर्विकासलक्षणाय
स्याःसातथा अश्ववदाचरतीत्यश्वान्नित्यादौदर्शनादौपचारिकोयंप्रयोगः नहिहरेरपिवक्षसिस्थितयोर्लक्ष्मीवनमालयोरौत्सर्गिकीस्पर्धासंजाघटीति पर्जन्योमेघस्तस्मादवद्रुतंध्वनिर्यस्याःसातया
वाचेतिशेषः घृणयादययासहववर्तइतिसघृणस्तादृशोवलोकोयस्यसतथा ७ सौहार्देनहेतुनाऽपृथग्धर्माएकविषयधर्मचारिणः तेनांकितवतत्राह तुष्टइति अतोवरंवृणीध्वमित्यर्थः ८ नकेवलं
मत्तोयुष्माकमेवफलमन्येषांभवदनुस्मर्तॄणामपिफलविशेषोभवतीत्याह यइति यथामत्प्रीतिहेतुर्मत्तोषकरंयुष्मदपृथग्धर्मत्वस्मरणमितरेषामपिभ्रातृष्वात्मसाम्यफलंस्याच्चथा ९ रुद्रगीतेनमांस्तु
वद्भ्योपिकामवरान्दास्यामीत्याह येतुमामिति १० अन्यंचवरंदास्यामीत्याह यद्यूयमिति अनेनविमलकीर्तिकामैःपुरुषैर्गुर्वादेशःसर्वथानुष्ठेयइतिशिक्षादर्शिता ११ सत्पुत्राभावेकिंमयोज

दिव्यवर्षसहस्रांतेपुरुषस्तुसनातनः ॥ तेषामाविरभूत्कृच्छ्रंशांतेनशमयन्रुचा ४ सुपर्णस्कंधमारूढोमेरुशृंगमिवांबुदः ॥ पीतवासामणिग्रीवःकुर्व
न्वितिमिरादिशः ५ काशिष्णुनाकनकवर्णविभूषणेनभ्राजत्कपोलवदनोविलसत्किरीटः ॥ अष्टायुधैःकरवरैर्मुनिभिःसुरेंद्रैरासेवितोगरुडकिन्नरगीतकी
र्तिः ६ पीनायताष्टभुजमंडलमध्यलक्ष्म्यास्पर्धच्छ्रियापरिवृतोवनमालयायः ॥ बर्हिष्मतःपुरुषआहसुतान्प्रपन्नान्पर्जन्यनादरुतयासघृणावलोकः ७
श्रीभगवानुवाच ॥ वरंवृणीध्वंभद्रंवोयूयंमेनृपनंदनाः ॥ सौहार्देनापृथग्धर्मास्तुष्टोहंसौहृदेनवः ८ योनुस्मरतिसंध्यायांयुष्माननुदिनंनरः ॥ तस्य
भ्रातृष्वात्मसाम्यंतथाभूतेषुसौहृदम् ९ येतुमांरुद्रगीतेनसायंप्रातःसमाहिताः ॥ स्तुवंत्यहंकामवरान्दास्येप्रज्ञांचशोभनाम् १० यद्यूयंपितुरादेशम
ग्रहीष्टमुदान्विताः ॥ अतोवउशतीकीर्तिर्लोकाननुभविष्यति ११ भविताविश्रुतःपुत्रोऽनवमोब्रह्मणोगुणैः ॥ यएतामात्मवीर्येणत्रिलोकींपूरयिष्यति
१२ कंडोःप्रम्लोचयालब्धाकन्याकमललोचना ॥ तांचापविद्धांजगृहुर्भूरुहान्नृपनंदनाः १३ क्षुत्क्षामायामुखेराजासोमःपीयूषवर्षिणीम् ॥ देशिन्नींरो
दमानायानिदधेसदयान्वितः १४ प्रजाविसर्गआदिष्टाःपित्रामामनुवर्तता ॥ तत्रकन्यांवरारोहांतामुद्वहतमाचिरम् १५ अपृथग्धर्मशीलानांसर्वेषांवः
सुमध्यमा ॥ अपृथग्धर्मशीलेयंभूयात्प्रत्यर्पितामया १६ दिव्यवर्षसहस्राणांसहस्रमहतौजसः ॥ भौमान्भोक्ष्यथभोगान्वैदिव्यांश्चानुग्रहान्मम
१७ अथमय्यनपायिन्याभक्त्यापक्वगुणाशयाः ॥ उपयास्यथमद्धामनिर्विद्यनिरयादतः १८

नंजन्मनासोयंमनुष्यलोकःपुत्रेणजय्यइतिश्रुतेस्तत्राह भवितेति पुत्रशब्दार्थंध्वनयति यएतामिति १२ अनुकूलभार्याभावेकथमौरसपुत्रसंपादित्यतस्तत्प्राप्तिंवक्तुमुपक्रमते कंडोरिति प्रम्लोच
याऽप्सरसा मातृपितृमरणकारणयोगेतज्जातत्वाच्चपरिहारार्थमपविद्धांत्यक्तांभूरुहावृक्षाजगृहुरित्यन्वयः १३ क्षुत्क्षामायाःश्रांतायाः ससोमः १४ प्रजाविसर्गेप्रजानांविविधसृष्टौ ततःकि
मत्राह तत्रेति तत्रतस्मिन्कार्येकर्तव्येसति १५ बहूनामस्माकमियमेकाऽनुकूलाकथंस्यादत्रापिताहशंवरंदास्यामीत्याह अपृथग्धर्मशीलानामिति १६ दिव्यवर्षसहस्राणामित्यत्रसहस्रशब्दोबहु
त्ववाची प्रतीतार्थस्यप्रमाणाविरुद्धत्वादनुपपन्नत्वं तदुक्तं मनुष्याणांवत्सराणांलक्षद्वादशकंपुरा । प्रचेतोभिरियंपृथ्वीपालिताऽव्याहतेंद्रियैरिति १७ एवमैहिकंवरंदत्त्वापारत्रिकंवरंददाति अथे
ति पक्वःपरिपाकंप्राप्तोगुणाशयःप्राकृतांतःकरणंयेषांतेतथा अतोनिरयादस्मात्संसारात् अतोनिंदाहेतुविचित्रेष्वित्यभिधानात्चित्रात्पुण्यपापमिश्रितात् चित्रमालेख्यमिश्रयोरित्यभिधानात् १८

प्रचेतसांशांतेनभगवन्निष्ठयाजातयानुग्रहलक्षणयारुचातेषांकृच्छ्रंदुःखंशमयन् ४ मणिग्रीवःकंठामुक्तकौस्तुभः वितिमिरानिरस्तांधकराः ५ कासृदीप्तौ भ्राजद्भ्यांराजद्भ्यांकपोलाभ्यांयुक्तं
वदनंयस्यसतथा भ्राजदित्युक्त्यात्मनेपदेपरस्मैपदित्वंकाल्पनिकमितिध्वनयति ६ पीनानामायतानामष्टानांभुजानांमंडलस्यमध्येवक्षसिस्थितयालक्ष्म्यासहस्पर्धमानावद्वर्तमानाश्रीर्विकासलक्षणाय
स्याःसातथा अश्ववदाचरतीत्यश्वान्नित्यादौदर्शनादौपचारिकोयंप्रयोगः नहिहरेरपिवक्षसिस्थितयोर्लक्ष्मीवनमालयोरौत्सर्गिकीस्पर्धासंजाघटीति पर्जन्योमेघस्तन्नादवद्द्रुतंध्वनिर्यस्याःसातया
वाचेतिशेषः घृणयादययासहवर्वतइतिसघृणस्तादृशोवलोकोयस्यसतथा ७ सौहार्देनहेतुनाऽपृथग्धर्माएकविषयधर्मचारिणः तेनांकितवतत्राह तुष्टइति अतोवरंवृणीध्वमित्यर्थः ८ नकेवलं
मत्तोयुष्माकमेवफलमन्येषांभवदनुस्मर्तृणामपिफलविशेषोभवतीत्याह यइति यथामत्प्रीतिहेतुर्मत्तोषकरंयुष्मदपृथग्धर्मत्वस्मरणमितरेषामपिभ्रातृष्वात्मसाम्यफलंस्यात्तथा ९ रुद्रगीतेनमांस्तु
वद्भ्योपिकामवरान्दास्यामीत्याह येतुमामिति १० अन्यंचवरंदास्यामीत्याह यद्यूयमिति अनेनविमलकीर्तिकामैःपुरुषैर्गुर्वादेशःसर्वथानुष्ठेयइतिशिक्षादार्शिता ११ सत्पुत्राभावेकिंप्रयोज

दिव्यवर्षसहस्रांतेपुरुषस्तुसनातनः ॥ तेषामाविरभूत्कृच्छ्रंशांतेनशमयन्रुचा ४ सुपर्णस्कंधमारूढोमेरुशृंगमिवांबुदः ॥ पीतवासामणिग्रीवःकुर्व
न्वितिमिरादिशः ५ कासिष्णुनाकनकवर्णविभूषणेनभ्राजत्कपोलवदनोविलसत्किरीटः ॥ अष्टायुधैःकरवरैर्मुनिभिःसुरेंद्रैरासेवितोगरुडकिन्नरगीतकी
र्तिः ६ पीनायताष्टभुजमंडलमध्यलक्ष्म्यास्पर्धच्छ्रियापरिवृतोवनमालयायः ॥ बर्हिष्मतःपुरुषआहसुतान्प्रपन्नान्पर्जन्यनादरुतयासघृणावलोकः ७
श्रीभगवानुवाच ॥ वरंवृणीध्वंभद्रंवोयूयंमेनृपनंदनाः ॥ सौहार्देनापृथग्धर्मास्तुष्टोहंसौहृदेनवः ८ योनुस्मरतिसंध्यायांयुष्माननुदिनंनरः ॥ तस्य
भ्रातृष्वात्मसाम्यंतथाभूतेषुसौहृदम् ९ येतुमांरुद्रगीतेनसायंप्रातःसमाहिताः ॥ स्तुवंत्यहंकामवरान्दास्येप्रज्ञांचशोभनाम् १० यद्यूयंपितुरादेशम
ग्रहीष्टमुदान्विताः ॥ अतोवउशतीकीर्तिर्लोकाननुभविष्यति ११ भविताविश्रुतःपुत्रोऽनवमोब्रह्मणोगुणैः ॥ यएतामात्मवीर्येणत्रिलोकींपूरयिष्यति
१२ कंडोःप्रम्लोचयालब्धाकन्याकमललोचना ॥ तांचापविद्धांजगृहुर्भूरुहान्नृपनंदनाः १३ क्षुत्क्षामायामुखेराजासोमःपीयूषवर्षिणीम् ॥ देशिन्नींरो
दमानायानिदधेसदयान्वितः १४ प्रजाविसर्गआदिष्टाःपित्रामामनुवर्तता ॥ तत्रकन्यांवरारोहांतामुद्वहतमाचिरम् १५ अपृथग्धर्मशीलानांसर्वेषांवः
सुमध्यमा ॥ अपृथग्धर्मशीलेयंभूयात्प्रत्यार्पितामया १६ दिव्यवर्षसहस्राणांसहस्रमहतौजसः ॥ भौमान्भोक्ष्यथभोगान्वैदिव्यांश्चानुग्रहान्मम
१७ अथमय्यनपायिन्याभक्त्यापक्वगुणाशयाः ॥ उपयास्यथमद्धामनिर्विद्यनिरयादतः १८

नंजन्मनासोयंमनुष्यलोकःपुत्रेणजय्यइतिश्रुतेस्तत्राह भवितेति पुत्रशब्दार्थंध्वनयति यएतामिति १२ अनुकूलभार्याभावेकथमौरसपुत्रसंपादित्यतस्तत्प्राप्तिंवक्तुमुपक्रमते कंडोरिति प्रम्लोच
याऽप्सरसा मातृपितृमरणकारणयोगेतज्जातत्वात्तत्परिहारार्थमपविद्धांत्यक्तांभूरुहावृक्षाजगृहुरित्यन्वयः १३ क्षुत्क्षामायाःश्रांतायाः ससोमः १४ प्रजाविसर्गेप्रजानांविविधसृष्टौ ततःकिं
मत्राह तत्रेति तत्रतस्मिन्कार्येकर्तव्येसति १५ बहूनामस्माकमियमेकाऽनुकूलाकथंस्यादत्रापिताहशंवरंदास्यामीत्याह अपृथग्धर्मशीलानामिति १६ दिव्यवर्षसहस्राणामित्यत्रसहस्रशब्दोबहु
त्ववाची प्रतीतार्थस्यप्रमाणाविरुद्धत्वादनुपपन्नत्वं तदुक्तं मनुष्याणांवत्सराणांलक्षद्वादशकंपुरा । प्रचेतोभिरियंपृथ्वीपालिताऽव्याहतेंद्रियैरिति १७ एवमैहिकंवरंदत्त्वापारत्रिकंवरंददाति अथे
ति पक्वःपरिपाकंप्राप्तोगुणाशयःप्राकृतांतःकरणंयेषांतेतथा अतोनिरयादस्मात्संसारात् अतोनिंदाहेतुविचित्रेष्वित्यभिधानात्चित्रात्पुण्यपापामिश्रितात् चित्रमालेख्यमिश्रयोरित्यभिधानात् १८

गृहाविष्टचेतस्त्वेनपुत्रमित्रादिस्नेहबद्धानांकथंधाममवेशोघटतइतितत्राह गृहेष्विति मद्वार्तयायातोगतोयामःकालविशेषोयेषांतेतथा गृहाःपुंसिचभूम्नीत्यमरः । जसिपुंल्लिंगः १९ ननुभवद्वार्ता संसारच्छेदिनीयदितर्हिसर्वेपिकिंनमुक्तास्तस्याः सुलभत्वादितितत्राह नव्यवह्रियतइति यतोयस्यहरेः प्रसादाद्गताःसूक्ष्मेणमनसावगच्छंतोजानंतोयेविपादिनमुह्यंतिनशोचंतिसंपदिनहृष्यंति तैर्ब्रह्म वादिभिरप्येतद्यज्ञोब्रह्मविष्ण्वाख्यंब्रह्मयथानुभवंनव्यवह्रियतइत्यन्वयः अतोमद्वार्त्तायाअसुलभत्वान्नसर्वेषांमुक्तिरित्यर्थः ब्रह्मवादिभिर्भवद्भिर्गृहेपियज्ञोनिजकर्मनव्यवच्छिद्यतेयतोभवंतोमदाज्ञयागृहागता नमोहादिकंकुर्वंतीत्येवमादिमयोपादिष्टमेतद्रहस्यंतस्मान्माशोचतेत्यपव्याख्यानं सूक्ष्मेणमनसाविभोवाघावक्तुंनशक्नुमइतिवचनेननिरस्तमितिज्ञायते यज्ञपदस्यनिजकर्मार्थत्वंब्रह्मपदस्यरहस्यार्थत्वंचन व्यवच्छिद्यतइतिग्रंथव्यत्यासश्चसंप्रदायापारज्ञानविजृंभितंचेति यज्ञोविष्णुर्देवता ब्रह्मविदाप्नोतिपरमितिसूचनायब्रह्मवादिभिरिति प्रसिद्धयज्ञपरिहारायब्रह्मेति विप्रादिव्यावृत्तयेयज्ञइति २० प्रचेतोभिरेवंभगवतोमतमवाप्यस्वपरहितंकिमकारीतितत्राह एवमिति २१ स्तुतिःप्रेक्षावच्चित्तहर्षणीचेदुपादेयास्यादन्यथेत्थंबधिरवदप्रयोजिकीत्यतोपिग्राह्यगुणविशिष्टामाहुरित्याह नमोनमइति निरूपितोदारगुणाह्वयायनिरूपिताउदारगुणायेषांतेतथामहागुणाआह्वयानामानियस्यसतथातस्मै मनोवचोवेगपुरोजवायवाङ्मनसयोर्वेगादपिपुरःस्थितवेगाय यद्वा वाङ्मनसवेगमतीत्यवर्तमानवेगाय तद्धावतोन्यानत्येतीतिश्रुतेः सर्वाक्षाणांसर्वेंद्रियाणांमार्गैर्निर्मार्गणैरगताध्वनेऽज्ञातमार्गाय २२ शुद्धायेत्येतदशुद्धाक्षाज्ञेयत्वेलिंगं शांतायपूर्णानंदस्वभावाय अपगतोऽपेक्षितोर्थोयस्मात्तदपार्थं

गृहेष्वाविशतांचापिपुंसांकुशलकर्मणाम् ॥ मद्वार्तायातयामानांनबंधायगृहामताः १९ नव्यवह्रियतेयज्ञोब्रह्मैतद्ब्रह्मवादिभिः ॥ नमुह्यंतिनशोचंतिनहृष्यंतियतोगताः २० ॥ मैत्रेयउवाच ॥ एवंब्रुवाणंपुरुषार्थभाजनंजनार्दनंप्रांजलयःप्रचेतसः ॥ तद्दर्शनध्वस्ततमोरजोमलागिरागृणन्गद्गदयासुहृत्तमम् २१ प्रचेतसऊचुः ॥ नमोनमःक्लेशविनाशनायनिरूपितोदारगुणाह्वयाय ॥ मनोवचोवेगपुरोजवायसर्वाक्षमार्गैरगताध्वनेनमः २२ शुद्धायशांतायनमःस्वनिष्ठमनस्यपार्थेविलसद्द्वयाय ॥ नमोजगत्स्थानलयोदयेषुगृहीतमायागुणविग्रहाय २३ नमोविशुद्धसत्त्वायहरयेहरिमेधसे ॥ वासुदेवायकृष्णायप्रभवेसर्वसात्वताम् २४ नमःकमलनाभायनमःकमलमालिने ॥ नमःकमलपादायनमस्तेकमलेक्षण २५

तस्मिन्सुष्ठुनिष्ठाव्यवस्थायस्यनास्तितत्स्वनिष्ठंसंशयात्मकमित्यर्थः तच्चमनःस्वनिष्ठमनस्तस्मिन्समाधानरहितेमनसिविलसद्द्वयायप्रकटितस्वतंत्रवस्तुद्वयाय अनवस्थितबुद्धिनांद्वितीयंदृश्यतेहरेः । सम्यक्सुस्थितबुद्धीनामिदंसर्वंहरेर्वशइतिवचनादुक्तएवार्थोनतुप्रकटितप्रपंचरूपायेति नित्यंगृहीताःमायायागुणाःप्रकृतेःसत्त्वादिगुणाःसत्त्वादिगुणप्रवर्तनानुगुणाःसत्त्वादिगुणरहिताज्ञानानंदात्मकाविग्रहाब्रह्मादिशब्दावाच्याश्चयेनसतथातस्मै नित्यंगृहीताःसत्त्वाद्याविग्रहाश्चत्रयःसदा । ज्ञानानंदात्मकास्तेतुविग्रहानिर्गुणास्तथा । द्वौतत्रब्रह्मरुद्रस्थावेकोवैकुंठधामगइतिवचनात्प्रकृतिगुणविरचितदेहत्वंहरेरंगीकर्तुंयुक्तं २३ विशुद्धश्चायंसत्वःसर्वगुणात्मकश्चविशुद्धसत्त्वस्तस्मै हरिःसर्वगुणात्मत्वात्सत्त्वइत्यभिधीयतइतिवचनात् रजआदिमिश्ररहितसत्त्वगुणायेत्यर्थोनोचितःहरणात्ज्ञानरूपत्वाद्धरिमेधाविभुस्मृतइत्यतःपापहरणात्ज्ञानरूपत्वाद्धरिमेधाः सृष्टौरजःसंपर्कात्कपिलवर्णज्ञानइत्यर्थोनग्राह्यः हरिर्नाकपिलेत्रिष्वित्यभिधानात् अतोगदितएवार्थस्तस्मै २४ २५

१ विलसद्द्वयायेत्यनेनेश्वरस्यभ्रान्तिरुच्यत इति भाति अतस्पष्टार्थमाह प्रकटितेति ।

SGDF Sri Gangeshwar Digital Foundation

अयुंक्ष्महिनमस्काराख्यंयोगमकार्ष्म २६ अनुकंपयाभवताप्येतद्रूपमाविष्कृतमन्यत्किं अस्मदनुकंपांविनानाकिमपीत्यर्थः २७ अभद्ररंधनपापदहन २८ यदुक्तंहरिणावरंवृणीध्वमितितत्राहुरि
त्याह येनेति क्षुल्लकानामल्पकानामपिभूतानामंतर्हृदयेअंतर्हितस्त्वंतेषामीहितंचष्टितंचावैषि तस्मान्नआशिषः कस्मान्नवेदापितुवेदेत्यन्वयः २९ त्वत्प्रसादादन्योवरोनप्रार्थनीयइत्याहुरित्याह असा
विति एषामस्माकंभगवान्प्रसन्नः असौभगवत्प्रसादएवेप्सितोवरोनान्यइत्यन्वयः ३० यद्यपिभगवत्प्रसादएवेप्सितोवरस्तथापिपरतःपरात्त्वत्संगतिलक्षणंवरंवृणीमइत्यन्वयः परतःपरत्वमुपपा
दयति नहीति नांतोस्तिममदिव्यानांविभूतीनांपरंतप। अंतोनंतेन तथाहिलिंगं परोमात्रयेत्यादिप्रमाणात् ३१ यतस्त्वमेवानंतोतोन्यस्मान्मनसावराभिलाषोनास्त्येवेतिभावेनाह पारिजातइति
लुप्तोपममेतत् यथापारिजातपुष्पेंजसातत्त्वेनलभ्येलब्धुंयोग्येसारंगोभृंगोन्यच्चंपकादिपुष्पंनसेवतेतथा साक्षात्त्वदंघ्रिमूलमवाप्यान्यदभीष्टंकिंकिंवृणीमहे नकिमपीत्यन्वयः ३२ माभूदन्यतोवरा

नमःकमलकिंजल्कपिशंगामलवाससे ॥ सर्वभूतनिवासायनमोऽयुंक्ष्महिसाक्षिणे २६ रूपंभगवतात्वेतदशेषक्लेशसंक्षयम् ॥ आविष्कृतंनःक्लिष्टानांकि
मन्यदनुकंपया २७ एतावत्त्वंहिविभुभिर्भाव्यंदीनेषुवत्सलैः ॥ यदनुस्मर्यतेकालेस्वबुद्ध्याऽभद्ररंधन २८ येनोपशांतिर्भूतानांक्षुल्लकानामपीहितम् ॥
अंतर्हितोंतर्हृदयेकस्मान्नोवेदनाशिषः २९ असावेववरोस्माकमीप्सितोजगतांपते ॥ प्रसन्नोभगवानेषामपवर्गगुरुर्गतिः ३० वरंवृणीमहेथापिनाथत्वत्पर
तःपरात् ॥ नह्यंतस्त्वद्विभूतीनांयोऽनंतइतिगीयते ३१ पारिजातेंजसालभ्येसारंगोन्यन्नसेवते ॥ त्वदंघ्रिमूलमासाद्यसाक्षात्किंकिंवृणीमहे ३२ याव
त्तेमाययास्पृष्टाभ्रमामइहकर्मभिः ॥ तावद्भवत्प्रसंगानांसंगःस्यान्नोभवेभवे ३३ तुलयामलवेनापिनस्वर्गंनापुनर्भवम् ॥ भगवत्संगिसंगस्यमर्त्यानांकि
मुताशिषः ३४ यत्रेड्यंतेकथामृष्टास्तृष्णायाःप्रशमोयतः ॥ निर्वैरंयत्रभूतेषुनोद्वेगोयत्रकश्चन ३५ यत्रनारायणःसाक्षाद्भगवान्न्यासिनांगतिः ॥ प्रस्तू
यतेसत्कथासुमुक्तसंगैःपुनःपुनः ३६ तेषांविचरतांपद्भ्यांतीर्थानांपावनेच्छया ॥ भीतस्यकिंनरोचेततावकानांसमागमः ३७ वयंतुसाक्षाद्भगवत्प्रि
यस्यशिवस्यसख्युःक्षणसंगमेन ॥ सुदुश्चिकित्स्यस्यभवस्यमृत्योर्भिषक्तमंत्वाद्यगतिंगताःस्मः ३८ यन्नःस्वधीतंगुरवःप्रसादिताविप्राश्चवृद्धाश्चसदानुवृत्त्या
आर्याह्यनाथाःसुहृदोभ्रातरश्चसर्वाणिभूतान्यनुसूययैव ३९

भिलाषोऽस्मत्तःकोसौवरइतितत्राह यावदिति भवतःप्रसंगोयेषांतेभवत्प्रसंगास्तेषाम् ३३ सत्संगोवांछनीयइतिभावेनाह तुलयामइति ३४ सत्संगतावेतेगुणालभ्यंतेइत्याह यत्रेति ३५ ३६ रुच्यभा
वेकथंघटतइतितत्राह तेषामिति तीर्थानांपावनेच्छयापद्भ्यांतीर्थानिविचरतांतावकानांसमागमः संसाराद्भीतस्यपुंसोनरोचतेकिंरोचतएवेत्यन्वयः संसाररोगपरिहारौषधपानसंभवादत्ररुचिर्जा
यतइत्यर्थः ३७ सत्संगफलमनुभवसिद्धंचेत्याहुरित्याह वयंत्विति भगवान्प्रियोयस्यसतथावस्यतवप्रियस्यसख्युःसंसारादौसहकारिणःशिवस्य मृत्योर्मारकस्यभिषक्तमंवैद्यश्रेष्ठम् ३८
वेदाध्ययनादिपुण्यंयत्तत्सर्वंभवत्प्रसादजनकमस्त्वितिनिवेदयंतीत्याह यन्नइति सुष्ठुअधीतंवेदाध्ययनं अनाथामृतभर्तृकाः ३९

१ भक्तानांक्लेशकालेप्राप्तेऽयंरक्षणीयइतिस्वबुद्ध्याप्रार्थनाभावेपिविभुभिर्भक्तोनक्षीयेतेतिथत् एतावत्त्वमेतादृशधर्मवत्त्वंभाव्यम् ॥

SGDF

निरंधसांत्यक्तपितृदत्तान्नानांत्यक्तसर्वथान्नानांवा अदभ्रमनल्पं ४० ननुब्रह्मादिवत्परिच्छिन्नत्वेपूर्वोक्तानंतत्वंनयुज्यते अपरिच्छिन्नत्वेस्तुतिर्नघटतइतितत्राह मनुरिति तन्महिम्नःपारमदृष्टवंतोपि ब्रह्मादयोवेदाद्युक्तानुसारेणयद्यथात्वांस्तुवंति अथोतथावयमप्यात्मबुद्धिसमंगृणीमहइत्यन्वयः ४१ आत्मसममित्युक्त्याप्रचेतसांबुद्धीनामस्मद्बुद्धितोमहागुणितत्वात् तदुक्तं स्तुतिपदानामनेकार्थत्वेनास्मद्बुद्ध्यविषयत्वेननास्माभिस्तदर्थकथनायप्रयत्नःक्रियते किंतुव्याख्यानप्रतिज्ञाभंगपरिहारायप्रतीतोर्थःकथ्यते तथाहि समायवैषम्यनैर्घृण्यरहिताय साहितामालक्ष्मीर्यस्यससमस्तस्माइतिवा शुद्धायनिरंजनाययदयंपाप्मनउत्सस्तस्मात्पुरुषोनामेतिश्रुतेः समस्तपापविनाशनाय परायोत्कृष्टाय वासुदेवायबलज्ञानात्मकमुख्यप्राणप्रवर्तकाय सर्वमाच्छाद्यातिक्रम्यदीव्यतीति वासुदेवस्तस्मै सत्त्वायपराक्रमरूपाय भगवतेसौभाग्यरूपाय ऐश्वर्यादिगुणवतेवा ४२ हरेःस्वधामप्रयाणमाह इतीति यानंगमनं अनपवर्गविक्रमोऽविनष्टपराक्रमः । अनेनकर्मणामपिनित्यत्वमसूचीतिज्ञायते ४३ इदानींप्रचेतसांविक्रमविशेषंवक्तुमुपक्रमते अथेति गांभूमिं ४४ अप्ययेप्रलये सांवर्तकः प्रलयकालीनोग्निरिव ४५ ब्रह्मणाऽगत्याक्रियमाणंतत्क्रोधशमनप्रकारमाह भ

यन्नःसुतप्तंतपएतदीशनिरंधसांकालमदभ्रमप्सु ॥ सर्वंतदेतत्पुरुषस्यभूम्नोवृणीमहेतेपरितोषणाय ४० मनुःस्वयंभूर्भगवान्भवश्चयेन्येतपोज्ञानविशुद्धसत्वाः ॥ अदृष्टपाराअपियन्महिम्नस्तुवंत्यथोत्वात्मसमंगृणीमः ४१ नमःसमायशुद्धायपुरुषायपरायच ॥ वासुदेवायसत्त्वायतुभ्यंभगवतेनमः ४२ ॥ मैत्रेयउवाच ॥ इतिप्रचेतोभिरभिष्टुतोहरिःप्रीतस्तथेत्याहशरण्यवत्सलः ॥ अनिच्छतांयानमतृप्तचक्षुषांययौस्वधामानपवर्गविक्रमः ४३ अथनिर्यायसलिलात्प्रचेसतउदन्वतः ॥ वीक्ष्याकुप्यन्द्रुमैश्छन्नांगामारोद्धुमिवोत्थितैः ४४ ततोग्निमारुतौराजन्नमुंचन्मुखतोरुषा ॥ महींनिर्वीरुधंकर्तुंसांवर्तकइवाप्यये ४५ भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्यपितामहः ॥ आगतःशमयामासपुत्रान्बर्हिष्मतोनयैः ४६ तत्रावशिष्टायेवृक्षाभीतादुहितरंतदा ॥ आजन्हुस्तेप्रचेतोभ्यउपदिष्टाःस्वयंभुवा ४७ तेचब्रह्मणआदेशान्मारिषामुपयेमिरे ॥ यस्यांमहदवज्ञानादजन्यजनयोनिजः ४८ चाक्षुषेत्वंतरेप्राप्तेप्राक्सर्गेकालविद्रुते ॥ यःससर्जप्रजाइष्टाःसदक्षोदैवचोदितः ४९ योन्यक्कृचकारसर्वेषांतेजस्तेजस्विनांरुचा ॥ स्वयोग्योपात्तदाक्ष्याच्चकर्मणादक्षमब्रुवन् ५० तंप्रजासर्गरक्षायामनादिर्भगवानजः ॥ युयोजयुयुजुस्तंवैसर्वेन्येचप्रजेश्वराः ५१ इतिश्रीभागवतेचतुर्थस्कंधेत्रिंशोऽध्यायः ॥ ३० ॥

स्मसादिति नयैर्युक्तिभिः ४६ प्रीतिकरणंविनाकेवलंनयैरेवकोपशांतिःकथमभूदितितत्राह तत्रेति ४७ प्रतिपक्षभूतैर्वृक्षैर्दीयमानंकन्यादानंनिःशंकंकथंसंगच्छतइतितत्राह तेचेति आप्तत्वेप्रमाणोवचनंकारणमित्यर्थः वंध्याचेत्किमित्युपयमनमकार्षुरितितत्राह यस्यामिति नजायतइत्यजनोविष्णुःसएवयोनिरुत्पत्तौकारणंयस्यसोऽजनयोनिर्ब्रह्मातस्माज्जातोऽजनयोनिजोदक्षःअजनिजज्ञेतामुपयेमिरेइत्यन्वयः महतोरुद्रस्यावज्ञानान्निंदनात् ४८ तज्जन्मप्रयोजनमाह चाक्षुषइति प्राक्सर्गेपूर्वसृष्टौ कालेनविद्रुतेनष्टायां दैवेनविष्णुनाब्रह्मणाचचोदितः चुदप्रेरणइतिधातुः ४९ किंनामायंजातइतिनिरुक्तिपूर्वकंतन्नामाह यइति स्वयोग्योपात्तदाक्ष्यात्स्वयोगसामर्थ्येनप्राप्तपदत्वात् ५० इदंचतन्नामकरणेलिंगमितिभावेनाह तंप्रजेति अनादिर्ब्रह्मा प्रजेश्वरामरीच्यादयः युयुजुरन्वाधानलक्षणंयोगमकुर्वन्निति ५१ इतिश्रीभागवतेचतुर्थस्कंधेविजयध्वजटीकायांत्रिंशोऽध्यायः ३०

SGDF
Sri Gurgeshwari Digital Foundation

शास्त्रांतरेषुबहूनामितरेषांसाधनानांमुक्तिसाधनत्वेनकथनस्यसावकाशत्वप्रकाशनायास्मिन्नध्यायेपुनरपिमुक्तिसाधनंब्रह्मज्ञानमेवेतिनिश्चीयते तत्रतत्साधनमपिमुख्यंचतुर्थाश्रमएवसर्वस्मात्तस्यश्रैष्ठ्या
दित्यभिप्रेत्यप्रचेतसांराज्यपालनानंतरं तमाचष्टे ततइति आश्वाविर्भूताधोक्षजभाषितं ततोमानुषगणितद्वादशलक्षकालात्परमुत्पन्नविज्ञानाःवेदांतविज्ञानसुनिश्चितार्थाः अनेनसंन्यासाधिकारे
योग्यतांलक्षयति १ एतदेवविशिनष्टि दीक्षिताइति सर्वभूतात्मनिसर्वभूतस्वामिनिसर्वभूतांतर्यामिणिवाहरौमेधाज्ञानंयत्रतद्ब्रह्मसत्रंसर्वभूतात्ममेधः तेनब्रह्मसत्रेणदीक्षिताः गृहीतसंन्यासाश्रमाइत्यर्थः
पारिव्राज्यंब्रह्मसत्रंन्यासइत्यभिधीयतइत्यभिधानात् ब्रह्मविषयेणयागविशेषेणेतिनार्थोत्रग्राह्यः प्राव्रजन्नितिविरोधाच्च हरिमेधस्तुसंन्यासोहरौमेधायतोभवेदितिवचनेनसंन्यासस्यविशेषितत्वाच्च
नसर्वभूतानांस्वस्वरूपत्वज्ञानेनेत्यर्थः उत्तरत्रापितत्त्वंनापुः किंतुतद्गतामितिवक्ष्यमाणत्वात् यत्रजाजलस्तस्यापत्यंजाजलिःमुनिःसिद्धोमुक्तोभूत्तस्यांप्रतीच्यांदिशिसमुद्रवेलायांहरिमुपासीनाःस्युरित्य
न्वयः २ तत्रापिनारदसंगमंतेषामाह तान्निर्जितेति शांतश्चसमानश्चविग्रहोदेहोयेषांतेतथातान् योजितमेकाग्रतयास्थापितंमनोयैस्तेतथातान् ३ यथादेशंयथोपदेशंदेशानुसारेणवा ॥ ४ ॥
चंक्रमणंपुनःपुनरागमनं रवेरुदयाख्यागमनं ५ सदाशिवाधोक्षजाभ्यांज्ञानस्योपदिष्टत्वात् नमयापृथगुपदेशायप्रयतनीयमितितत्राह यदादिष्टमिति क्षपितंनष्टमितियावत् ॥ ६ ॥ येना

॥ मैत्रेयउवाच ॥ ततउत्पन्नविज्ञानाआश्वधोक्षजभाषितम् ॥ स्मरंतआत्मजेभार्यांविसृज्यप्राव्रजन्गृहात् १ दीक्षिताब्रह्मसत्रेणसर्वभूतात्ममेधसा ॥ प्रती
च्यांदिशिवेलायांसिद्धोभूद्यत्रजाजलिः २ तान्निर्जितप्राणमनोवचोदृशोजितासनाञ्छांतसमानविग्रहान् ॥ परेमलेब्रह्मणियोजितात्मनःसुरासुरेड्योददृशे
स्मनारदः ३ तमागतंतउत्थायप्रणिपत्याभिनंद्यच ॥ पूजयित्वायथादेशंसुखासीनमथाब्रुवन् ४ स्वागतंतेसुरर्षेद्यदिष्ट्यानोदर्शनंगतः ॥ तवचंक्रमणं
ब्रह्मन्नभयाययथारवेः ५ यदादिष्टंभगवताशिवेनाधोक्षजेनच ॥ तद्गृहेषुप्रसक्तानांप्रायशःक्षपितंप्रभो ६ तन्नःप्रद्योतयाध्यात्मज्ञानंतत्त्वार्थदर्शनम् ॥ येनां
जसातरिष्यामोदुस्तरंभवसागरम् ७ ॥ मैत्रेयउवाच ॥ इतिप्रचेतसापृष्टोभगवान्नारदोमुनिः ॥ भगवत्युत्तमश्लोकआविष्टात्माऽब्रवीन्नृपान् ८ ॥ नारद
उवाच ॥ तज्जन्मतानिकर्माणितदायुस्तन्मनोवचः ॥ नृणांयेनहिविश्वात्मासेव्यतेहरिरीश्वरः ९ किंजन्मभिस्त्रिभिर्वेहशौक्लसावित्रयाज्ञिकैः ॥ कर्मभिर्वा
त्रयीप्रोक्तैःपुंसोपिविबुधायुषः १० श्रुतेनतपसावाकिंवचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्यावाकिंनिपुणयाबलेनेंद्रियराधसा ११ किंवायोगेनसांख्येनन्यास
स्वाध्याययोरपि ॥ किंवाश्रेयोभिरन्यैश्चनयत्रात्मप्रदोहरिः १२ श्रेयासामपिसर्वेषामात्माह्यवधिरर्थितः ॥ सर्वेषामपिभूतानांहरिरात्मात्मदःप्रियः १३

त्मज्ञानेन ७ ८ यद्धरिसेवासाधनंजन्मादितदेवसफलंनतुसत्कुलजन्मादीत्याह तज्जन्मेत्यादिना येनजन्मादिना ९ किमित्येवंविशेष्यस्तौषीतितत्राह किंजन्मभिरिति यत्रजन्मादौहरिरात्मप्रदो
नस्यात्तज्जन्मादिनाकिंफलमित्यन्वयः शुक्लंजन्मोभयकुलशुद्धं सावित्रंजन्मउपनयनादि याज्ञीयमग्न्याधानलक्षणंजन्म ॥ १० ॥ इंद्रियराधसाबहुग्रहणसामर्थ्येन ॥ ११ ॥ सांख्ये
नयथार्थज्ञानेन न्यासस्वाध्याययोःक्रियया पि अन्यैस्तीर्थसेवादिभिः १२ इतोपिविहितानांपुण्यानांहरेरनुग्रहपर्यंतमेवफलमित्याह श्रेयसामिति यावत्प्रसीदतितावत्पर्यंतंपुण्यफलमित्यवधेरर्थः
ननुसेवितःकिंफलंददातियेनश्रेयसामवधिःस्यादित्याशंक्यान्येसेवितायावत्प्रसीदंतितावत्पर्यंतंपुंसांस्वव्यतिरिक्तमेवपुण्यफलंप्रयच्छंति अयंतुस्वात्मानमेवददातीत्येतादृशःकृपासमुद्रःकोस्तीत्यभिसंधा
याह सर्वेषामिति आत्मानंददृपः १३

SGDF

किंवाश्रेयोभिरन्यैरित्यत्रदेवादिसेवालक्षणश्रेयांसिकथंनिषिध्यंते तत्सेवायाअपितत्तत्फलावाप्तयेकर्तव्यत्वादिदितितत्राह यथेति प्राणोपहारोभोजनलक्षणपूजा इंद्रियाणांतृप्तिलक्षणपूजांजनयति अ च्युतेज्यासर्वदेवाद्यर्हणफलंददाति अत्रैवकारेणप्रधान्यपूजानिषिध्यतेनत्ववांतरपूजा तस्याविहितत्वेनअच्युतस्यपूजात्वादित्यभिप्रायः परिवारतयाग्राह्याअपिहेयाःप्रधानतइत्युक्तेः १४ ननुहरिपू जयादेवादिपूजाफलंकथंस्यान्नहिदेवदत्तभोजनतृप्त्यायज्ञदत्तस्तृप्यतीतितत्राह यथेति उदयकालेआषाढादिकालेवागावोरश्मयोजलानिचसूर्याद्यथाप्रभवंतिनिर्गच्छंतिउत्पद्यंतेवा पुनश्चसंध्याकालेहेमं तादिकालेवातस्मिन्सूर्येप्रविशंति गवांमंडलप्रवेशोवारिणांमरीचिपीतत्वमित्येषविशेषः यथाचस्थिरजंगमानिभूतानिभूमेरुत्पद्यंतेभूमावेवप्रविशंति तथायंगुणप्रवाहस्त्रिगुणात्मकजगल्लक्षणोहरेरुत्प द्यतेहर्याधारतयातिष्ठतीत्यन्वयः अनेनहरेःसर्वकर्तृत्वेनस्वतृप्त्यादेवादीनांस्वाश्रितत्वेनतृप्तिर्युज्यतइत्येतत्सूचितामिति १५ अस्तुसर्वश्रेयसामात्मावधित्वमेषुसत्सुकथंप्रकाशतइतितत्राह एतदिति पूर्वसंचीर्णश्रेयस्सुसत्सुयदासुप्रवृत्तयोविलीनश्वासादिवृत्तयोऽसुप्तप्रवृत्तयःप्रबुद्धवृत्तयोऽसवइंद्रियाणिजाग्रतिपुरुषंबोधयंति उद्योगेस्थितावा यदाचद्रव्यक्रियाकारकविभ्रमात्ययः तदायत्तदुपानिषद्वे द्यंतदेतज्जगदात्मनःप्रपंचस्वामिनोहरेःपरंपदं यथासवितुःप्रभासकलपदार्थप्रकाशिकासूक्ष्मापि तथासकृद्विभातंभवति यथानारदस्य पुनरभ्यासेसर्वदैवेत्यन्वयः देहात्मभावभ्रमोद्रव्यभ्रमः अहंकर्तेति क्रियाभ्रमः मदीयानीमानींद्रियाणीतिकारकभ्रमः मुख्यप्राणप्रसादेनप्राणशब्दवाच्येष्विंद्रियेषुज्ञानार्थपुरुषोद्बोधनोद्योगवत्सुजाग्रतोयोगिनोज्ञानोत्पत्त्याद्रव्यादिविभ्रमनिवृत्त्याभगवत्स्वरूपंप्रकाशते इतिभावः । हरावेवगुणप्रवाहइत्युक्तेगुणप्रवाहाधारत्वेनसोपाधिकत्वंहरेःस्यादित्यतआह एतदिति एतदेवविष्णोःपदंतदुत्पन्नंजगदात्मनउपाधेःपरमुपाध्यसंबंधमाधाराधेयभावोगगनगंधर्वनगरवत्ज्ञा

यथातरोर्मूलनिषेचनेनतृप्यंतितत्स्कंधभुजोपशाखाः ॥ प्राणोपहाराच्चयथेंद्रियाणांतथैवसर्वार्हणमच्युतेज्या १४ यथैवसूर्यात्प्रभवंतिगावःपुनश्च तस्मिन्प्रविशंतिकाले॥भूतानिभूमौस्थिरजंगमानितथाहरावेवगुणप्रवाहः १५ एतत्परंतज्जगदात्मनःपदंसकृद्विभातंसवितुर्यथाप्रभा॥यथाऽसवोजाग्रतिसु प्तवृत्तयोद्रव्यक्रियाकारकविभ्रमात्ययः १६ यथानभस्यभ्रतमःप्रकाशाभवंतिभूयोनभवंत्यनुक्रमात्॥एवंपरेब्रह्मणिशक्तयस्त्वमूरजस्तमःसत्वमितिप्रवाहः १७

तव्यःतर्हिशून्यंतत्राह सकृद्विभातमिति प्रज्ञानघनंयथासवितृप्रभाप्रभातातद्वत्स्थितंयज्ज्ञानात्द्रव्यक्रियाज्ञानभिदाभ्रमोजगद्भेदभ्रमस्तस्यनिवृत्तिर्भवति किंलक्षणोहरिरित्यनेनतल्लक्षणंतज्ज्ञानंचोच्यते ननुप्रज्ञानघनाज्जडस्यजगतःकथमुत्पत्तिरित्याशंक्यदृष्टांतेनोपपादयतियथेतियथाऽसवइंद्रियाणिप्रजाग्रतिसुप्तिकालेसुप्तवृत्तयोपहृतव्यापाराआत्मनिलीनास्ततःप्रबोधे प्रज्ञानघनादप्यात्मनोजायंते तद्वद्ब्रह्मणोजगदित्येतदपव्याख्यानं आत्मभावःशरीरेषुद्रव्यभ्रमउदाहृतः । क्रियाभ्रमस्त्वहंकर्तामदीयानींद्रियाणितु । कारकभ्रमइत्युक्तस्तएतेविभ्रमायदा । श्वासादिवृत्तिलोपेनप्राणाउद्योगिनस्त दा । विलीयंतेप्राणभक्त्यानित्यंस्वापवतांस्फुटम् । उद्योगएवजाग्रत्स्याद्योगिनांमुक्तिसिद्धयइत्यनेनैतद्व्याख्यानरूपेणसंप्रदायविभ्रमप्रकाशकेननिरस्तमितिज्ञायते एकोदेवःसर्वभूतेषुगूढः यस्मिन्सर्वा णिभूतानीत्यादिष्वेकस्यहरेराधाराधेयभावस्यसत्यत्वावगमात् नहिसुषुप्ताविंद्रियाणामात्मनिलयःप्रज्ञानघनादुत्पादोपिस्वकपोलकल्पितत्वमंतरेणप्रामाणिकइति १६ ननुपंकिलप्रदेशेप्रवर्तमानदेव दत्तवत्सृष्ट्यादौगुणपंकेप्रवृत्तस्यतत्कृतलेपःस्यात् सचानुपपन्नोऽसंगोह्ययंपुरुषइतिश्रुतेरितितत्राह यथेति यथानभस्यभ्रतमःप्रकाशाआगमापायिनःअनुक्रमेणभवंतिच नतावताकाशस्यतत्संबंधले पोस्ति एवंपरेऽसंगेब्रह्मणिरजस्तमःसत्त्वमित्यमूःशक्तयोभवंतितदेकाधीनत्वात् शक्तिशब्दवाच्याः इत्ययंगुणप्रवाहोनतस्मिन्विशेषमापादयतीत्येतत्तुशब्दादवगंतव्यं ननुशक्तीनांमिथ्यात्वात्ज्ञ प्तिप्रकाशापितुंनैपुण्याभावात्ब्रह्मणिलेपाभावइत्यतोवाह इतीति अयंसत्यइतिशेषः एतदभिप्रायेणप्रवाहइत्युक्तं यथाग्निर्मतिष्ठंभनसमर्थस्यापितत्प्रयुक्तदाहदुःखाभावोनतत्वमेर्मिथ्यात्वादेवंब्रह्मणो लेपकत्वशक्तिरपिद्रव्याणांभगवदधीनेतिविशेषंतुशब्दोवक्तीतिवा १७

SGDF Sri Gurgaswamy Digital Foundation

मथितार्थमाह तेनेति यतएवंप्रवृत्तिमत्स्वेपितत्कृतदोषलेपाभावस्तेनविष्णुरेकएवपूर्णोनत्वन्यइतिलक्षणात्मैकइतिभावेनएतामितःप्रत्योभिसंभवितास्मीतितिबुद्ध्वापरमात्मानंभजध्वमित्यन्वयःपूर्णोविष्णुःस
एवैकइतिभावोयईरितः । आत्मैकभावइतितंविदुर्ब्रह्मात्मदर्शिनइतिवचनादात्मैकभावेनेतिनैक्यमुच्यते एकमेवाद्वितीयमात्मानमेवलोकमुपासीत प्रधानादिदमुत्पन्नमित्यादिश्रुतिः सप्रमाणीक
र्तुमेकमित्यादीनिविशेषणानिबोद्धव्यानि १८ इत्थंभावांतरमाह निरस्तेति भक्तानांनिरस्तौसंकल्पविकल्पौयेनसतथा हरिप्रसादमंतरेणतौनिरस्तौनस्यातांपुंसामित्यर्थः तमद्वयंद्वितीयसमर
हितं संकल्पश्चविकल्पश्चकृतेविष्णुप्रसादतः । नैवसंभवतोविष्णोःसमाभावात्तुसोद्वयइतिवचनंचात्रमानं द्वयस्यपंचविधस्यभेदस्यापवादः कुतर्कैर्निरासस्तमुपरमंतिनकुर्वंतीतितेद्वयापवादोपरमा
स्तेषूपलंभनंदर्शनंयस्यसतथातंच नआदिमध्यांतायस्यसतथातमजस्रनिर्वृतिंनित्यानंदंसंज्ञप्तिमात्रंविज्ञानघनइत्युक्तेःयादृशेनदर्शनेननिरस्तसंकल्पादिगुणविशेषाः तादृशेनतानुपसंहृत्यभजतेत्यन्वयः
१९ साधनांतरंचाह दययेति येनकेनचिच्छास्त्रविहितेनलब्धेनान्नपानादिनासंतुष्टयालंबुद्ध्या २० ननुबहुजन्मचीर्णसुकृतानंत्येनप्रसाद्यसकृद्भिभातंयदिपश्चात्तितिपक्षेबहुक्लेशेनसाधनानुष्ठानं
व्यर्थंपारदसाधनवदितितत्राह अपगतेति अपगतादूरतोनिरस्ताःसमस्ताःसकलाईषणाःपुत्रवित्तादिकामायस्मात्सतथा अतएवामलश्चात्माअपगतसकलेषणामलात्मातस्मिन्नेवंविशुद्धांतःक
रणेनिरंतरमेधितयाभावनयाभक्त्या आहूतइवागत्यात्मानंप्रकाश्यसन्निहितोहरिःश्रीनारायणः सतांहृदयान्नसरतिनगच्छतिनतिरोभवति तत्रहेतुमाह निजेति स्वभक्तवशगतत्वंमाप्तवानितियत्त

तेनैकमात्मानमशेषदेहिनांकालंप्रधानंपुरुषंपरेशम् ॥ स्वतेजसाध्वस्तगुणप्रवाहमात्मैकभावेनभजध्वमद्धा १८ निरस्तसंकल्पविकल्पमद्वयंद्वयाप
वादोपरमोपलंभनम् ॥ अनादिमध्यांतमजस्रनिर्वृतिंसंज्ञप्तिमात्रंभजतामुयादृशा १९ दययासर्वभूतेषुसंतुष्ट्यायेनकेनवा ॥ सर्वेंद्रियोपशांत्याचतुष्य
त्याशुजनार्दनः २० अपगतसकलेषणामलात्मन्यविरतमेधितभावनोपहूतः ॥ निजजनवशगत्वमात्मवान्योनसरतिछिद्रवदक्षरःसतांहि २१ नभजतिकु
मनीषिणांसइज्यांहरिरधनात्मधनप्रियोरसज्ञः ॥ श्रुतधनकुलकर्मणांमदैर्येविदधतिपापमकिंचनेषुसत्सु २२ श्रियमनुचरतींतदर्थिनश्चद्विपदपतीन्विवि
बुधांश्चयःस्वपूर्णः ॥ नभजतिनिजभृत्यवर्गतंत्रःकथममुमुद्विसृजेत्पुमान्रसज्ञः २३

स्माच्छिद्रवदाकाशवदेतन्निदर्शनकथनेनव्याप्तस्याभिव्यक्तिरेवविवक्षितेतिध्वनयति । पूर्वदेशवियोगलक्षणक्रियोत्तरदेशसंयोगसंभवात् व्याप्तिभंगापत्तेरिति नक्षरतिनस्रवतीत्यक्षरशब्दनिरुक्त्या
चभक्तजनहृदयान्नापगच्छतीतिभावेनोक्तमक्षरइति हिशब्देनहरेर्ज्ञानिप्रियत्वंमानसिद्धमितिस्मारयति ज्ञानीत्वात्मैवमेमतइति २१ व्यतिरेकमाह नभजतीति आकिंचनेषुमदहेतुधनरहितेषुसत्सुश्रुत
धनकुलकर्मणांमदैश्चयेपापमपराधंविदधति सहरिस्तेषांकुमनीषिणांपुंसामिज्यांयागादिपूजांनभजतिस्वीकृत्यफलंनददातीत्यन्वयः कीदृशोहरिरधनाहिरण्यादिधनरहिताश्चातएवात्मधनाश्चाधनात्मध
नास्तएवप्रियायस्यसतथा तेषांप्रियोवा अस्मिन्नर्थेइदंप्रमाणं प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियइतिच प्रियत्वेनिमित्तमाह रसज्ञइति भक्तैःक्रियमाणंरसमनुरागंभक्तिंजानातीतिरसज्ञः रसो
रागेविषेवीर्येइतियादवः रागोनुरागेलाक्षादावितिच श्रुतंचधनंचकुलंचकर्माणिचतानितथातेषांमदैर्बुद्धिभ्रंशहेतुवृत्तिविशेषैः २२ अस्मिन्नर्थेर्थवादंप्रमाणयति श्रियमिति द्विपदपतीन्मनुष्य
प्रधानान्तदर्थिनःश्रीप्रसादप्रार्थनाशीलान् स्वपूर्णइत्ययंतदपेक्षामंतरेणस्वापेक्षाभावेहेतुः निजभृत्यवर्गतंत्रइतिजयस्तंभप्रकटनार्थः अन्यथालक्ष्म्यादीनामभक्तत्वेनपृथक्करणंप्रसज्येत नचतद्युक्तं
निजवनेतुलसीभिरीशमभ्यर्चतीतिलक्ष्म्याअपिमायापदलांतरभावेपिसुखात्मकभक्त्यातत्पूजाविधानात् उद्विसृजेत् उद्विग्नोभूत्वात्यजतीत्यर्थः २३

SGDF

भवत्पूर्वजाःसर्वेपिभगवद्भक्तास्तत्रध्रुवोविशेषभक्तइति तद्भक्तिफलंकिंचिद्विशिनष्टि भवतामिति चित्ररथइतिध्रुवस्यनामांतरं भगवत्प्रसादपात्रत्वेकोपिचित्ररथानुगः । यस्यप्रियश्रवाःकृष्णस्स्वात्मा
नमपिदत्तवानितिविष्णुपुराणोक्तेः रथगतावितिधातोः चित्राआश्चर्यभूतागतिर्यस्यसइतिवा चित्रवन्नानावर्णोरथोयस्यसइतिवा स्वमात्मानंराजयतीतिस्वराट् राजांतरवर्जितश्चक्रवर्तीत्यर्थः गु
रोःपितुर्दाराभार्याशब्दवाच्याः २४ स्त्रैणंस्त्रीजितंपितरंपूजास्पदं २५ सर्वेषांवैमानिकानांधिष्ण्येभ्यःस्थानेभ्यःपरमुत्तमं उत्तमत्वेकारणमाह मायेति मायेनसर्वोत्तमेनविष्णुनाऽधिष्ठितंसंन्निधाय
स्थितं अनिर्वाच्यमायाकल्पितमित्यंगीकारे सर्वोत्तमत्वाद्विष्णुर्हिमायइत्येवशब्दितइतिस्मृतिविरोधःस्यात् तस्मिन्पक्षेमायाकल्पितमित्येवस्यान्नत्वधिष्ठितमिति मुनयोनृपाश्चार्वाक्स्थिताऽउदी
क्षंतेपरंनापुरित्यत्रदेवानुत्तममुनीन्विनानुसंधेयं देवानत्युत्तममुनीन्विनाकेशैशुमारकं । हरेर्देहंप्रविष्टास्तुध्रुवोदेवाश्चतद्गताइतिवचनात् अनेनापिमायाधिष्ठितमित्यत्रपुल्लिंगएवमायाशब्दोत्रविवक्षितो
नतुमायेत्याबंतः २६ उपसंहरति तमिति यस्यानुग्रहात् ध्रुवोत्युत्तमस्थानमाप तमीश्वरं २७ प्रचेतसामुक्तैवकथाकथितानारदेनकिमन्याश्चकथाउक्ताःसंतीतितत्राह इतीति २८ यचेतत्क

भवतांवंशधुर्योभूद्ध्रुवश्चित्ररथःस्वराट् ॥ गुरुदारवचोबाणैर्निर्भिन्नहृदयोर्भकः २४ त्यक्त्वास्त्रैणंचतंगच्छन्नृदृष्टोमेपथ्युदारधीः ॥ पंचवर्षोमदादेशैःसंराध्यपु
रुषेश्वरम् २५ तत्परंसर्वधिष्ण्येभ्योमायाधिष्ठितमारुहत् ॥ मुनयोद्याप्युदीक्षंतेपरंनापुरवाङ्मुखाः २६ तंयूयंसर्वभूतानामंतर्यामिणमीश्वरम् ॥
रुद्रादिष्टोपदेशेनभजध्वंभवनुत्तये २७ ॥ मैत्रेयउवाच ॥ इतिप्रचेतसांराजन्नन्याश्चभगवत्कथाः ॥ श्रावयित्वाब्रह्मलोकंययौस्वायंभुवोमुनिः २८ तेपि
तन्मुखनिर्यातंयशोलोकमलापहम् ॥ हरेर्निशम्यतत्पादंध्यायंतस्तद्गतिंययुः २९ एतत्तेभिहितंक्षत्तर्यन्मांत्वंपरिपृष्टवान् ॥ प्रचेतसांनारदस्यसंवादंह
रिकीर्तनम् ३० यएषउत्तानपदोमानवस्यानुवर्णितः ॥ वंशंप्रियव्रतस्यापिनिबोधनृपसत्तम ३१ योनारदात्मविद्यामधिगम्यपुनर्महीम् ॥ भुक्त्वाविभज्यपु
त्रेभ्यऐश्वरंसमगात्पदम् ३२ इत्थंतुकौषारविणोपवर्णितांक्षत्तानिशम्याजितपादसत्कथाम् ॥ प्रवृद्धभावाश्रुकलाकुलोमुनेर्दधारमूर्ध्नाचरणंहृदाहरेः ३३
॥ विदुरउवाच ॥ सोयंमममहायोगिन्भवताकरुणात्मना ॥ दर्शितस्तमसःपारोयत्राकिंचनगोहरिः ३४ ॥ श्रीशुकउवाच ॥ इत्यानम्यतमामंत्र्यवि
दुरोगजसाह्वयम् ॥ स्वानांदिदृक्षुःप्रययौज्ञातीनांनिर्वृताशयः ३५ एतद्यःशृणुयाद्राजन्राज्ञांहर्यर्पितात्मनाम् ॥ आयुर्धनंयशःस्वस्तिगतिमैश्वर्यमा
प्नुयात् ३६ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेपारमहंस्यांसंहितायामेकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ थितंप्रचेतसांमुक्तिप्रापकंस्यात्तर्हितदुपादेयंस्यात्तत्कथमित्या
शंक्यानेनैवापेक्षितगतिरभूत्तेषामित्याह तेपीति २९ हरेःकीर्तनंयत्रसतथा ३० अत्रशुकोवृत्तानुवर्णनपूर्वकमुत्तरकथांप्रतिजानीते यएषइति अनेनशुकेनोक्तमेवविदुरायोक्तंमैत्रेयेणेतिज्ञातव्यं ३१
श्रोतृजनतृप्त्यर्थंप्रियव्रतचरितंप्रस्तौति योनारदादिति ३२ मैत्रेयोक्तहरिकथाश्रवणेनविदुरेकोविशेषोभूदत्राह इत्थमिति नारायणोऽजितपदोवामनोमधुसूदनः श्रीधरःशंकराध्यक्षोब्रह्माध्यक्षोम
हानदइत्यभिधानं अजितस्यहरेःपादसत्कथांचरणविषयांकथांवाअजितपादानांहरेरंशभूतानांविशेषावेशवतांराज्ञांवामुनेःचरणंमूर्ध्निदधार हरेश्चरणंहृदा ३३ नतेरष्टांगत्वंद्योतयितुंमुनिंस्तौति सोयमि
ति यत्रतमसःपारेस्थितः ३४ स्तुत्वानत्वापुनः किमकार्षीदत्राह इतीति स्वानांज्ञातीनामितिकर्मणिषष्ठी निर्वृताशयइत्यनेनज्ञातव्यांशस्यपूर्तिंदर्शयति ३५ शुकएतस्यश्रोतुरैहिकामुष्मिकंफलमाह
एतद्यइति ३६ चतुर्थस्कंधोयंहरिचरितरत्नावलिनिधिःकथंचिद्व्याख्यातोहारिगुरुमहानुग्रहबलात् । महांतःप्रीयंतामनुगुणसुलुब्धाःशुचिधियःसहंतांचावद्यंममविवृतिमार्गेस्खलनतः १ सुमनःसुमनोमौ
लौलसंतीमुरभिद्गले । पदरत्नावलिर्नामवनमालेवरोचतां २ इतिश्रीमन्महेंद्रतीर्थपूज्यपादशिष्यविजयध्वजभट्टारककृतौ श्रीमद्भागवतटीकायांपदरत्नावल्यांचतुर्थस्कंधेएकत्रिंशोऽध्यायः ३१

SGDF ... Digital Foundation

SGDF

॥ इति श्रीमद्भागवते चतुर्थस्कंधः समाप्तः ॥

SGDF
Sri Gargeshwari Digital Foundation